Chapter-2

भारतचन्द्रकाव्यस्य
साहित्य दृष्ट्या समीक्षणे
द्वितीय खण्डम्

चम्पूभारतस्यवर्ण्यविषयाः तत्प्रयुक्तारसभावादयः गुणालंकारादयश्च

(१) कवेः श्रीगणपतिकर्तृक-कल्याणाशीर्वादः

चम्पूभारते सर्वतः प्राक् वक्तृश्रोतृणां मङ्गलमाशासानेन कविना भगवान् गणपतिरस्तूयत, यथा -

"कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वातोत्कूराजिहीर्षादरविवृतफणाशृङ्खभूषाभुजङ्गम् ।।१।१

अत्र भगवद्गणपतिकर्तृक-प्रस्तुतग्रन्थवक्तृश्रोतृजनसम्बन्धिकल्याणकर्मकविधानाशीर्वचनरूपप्रधानवाक्यार्थेन ग्रन्थकारगतभगवन्माहात्म्यज्ञानेन तद्गतैव भगवद्विषया रतिः प्रतीयते । मदधुनीप्रभवत्वेन करयोः शैलविशालत्वंप्रतीयते, तेन उपमालंकारध्वनिः। मदधुनीखेलल्लोलम्बकोलाहलेन च दिक्चक्रवालान्तरालानां मुखरितत्वात् मदधुनीनां दिगन्तव्याप्तत्वं ध्वन्यते, साधनभूताभ्यां चाभ्यां ध्वनिभ्यां साध्यभूतं भगवन्माहात्म्यं ध्वन्यते तेन अनुमानालंकार(१) - ध्वनिः ।भूषाभुजङ्गानां च कर्णतालव्यापारेवातोत्कूराहारदानेन भगवतो भक्तजनमनोरथपूरकत्वं ध्वन्यते वस्तुलंकारध्वनिभ्यां चाऽभ्यां प्रत्नवेतण्डरत्नस्य-इतरवेतण्डेभ्यः कोऽपि महान् उत्कर्षः प्रतीयते, तेन व्यतिरेकालंकारध्वनिः(२)

---

१ अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ।काव्यप्रकाशे । १०।१० ।

२ व्यतिरेकलक्षणमपि तत्रैव -
"उपमानाद्यदन्यस्य व्यतिरेकः स एव सः" ।१०५।१० ।

तस्यकविगतभगवन्माहात्म्यज्ञानपोषणद्वारातद्गतायाः एव भगवद्विषयायाः रत्याः पोषणेनाङ्गता । कटमर्दे धुनीरूपतायाः कल्लोलमालारूपेण प्रवहत्तास्य तत्सौरभलोभिलोलम्बकोलाहलैर्दिक्चक्रवालान्तरालानां मुखरितत्वस्यचाऽसम्बन्धेऽपितत्सम्बन्धोत्प्या सम्बन्धाऽतिशयोक्तयस्तिस्रोऽर्थालंकाराः - अपि भगवन्माहात्म्यपोषकत्वेन तद्विषयकरतिभावस्यैवाङ्गानि । वेतण्डरत्नस्य विकटरूपत्वात् तद्वर्णनपरा गौडीरीत्यनुसारि दीर्घसमास बहुला परुषाख्य (३)वृत्यनुरूपसंयुक्तपरुषवर्णघटिता पदावली ओजोगुणाव्यञ्जकत्वेनतदनुरूपैव । एवं ककाररकारलकाराणामसकृदावृत्या,वृत्यनुप्रासाः(४)तकारनकारयोर्गकारमकारयोश्च सकृदावृत्या छेकानुप्रासा(५) अपिविकटार्थाऽनुरूपत्वात् तदुत्कर्षका एव शब्दालंकाराः । विकटंवृन्धराच्छन्दोऽपिविकटार्थाऽनुकूलमेव । एवं वस्त्वलंकारध्वनिभ्यां पोषितेन शब्दार्थालंकारैश्चोपस्कृतेन व्यङ्ग्यरतिभावेन च मंगुलपद्यं मनोहरतरमेव ।

(२) कुरुराजधानी

चम्पूभारते प्रथमस्तबके मंगलाचरणानन्तरं कुरुराजधान्याः हस्तिनापुर्याः वर्णनं रुचिरतयाकृतमस्ति सर्वतःप्राक् पद्यैर्गद्येन च । तत्र पद्यानि गद्यं च पृथक् पृथक् समीक्ष्यन्ते यथा -

---

३ परुषावृत्ति लक्षणमपि तत्रैव-
ओजः प्रकाशकैस्तैस्तु परुषा ।८०।६ का.प्र. ।

४ वृत्यनुप्रासलक्षणमपि तत्रैव -
'एकस्याऽप्यसकृत् पदः (वृत्यनुप्रासः) ।७६-६ का. प्र. ।

५ 'छेकानुप्रासलक्षणमपि तत्रैव -
'एकस्य सोऽनेकस्य सकृत् पूर्वः (छेकानुप्रासः) ६६।६।का. प्र. ।

[1] तुहिनकिरणवंशस्थूलमुक्ताफलानां
विपुलभुजविराजद्धीरलक्ष्मीविभूम्राम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या
रिपुजनदुरवापा राजधानी कुरूणाम् ।१।२।।

अत्र कुलवेणूभयवाचकस्य वंश शब्दगतश्लेष(१) मूलकं कुरुष्वमुक्ताफलारोपरूपं श्लिष्टपरम्परितरूपकम्(२), विपुलभुजेत्यादिपदबोध्य वीररसस्य-कुरुनृपवर्णनाङ्गत्वाद् गुणीभूतव्यङ्ग्यम्(३) रसवदलंकारो(४) वा कुरुनृपाणामुत्कर्षं द्योतयन्ति । महापुरुषवर्णनस्य वस्तुसंपद्वर्णनस्य च पुरीवर्णनाङ्गत्वादुदात्तालंकारः (५) पुर्याः सुरपुरश्रीहसनेन व्यतिरेकालंकारश्च पुर्या लोकोत्तरवैभवशालित्वं व्यञ्जयतः । रकारलकारवृत्त्यनुप्रासः सकारनकारच्छेकानुप्रासश्च पद्यस्य कामपिच्छायां पुष्यतः ।

[2] यस्यामुदग्रनृपमन्दिरचन्द्रशाला-
वातायने गतिवशाद्वपुषि प्रसक्ताम् ।

---

१ वाच्यभेदेनभिन्ना यद् युगपद् भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः श्लेषोऽसौ ।का०।प्र०।उ०।१०।८ ।।

२ नियतारोपणोपायः स्यादारोपः परस्य यत् ।
तत् परम्परितम् ।।का०प्र०उ०।१०।९५

३ व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिः संज्ञितकाव्यप्रकारः,गुणभावे तु गुणीभूतव्यङ्ग्यता ।ध्वन्यालोके ।उ०।३।४२ वृत्तौ ।।

४ प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ।ध्वन्यालोके। ।उ०।का०२७।
रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।।९५ का०
गुणीभूतत्वमायान्ति यदाऽलंकृतयस्तदा ।।
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ।सा०द०।१०।९६ ।

५ उदात्तं वस्तुतः संपन्महतां चोपलक्षणम् ।काव्यप्रकाशे ।उ०।१०।११५ ।

दीपाग्रधूममषिकां शिशिरांशुबिम्बे
मोहात्कुरङ्ग इति मुग्धजना वदन्ति ।।१।३।।

अत्र चन्द्रबिम्बस्य नगरी वातायनप्रवेश सम्बन्धाभावेऽपि तत्सम्बन्ध वर्णनात् सम्बन्धातिशयोक्तिः (१) कुरङ्गापह्नुति (२) श्चकुरङ्गाग्रिमशब्देन-संकीर्णा नगर्या उत्तुङ्गनिकेतत्वं ध्वन्यते । मकारशकाराद्यनुप्रासाश्रपि रमणीयक या एव ।

ग्रीष्मेषु शीतकरकान्तकृतोदरासु
यद्गोपुराग्रिममदरीषु पथागतस्य ।
विश्राम्यतो हरिहयस्यविलम्बनेषु
चिन्हं तदीय दिनसंततिदीर्घभावः ।।१।४।।

अत्र गोपुराग्रिमदरीणां चन्द्रकान्तमणि बद्धत्वेनसम्पदुत्कर्ष वर्णनादुदात्तालंकारः तेन गोपुर्या रमणीयत्वं ध्वन्यते । पुरीगोपुराऽग्रिमदरीषु हरिहयविश्रामस्य सम्बन्धाभावेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः,तेन-नगर्या उन्नतत्वं द्योत्यते । दिनदीर्घत्वेन हरिहय विश्रामाऽनुमानादनुमानालंकारः तेनाऽपि नगर्या तुङ्गत्वं द्योत्यते । ककाररकारदकारादिकैकवृत्त्यनुप्रासावपि काव्यभिख्यां पुष्यतः।

यत्राङ्गनावदनयामवतीशहृष्य
च्चन्द्राश्मसौधगलितः सलिलप्रवाहः ।
वृन्दारकेन्द्रनगरीबृहत्सखाय
मन्दाकिनीतिलभते महतीमभिख्याम् ।।१।५।।

---

१ अतिशयोक्तिभेदाः साहित्यदर्पणे यथा -
भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ ।
कार्यकारणयोः पौर्वापर्ये सा पञ्चधा मता ।४७ ।१० ।।

२अपह्नुतिलक्षणं यथा -
प्रकृतं प्रतिषिध्याऽन्यत्स्थापनं स्यादपह्नुतिः ।३६।१० । सा०द०।

अत्र वदनस्य चन्द्रकेप्रणाग्रुनानां सौन्दर्यातिशयो व्यज्यते । चन्द्राश्मनां सलिलप्रवाहप्रभवत्वाऽसम्बन्धेऽपितत्सम्बन्धोक्ति रूपयाऽतिशयोक्त्या-सौधानां चन्द्राश्मबद्धत्वेन सम्पदुत्कर्षाविक्लप्तेनोदात्तालंकारेण मन्दाकिन्यप हनुत्या च नगर्यां वैभवातिशयो व्यज्यते । नकार मकार लकाराद्यनुप्रासच्छ्क--टाऽपि रुचिरतरा ।

" दीप्रैरगारमणिभिर्दिवसायमानां
निश्चिन्वते मनसि यत्र निशां युवानः ।
कातर्यान्तिकैरखिलकालनिवेदनाय
घण्टामणेरभिहस्तितस्य घनारवेण ।१।६।।

अत्र भवनानां मणिबद्धत्वेन उदात्तालंकारः तस्य कविगत सादृश्य-ज्ञान रूपोपमायामर्ग्रुता तस्याश्च निशाविषयक युवजनगत दिवस प्रकारक भ्रान्त्यामर्ग्रुता(१), तस्याश्च घण्टामणिघनारवहेतुक निशाऽनुमानालंकारेर्ग्रुता। स्वमर्ग्रुतांग्रुत्वेन संकीर्णैरलंकारैर्नगर्यां वैभवाऽतिशयो द्योत्यते । दकार वकार नकारादीनामनुप्रासोऽपि रमणीयः ।

" वक्त्रं विलासमणिदर्पणे धार्यमाणां
वामाहिमांशुरयमित्यवधार्य यस्याम् ।
आदर्शबिम्बधृतिरक्षतदृष्टपूर्वा
तस्येति तादृशाधियं विनिवर्तयन्ति ।१।७।।

अत्र वदन विषयक हिमांशुत्वभ्रान्त्या आदर्श शब्दगतश्लेषमूलका-भेदाऽतिशयोक्त्या च आदर्श बिम्बधृतिश्रवण दर्शनाभावहेतुकेन वदनस्य हिमां शुत्वाभावाऽनुमानालंकारेण, वामानां सौन्दर्यातिशयो ध्वन्यते । वकार-मकार णकार यकारादीनामसकृदावृत्या वृत्त्यनुप्रासोऽपि रुचिरस्तदनुकूल--एव ।

---

१ साम्यादतस्मिंस्तद् बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः ।सा०द०।प०।१०।३६

"आलापकालसमपल्लवितांकुवीणा-
सौरभ्यमातिमधुपारवसंकुलस्य ।
तन्त्रीस्वनस्य समितौ तरुणीस्वरस्य
जानाति यत्र चतुरोऽपि न तारतम्यम् ।१।८ ।।

अत्र सौरभ्येणतरुण्याः पङ्क्तिनीत्वध्वनि । तन्त्रीतरुणीस्वनयो-स्तारतम्याऽज्ञानात् सामान्यालंकारो(१)ऽपि नायिकोत्कर्षकत्वेन ध्वन्यङ्ग-मेव । लकार रकार तकारादीनां वृत्त्यनुप्रासोऽपि रुचिरो माधुर्यगुणानुकू ल एव ।

"चित्रं दिदर्शयिषुणा जनितस्य यस्यां
मध्यं विनैव विधिना महिलाजनस्य ।
अङ्गं नितम्बजघनादि यतो यतोऽध-
स्तुङ्गं कुचाद्युपरि याति ततोऽनुकूलम् ।१।१०।।

अत्रविधेश्चित्र दिदर्शयिषाया अभावेऽपि तदुक्ति रूपयाऽसम्बन्धाति-शयोक्त्या महिलाजनस्य मध्यभागसम्बन्धेऽपि तदभावोक्तिरूपयाऽसंम्बन्धाऽति-शयोक्त्या तस्य नितम्बजघनादिनीचैस्तनाङ्गानुकूलमेव उच्चैस्तन कुचाद्यङ्गस्य तदु पर्युपरियानेन मध्याभावोपपादनात् काव्यलिङ्गेन(२) च महिलाजनस्य सौन्दर्यो-त्तिशयो ध्वन्यते । दकार नकार तकाराद्यनुप्रासोऽपि तदनुरूप एव, माधुर्यगु णाऽनुरूपश्च ।

"पंकेरुहाणि परिखासवतीर्य यस्यां
प्राकारभित्तिमभितः परिवेष्टयन्ति ।
अन्तः स्थितिं विदधतामबलाजनाना-
मास्यानि जेतुमखिलानि किलात्ममासा ।१।११।।

---

१ हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गम्।१०।६३।सा०दर्पणे ।

२- विशेषणैर्यत्तु साकूतैरुक्तिः परिकरस्तुसः ।१०।११८।काव्यप्रकाशे ।

अत्र अबला शब्दस्य अबलाजनास्यानामनायायासेन जेतुं शक्यत्वाऽभिप्राय गर्भित्वात् परिकरालंकारः(१), तस्य च - पक्केरुहाणां प्राकारमिति परिवेष्टनस्य अबलाजनास्य जयप्रलकत्वोत्प्रेक्षा(२)गुता । तया च नगर्यां बाहयशोभावर्णनमुत्कृष्यते । रकार-तकार-नकारादीनामसकृदावृत्या वृत्त्यनुप्रासच्छटाऽपि रमणीया, माधुर्यगुणाऽनुरूपा च ।

एवं वैभवं सौन्दर्यं च रुचिरमधुरैः पदैर्वर्णयित्वा कविस्तस्याः नतोन्नतत्वं वर्णयति गद्येन प्रौढेन यथा -

"या खलु पुरा कुरुधराधिपापराधसमेधितक्रोधेन हलधरेण निजायुधेन हठात्कर्षणाशिथिलायां समुत्खातपदविन्यासक्षितिभागा तदीयभुवनभूषणायमानां भोगवतीमात्मना विजेतुं किल भागीरथीपाथः पथेनावतीर्य कृतप्रस्थानेवाद्यापि परिदृश्यते ।"

अत्र क्रुद्धस्य हलधरस्य तद्व्यापारस्य अस्तव्यस्तायाश्च पुर्या वर्णने च ओजोगुणानुरूपा(३) । संयुक्तपरुषाक्षरपरिपूर्णा प्रौढा रचना, भोगवत्याश्च सुस्थिररुचिराया वर्णने माधुर्यगुणाऽ(४)नुरूपा ललितमधुरवर्णपरिपूर्णा रचना, पुनस्तज्जयसंरम्भवत्या हस्तिना पुर्यावर्णने ओजोगुणाऽनुरूपा संयुक्तपरुषाक्षरोपध्मानीयघटिता रचना कामपि चमत्कृतिमुत्पादयति। हस्तिनापुर्यां स्वापकर्षकहलधरनगरीजयफलकप्रस्थानोत्प्रेक्षा(५) चमत्कारिणी।

एवं रुचिरतरमेव व्यधायितवर्णनं कविना राजधान्याः हस्तिनापुर्याः ।

---

१ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तुसः ।१०।११८।काव्यप्रकाशे उ०।

२- संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।१०।९२।काव्यप्रकाशे उ०।

३ योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः ।

टादिः शषौ वृत्तिर्दैर्घ्यं गुम्फ उद्धत ओजसि ॥ १०।७५ काव्यप्रकाशे उ०।

४ मूर्धन्यवर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।

अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ।१०७४। काव्यप्रकाशे उ० ।

(३) पाण्डुराजः

पाण्डुर्विचित्रवीर्यस्य कुरुवंशिनोनृपस्य पुत्रः तस्मिन् दिवंगते भूवलयस्याऽराजकत्वं कृतं दस्युस्तेनादि भयमाशंक्य तन्मात्रा सत्यवत्या आज्ञप्तेन भगवता व्यासेन स्वभ्रातृवध्वामम्बालिकायामुत्पादितः युधिष्ठिरादीनां पिता महान् वीरः परमोधार्मिकः प्रजावत्सलः प्रशासनादिनैपुण्य प्रभृतिगुणैः-परितः प्रसृमर-पृथुलसुयशा आसीत् । अस्तिनापुरी च तस्य राजधानी अभवत् । तदिदं कविना अतीव कौशलेन वर्णितमस्ति ।

वीररसवर्णनम्

वीरोरसश्चोत्साहस्थायिको निवेश्यते तत्र तत्र । यथा -

" उपेत्य तां पाण्डु रुदार विक्रमः
प्रजामनः पल्लवयन् प्रशासनात् ।
यशः प्रकाशैर्यमुना सखी सखै-
र्निनाय लोकं निजनाम वाच्यताम् ।१।१२।।

अत्रानुप्रास शब्दालंकारेण सह उपमायामाण्डुप्रशसा लोकानां पाण्डुत्वस्य तन्नामवाच्यता रूपप्रकारान्तरेण कथनात्तद्गुण(१) पर्यायोक्ता (२)ऽलंकाराभ्यां कापिविच्छित्तिराविष्कृता कविना । विक्रमप्रशासनादिना यशः प्रकाशने नोत्साहे व्यज्यमानेऽनुगुणतैव शब्दालंकाराणाम् ।यथा च -

---

१ तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।१४१।कुवलयानन्दे कारिका।

२ पर्यायोक्तं तु ~~वर्ण्यैकजन्यलक्षकवचनकलापेऽन्य~~ गम्यस्य वचो भङ्ग्यन्तराश्रयम्।
कुवलयानन्द का० ६८

"चित्रं चरित्रं जगतीतलेऽस्य
न श्लाघयामास नरेषु को वा ।
स यत्स्वयं पाण्डुरपि स्वकेन
गुणेन रक्तानकरोत्समस्तान् ।१।१३।।

पाण्डोः प्रजारञ्जकत्वं वर्णयता त्र कविना पाण्डुरक्तशब्दगतश्लेष मूलकेन पाण्डोरक्तत्वकरणरूपेण विषमालंकारेण(१) तद्गतोत्साह व्यञ्जने काऽपिविचित्रा कविरावर्भावितास्ति । यथा च -

"अनतर्भवत्कृष्णमृगाजिनाकैः
सुनिर्मलैः षोडशदानकीर्तैः ।
खण्डैरमुष्येन्दुरकारि धात्रा
मृषा यमद्वेरजनीति वार्ता ।१।१४।।

अत्राऽपि पाण्डोरर्थिजन मनोरथ पूरकत्वेनदानवीरत्वमपह्नुत्या-अतीव चमत्कारितयाऽवर्ण्यत कविना ।

पाण्डोः परराजनिग्राहकत्वं आसमुद्रपृथिवीपतित्वं च वर्णयता कविना सहैव कुन्तीमाद्रीपरिग्रह वार्ताऽपि संदोपेणावर्ण्यत । यथा-

"जग्राह निग्राहपरः परश्रियां
करैः करेणोरुचक्रमः ।
कुन्तीं शकुन्तेशरथो यथा रमां
समुद्र का काञ्चीं च स मद्रकन्यकाम् ।१।१५ ।।

अत्र यमक-छेकानुप्रासवृत्त्यनुप्रासाख्य शब्दालंकारैः सहोपमया संकीर्ण्यशत्रुनिग्रहदारपरिग्रहविषयकोत्साहं व्यञ्जयता कविना परा प्रौढिरावि ष्कृता । यथोक्तं -"प्रौढिर्व्यासेसमासौ च" ।

पुरा किल राजानः स्वविक्रम गुणमस्खलितं रिरक्षिषवः समरा नुद्यम काले वीरोचितां मृगया रुचिं गृह्णान्तिस्म । तदनुसारं पाण्डुरपि मृ गयां चिकीर्षन् हिमवद्गिरिपरिसरारण्य भूभागं पत्नी द्वयेन सहित एव ग-

---

१ विषमं वर्ण्यते यत्र घटनानतुरूपयोः ।८८। कुवलयानन्दे ।

च्छति स्म, पाण्डोर्मृगया सन्नाहः तद्द्वारा वीररसश्च कविना यमकानुप्रासोपमालंकारच्छविच्छुरितेनाऽति प्रौढेन गद्येना वर्ण्यते । यथा -

" अथ कदाचिन्मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेतरोचिषि विश्वातिशायिनि विजिन्नमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्भुभिरनेकवागुराद्युपकरणैर्यौधैरनुद्रुतो मृदुमद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणागणनीयमहिमवतो हिमवतो जगाहे महतीमटवीतटवीथिकाम् ।"

" तत्र स तावदतिदुल्लकवनमल्लिकामतल्लिकोद्वेल्लितघम्मिल्लोऽवलग्नदृढलग्नकच्छपुटविच्छुरितिच्छुरिको निर्घृणानुघृणांसलितमांसलितः परिनिरासनपरं शरासनवरं करे कुर्वाणो गीर्वाणचक्रवर्तिविक्रमः क्रमेण विविधमृगवधं विधातुमुपचक्रमे ।"

अत्र अश्वस्य शशिश्वेतत्वोक्त्या, उपमामातरिश्वजयोक्त्या च व्यतिरेकस्तस्योत्कर्षं व्यनक्ति । राज्ञो गीर्वाणचक्रवर्तितुल्य विक्रमोक्त्या उपमया कोऽपि महानुत्कर्षः प्रतीयते । प्रौढाकारघटित छेकवृत्त्यनुप्रासयमकानि-राज्ञो वीररसस्थायिन उत्साहस्य नितरामानुगुण्यमाचरन्ति ।

एवं मृगयासन्नाहं वर्णयित्वा मृगवराह महिष मार्तण्ड व्याघ्र सिंहानां वधसंरम्भे पाण्डोर्विक्रमलीलालक्ष्मीवर्णनं तद्द्वारा वीरस्थायिभावोत्साह परिपोषणं चापि अतीवरोचकं च शब्दार्थालंकारैश्चमत्कारकं च संपादितमस्ति कविना । यथा -

" भूभुजो स्य सविधे विचरन्त्यो-
भे भौजमद्रसुतयोर्दृशि शोभाम् ।
जेतुकामभिव सर्वसमष्ट्या प्राद्रुरास पुरतो मृगयूथम् ।१।१६।।

अत्र मृगयूथे राज्ञीद्वय नयनशोभा जयोत्प्रेक्षा छेकवृत्त्यनुप्रासाश्च महच्चमत्कुर्वन्ति ।यथा च -

" कोणी-पतौ मदकलं प्रति कृष्णसार्मे
तूणीमुखे पतित पाणिनवाङ्कुरेऽस्मिन् ।

रणीकुलानि तरलैर्यमुनाजलानां
वेणीमिवाद्रिवलनैर्विपिने वितेनुः ।१।१७।।

अत्रणीयमकस्य छेकवृत्त्यनुप्रासानां मृगदृष्टिषु यमुनाजलवेण्युत्प्रेक्षायाः काऽपि विच्छित्तिर्दीप्यते ।

"कुर्वन्ति यूनां कुरुते स्म भीतिं
गुरोः कुलस्याऽमृतदीधितेर्नः ।
सजातिरेषां तनुते कलङ्क-
मितीव रोषादिषुभिः स पाण्डुः ।१।१८ ।।

अत्राऽपि हेतूत्प्रेक्षा छेकवृत्त्यनुप्रासाश्च रुचिरा एव ।एवं अत्र मृगस्वभावोऽति रुचिरतया वर्णितः । तत्र यमकानुप्रास हेतूत्प्रेक्षायाश्च चमत्कृतिरत्र दर्शनीयैव ।

वराहलुलायादि वधे तेषां स्वभावेन सहपाण्डोर्हस्त लाघवम्, हय प्रधावनम्, खड्गभल्लादि शस्त्रचालन चातुर्यं चाऽपि वर्णितं कविना मनोरमतया।- यथा-

"प्रजवं हयं गमयते ततस्ततः
पतिता नृपाय शलकीशलालिकाः ।
गहने वनेऽपि पिशुनत्वमाचरन्
ग्रहणे वराहकुलवर्तनी भुवाम् ।१।१६।

अत्र वनस्यपिशुनोपलब्धिस्थानरूपकारणात्वाभावेऽपि तत्रैव पिशुनामुपलब्धिरिति(१) विभावना, शलकीशलालिकाभिर्वराहवासभूमीनामनुमानं, छेकवृत्त्यनुप्रासाश्चाऽत्र कामपि विच्छित्तिं जनयन्ति ।

"वेशन्तपक्वविहृतैर्विनिवृत्य सद्यः
प्रत्युद्गतां ध्वनिषु मत्सरिणां हयस्य ।
मुदार एष वनपौत्रवतामतानी-

---

१ विभावना विनापि स्यात् कारणं कार्यजन्म चेत् ।७७ कुवलयानन्दे ।

इभूदार शब्दमसहिष्णुरिवान्तमेषाम् ।१।२०।।

अत्र मूदारशब्दगत श्लेषस्य वराहगत मूदारशब्दासहिष्णुत्वोत्प्रेक्षायाश्च चमत्कृतिरपि कर्षति सहृदयजनहृदयम्। छेकवृत्त्यनुप्रासा अपि चमत्कारिण एव ।

तूर्णं प्रधाव्य तुरगं स्वमन्यतोऽसौ
पाण्डुः कुलं परिवारं लुलाययूनाम् ।
अग्रे विशालकघूननदुर्विधत्वात्
सत्यापितद्विरदभावविपर्ययाणाम् ।१।२१ ।।

अत्रऽपि छेकवृत्त्यनुप्रासानां महिषगतकराभावहेतुतद्विरदाभावस्य बोधादनुमानालंकारस्य च योजना चमत्कारिण्येव ।

आकर्ण्य क्षितिपहयारवानसह्या-
नामूलं कुपितधियस्तिरो विषाणम् ।
व्याधूयान्तिकतरुषु क्षणान्निचस्नु-
व्यक्रिष्टुं पुनरथ तच्चिरान्न शेकुः ।१।२२।।

अत्र कविना महिष स्वभाव चित्रणं तद्गताऽमर्षभावानुभाव वर्णनद्वाराऽतिमार्मिकतया कृतमस्ति । तत्र तरुभञ्जनरूपेष्टविरुद्धस्य वनमहिषाणां विषाणास्तं मनरूपानिष्टप्राप्त्या विषादनालंकारो(१) तीवानुगुण्यं प्राप्नोति ।

कुरुतेति ततः सहैव वासं
कुल कूटस्थ कृतान्त वाहनेन ।
मदधूतविषाण मण्डलाग्रे
महिषाधीप निवारवान मण्डलाग्रम् ।१।२३।।

अत्र वृत्त्यनुप्रास-यमक शब्दालंकारयोर्हेतूत्प्रेक्षायाश्च चमत्कृतिरपि रुचिरैव ।

तन्न चिमवनीपतेस्तत-
श्चन्द्रहास पतनं चकारयत् ।
पोषितेषु वनमध्यचर्यया

---

१ इष्यमाण विरुद्धार्थ संप्राप्तिः प्राप्तिस्तु विषादनम् ।१३२ ।। कुवलयानन्दे।

पुण्डरीक निवहेषु मीलनम् ।१।२४।।

अत्र वन पुण्डरीक- चन्द्रहास शब्दगतश्लेषमूलकाऽभेदाऽतिशयोक्ति निष्पादित समालंकारेण(१) चित्रत्वाभावोपपादकात्मक काव्यलिंगस्य चमत्कारो ऽरा जगतमृगयोत्साहं परिपोष्यैवस्थापस्थापति सहृदयेषु ।

" गहनमस्त शरारु मृगव्रजं
कृतवताऽप्यमुना जविवाजिना ।
ममृगिरे हरयो मदशालिनो
मनुजपेन गिरीशदरीशयाः ।१।२५।।

अत्र यमकानुप्रासाभ्यां रुचिरया रचनया नृपस्य गिरिदरीशयानां सिंहानामन्वेषणेन वीरस्थायिभावोत्साहोऽति रुचिरतयोपस्थाप्यते परिपोषितः।

~~केकवृत्ति~~

" विस्फारघोषमवकर्ण्य विनिर्गतानां
हुंकुर्वतां तरुणकेसरिणां गुहाभ्यः ।
या केवलं प्रथममानन एव मल्लै-
स्तां पर्वृतां स विदधे सकलेऽपि देहे ।१।२६।।

अत्र केसरिमृगया वर्णने पर्व्रुता शब्दगत श्लेषमूलकाऽभेदाऽतिशयोक्तिमूलकः पर्यायाऽलंकारो(२) व्यनक्त्यतिदीप्त्या पाण्डुगतमुत्साहम्, केकवृत्त्यनुप्रासाऽपि मनोहारिण एव ।

" एवमश्रान्तमृगया परिश्रान्तमपरिमितस्वेदशीकरनिकरकोरकित फालमूलमातेनिरे तमाश्यानं तुहिनगिरिदेश्या नन्दनीयमन्दिमानो मानसरोऽरविन्दमकरन्दसौरभपारदृश्वानो मातरिश्वानः ।"

---

१ समं योग्यतयायोगो यदि संभावितः क्वचित्। १०।१२५। काव्यप्रकाशे उ०।

२ एकं क्रमेणाऽनेकस्मिन् पर्यायोऽन्यस्ततोऽन्यथा । १०।११७ । काव्यप्रकाशे उ०।

अत्र मृगयोपसंहारे परिश्रान्तराजवर्णने केकवृत्त्यनुप्रायिमकैः काऽपि विच्छित्तिराविर्भाविता गद्यस्य ।

मुनिशापः

मृगया हि वीरसाऽनुभावः, तदनन्तरं वर्ण्यमानस्य शान्तस्य वीरेण-विरोधो मा भूत्, तदर्थं कविः राज्ञो मुनिशापं वर्णयति(१) यथा-

'तदनन्तरमसौ परन्तपः समन्ततः शकुन्तखनिरन्तरादखिल मृगश रण्या दरण्यादुत्पलवमानस्य कस्यचिदनुप्लवनमन्दीभूतजववमूरोश्चमूरोः सरणिमनु सरमाणस्तदीय तनूरुहचित्र बिन्दुनिकरैरिव गगनमुत्पतद्भिः खुरजोभिरनुमीयमा न तुङ्गगतिः सुदूरमुत्पपात ।'

'तत्र तावत्कस्मिंश्चिल्लतागुल्मपरिसरे स नरनाथः परिकथिततरुणिम-प्रथितकलेवरमशिथिलरतिसुखसनाथं हरिणमिथुनं नयनपथस्यातिथी चकार ।'

'तिग्मेन बाणेन जघान तस्मिन्युग्मे नराणामधिपः पुमांसम् ।
वातायुराकारमसौ महर्षेर्जातायुरन्तः सहसाऽऽललम्बे ।१।२७।'

'ततः कृपामन्दमनाः किंदमनामधेयः संदारिततनुस्यन्दमानरुधिरेण महाऽ रुक्षा कल्परविकल्पमहा रुषा तस्मिन्महीभृति संभोगसंभेदकम्भौजदृशां दम्भो लिमिव सहस्रादाः शापमुदस्त्रादीत् ।'

एवं केकवृत्त्यनुप्रासैर्यमकैरुत्प्रेक्षापर्यायोक्तोपमाभिश्चारुतरमवर्ण्यत रा ज्ञो मुनिशापः । मुनेः कल्परव्युपमया तत्सामर्थ्यातिशयः । ~~व्युत्पत्तिकल्प~~ शापस्य द म्भोलुपमया च सद्यः फलदत्वं ध्वन्यते । दर्शनस्य नयनपथातिथीकरणात्मकरूपा-~~न्तरेण~~ न्तरेण कथनात् पर्यायोक्तं स्पष्टमरुचिरं च ।

---

१ विरुद्धयोर्विरोधानिवृत्तये दर्शित उपायः काव्य क प्रकाशे -

'आश्रयैक्ये विरुद्धौ यः सकार्यौभिन्नसंश्रयः ।
रसान्तरेणान्तरितौ नैरन्तर्येण यो रसः ।।'

शान्तरसः

एवमन्तरालस्थापितेन मुनिशापेन निवृत्तविरोधः शान्तः सम्प्रति वर्ण्यते कविना राजगतः, यथा-

"तदनु तापसशापेन विरचितमनस्तापेन तेन भूपेन चतुरङ्गबलमिव सप्तार्णवं राज्यमपि व्यसृज्यत" ।

अत्र विषादध्वनिस्तदनुभावश्च सप्तार्णवराज्यत्यागो राजगतत्वेन यमकोपमानुप्रासैः सुष्ठु सुरुचिरमवर्ण्यत ।

"अष्टांगयोगानवतोऽस्य राज्ञो मिष्टान्नमासीन्मृदुकन्दमूलम् ।
गर्भो वनस्याजनि केलिसौधो दर्भोऽपि सिंहासनतां जगाहे ।१।२८।।"

एवं निर्वेदस्थायिकः शान्तरसः तापसचर्यानुभावेन धृतिमत्यादिव्यभिचारिभावैश्च साधुपरिपोषितो राजगतत्वेनाध्वकश्रमक्लान्तिकृन्न्यते, कन्दमूलादिषु मिष्टान्नाधारोपेण रूपकालंकारस्तत्रोपस्कारकत्वेनाऽनुगुण एव ।

तदनन्तरं राज्ञोऽपत्याभावजन्यविषादः तत्सम्बन्धी च कुन्त्या सह तत्संवादो वर्ण्यमानः शान्तेनविरुध्येत्तदर्थं द्वयोरन्तराले स्वकीयं विस्मयं "अहो" इत्यादिगद्येन "बाणै" इत्यादिपद्येन च निबध्नाति कविः

"अहो नरपतितापसयोः समानरूपं फलमिदमाचरितम्[१] तथा हि -

"बाणशापप्रयोगाभ्यां बाधितौ तावुभावपि ।
तपस्वितां यतः सद्यस्तादृशीमुपजग्मतुः ।१।२९।।

तपस्विशब्दगतश्लेषमूलिका मुनिशोच्योभयाऽभेदातिशयोक्तिः, उभयोस्तपस्वित्वप्राप्तिरूपा तुल्ययोगिता(१) च, तद्घटितवाक्यार्थस्य बाणशापप्रयोगात्मकभिन्नकारणाभ्यां समानरूपफलप्राप्तिकथनस्योपपादकत्वेन काव्यलिंगालंकारोऽप्यत्र चमत्कारक एव ।

---

१ वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता । ४४ । कुवलयानन्दे ।

पाण्डोः पुत्रप्राप्तिः

तापसशापेन निर्विण्णो पाण्डो शान्तरसो वर्णितः । सम्प्रति राज्ञः पुत्राऽभावं तत्परिणामादि विचारपरिपूरितमालापं देव्याकुन्त्या सह निबध्नाति कविः । यथा -

" अपाककरिष्यन्ननपत्यभावमपत्यभावं भुवनं करिष्यन् ।
उवाच देवीमुचितं स पाण्डुरुपह्वरे जातुचिदूहदक्षः ।।
परिपालयतोऽपि मे महीं परिपूर्तिर्न तनूजदुर्गतेः ।
प्रजया हि मनुष्य इत्यसौ प्रथते हि श्रुतिवर्णपद्धतिः ।।
गात्रं न केवलमशेषबुधोपलाल्यं
गोत्रं च तत्रभवतः कुमुदैकबन्धोः ।
आपाण्डु वर्तत इति स्फुटमध्वमन्ये
यस्मात्प्रजां न लभसे यदुवीरकन्ये ।। १।३०-३२ ।।

अत्राऽपत्यभावपत्यभाव करणयो विरोधः[1] (१) महीपालनरूप पुण्यकार्यकरणात्मक हेतौ सत्यपि पुत्राप्तिमनोरथपूर्तिरूपफलाभावस्य कथनेन विशेषोक्तिः[2] (२) विशेषोक्ति घटित वाक्यार्थस्य च " प्रजया हि मनुष्यः पूर्णः " इति श्रुत्युपन्यासेनोपपादनात् काव्यलिंगम् , कुमुदबन्धुशब्दात्र गोत्रयोरापाण्डु वर्तनोक्त्या तुल्ययोगिता, तुल्ययोगितायां च पाण्डुरपाण्डुराजावधिरूपार्थबोधकाऽऽपाण्डुपदगतश्लेषमूलकाभेदातिशयोक्तेरपि सत्ता, एवमर्थालंकारैश्च माधुर्यप्रसादाऽनुरूपैर्यमकानुप्रासैश्च-पाण्डुगतौन्यग्ध्वनिः सुतरामुत्कृष्यते । यथा च -

---

१ विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।१०।११०। काव्यप्रकाशे ।
२ विशेषोक्तिरखण्डेषु कारणेषु फलावचः । १०।१०८। काव्यप्रकाशे ।

" न ह्यतीव विधिरप्यसुतानां नह्यते फलमिति श्रुतिसिद्धेः ।
जीवतो मम यथाहवसाध्यो मीलतोऽपि न तथा परलोकः ।।
अहं किमम्बा किमभीष्टतापदे तवेति मातुर्धुरि तातपृच्छया ।
प्रलोमतुल्यं प्रवदन्तमर्भकं मुदा हसन्जिघ्रति मूर्ध्नि पुण्यभाक् ।।
निर्व्रते पितृभिस्तप्तैर्निरपत्यधनः पुमान् ।
अध्वनीनैरतिश्रान्तैरवकेशीव पादपः ।।
कदापि तातशब्दस्य कल्पभूमिरुहामिव ।
नार्थीभवितुमर्हामि नरवाहनसंनिभः ।।
किं भोगवैभवयशः क्षितिजीवितार्थै-
रम्भोरुहाक्षि ! नियमैरनघैस्त्वमेव ।
शापातिरेकदवपावकशायिनो मे
तापापनोदविषये तनयं प्रसूष्व ।।१। ३३-३७ ।।

अत्र विषाददैन्यभावौ साधु ध्वन्येते । " जातपुत्रोऽग्नीनादधीत " इत्यादिश्रुत्या सपुत्रस्य श्रौतस्मार्तकर्माधिकारकथनेन परलोकस्य आहवसाध्यत्वाभाव समर्थनात्मक काव्यलिंग[1] " आहव-परलोक " शब्दगतश्लेषस्यांगता, याचक- वाच्यभवनरूपार्थद्वयबोधके " अर्थीभवितुं " पदे श्लेषस्य राज्ञो नरवाहनोपमांगता, एवं संकरालंकारद्वयेन (१) राज्ञोऽकेकशिक व केशि सादृश्योक्ति रूपयोपमया च वृत्यनुप्रासयमकालंकारैश्च काऽपि ध्वन्यनुकूला विच्छित्तिराविष्क्रियते कविना ।

मुनिभक्तिः

एवं प्रजायै संतप्तां तदुत्पादनाय चोपाक्षायाचरणायाऽनुमतिं यच्छन्त्रं राजानंमुनिवरदानं तत्कारणभूतं समक्षि तदाराधनं च कथयन्त्या देव्याः कुन्त्याः मुनि सेवां तद्विषयां भक्तिं च साधु वर्णितवान् कविः ।तदुपक्रमो यथा -

---

१ अविश्रान्तिजुषामात्मन्यर्थानां क्रियत्वं तु संकरः । १०।१४०। काव्यप्रकाशे ।

'इत्यसकौ शोचतः पत्युरग्रभुवि कृकुरुक्ष समग्रमन्दाकारमणीयं मन्दाकारमणीयन्त्रितमिदं वचनं कथयामास ।'

राजन् ! खलु पुरारक्षमु पिता पितामहसमानस्य निशान्तमधिवसतः कृशां तनुलतां तपसा वहतोऽपि दिशां ततिषु निशान्तरविकान्तिभृशान्तर्ग्रुरुचां-तर्ग्रुपरम्परां तरलयतोऽशान्तमनसो मुनेरुपान्तपरिचरणायमानुशासितशैशवराज्यामपि नियोज्यामकरोत् ।'

कविना त्र रूपकोपमाविभावनापर्यायोक्तैश्च सह मुन्मीलितम् । तत्र - मन्दाकाराणामणि रूपकम्, मुनेः पितामहोपमा, मुनितनुरूवां रविकान्त्युपमा, मुनिकृशतनुलतया कान्तितर्ग्रु परम्परा प्रसारणोक्त्या अकारणात् कार्योत्पत्त्या विभावना(१) दुर्वाससः अशान्तमनोमुनि रूपेण बालायाश्च शैशवराज्यशासिका-रूपेण प्रकारान्तराभ्यां कथनात् पर्यायोक्तद्वयं च स्पष्टमेव । पितामहोपम्या मुनेः सेव्यत्वं व्यज्यते । अथ मुनि समाराधना वर्ण्यत , यथा -

'ततो नियोगान्समयेषु लब्धुं मया महायत्नजुषा महर्षेः ।
आरामवल्लीरपहाय तस्य भ्रूवल्लिमेवैव प्रतिपाल्य तस्थे ।।
यथा यथा सेवनयत्नजन्मना निदाघतोयेन निषिक्तमर्ग्रुकम् ।
तथा तथावर्धत तापसान्तिके महाविकासा मम भक्तिवल्लरी ।।
तपस्विनस्तस्य तपःकृशस्य सरूपतामाप्तुमिवाश्रयद्भिः ।
दिने दिने मे दयनीयरूपैरंगैरशेषैरतिकार्श्यमापे ।।
आपादनेन समिधामभिषेकवारा-
मभ्यर्चनासुमनसामपि तापसेन्द्रः ।
मय्येव शिष्यजनतामभितां वितन्वन्नन्तेवसन्तमपि कोपमपाचकार ।१।३८-४१

अत्र मुनिविषयको देवीकुन्तीगतोभक्तिभावः समित्कुसुमानयनादिभिरनुभावैः स्वेदकार्श्यादिभिः सात्त्विकभावैश्च साधुपरिपोषितः , तद्व्यञ्जक प्रसाद माधुर्यगुणानुसारिणामधुराक्षरघटितेन वृत्त्यनुप्रासेन रूपकादिभिरर्थालंकारैश्च सुत

---

१ विभावना विनाऽपि यस्मात् कारणं कार्यजन्मचेत् । कुवलयानन्दे ।कारिका७०

रां समुत्कर्षितः । तत्र भ्रुविवल्ल्यारोपाद् भक्तौ च वल्ल्यारोपाद् रूपकम्, आरामवल्ली- मुनिभ्रुवल्ल्योः सेवनक्रमोक्त्या पर्यायः(१) अङ्गानां कृशीभावे मुनिसरूपता प्राप्ति रूपकस्य वाच्योत्प्रेक्षा, मुनेः कोपदूरीकरणे कुन्त्यां सातिशयशिष्यभाववर्धनरूपफलोत्प्रेक्षा वाचकाभावत् प्रतीयमाना, एतस्यां च निकट वासि- शिष्योभय वाचकाऽन्तेवसन्तं-पदगत श्लेषाऽभेदातिशयोक्तेर्गुता, च सर्व मनोहरतरम् । कुन्त्या भक्ति परिणामं मुनिप्रसादं वर्णयता तु कविना मय्येव,इति पद्यार्धे निबद्धायाः प्रतीयमानफलोत्प्रेक्षायाः श्लेषस्य पर्यायस्य चाऽङ्गाङ्गि भावेन संकरः सुतरां चमत्कारकः कवेः परं प्रतिभाशालित्वं प्रकटयति । अग्रे मुनि प्रसाद फलं वर्णयति कविः । यथा -

'एकां समां तत्र वसन्कदाचिदेकां स मां पार्श्वगतामवेक्ष्य ।
समाधिवृत्या सह मौनमुद्रां समापयामास तपोधनेन्द्रः ।।१।४२ ।।

'वत्से ! भवत्सेवा संप्रदायेन सम्प्रति मृशं प्रसीदामि' इति व्याहृत्य समुनिरनुकम्पितचेता मह्यमत्यर्थममीप्सितार्थसमर्थापनपरतन्त्रं कमपि मन्त्रमुपादिक्षत्।

'अधुना तस्य प्रभावेण शतमखमुखासु निखिलासु लेखरेखासु ये ये पराध्यास्ते ते रहसि कृतसांनिध्याः स्वानुगुणगुणगणविभवानात्मभवान्मयि विकसदनुकम्पाः संपादयिष्यन्ति' ।

अत्र कुन्त्यां मुनिवरस्याऽनुग्रहं सहोक्त्या यमकानुप्रासैश्च वर्णयताकविना काऽपि प्रराप्रौढिः प्रकटितास्ति । अस्तु -

'इति वचनमयीं सुधां किरन्तीं यदुनृपतेस्तनयां प्रशंसमानः ।
पतिरनुमनुते स्म पौरवाणां प्रकृतमहोत्सवपारदर्शनाय ।१।४५ ।।'

अत्रानुप्रासः वचने सुधारूपकं च रुचिरमेव । एवं मुनि प्राप्त मन्त्रबलेन पुत्र प्राप्तौ राज्ञाऽनुमतायां सत्याम् पाण्डोः कुन्त्यां माद्र्यां च पुत्रोत्पत्तिं वर्णयति कविः यथा -

'धर्मात्प्राप युधिष्ठिरं पवनतो भीमं च भीमं द्विषां

---

१ पर्यायो यदि पर्यायेणैकस्याऽनेक संश्रयः ।११०। कुवलयानन्दे ।

जिष्णोर्जिष्णुमतीव धृष्णुमनघा कुन्ती मुनेर्विद्यया ।
अन्या सापि तयैव तत्र नकुलं रूपास्पदं गीष्पतेः
सच्छात्रं सहदेवमप्यजनयन्नासत्ययोरन्तिकात् ।१।४६ ।।

अत्र भाविलोकोत्तरमहावीराणां युधिष्ठिरादीनामोजस्वित्व सूचनाय ओजस्विगुणानुकूल्यमेव भजते तेषामुल्लेखे ।

एवं पाण्डोः पुत्राभावविचारः पृथायामुनिभक्तिः तस्यां मुनि प्राप्त मन्त्रबलेन पुत्र प्राप्तिश्च निर्विण्णस्य तापसवृत्त्याजीवनं यापयतश्च शान्तरसैकमन सि एव तस्मिन् दैववशतयाऽपि कामाधीनतया वर्ण्यमानः शृङ्गारो न विरुद्धयेते- ति शान्तशृङ्गारयोरन्तर्निवेशितास्ते तयोर्विरोधं परिहरन्ति । परिहृते विरोधे शृङ्गार वर्णनायतदुद्दीपन विभावरूपो वसन्तो वर्ण्यते कविना ।

शृंगारवर्णनम्

वीरेषु शृङ्गारोऽपि वर्णितस्तदुत्कर्षकतया शोभते । तदनुसारं मृगय यानन्तरं पाण्डोः आश्रमस्थितस्य शृङ्गारोऽप्यवर्ण्यत, अतः तदुद्दीपकतया वसन्तो ऽपि वर्णितः कविना , यथा -

' अथ कदाचिदखिलहरिदन्तरनिरन्तरचलमानमलयपवमानकम्पितचम्पकसंपादि तसौरभसंपदनुकम्पितनिलिम्पपथाः केसरकुसुमकेसरशिखरमासुरधूलीधूसरदिशो मनसिज विजयसहकारचतुरसहकारपल्लवतल्लजपरिचर्वणगर्वायमाणकलकण्ठयुवककण्ठोक्तपथिक जनसंदोहजीवितसंदेहा वनदेवतावदनतिलकायमानतिलककलिकावलिपलितभावुकनभो- विभागा मदनुहुतभुर्भूरसदृशकमलभूर्भुरुमधुरसासंभारचितमदभूर्भुरवविभवतुर्भुरति- तमिथुनशृङ्गाररसाः समुन्मिषद्वासन्तिकामिषेण सीमन्तिनीरतेरुदन्तं दुरन्तं - विचिन्त्य रहसि वसन्तं नृपं तमिव हसन्तो वसन्तोदयवासरा मन्दं मन्दमरण्यानी घरण्यां कमपि विकासमापादयामासुः ' ।

अत्र मधुर शृङ्गाररसोद्दीपनभूतस्य वसन्तस्य वर्णने माधुर्याऽनुगुणो वृत्त्यनुप्रासोमधुरवर्णैरेव घटितश्च यमकालंकारश्छेकानुप्रासश्च परां प्रौढिं प्रकटयन्ति कवेः । अत्रकलकण्ठे पथिक जीवित सन्देहकथनासम्बन्धेऽपि तदुक्त्यासंबन्धातिशयोक्तिः, तिलकावल्यां वनदेवतावदनतिलकोत्प्रेक्षा, कमलेमदनरूपहुतभुर्गुणारोत्प्रेक्षा तस्यां रूपकमङ्गनम्, कमलेभृङ्गारारोपात् मकरन्दरूपमधुनिमथरूपमधुनोमधुशब्दगत श्लेषमूलकारोपाच्च श्लिष्टपरम्परितरूपकम्, वसन्तवासरेशुहासोत्प्रेक्षा तस्यां च - समुन्मिषद्वासन्तिकाव्याजापह्नुतेरङ्गता एवमर्थालंकाराणां योजनाऽप्यत्र रुचिरैव । वर्णनेनेतेन वसन्तोऽभिलक्ष्यीभूत इवाऽनुभूयते । अग्रेऽपि यथा -

" किं शुकस्य वदने रुचिरत्वं किं शुकस्य हृदयेऽपि वशित्वम् ।
किंशुकस्य कुसुमेषु नदन्ती शंसति स्म मधुपालिरितीव ।।
कुरबके रवकेलिभृतः सुधासमधुरं मधुरं मधु षट्पदाः ।
पपुरवापुरवार्यमपि स्मयं नृपवने पवनेरितपादपे ।।१।६८-६९ ।।

परं कौशलमुन्मीलत्यत्र कविना स्वागतोद्धतविलम्बितच्छन्दसी वसन्तवर्णनोपयुक्ते सनादायतयोश्चयमक चमत्कृतिम् प्रकटीकृत्य । आदौपोत्प्रेक्षोपमालंकाराश्च मधुपानां मधुपानजन्यमत्त्वं परिपोषयन्ति । तत्र शुकवदनरुचिरत्वे-शुकहृदयवशित्वे चादौपमा(१)दाक्षोपालंकारः,तस्य मधुपानां शंसनोत्प्रेक्षायामङ्गना-मधुनः सुधोसमधुरत्वोक्त्या उपमा च स्पष्टमेव प्रकाशन्ते । एवं कविना वसन्तस्य परमोद्दीपकत्वं प्रकामं प्रकाश्यते ।

अथ शृङ्गारोद्दीपनविभाववर्णनेन सह आलम्बन विभावमपि स्पृशति कविः यथा-

" अथास्मिन्नमुना तपोवनपरिसरे पटीरगिरिबन्धुना गन्धवहस्तनघ्रायेनसंनिधिं नीयमानो मद्रजःपरिग्रहस्तपस्यन्तमपि मनस्यन्तः कं परितापसंपदा न लिम्पेदित्यर्थान्तरमप्यलिगिरा बोधयन्त्यामिव वनवासन्त्यामयंकाणादेव क्षितिपतिरिङ्घन्वनो लक्ष्यतामध्यरुक्षत् ।"

---

१ निशोधमात्रस्तदोपः । सगंगाधरे द्वि प्रा० ।।

अत्र शृङ्गारस्योद्दीपन वर्णने प्रसाद माधुर्य गुणानुरूपमधुराक्षर घटितेन आलम्बनविभावस्य वीरस्यराज्ञः परामर्शमदनशरलक्ष्यत्व बोधने च ओजोगुणानुरूपपरुषसंयुक्ताक्षरघटितेन वृत्त्यनुप्रासेन ध्वनिन्ना श्लेषेण उत्प्रेक्षाया पर्यायोक्तालंकारेण चाऽत्र परं कौशलं प्रकटितं कुशलेन कविना । तत्र पद्मीरगिरिनिर्गति गन्धवहे तद्बन्धुत्वोक्त्या तत्संपर्कातिशयेन सौरभातिशयो ध्वन्यते, सोयं अत्यन्ततिरस्कृत वाच्यो लक्षणामूलो ध्वनिः (१) मद्रजः परिग्रहः इत्यत्र श्लेषः, वासन्त्यामलिगिरा बोधनोत्प्रेक्षा, राज्ञो मदनातुरत्वस्य इक्षुधन्वलक्ष्याधिरोहण - रूपप्रकारान्तरेण कथनात् पर्यायोक्तम् च स्पष्टमेवोद्भासन्ते ।

अथ शृङ्गारस्याऽनुभावाः यथा -

"परिहृत्य तनुं चित्ते बाणं कामो मुमोच यत् ।
अन्तरेवातिरक्तोऽभूदव्रणास्तद्बहिर्नृपः ।।१।७०।।

अत्र राज्ञो रागाऽभिभूतत्वं रक्तशब्दगत श्लेषमूलाऽभेदातिशयोक्त्याऽन्तरतिरक्तत्वस्य चित्तमात्रवेधकबाणमोचनेनोपपादनात् काव्यलिङ्गालंकारेण च परयारुचिरतया वर्ण्यते कविना । यथा च -

"कं केलिदेशमुपयाम्यधुनेति तावत्-
कंकेलिसंवलनकल्पितचित्रशोभम् ।
माद्र्या करेणुरिव साकमसौ करेण्वा
गूढं ययौ कुरबकद्रुलतानिकुञ्जम् ।१।७१।।

अत्र यमकेन मधुराक्षरघटित वृत्त्यनुप्रासेन प्रसादमाधुर्यगुणाभ्यां च रमणीयोद्देशान्वेषणः तत्प्रवेशरूपौ शृङ्गाराऽनुभावौ सम्यग् वर्णितौ, वितर्कशङ्कौत्सुक्याख्या शृङ्गारव्यभिचरिभावाश्च साधु व्यञ्जिताः कुशलेन कविना । उपमालंकारोऽप्यत्राऽतीवाऽनुगुणः । यथा -

"चाटुप्रयोगे चतुरः स पाण्डुः प्रसूनतल्पे प्रविवेशितायाः ।

---

१ अविवक्षित वाच्योयस्तत्रवाच्यं भवेद् ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ।।४।२४ । काव्यप्रकाशे ।

क्षौमं बिभेद स्मरराजधानीक्षौमं करम्भोजदलेन तस्याः ।१।७३।।

अत्रापि चाटुप्रयोगक्षौमभेदनश्रमौ शृङ्गारानुभावौ त्रापत्र्यौत्सुक्यव्यभिचारिणौ च सम्यग् व्यञ्जितौ वृत्त्यनुप्रासेनयमकेन करस्यअम्भोजदलरूपकेण, अम्भोजदलेन, क्षौमशब्दवाच्यप्राकारस्य अम्भोजदलेन भेदनवर्णने कारणाभावेऽपि कार्योत्पत्त्युपलम्भाद् विभावनया चात्र आविष्कृतः कोऽपि चमत्कारः ~~चमत्कृतये~~ भव्यया च भारत्या कविना ।

पुनरपि शृङ्गारस्यविभावमनुभावं सात्त्विकभावात् व्यभिचारिणश्च वर्णयति कविः । यथा -

" तत्र तौ राजदम्पती मुनिशापबलपरिक्लिष्टायेव मुहुरम्बुगुरालिंगुनर्मकुलतरंगित कुचकुम्भसंभृतघर्मजलनिर्मितमदनयौवराज्याभिषेकमधरितमधुरसमधुरिमाधरबिम्बचुम्बनोऽधर विडम्बिताम्बरचकुटुम्बिजीवनमतिजवप्रफुल्यमानथम्मिल्लविगलदविरलबकुलपुनरुक्तपुष्पतल्पम् विगणितवीणागुणाक्वणितमणितमसृणितमतिचिरप्रमुषितमसमशरसमरमुन्मीलयामासतुः ।"

अत्र रतिकेल्याः पञ्चशरसमरत्वेन वर्णनात् तस्मिन् मदनयौवराज्याभिषेके च संरम्भोचितस्यौजोगुणस्य व्यञ्जनाय दीर्घसमासा गौडीरीतिः क्वचित्संयुक्तपरुषाक्षरयोजना च कविना स्वीकृता, सहैव शृङ्गारस्याऽनुभावानामालिंगनचुम्बनादीनां स्वेदाख्यसात्त्विकभावस्य औत्सुक्यत्रापत्र्यश्रमव्यभिचारिणां चाऽपि प्रकाशनाय माधुर्याऽनुगुणा मधुरवर्णघटितो वृत्त्यनुप्रासो यमकालंकारश्चाऽप्यगृह्यतकविना । अत्र असमशरसमरोन्मीलने मुनिशापबलपरीक्षणोच्छाया हेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रेक्षा, कुचे कुम्भारोपाद् रूपकम्, मदनयौवराज्यनिर्माणकर्तृत्वस्याऽसम्बन्धेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः, अधरे बिम्बारोपाद् रूपकम्, तस्य मधुरसाऽधरीकरणोक्त्या व्यतिरेकः, अधरबिम्बचुम्बनेन अम्बरचरजीवनविडम्बनोक्त्या उपमा, मणितस्य वीणागुणाक्वणनाऽवगणनया व्यतिरेकः, सुरतस्य च असमशरजन्ययुद्धरूपप्रकारान्तरेणोक्त्या पर्यायोक्तम्, चाऽर्थालंकाराश्चापिनिबद्धाः कविना अतीव विच्छित्ति वैचित्र्येण चमत्कुर्वन्ति ।

एवं शृङ्गाररसस्तदीयालम्बनोद्दीपन विभावानुभावव्यभिचारिणां समी-

चीनतया निवेशेन निर्वहणेन च साधुपोषितो व्यञ्जितश्च सहृदयानां नितरामाह्लादाय कल्पते ।

अद्भुतरसवर्णनम्

संसारस्य विविधरूपत्वात् अनित्यत्वाच्च लोकोत्तरसर्वशक्तिशालिनो भगवदवतारकल्पा महामहापुरुषा अप्यत्र एकरूपतया स्थास्नुतया च वस्तुमशक्नुवन्तः कृतवन् । तदनुसारं पाण्डुरपि महावीरोऽपि विपुलैश्वर्योऽपि मृगरूपे स्थितस्यकिन्दममुनेः अज्ञानात् स्वशरेण वधंकृत्वा च विरक्तो वनाश्रमे वसन् दैववशात् वसन्तसमये कामाधीनः सन् मुनिशापानुसारं दिष्टान्तं प्राप्तः । तेन तत्कामाधीनतयां प्रवलतः शृङ्गारवर्णनादनन्तरं कवेः करुणरसो वर्णनीयत्वेन प्राप्तः। किन्तु शृङ्गार-करुणयोर्नैरन्तर्यं विरोधात् शृङ्गारानन्तरं कुशलेन कविना विस्मयस्थायिभावकोऽद्भुतरसोऽत्राऽन्तर्निवेशितः । यथा -

"आयुषः संततिं दीर्घामावहन्नपि पौरवः ।
आयुषः संततेरन्तमाजगाम रतेरिव ।१।७४ ।।

अत्र आयुः-शब्दवाच्यनृप विशेष जीवनकालयोः श्लेषमूलकाऽभेदादभेदाऽतिशयोक्तिमूलको विरुद्धयोरायुः सन्तति - सन्ताननाशयोः पौरव रूपसमानाधिकरणत्वेनोक्तत्वाद् "अपि" योत्यौविरोधालंकारोऽद्भुतस्थायिभावविस्मयमेव व्यनक्ति, यथा च -

"नृपस्य दूरीकृतपाशसङ्गमं यमं विहायैकमुपैयुषो वधूम् ।
अजस्रमूरीकृतपाशसङ्गमो यमोऽपरः संनिदधे लतागृहे ।१।७५।।

अत्राऽपि त्यक्तोऽपि राज्ञायमो न दूरीभूत इति विशेषोक्तिर्विस्मयस्यैवापादिका । "एकयमस्थाने परयमोपस्थित्या" सम्पन्नः पर्यायालंकारोऽपि विस्मयोपस्कारक एव सम्पद्यते एव । यथा च -

"आर्लिङ्गनेन कुरवो हरिणोदाणाना-

~~कञ्चैकवं~~ मामोदगौरवभृतो भुवि सर्व एव ।
तन्मध्यमागपि तथा स कथं नु पाण्डु-
रालिङ्ग्य मद्रतनयामवधि प्रपेदे ।१।७६।।

कविना महत् कौशलमत्र प्रकटीकृतम् । 'कुरवः' एकवचनान्तो कुरवकवाचकः, बहुवचनान्तश्च कुरुराजवंश्यवाचकः; तयोः श्लेषेणाऽभेदसंपाद्यपाण्डोरपि हरिणोद्दाणालिङ्गनेन आमोदगौरवभृतत्वस्ययुक्तत्वं साधितम्, तथात्वेऽपि माद्र्या आलिङ्गनेनाऽयुक्तावधिप्राप्तिस्तत्र विस्मयापादिकैव । श्लेषमूलकाभेदातिशयोक्तिमूलको पाण्डोरयुक्तावधिप्राप्तिकथनात्मको विषमालंकारोऽत्र सुतरां विस्मयानुकूलः । आमोद शब्देऽपि हर्षगन्धवाचकेश्लेषवाचकेश्लेषमूलाऽभेदातिशयोक्तिः । कुरवः इत्यत्र मृतः इतयत्र च प्रकृतिप्रत्ययोभयगतः सर्व इति पदे च केवलः प्रत्ययगतः श्लेषः । प्रसादमाधुर्यशोभाप्यत्रद्रष्टव्यैव ।

करुणः

एवं परमकुशलेन कविना शृङ्गारानन्तरं विस्मयस्थायिकमद्भुतं विधे निवेश्य तदनन्तरं करुणरसस्य वर्णनमुपक्रम्यते । यथा -

'निद्रया किल निमीलितं मृतेर्मुद्रया निजमुदीक्ष्य वल्लभम् ।
उद्रवा करमुरस्य विक्लवा मद्रराजतनया रुरोद सा ।१।७७।।

अत्र राजालम्बनः तदवस्थोद्दीपनविभावः, रोदनादिश्चानुभावः, विषाददैन्यादयोऽनुव्यभिचारिणः, तैर्भावितः शोकः परिपुष्यते । सर्वथा नीरोगस्य स्वस्थस्यापि राज्ञो सहसा तादृगवस्थाप्राप्तिरप्याश्चर्यजनिकैव, अतः शोकेन सहव्यभिचारितयाऽद्भुतरथायिनोविस्मयस्य मनाक् संपर्कोऽप्यत्राऽस्त्येव । अतः- ~~अस्तं~~ तद्व्यञ्जकस्यौजसोऽनुगुणा 'द्र' कारघटितोयमकालंकारोऽपि पद्यप्रतिपादोपादिभागे निवेशितश्चमत्कारक एव । सहैव प्रसादमाधुर्यशोभाऽपि श्लाघ्यैव । यथा च -

"तन्निशम्य समभेत्य कुमारैस्तादृशं पतिमवेक्ष्य रुदन्त्याः ।
भोजपुंगवभुजोऽनुनिपातैर्भूरपि स्वयममुंक्त बाष्पम् ।१।७८।।

अत्रापि पूर्ववदेव विभावादयः कुन्तीगतंशोकं पुष्णन्ति। अत्र सहोक्त्यलंकारोऽपि सुतरामनुकूल । यथा च -

"तदनु नव्यवैधव्यबहुव्यथायाः पृथायाः पुरतो निर्मर्यादपितृशोकविदार्यमाणधैर्यसौदर्यजनपरिवार्यमाणाय हृदि विदितनिखिलधर्मजातायधर्मजाताय महत्या मपि विपत्यां वैयात्येन भवितव्यमिति राजनयनिगमाङ्कुरं प्रकाश्य काश्यपादयोदयोपेताः शतशृंगमुनिपुंगवास्तुंगमणिसौधशृंगं कुलक्रमागतं कुरुनगरमेतानवतारयामासुः ।"

अत्राऽपि पृथा तत्पुत्रादिगतः शोकः परिपुष्यति तद्विभावादिभिः । सहैव शोकाकुलत्वेन दयनीयतया युधिष्ठिरादयो काश्यपादीनां महर्षीणां समवेदनया सह वात्सल्यस्यापि पात्रीभूताः । एवं भवति करुणस्योपसंहारः । यमकानुप्रासाश्चात्र गद्यानुकूलां विदधति तद्विच्छित्तिमेव प्रचुरतया । भवन्ति च सहृदयानां सातिशय प्रमोदाय ।

(४) पाण्डवानामुद्भवो बाल्यं शिक्षासंस्कारादिकं च

अथ पाण्डोरनुज्ञाया कुन्त्या हूतैर्धर्मादिदेवैर्युधिष्ठिरादीनां कुन्त्यांमाद्र्यां चोत्पत्तिः, तेषांजन्मोत्सवः, शैशवं, बाल्यकेलयः, शिक्षा संस्काराः-नवयौवनं च वर्णितं कविना विविच्यते, तद्वर्णनं यथा -

"धर्मात्प्राप युधिष्ठिरं पवनतो भीमं च भीमं द्विषां
जिष्णोर्जिष्णुमतीव घृष्णुमनघा कुन्ती मुनेर्विद्यया ।

अन्या सापि तयैव तत्र नकुलं रूपास्पदं गीष्पते:
सच्छात्रं सहदेवमप्यजनयन्नासत्ययोरन्तिकात् ।।
तदनु वासवनन्दनसंभृता: स पटुगीतिरवप्रमदालय: ।
सुमनसस्तु यथोचितमाचरन्निपतनं भुवि नृत्यविधिं दिवि ।।
जन्मोत्सवो महानेषां> जलमत्यच्छमावहन् ।
विधामनन्यसामान्यां व्रीडां कुम्भभुवोऽनयत् ।।
स्वस्य चक्रगतिं सख्यु: स्वयमप्याश्रिता इव ।
जवात्प्रदक्षिणज्वाला जज्वलुर्यज्ञपावका: ।।
सामोदो भीमसंभूतिसंभृताशौचशक्तया ।
संकुचन्निव संस्पर्शे समीरो मन्दमाववौ ।।
कन्यकात्वे पि मय्येषा कामुकीति स्मरन्निव ।
प्रसूतिदिवसं कुन्त्या: प्रादिद्युतदहस्कर: ।।
पुष्पात्प्रागेव सुषुवे पुत्रमेषीति वीरुध: ।
फलेग्रहय एवासन्प्रसूनात्प्राक्पृथावने ।१।४६-५२ ।।

अत्र पाण्डवानामुद्भव-वर्णने तेषां भविष्यदौजस्वित्वाऽनुरूपा संयुक्ताऽक्षरघटिता ओजस्विनी रचना ।

पाण्डवानामुद्भवे जाते दिवो भुवश्चोल्लासस्य वर्णने नन्दन-प्रमदालि-सुमनस - आमोद-शब्दगतश्लेषै: सामोदगताभेदातिशयोक्त्या जल-निर्मलीकरणो-पाण्डुकुमार जन्मोत्सवस्य कुम्भोद्भव विधाव्रीडाजननोक्त्या व्यतिरेकेण,तदग्रेन विधाया व्रीडासम्बन्धाभावेऽपि तदुक्त्या संबन्धातिशयोक्त्या, सुर-सुमोभयवाचकसुमनशशब्दगतश्लेषमूलकाभेदातिशयोक्त्याऽभिन्नसुमन: कर्तृक यथोचिताचरण क्रियाया भुविपतनेन दिविनर्तनेन च सम्बन्धात् तुल्ययोगितया,आश्रयणे स्वरूपोत्प्रेक्षायासंकोचे स्मरणे च हेतूत्प्रेक्षाया वाच्यया, पृथाया: पुष्पात् प्रागेव पुत्रप्रसव-रूपहेतोरुत्प्रेक्षायागम्यया च काऽपि चमत्कृति राविर्भाविता,चमत्कारिणा च महावाक्येनाऽनेन भाविमहापुरुषत्वं च ध्वनितं पाण्डुकुमाराणां कविना । अथ पाण्डुकुमाराणां शैशवम् :-

"तदनु गुणगणैरमेयैरनुभूयमानविकासमये समये -"

"प्रजाधिपोऽसौ प्रथमं युधिष्ठिरे सुतेषु तेजस्विषु तेषु पञ्चसु ।
प्रभाकरे पञ्चतया इवोन्नते व्यापारयामास विलोचनद्वयम् ।।
तपस्विनीनां स्तनपायिनस्ते दरक्कणात्कीचकदत्तकर्णाः ।
वने दिनान्ते वसुधेन्द्रपुत्रा वल्केषु निद्रासुखमन्वभूवन् ।।
क्षुत्पीडया स्तनरसे कलहं शिशूनां
कुन्ती तदा शमयितुं कुचकुम्भयुग्मे ।
एकं युधिष्ठिरधनञ्जययोश्च भाग-
मेकं समीरणसुतस्य च संविभेजे ।।
निशाचरैः समं बाल्ये नियोद्धुमिव कौतुकी ।
उत्तानशयने मुष्टिमुद्ग्रां मारुतिर्दधौ ।।५३-५६।।प्रथम स्तबके ।

अत्र पाण्डोः सुतदर्शने प्रथमं युधिष्ठिरदर्शनेन तस्य प्रभाकरोपमया च महत्वं ध्वन्यते ।

पाण्डुकुमारेभ्यः स्तन्यदानेन तद्विषयकस्तपस्विनीगतो वात्सल्यरसो ध्वन्यते, मधुरा रचना तदनुकूला ।

कुन्त्या समीरणसुताय पूर्णैकस्तनरसस्य दानेन तस्य महाप्राणत्वं ध्वन्यते । तस्य मुष्टिबन्धनस्य निशाचरसहकृतनियुद्धफलकत्वोत्प्रेक्षाऽपि तन्महाप्राणत्वं ध्वन्यनुकूला । ओजस्विनी रचनाऽपि तदर्पणानुकूला । कुचकुम्भोपमा प्रकृतानुकूलारुचिर्ती ।

अथ तेषां शैशवकेलयः :-

"ततः क्रमेण गतेषु कतिपयेषु वासरेषु -"
"पङ्क्तिरात्मपितृयोषिति भूमौ स्पर्शनं परिहरन्त इवैते ।
जानुभिः करसरोजसहायैश्चक्रमं चमदकुर्वत बालाः ।।
"आदाय भीमतिमांसलमुक्तमार्द्रेऽप्याघ्राय जानुकृतचक्रममाश्रमान्ते ।

बाहालतेव वहनाद्विरराम शश्वत्कौतूहलं न तु कदाचन तापसीनाम् ।।

`वृद्धतापसपुरः प्रसारितं वेणुदण्डमवलम्ब्य शैशवे ।
भावयन्निव गदापरिग्रहं भाविनं पवनभूश्चचार सः ।।`

`मुनिसुतैरविशेषबुभुक्षो वने मुहुरमी नवशैशवकेलिषु ।
मुलिनतामनयन्त कलेवरं कदकलाः कलमा इव धूलिभिः ।।`

`तत्र तत्र मृदुपांसुषु पाण्डोः पुत्रपादतलविन्यसनेन ।
छत्रकेतुकुलिशैः स्फुटरेखैश्चित्रवत्यमवदाश्रमभूमिः ।।`

`लीलास्मितैः भृकिमयुगाङ्गलङ्गिमिलालाफलानां पृषतैर्वृहद्भिः ।
बाला वधुस्ते हृदि मौक्तिकानां माला घुतोल्लेखनरन्ध्रसूत्राः ।।`

`अत्यन्तबाल्यादमृतायिताभिरन्योन्यसर्धावितभिराह्वयत्सु ।
स भीमसेनोऽजनि पाण्डुपुत्रेष्वर्धावितनामापि च पूर्णनामा ।।`

`तदानीमयमम्बालिकासूनुरविलम्बितं संनन्दन इव पञ्चनन्दनागमसंपदा तया मुदमभितर्म्यवां बभार ।`

`पुत्रेषु तेषुक्रमपोषितेषु विलोकयन्त्या विहरत्सु कुन्त्याः ।
आप्याययामासतुरन्तरङ्गं प्राप्यापि माद्रीतनयौ यमत्वम् ।।`

`तैरादराद्बनलतासु दृढीकृतासु दोलाविधेः परिचितस्य सहर्षिपुत्रैः ।
पर्यायलब्धमसकृत्पवमानसूनोरारोहणं हृतमभूदवसानभूमिः ।।`

`भीमेन दन्तयुगले विधृतंयमन्ये वन्येभमारुरुहुरद्रिनिभंसगम्याः ।
शुण्डां प्रगृह्यविजयः स्वयमेवमानीतंलीलयारदपथेनसमारुरोह ।।`

तदनु विधिवदुपनीतानां क्रमेण मधुरेण वयसा शिरसा च विधृतवपुषांविनयगौरवपुषां सकलासु कलासु कौशलमुन्मीलयतां तेषां यशांसि बलभेदन मदावलस्य धाम्नोर्युगलमपि युगपदुल्लङ्घयामासुः ।

`नवतरुणिमलक्ष्मीनन्दनीयं शरीरं कुरुवृषभसुतानां कुर्वती नेत्रपात्रम् ।
मुनितातिरिति मेने मोहनाय त्रिलोक्याः स्वविशिख इव कामाः सोऽपि किं पञ्चधाऽभूत् ।।१।५७-६७`

अत्र बालानां जानुभिश्चक्रमणे पितृयोषितो भूमेः पादस्पर्शवर्जनफलकत्वोत्प्रेक्षावाक्यार्थोपस्कारिणी, भूमौ पितृयोषिदारोपाद् रूपकमुत्प्रेक्षाङ्गं-

गम् ।

तापसीनां भीमोद्वहनेन तद्गतोत्सुक्यहर्षश्रमभावशान्तिपरिपोषितस्य वात्सल्यस्य ध्वनिः । तत्र कौतूहलव्यपोहनात्मकस्य परिसंख्यालंकारस्य(१) बाहायां लतारूपकस्य चोपस्कारकता ।

भीमस्य वृद्धतापसप्रसादितवेणु-दण्डावलम्बेन भाविगदापरिग्रहभावनोत्प्रेक्षा वाक्यार्थोपस्कारिका ।

पाण्डुकुमाराणां धूलिकेलौ कलभोपमा तन्महाप्राणात्वव्यञ्जिका वाक्यार्थोपस्कारिका च । चरणगतच्छत्रकेतुकुलिशरेखाकृतधूलिगतचित्रैश्च तेषां सार्वभौममहापुरुषत्वाऽनुमानध्वनिः । लालाजलबिन्दुपंक्तिषु मौक्तिकमालास्वरूपोत्प्रेक्षा वाचकाभावाद् गम्या वाक्यार्थोपस्कारिका ।

भीमसेवनस्याऽऽहवानप्रयुक्त-भीम-शब्दे अर्थनामत्व-पूर्णनामत्वयोः सामानाधिकरण्याद् विरोधाभासः, 'बिनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इति वार्तिकानुशासनेन (२) अर्धस्याऽपि पूर्णत्व-समर्थनाद् विरोधस्य निवृत्या आभासरूपता । विरोधेन तस्य अद्भुतत्वस्य वैरिभयावहत्वस्य च ध्वनिः ।

पर्जन्यनन्दनाऽऽगमसंपत्तिमत्त्वप्रयुक्तया पाण्डोः संक्रन्दनोपमया नंक्षत्रशब्दगत-श्लेषमूलकाऽभेदातिशयोक्त्यनुप्राणितया तस्य कोऽपि महानुत्कर्षो ध्वन्यते।

माद्रीसपत्नी सुतयोः यमत्के पि कुन्ती दुःखदत्वाभावात् विशेषोक्तिः कुन्त्या उदात्त हृदयत्वं नकुलसहदेवयोश्च रमणीयरूपशीलत्वं ध्वनयति । तेन कुन्तीगत तद्विषयक वात्सल्यस्योपस्कारः ।(प्रकृतात्वेऽलंकारमूलभेदातिशयोक्तिः)

पवमानसूनोर्दोलारोहणेन दोलाविधेः समाप्त्या तस्य महाप्राणत्वाभिव्यक्ति द्वारा व्यतिरेकालंकारध्वनिः ।

शुण्डाग्रहण पूर्वकं रदपथेन विजयस्य वन्येभारोहणेमानित्वस्यहेतुत्वाभिव्यक्त्या काव्यलिङ्गम् , तेन च विजयस्य वीरत्वोत्कर्ष प्रतीत्या व्यतिरेक ध्वनिः ।

---

१ परिसंख्यानिषिध्यैकमन्यस्मिन् वस्तुयन्त्रणम् । ११३ । कुवलयानन्दे ।

२ वैयाकरण सिद्धान्त कौमुदी ।

निः ।

शिक्षासंस्कारैर्यौवनेन च विनीतानां मनोहराणां च पाण्डुराजकुमाराणां स्वर्गपर्यन्तं यशसां व्याप्तिवर्णने यमकानि, वयःशिरोभ्यां वपुर्विनययोः क्रमान्वयात् यथासंख्यं(१) शोभास्थानोभयवाचकधामशब्दगतश्लेषः, पाण्डुयशसामैरावतशोभालंघनात् व्यतिरेकालंकारः स्वर्गलंघनाच्च सम्बन्धातिशयोक्तिः । व्यतिरेकसम्बन्धातिशयोक्त्यारेकवाचकानुप्रवेशसंकरः । पाण्डवेषु पञ्चधाभूतकामसन्देहात् ससन्देहालंकारः(२) तदुद्भूता कामपञ्चत्वप्रयुक्ता विशिखोपमा च भृशं चमत्कुर्वन्तितराम् । ससन्देहेन पाण्डुकुमाराणां लोकोत्तररामणीयकस्य ध्वनिः ।

एवं सुरुचिरमवर्ण्यन्त शैशवं शिक्षा संस्कारादयश्च पाण्डुकुमाराणां क विना ।

(५) धृतराष्ट्रस्य पाण्डुकुमारपोषणं दुर्योधनस्य तद्रोहश्च ।

अथ पितृविहीनानां पाण्डुकुमाराणां क- काश्यपादिर्ऋषिभिः हस्तिनापुरनयनम्, धृतराष्ट्रस्य पाण्डुस्मृत्याशोकः पाण्डवेषु वात्सल्यं च ,दुर्योधनस्य तेषु द्वेषुः, सर्पैर्भीमस्य दंशनम्, सर्पविषविह्वलस्य रज्जुभिः परिणाहितस्य च तस्य गंगायां पातनम्, कुन्त्या भीमबन्धूनां च तद्विरोगे शोकः, पातालभुवि भुजंगराजदत्तपीतामृतस्य तस्याऽऽगमेन तेषां हर्षश्चेतिवर्णितं कविना विविच्यते सम्प्रति । तद्वर्णनं यथा -

'तदनु नव्यवेधव्यबहुव्यथायाः पृथायाः पुरतो निर्मर्यादपितृशोकविदार्य-

---

१ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ।१०६। कुवलयानन्दे ।

२ ससन्देहस्तु --------- संशयः । १०।९५ । काव्यप्रकाशे ।

माणधैर्यसौदर्यजनपरिवार्यमाणाय हृदि विदितनिखिलधर्मजाताय धर्मजाताय महत्यामपि विपत्यां वैयात्येन भवितव्यमिति राजनयनिगमाङ्कुरं प्रकाश्य काश्यपादयो दयोपेताः शतशृङ्गमुनिपुङ्गवास्तुङ्गमणिसौधशृङ्गं कुलक्रमागतं कुरुनगरमेतानवतारयामासुः ।

"मन्दं मन्दमुपेत्य तत्र सदसो मत्पाण्डुपुत्राङ्कुराः ।
क्रेति प्रेमपुरःप्रसारितकरः कुर्वन्दृढालिङ्गनम् ।।
स्पर्शं स्पर्शमिमान्निजाङ्गमितान्भ्रातुः स्मरन्कौरवः
श्च्योतद्विनयनाम्बुभिः स विदधे शोकं सकल्कं नदीमातृकम् ।।
"पाण्डुवेषु दृढतापरिणाहप्रायक्षतनुसंपदियताम् ।
स्पर्शनं विदधतैव दृशाऽन्धः पाणिना परिममौ धृतराष्ट्रः ।।
"दत्वा तत्तत्प्रत्यहं यथादिष्टं यावत्स्वेषामात्मजानां शतेऽपि ।
पाण्डोः पुत्रेष्वम्बिकासूनुतेष्वेकैकस्मिन् प्रेम तावद् बबन्ध ।।"

"एवं वत्सभावेऽपि भक्तिमत्सु तेषु निजपितृवत्सलतामसकृत्समीक्ष्य मत्सरेण दुर्मनायमानो हृदयालवाले सुयोधनो राधेयप्रधानदुर्बोधमेधोत्सेधसविधधरणीरुहमधिरूढामकुतोरोधां विरोधविषवीरुधमेधांचक्रे ।"

"तीव्रोदयानविनयान्धतां क्रमेण दुर्योधनाद्यसुहृदां दुरहंकृतीनाम् ।
पट्टाभिषेकमभिलष्यति फालदेशे कुट्टाकभावकुतुकं कुरुते स्म भीमः ।।"
"पञ्चानां प्रवहन्तीनां पवनात्मज एव सः ।
कौरवक्ष्वेडसिन्धूनां क्रमात्संप्लुमधूरभूत् ।।" १।८०९ ८४ ।।

एवं पृथायाः युधिष्ठिरादीनां च शोकसन्तप्तानां काश्यपादिभिर्ऋषिभिर्हस्तिनापुरनयनम्, धृतराष्ट्रस्य पाण्डुस्मृत्या शोकः पाण्डुकुमारेषु च वात्सल्यम्, दुर्योधनादीनां पाण्डवेषु द्वेषश्च साधु वर्णितः कविना ।

तत्र गद्ये पृथायाः पाण्डुकुमाराणां च विषादेन तद्गतः शोकः परिपोष्यते ।-काश्यपादीनामृषीणां च युधिष्ठिरादीन् प्रत्युपदेशेन तेषां हस्तिनापुरनयनेन च तद्विषयक ऋषिजनगतो वात्सल्यरसः परिपुष्यन्नवतरतितरां प्रतीतिपथम् ।तत्र हस्तिनापुरस्यतुङ्गमणिसौधशृङ्गकथनेन उदात्तालंकारस्य तदुपस्कारकता ।

धृतराष्ट्रस्य मन्दमन्दागमन हस्त प्रसारणस्पर्शनादिना इष्टवस्तुदान-पोषणादिनाऽनुभावेन औत्सुक्यहर्षादि संचारिभावैश्च पाण्डुकुमारविषयको-वात्सल्य रसः, रोदनाश्रुपानादिभिरनुभावैः करुणरसः परिपोषं प्रतिपद्यते । तत्र धृतराष्ट्रशोकस्याऽश्रुभिर्वर्धितत्वस्यनदीमातृकत्वरूपेण प्रकारान्तरेण कथनात् पर्यायोक्तालंकारः शोकोपस्कारकः ।

धृतराष्ट्रविषयक पाण्डवमक्त्या पाण्डवविषयकधृतराष्ट्रवात्सल्येन च विभावाभ्यां दुर्मनायमानत्वेनाऽनुभावेन च विषादः पाण्डवविषयक विरोधभावेनाऽनुभावेन असूयाभावश्च दुर्योधनगततया ध्वन्यते । तत्रदृष्ट्यभावरूपकारणाभावेऽपि धृतराष्ट्रस्य पाण्डवरूपादितनुसम्यज्ज्ञानरूपकार्यसम्पत्या विभावना तस्य दाक्ष्यंध्वनयति/विरोधे विषवीरुत्सर्गरूपकस्य वाक्यार्थोपस्कारकता । पट्टाभिषेकाभिलाषिणोदुर्योधनफालदेशस्य भीमकर्तृक कुट्टनप्राप्त्या विषादना(१) लंकारस्य भीमगतौग्र्यव्यञ्जकता ।

भीमस्य कौरवक्रोध विषयता तत्क्रोधसिन्धुसंभूतरूपकेणासुष्ठुतरामुपस्कियते, इति तस्य वाक्यार्थोपस्कारकताः ।

अथ दुर्योधनकारितं भीमस्य सर्पदंशनम्, सर्पविषाविह्वलस्य रज्जुभिः-परिणाहितस्य च तस्य गङ्गायां पातनम्, तद्वियोगे कुन्त्या भीमबन्धूनां च शोकः, पातालमुविभुजगराजदन्तपीताभृतस्य तस्याऽगमेन तेषां हर्षश्च वर्णितानि विविच्यन्ते संप्रति तद्वर्णनं यथा -

'एकदा तु ते सर्वे सुपर्वसरितः सलिलेषु विहृत्य समुत्तीर्णावीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विव पटगृहवाटेषु परिगृहीतमनोहराम्बरपटीरहाराभ्यवहाराः कुमाराः कुशलकुशीलवकुलशीलितविचित्रकलशीरवविवशीकृतमनसः सुखमासामासुः।

'रहसि नलिनतल्पे रत्नपर्यङ्ककल्पे
दिनविरतिसमीरैः सेव्यमानः स भीमः ।
तटभुवि कुसुमानां तादृशैर्गन्धपूरै-
रधिकमलसताया हानिदद्रौ निदद्रौ ।२।१।।'

---

१ इष्यमाणाविरुद्धार्थ संप्राप्तिस्तु विषादनम् । १३२ । कुवलयानन्दे ।

"अथ निशीथे तथाभूतस्य तस्य जिघांसया कुरुनरेन्द्रनन्दनेन चोदितैर्नरेन्द्रैरुपेत्य युगपदेव झटिति निभृतं समुद्घाटितेषु नियन्त्रणपेटकेषु-

"सुते पितृरवादिमसंप्रदायशुश्रुत्सयेव श्वसनाशनेन्द्राः ।
समीरसूनुं समुपेत्य जिह्वाबहिः प्रसारान्बहुशो वितेनुः ।।"

स सुप्तस्य तस्य तु सुयोधनभृत्यमुक्ता
वाताशनाश्च सकला वनदेवताश्च ।
आशीर्द्वयं वपुषि चायुषि च प्रतेनुः
पूर्वाह्न तत्र चरमेव पुपोष वीर्यम् ।।
मर्मदंशदशना भुजङ्गमा मारुतेर्वपुषि सुप्तभूरुहः ।
मुष्टिमेयतनवो विरेजिरे मूलिका इव बहिर्विनिर्गताः ।।

"अन्येद्युरपि पुनराजीवन्तं निद्रारुणनयनराजीवं तं स मुग्धधीः स्निग्ध-इव सजग्धकेलिकायामारालिकदापितकवलनिचोलितकरालगरलविह्वलं प्रलम्बितशिरसं रज्जुभिः परिणाह्य परिणाहिनीभिरसुहृदां हृदयशूलमपि शूलकीलिते निर्जरसरिदन्तर्जले विसर्जयामास ।"

"तेषां तदानीं धृतराष्ट्रजानां तीरे च नीरे दिविषत्तटिन्याः ।
मरुत्सुतं मारयितुं प्रवीरं सारा गुणाः साधनतामवापुः ।२।२-५।।

"ततः पातालभुवि तदागमनकौतुकिना वासुकिना संमानितः स धृतिमानितस्ततोऽष्टासु दिशासु तदनुगुणपरिणानं दिनगणमत्ययशंकिभिरितरैरपत्यैः-सह विचित्य "हा वत्स । रिपुभर्त्सन भीम । क्व वा निषीदसि ?" इति विषीदन्त्याः कुन्त्या नवमपि वासरमनवमेव सञ्जनयन् प्रथमसूनृतामृतांजनेरिव दृशौ रञ्जयामास ।"

"आगतस्य तस्य मदाबलायुतबलाढ्यानां पृथाकुपरिष्वङ्गपदापितदशकलशपीयूषाणां निषेवणेन विशेषितपरिपोषप्रगात्रं सवित्रीभुजान्तर इव सोदरकौरव हृदयेऽपि मोदविषादसंपदो न ममतुः ।"

अत्र मारुतसुतविषयकं दुर्योधनस्य क्रोधं वनदेवतानां वात्सल्यं सर्पराजस्य सम्मानं कुन्त्या युधिष्ठिरादीनां मोदं कौरवाणां विद्रोहं च वर्णयता क

विना यथायुक्तमाधुर्यौजोगुणानुगुणवर्णघटितवृत्त्यनुप्रासं यमकानि उपमा, उत्प्रेक्षाः, वाताशन-वनदेवतानां क्रमशो वपुषि आयुषि च शीर्ष्यदानकथनेन यथासंख्यम्-शुभाशंसाऽरिदंष्ट्रावाचकाऽऽशीः शब्दगतश्लेषम्, आयुषिवनदेवताशिषांशक्तत्वस्थापनपूर्वकस्य वपुषि वाताशनाशिषां शक्तत्वप्रपोहनस्य कथनेन परिसंख्यालंकारम्, श्लेषयथासंख्यम्योश्चाऽस्मिन्नंशुत्वे संकरम्, दृढगरदोभयवाचकसारशब्द-क्रौर्यादिधर्म- रज्जूभयवाचकगुणशब्द- गतश्लेषम्, वासरस्य नवमत्वाऽनवमत्वयोः कथनात् द्विरोधाभासम् , नवमत्वरहित- फल्गुत्वरहितोभयवाचकाऽनवमगतश्लेषमूलकम्, सोदरकौरव हृदये क्रमशो मोदविषादयोरुक्त्या पुनर्यथासंख्यम्, च तत्र - तत्र विन्यस्य उपस्क्रियन्ते वाक्यार्थाः ।

एवं पाण्डुकुमार विषयकस्य धृतराष्ट्रवात्सल्यस्य दुर्योधनादि द्रोहस्य च वर्णनं चमत्कारकमेव ।

(५) पाण्डवानां धनुर्विद्योत्कर्षः युधिष्ठिरस्य यौवराज्याभिषेकश्च

अथ पाण्डुकुमाराणां कृपद्रोणाध्यां धनुरागमशिक्षाणं, ग्रहग्रस्तस्य च द्रोणस्याऽर्जुनेन रक्षाणं , द्रोणाज्ञया द्रुपदं जीवग्राहं गृहीत्वा द्रोणायाऽर्जुनस्य तत्समर्पणं, द्रुपदस्य याजमुन्यनुग्रहेण धृष्टद्युम्न द्रौपदी प्राप्ति, युधिष्ठिरस्य यौवराज्याभिषेकः+, तन्नीत्या च कोशानां नानाधनपरिपूर्णत्वं वर्णितं - कविना विविच्यते, तद्वर्णनं यथा -

" तदनन्तरम् -"

" काष्ठां परां कार्मुक कौशलस्य
काष्ठाः परास्तानपि तथशोऽपि ।
प्रज्ञादृगारोपयितुं प्रवृत्तोव्यज्ञापयद्विष्णुपदीतनूजम् ।।" १।६।।

" सोऽपि कृत्य विदामग्रणीरपरेणेव शरजन्मना कृपेण बहुकृपेण निरवद्य

वीरयशोनिषद्यां चापविद्यामापाद्य पि तां पुनरुक्तयितुं दिशिदिशिजैत्रगुणं पौत्रगणं महताधननिहेन सह विविधधनुरागमप्राणस्य द्रोणस्य चरणयोरुपदीचकार।'

'सिन्धुजातकलशीभुवोस्तयोः स्निग्धभावमवलोक्यतादृशम् ।
तत्र पौरनिकरः समाचरच्चित्र पूरजठरे निमज्जनम्।।'

'कुमारास्तूणमारुक्षान् कुम्भयोनेरनुग्रहात् ।
कोटिं कोदण्डसारस्य गुणिनस्ते गुणा इव ।।'

'कूलस्थस्यानुकुर्वन्कुरुसुतसदसः कुम्भयोनेः कदाचि-
त्स्नातुं मध्ये जलानां चिरकृतवसतेः सिन्धुभूवर्धमानः ।
आदौ पादौ निपीड्य स्फुटकमलरुचौ बिभ्रदन्तेवसब्रह्मत्वं
ग्राहो जग्राह कश्चित्स्वयमपि विजयास्त्रागमान्तं महान्तम् ।।'

'ततस्ते सर्वोत्तरा अपि शरासनेषु दक्षिणाः गुरुदक्षिणां कुरुत मह्यं द्रुह्यतो द्रुपदस्य युधि बलाद्गृहीतस्य समर्पणम्' इति गुरुणा चोदिताः सर्वेऽप्यहं पूर्विकया कयापि विमतेषु कृतावज्ञसेनं याज्ञसेनं पुरं निरुध्य चिरमयुध्यन्त।'

'कृत्ते मत्तेर्घनुषि स गुरुद्रोहिणस्तस्य जीव-
ग्राहे बाहाङ्गुलपरिचलत्खड्गवल्लीसहायः ।
पुत्रावत्यां सुबलदुहितुः पूर्वपक्षी-भवन्त्यां
सिद्धान्तोऽभूदिवि भुवि बुधैः श्लाघितः सव्यसाची ।।'

'पार्थमेव पुरतो निधाय ते कौरवास्तदनु संनिधौ गुरोः ।
भक्तिमिर्व्यनमयन्निजं शिरः पार्षतस्तु परिभूतिलज्जया ।।'

'अथो गुरुर्नीतमधिज्यधन्वना पुरः प्रदेशं पुरुहूतसूनुना ।
तरस्विताङ्गं तमवेक्ष्य विद्विषं वचो गभीरं वदति स्म सस्मितम् ।।'

'रे रे क्षत्रियसत्तम ! पुरा महत्तरमग्निदेश्यमग्निवेश्यं नाम मुनिमस्त्रपरिश्रमाय प्रश्रयेण सह शुश्रूषमाणास्त्वं मत्कृते पितुरनन्तरं समाधिराज्यपदस्य प्रथममर्घं भवते वितीर्य ततः परमर्घमहमनुभविष्यामीति यथा प्रत्यशृणुथास्तत्तथा निर्वर्तितं खलुधिग्विप्रमिति चुरप्रायेण विप्रियवचनेन प्रथीयसीं मनसि व्यथां मम विधीर्णवता महार्णविपरिधानवतीं वसुमतीं स्वयमेवानुभवता ननु भवता ।'

" आबालवृद्धं जलसक्तमेव जनाः समस्ता द्रुपदंयदाहुः ।
तस्मात्त्वयि स्वीकृततादृशाख्ये कथं नु मज्येत नमित्रतेजः ।।"

" इति व्याजस्तुतिवचनेन पौरवान्ते मार्गवान्तेवसता प्रधर्षितः पार्षतस्तेन सार्धमर्धराज्यपरिवर्तनमात्रमर्थीकृत्य कृत्यविदां ककुदस्तौ जम्भरिपुकुम्भसंभवावुभावप्युपयमं प्रवर्तयितुं कृतक्रतुनिर्वर्तनः सोमकान्तिकोपास्यो पुत्रो भागीरथीवनाव सथस्य याजस्य मुनिराजस्य याजनानुग्रहेण परिवग्राह ।"

" ततोऽपि वर्मतनयं तपनीयपीठ-
मारोप्य चक्षुरिव लब्धममुंतपोभिः ।
आवर्जितैः कलशवारिभिरभ्यषिञ्च-
दानन्दबाष्पसलिलैरवनीं च पौराः ।।"

" आबिभ्रतो धरणिमर्थुदनिर्विशेषं
नानाधनायतिभिरस्य नयोदिताभिः ।
पस्त्यं समस्तमपि वासवसंनिभस्य
कौशीबभूव कुतुकैः सह कौरवाणाम् ।।"

" पारेमिन्धु प्रथितममितं प्रत्यहं वर्धमानं
सोढुं पार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् ।
प्रीतो राजाऽप्यनुजतनयप्रेममार्गे प्रयातुं
मातुर्दोषादिव बहिरगादन्धभावम् ।।२।६-१६।।

एवं पाण्डुकुमाराणां कृपद्रोणाभ्यांधनुर्वेदशिक्षाणां, ग्रहणस्य द्रोणस्यार्जुनेनरक्षणं, द्रोणाज्ञया द्रुपदंजीवग्राहं गृहीत्वाऽर्जुनस्य द्रोणाय तत्समर्पणं, द्रुपदस्य कृकृकृकृकृकृ धृष्टद्युम्नद्रौपदीप्राप्तिः, युधिष्ठिरस्य यौवराज्याभिषेकः तन्नीत्या कौशानांनाघनैः परिपूर्णात्वं च वर्णितमतिकौशलेन कविना ।

तत्र धृतराष्ट्रभीष्मकृपद्रोणगतः पाण्डुकुमारविषयको वात्सल्यरसः तेषां पोषणशिक्षणाधनुभावैः हर्षादिसंचारिभावैश्च पोषितः कामपि चमत्कृतिं जनयति । तत्रप्रसादमाधुर्यानुसारिणश्चैकवृत्त्यनुप्रासस्यरूपकोत्प्रेक्षोपमा यथासंख्यश्लेषमूलाऽभेदातिशयोक्ति विरोधाभासानां च वाच्यार्थोपस्कारकता का

ऽपि रमणीया । तत्र विद्यायां निषधारोपाद्द्रोणे प्राणारोपाद् रूपकम्, कृपेशरजन्मोत्प्रेक्षा, कुमाराणां गुणोपमा, कुमाराणां तथाश्चक्रमेणोभयविधकाष्ठारोपकथनाद् यथासंख्यम्, सिन्धुजात-कलशीभू शब्दगतश्लेषमूलका-तद्वाच्यद्वयाभेदाऽतिशयोक्तिमूलको विरोधाभासः , कोदण्डसारशब्दगतश्लेषमूलकाभेदाऽतिशयोक्तिश्च वाक्यार्थोपस्कारकाण्येव ।

ग्राहाद् द्रोणरक्षणेनार्जुनस्य कोऽप्युत्कर्षस्तेन व्यतिरेकालंकारो ध्वन्यते ।तत्राऽपि अन्तेवसत्वविजयास्त्रागमान्तशब्दगतश्लेषस्य ग्राहे कौरवोपमयाश्चोपस्कारकत्वेन श्लेषोपमयोश्चमत्कारित्वम् ।

द्रोणस्य द्रुपदनिग्रहाज्ञायां पाण्डवेषु सर्वोत्तरत्वशरासनदक्षिणत्व - सामानाधिकरण्यवर्णनाद् विरोधाभासेन पाण्डवानां चित्रचरित्रत्वं लोकोत्तरत्वं- च ध्वन्यते ।

अर्जुनस्य द्रुपदग्रहणेन कोऽप्युत्कर्षस्तेन च व्यतिरेकालंकारो ध्वन्यते । तत्राऽपरेषां पूर्वपक्षत्वेनाऽर्जुनस्य च सिद्धान्तत्वेन रूपणाद् रूपकस्यैक्य-तदुपस्कारकता । जीवतो द्रुपदस्य ग्रहणारूपेणाऽनुभावेन धृतिगर्वादिसंचारिभिश्चपोषितोऽर्जुनोत्साहो वीररसतां प्रपद्यमानः कामपि चमत्कृतिं जनयति सचेतोजनमनःसु। तत्राऽलंकारध्वनेः पूर्वोक्तस्यार्थशक्तेव ।

द्रोणसमीपं द्रुपदनेतृणां कौरवाणां शिरोनमनेनरतिभावे द्रुपदस्य च तन्नमनेन लज्जाभावे व्यज्यमानेऽपि वैशद्येन बोधाय वाच्यतां नीतः । तत्र कौरव- पार्षतोभययोरेकशिरोनमनेन योगात् तुल्ययोगितालंकारो वाक्यार्थोपस्कारकः ।

द्रोणस्य द्रुपदं प्रति वचने स्मृतिगर्वाऽसूया भावाः तरङ्गितावलोकन- सस्मितवक्रोक्तिवचनैर्ध्वन्यन्ते । तत्र अग्निवेशस्य अग्निदेश्योक्त्या उपमाया मित्रतेजोधर्मे द्रुपदत्वस्योपपादकत्वात् काव्यलिङ्गम्, जलद्रुपदमित्र-शब्दगतश्लेषमूलकाऽभेदातिशयोक्तीनां काव्यलिङ्गाश्रितया तत्संकरस्य वाक्यार्थोपस्कारकत्वम् । यमकानुप्रासावत्र रुचिरौ ।क्षात्रियसत्तमशब्दगतोऽत्यन्ततिरस्कृतवाच्यध्वनिर्द्रुपदस्य-क्षात्रियसत्तमत्वातिशयव्यञ्जकः।

सोमकान्ति-शब्दगतोपमया द्रुपदपुत्र्यालोकोत्तरलावण्यं कोपास्य-शब्देन

च तत्पुत्रस्य भाविमहावीरत्वं ध्वन्यते । यमकानुप्रासौ चात्रमणीयौ । उपयमश ब्दगतश्लेषो पि रुचिरः ।

धृतराष्ट्रस्य यौवराज्ये युधिष्ठराभिषेचनेन वात्सल्यं ध्वन्यते । पौरजनानां चाऽऽनन्दबाष्पमोचनेन हर्षभावो ध्वन्यते । धर्मजस्य नयनोत्प्रेक्षा वात्सल्ये सुतरामनुगुणा । एकस्या अभिषेचन क्रियायास्तातपौरयोर्गात् तुल्य योर्भिगितायाश्च वाक्यार्थोपस्कारकत्वम् ।

युधिष्ठिरस्य सकलभूवलयसनैपुण्य प्रशासनेन धनार्जनादिभिरनुभावैः तद्व्यभिचारिधृतिमत्यादि संचारिभावैश्च प्रपोष्यमाण उत्साहो वीररसतां प्रपद्यमानश्च मत्कारोतितरां सुतराम् । अत्र च प्रसादौजोगुणयोस्तदनुसारिणी वृत्त्यनुप्रासस्य-उपमासहोक्ति श्लेषालंकाराणां चोपस्कारकत्वम् । तत्र युधिष्ठिरस्य वासवोपमया प्रभावातिशयविशिष्टत्वं, धरण्याश्चार्जुनोपमया अनायासधार्यत्वं व्यज्यते । धनवेश्म- मुकुलोभयवाचक कोश शब्दगतश्लेषानुप्राणित तदभेदातिशयोक्तिमूला - युधिष्ठिरपस्त्य- कौरवकृतुकयोः कौशीभवने सहोक्त्या युधिष्ठिरसमृद्धि-कौरवखेदयोर्हेतुफलरूपतावगमात् काव्यलिङ्गध्वनिरप्यत्र चमत्कारोतितराम् । एवं सरुचिरतरं वर्णनं कवेरेतत् ।

(७) पाण्डवानां लाक्षागृहनिवासस्ततोनिर्गमश्च

अथ दुर्योधनानुरोधाद् धृतराष्ट्रस्य युधिष्ठिरं प्रति वारणावतपुरवासायाऽऽज्ञापनम्, दुर्योधन सचिव दर्शिते लाक्षागृहे च तत्र तेषां वासः, रात्रौ-लाक्षागृहेऽग्निं प्रक्षिप्य युधिष्ठिरादीनादाय भीमस्य ततो निर्गमनम्, पुरोचनादीनां च तत्र भस्मीभवनम्, युधिष्ठिरादीनां लाक्षागृहे भस्मीभवनसंभावनया दुर्योधनादीनां प्रसादश्चेति वर्णितं विविच्यते, तद्वर्णनं यथा -

'तदनन्तरम् -

'पारेसिन्धु प्रथितममितं प्रत्यहं वर्धमानं
सोढुं पार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् ।
प्रीतो राजाऽप्यनुजतनयप्रेममार्गे प्रयातु
मातुर्दोषादिव विरागादन्तरप्यन्धभावम् ।।'

'तदनु सौबलीजानिरसौ बलीयसाऽमर्षेण घर्षितः सहजविनयं धर्मतनयमाहूय कृतावहित्थो गिरमित्थमुत्थापयामास ।'

'वत्स ! संप्रति वारणावतं पुरमुपेत्य वारणाननगुरोरुत्सवं वारणाय विपदां निरीक्ष्य सहानुजैस्तत्र वास्तव्यपौरजनभव्यया गिरास्तव्यो निरवधिसुखा मनुशाधि वसुधाम्' इति ।

'तस्याशयं हृदि विदन्नपि धर्मसूनु-
स्तातस्य वाचमविलम्ब्य तथेत्यगृह्णात् ।
तत्तादृशेषु गुरुशासनपालनेषु
कूलंकषं गुणगणेन कुलं हि पूरोः ।।'

'धर्मसूरनुजैः साकं तद्गिरा तत्पुरं ययौ ।
कर्मचोदनया जीवः कायमन्यमिवेन्द्रियैः ।।२।१६-१८ ।।

एवं नीतिनैपुण्येन प्रत्यहमभ्युदयं प्राप्नुवन् युधिष्ठिरो दुर्योधनस्य तदभ्युदयाऽसहिष्णोरनुरोधाद् धृतराष्ट्रेणाछलमाश्रित्य वारणावतपुरं सहाऽनुजैः-गन्तुमाज्ञप्तस्तदाज्ञामनुससारेति वृत्तं निबध्नता युधिष्ठिरस्य धैर्य-गाम्भीर्य-विनयसुशीलत्वादिकं च वर्णयिता आज्ञापालनादिभिरनुभावैः धृत्यादिभिः संचारिभिश्च तद्गतं वीरस्थायिभावमुत्साहं परिपोषयता तस्य कोऽप्युत्कर्षो ध्वन्यते कुशलेन कविना। प्रसादौजोगुणानुसारी वृत्त्यनुप्रास उपमारूपकोत्प्रेक्षार्थान्तरन्यासश्च तदानुकूल्यमेवाऽऽश्रयन्ति । धर्मतनयस्य आज्ञापालनेन विनयप्रकाशनस्थले माधुर्यगुणानुसारी वृत्त्यनुप्रासोऽपि तरां चमत्कारकः ।तत्र युधिष्ठिरद्वारा धर्मं धृतराष्ट्राज्ञापालनस्य सामान्यार्थेन समर्थनादर्थान्तरन्यासः, भ्रातृजप्रेममार्गगमनाय धृतराष्ट्रस्याऽऽन्ध्ये मातृदोषरूपहेतोरुत्प्रेक्षा, तस्यां प्रेम्णोमार्गरूपकस्यार्थता,

सानुजयुधिष्ठिरस्य सेन्द्रियजीवेनोपमा च स्पष्टान्येव ।

अथ वारणावतपुरे लाक्षागृहवासः, ततो निर्गमनं च वर्ण्यते कविना-यथा -

'सविनयमथ दर्शितं महीयः सचिववरेण पुरोचनेन शत्रोः ।
जतुगृहमभजन्त तत्र पार्था जगदिव नूत्नमशेषवस्तुपूर्णम् ।।'

'तत्र ते विदुरभृत्यभाषितैः सौबलेयशतमन्युहेतुना ।
पञ्चतामपि परां धनञ्जयप्रापणेन जतुधाम्नि मेनिरे ।।'

'शिशमयिषुरपि द्विषां स मन्त्री निभृतशरारुरिमाग्निगूढभावान् ।
अवसरमनलावृते निकेते प्रतिदिनमेधयितुं प्रतीक्षते स्म ।।'

'जातुचिदपत्यैः सह पञ्चभिर्भृत्यभावनिषादमीषामामिषफलेषु विषं निनीषन्त्या निषादयोषित इव तस्य पुरोचनस्य निद्रायामपि द्राघिमाणंदातुकामेन तत्र सद्मनि क्षणदायामाशुशुक्षाणां क्षणाग्निक्षिप्य जननीसोदरजननी चेतरसंवेशसुखमणिमूर्च्छायमानभुजशिखरसीमेन भीमेन तस्माद् गृहाद्विदुरकिंकरकृतमिथया सुरंगया निर्जग्मे ।' २।१९-२१।।

अत्र पुरोचनगतो निषादपुत्रयोषिद्गतश्चाऽवहित्थभावः । मारुतसुतगतश्च वीरस्थायी उत्साहो धैर्यगाम्भीर्यसाहसाद्यैरनुभावैः धृत्यवहित्थामर्षादिसंचारिभिः पोषितो वृत्त्यनुप्रासेनौजोगुणानुरूपेण यमकोत्प्रेक्षोपमादिभिरुत्कर्षितो कामपिचमत्कृतिं विदधाति शतमन्युपञ्चता धनञ्जयगतश्लेषमूलाभेदातिशयोक्तिः, मृत्योर्निद्राधिमरूपप्रकारान्तरेणाकथनात् पर्यायोक्तं च सातिशयांविच्छित्तिं वाक्यार्थस्य विधत्तिः ।

पार्थानां जतुगृहान्निर्गमनानन्तरं तत्राऽग्निज्वलनस्य पौराणां दुःखस्य, दुर्योधनादीनां हर्षस्य च वर्णनमक्रियत कविना , तदुदीक्ष्यते यथा-

'पार्थद्विषां विग्रहमेकमेकं विभज्य सप्तापि शिखाः कृशानोः ।
स्वीकृत्य तृप्ताः स्वशिरः प्रकम्पैः शश्वल्लिरे तत्र समीरपुत्रम् ।।'

'प्रपश्यतां पौरजनानां प्रभाते सांक्रामिकं रोगमिवाधितापम् ।
आबिभ्रतामश्रुभिरेव शान्तिरापादि तत्राग्निहठात्क्रियायाः ।।'

"तत्रालये दग्धतनूनथैतान्निश्चित्य पार्थान्निजवारवाचा ।
दुःखापदेशेन सुयोधनाद्याः समोदबाष्पं ससृजुः सभायाम् । २।२२-२४ ।।"

काऽत्र पार्थविड्डिम्बग्रह तृप्ताग्नेः समीरसूनुश्लाघोत्प्रेक्षावाचकाभावाद् गम्या, तया भीमस्य उचितकारित्वम्, पौरदुःखस्य सांक्रामिक रोगोपमयासद्यो व्यापित्वम्, दुःखाऽपदेशव्याजापह्नुत्या च दुर्योधनादीनां दृष्टत्वं च ध्वन्यते ।

(८) भीमस्य हिडिम्ब वधः

अथ मार्गे भीमसेने हिडिम्बाया आसक्तिः, हिडिम्बेन सह तद्युद्धं, हिडिम्बवधश्च वर्णितो विविच्यते, तद्वर्णनं यथा -

"तावत्सोऽपिगन्धवहसूनुरन्धतमसबन्धुरं सक्थिजवसमुत्थितमरुदुत्पाटिततरुविटपवसतिविघटनसमुद्भ्रान्तशकुनकुलकलनिबद्धनिध्वानमध्वानं विलंघ्य कस्यचित्काननकासारतीरतरोरधिपरिसरमेतानवतार्य तदीयपरिरक्षणविचक्षणः क्षणमवतस्थे ।"

अत्राऽपि मारुतसुतेः वीरस्थायिभाव उत्साहो जननी सहोदरजनानादाय सुदीर्घपथलंघनाऽनुभावैर्न धृत्यादिभिः संचारिभिः पोषित ओजोगुणानुसारिणा वृत्त्यनुप्रासेनयमकेन सुतरामुत्कृष्यते । भीमस्य महावीरत्वं च वस्तुनाऽत्र ध्वन्यते ।

भीमसेनो महावीरत्वेन सह सिंहसंहननोऽप्यासीत् । फलतः पथिहिडिम्बायास्तस्मिन्नासक्तिर्वर्ण्यते - यथा -

"तत्र कापि तरुण्णी तडिदाभा तं ययौ जतुगृहे सुहितेन ।
चूषणाय तमसां वनमार्गे चोदिता हुतवहेन शिखेव ।।"
"अधरोष्ठविभागरेखिका सुदृशोऽस्या वदनेऽस्ति वा न वा ।
इति सा हृदि तस्य संशयं परिमार्ष्टुं किल मौनमत्यजत् ।।"

'एतां प्रशास्ति भुजया वनराज्यसीमामेकः स्वयं नरभुजामृषभो हिडिम्बः।
अर्धांशभाग्जनवधे समन्तकेनतुल्याभिधानपदया स्वसुमान्मया यः ।।'

'वीतशङ्कमिह तैऽथ तिष्ठतः कीदृशे ककुदमित्ययं मम ।
चित्ररंशुभुवि नृत्तकौशलीमुत्तरंस्यति चित्रलासकः ।।'

'रुधिरं पातुकामेन तेन वो हन्तुमीरिता ।
अधरं पातुकामाऽहमस्मि ते रूपसंपदा ।।'

'अथ ते सविधमापतेदसौ हृथमेतदुचितं वचः शृणु ।
मारणं रिपुषु तन्वताऽमुना मा रणं कुरु महान्बलेन सः ।।'

'उपयामविधौ त्वरस्व मे कृपया मारशराः शरारवः ।
दिवि वा भुवि वाऽथ दिक्षु वा रमये त्वामुपनीय रंहसा।।२।२५त३१।।

अत्र 'आदौ वाच्यः स्त्रिया रागः' इत्यभियुक्तोक्त्यनुसारं हिडिम्बागतो भीमसेन विषयकस्तदीय बलवीर्य रूपयौवनादि सम्पदुद्दीपनोरिरंसाभिव्यञ्जकवचनैरनुभावितः औत्सुक्यदैन्यचापल्यादिभिः संचारिभिः पोषितो पूर्वरागाख्यो रतिभावः प्रयात्यास्वादनीयताम् ।तत्र हिडिम्बायां वह्निशिखास्वरूपोत्प्रेक्षाया तद्विद्युपमया च तस्याः सौन्दर्यातिशयोध्वन्यते । तत्र वह्नेः स्वशिखायाः पाण्डवमार्गतमश्चूषणप्रेरणायां तस्य जतुगृहसुहितत्वस्य हेतुत्वावगत्या काव्यलिङ्गमुक्तोत्प्रेक्षाङ्गम् । मौनत्यागे संशयमार्जन फलकत्वस्योत्प्रेक्षाऽपितत्सौन्दर्य व्यञ्जिका । अन्तककृतजनवधार्धांशभाकत्वस्य रक्षसि सम्बन्धाभावेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः तस्य भयङ्करत्वव्यञ्जिका । हिडिम्बानाम्नो हिडिम्बतुल्याभिधानपदत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम्, चित्र-चित्रयोः रंशु-लासकारोपाद् रूपकम् च वाक्यार्थोपस्कारकम् । पाण्डवहननाय प्रेरिताया हिडिम्बायास्तद्भ्रमणा प्रवृत्या अननुरूप संसर्ग कथनरूपं विषमम्, हिडिम्बेन सह रणनिषेधे तस्य महाबलिष्ठत्वस्यउपयामविधौत्वरायां मारशराणां शरारुत्वस्य दिविभुविदिक्षुनीत्वा रमणे च उपयामस्य हेतुत्वावगत्या काव्यलिङ्गत्रयम्, तस्या औत्सुक्यचापल्यादि व्यञ्जनानुरूपम् ।

प्रसादमाधुर्याऽनुसारी वृत्यनुप्रासो यमकं च प्रकृतार्थोत्कर्षकतया सुतरां

चमत्कृतिमादधतितराम् ।

हिडिम्बायां भाष्यमाणायामेवसत्यामागतस्य हिडिम्बस्य तेन सह - भीमयुद्धस्य हिडिम्बवधस्य च वर्णनं समीक्ष्यते , तद्वर्णनं यथा -

" भी इत्यैनां भाष्यमाणां रजनिचरपतिः क्रोधविस्फुलिंगैः स्फुलिंगै-
र्दग्ध्वेवाक्ष्णोरभीक्ष्णं स्फुटघटितभुजास्फोटवाचालिताशः ।
बिभ्राणो बभ्रुकेश्यं त्वमिह वससि को मृत्युवक्त्रार्धजग्धो
दुर्बुद्धे ! तिष्ठ यासि क्व पुनरिति गिरा भैदुरः प्रादुरासीत् ।।
" तस्मिन्रक्षसि नेदिष्ठे तादृक्षापरुषाक्षरे ।
अपमृत्युरिवोदस्थादनिलस्यात्मसंभवः ।।
" वृक्षेण वृक्षं गिरिणा गिरीन्द्रं हस्तेन हस्तं वचसा वचश्च ।
परस्परेण प्रतिरुध्य घोरं समीक्षमेतौ समसादयाते ।।"
" स्वसुः समक्षं स्वयमेव मुष्ट्या बलं बिडौजा इव वज्रसख्या ।
हिडिम्बमेनं यमराजधानीकुटुम्बिमुख्यं कुरुते स्म भीमः ।।२।३२-३५।।

अत्र हिडिम्बा-भीमसेन विषयको हिडिम्बगतः क्रोधस्तदीयनेत्रज्वलन-भुजास्फोटन-परुषवचनाद्यनुभावैः असूयामर्षौग्र्यादि संचारिभिः तथा भीमसेन गतोऽपि हिडिम्ब-विषयकस्तन्मारणायोत्साहोऽभ्युद्यान नियुद्धोद्योगमुष्टिप्रहारादिभिरनुभावैःधृत्यमर्षौग्र्यादि संचारिभिश्च पोषितौ क्रमशो रौद्रवीररसतां परिणतौ सुतरां चमत्कृतिं जनयतः ।तत्र ओजोगुणानुसारिसंयुक्तपरुषाक्षरप्रचुरो वृत्त्यनुप्रासो अनुमानोत्प्रेक्षोपमा पर्यायोक्तान्यानुकूल्येनैवादधति । स्फुलिंगैः- क्रोधानुमानकथनादनुमानालंकारः, तस्यच दाहोत्प्रेक्षायामर्थगता, तया च हिडिम्ब-स्य भयंकरत्व ध्वनिः । भीमे अपमृत्यूत्प्रेक्षाया तस्य सद्यो हिडिम्बमारकत्वं महा बलशालित्वं च ध्वन्यते, भीमे तन्मुष्टौ च इन्द्र वज्रयोरुपमया तस्या अमोघत्वं व्यज्यते । भीमो हिडिम्बं हतवानिति वस्तुतः प्रकारान्तरेण कथनात् पर्यायोक्तालंकारोऽपि चमत्कारकोऽत्र वाक्यार्थोपस्कारकतया ।

प्रभात वर्णनम्

एवं राज्ञ्यन्धकार एव भीमेन हिडिम्बवधो विहितः -

" तदनु तिमिरकदम्बेनेव हिडिम्बेन निर्मुक्तात्तस्मादहर्मुखादिव वनात्संध्ययेव सरागया तया कमलपालिकया सह तपनभावव इव राजसूनवस्ते निष्क्रम्य शालिहोत्रमुनेः सरसि वीतिहोत्रभासं व्यासं भगवन्तमासेव्य तत्र तन्निदेशाद्कहानि कतिचिदतिवाह्य ब्रिबकुः ।" २।३५।(गद्यम्)

अत्र उपमान विधया कृतं प्रभात वर्णनं रोचकमेव । तत्र तपनभानूपयुक्त राजकुमाराणां तेजस्वित्वं वीतिहोत्रोपमया च व्यासस्य महामहिम शालित्वं - ध्वन्यते ।

अथ घटोत्कचोत्पत्तिवर्णनमीक्ष्यते तद्वर्णनं यथा -

" पुत्रं तत्र घटोत्कचं पवनभूसंसूदनंसूतुरा

प्राप्तं सर्वगुणैर्मनोजवसतां प्रासूत नक्तंञ्चरी ।

कुर्या वः स्मृत एव कर्मसु हरेः शक्तेरपि ध्वंसना-

मित्युक्त्वा स पितृन्यथाभिलषितं युक्तस्तया निर्ययौ ।२।३६।

अत्र घटोत्कस्य मनोजवसतया भीमतुल्यकथनाद् उपमाया अनुप्रासस्य च-छटा दृश्यते ।

(८) बकवधः

अथ पाण्डवानां बकरक्षोवासकाननतटस्थैकपुरी प्रवेशो भिक्षाचर्यया निर्वाहश्च वर्णितो विविच्यते तद्वर्णनं यथा -

' ततस्ते वन्याशनैर्धन्या धारितवसुधासुधाशनाकृतयः प्रावृषमिव बकबलाक्रान्तां पातालभुवमिव प्रत्यहंश्रवर्धमानबलिशोकार्मुग्रराज्यसीमामिव सूर्यतनयानुकूलप्रतिष्ठां रविरथादाधुरमिवैकचक्रां पुरीं क्रमादाक्रम्य कस्यचिद्गृहमेधिनो गृहमध्यमैत्य सुखमध्यवात्सुः ।'

' भिक्षामटद्भिरथ तत्र पृथाकुमारै-
र्धर्मं विभज्य पृथगर्पितमन्नराशिम् ।
आकण्ठमभ्यवहरन्निखिलैः प्रतीकैः
पुत्रो बभूव मरुतः पुनरुक्तपोषः ।।'

' तत्र तत्र द्विजैरेते पृष्ठा नाशं पृथाभुवाम् ।
इत्यूचुर्वयमत्रैव विद्मस्तेषां तु संस्थितिम् ।।'

' यद्दोष्णा केनापि हतो हिडिम्ब इति ब्रुवाणेषु मिथो द्विजेषु ।
आकूतगर्भं हसितं सगर्व्याश्चक्रुर्मुखं वीक्ष्य समीरसूनोः ।।' २।३७-३९ ।।

अत्र यमकानुप्रासप्रयोगः एकचक्रपुर्यां कर्कश श्लेषमूलकाभेदातिशयोक्तिमूलकमालोपमायाः पाथानां पौरजन प्रश्नोत्तरे संस्थितिगत श्लेषः भीमसेनविषयकस्तस्य यद्दात्वमूचकैंगितैस्तद्बन्धुगतोहासश्चातितरां चमत्कुर्वन्ति ।

अथ बकक्रौर्यभीत विप्रपत्नीशोकः कुन्तीकृततदाश्वासनं च वर्णितं कविकृतं समीक्ष्यते , तद्वर्णनं यथा -

भयानकरसः

' एकदा सायमन्तर्गृहे निरवग्रहं निष्पतद्भिरश्रुबिन्दुभिर्वाष्पैस्तरङ्गितोत्तमाङ्गमपत्यमुत्सङ्गभुवि पुरोधाय यातुधानापराधभयानुरोधेन मन्दितं क्रन्दितमुत्सृजन्तीं कुन्तीं समुपसृत्य विषादनिदानं विप्रायताक्षीमप्राक्षीत् ।'

' सापि तां कृपालुतया हृदि लगद्गलद्गां गद्गदाक्षरमाचचक्षे ।'

' साध्वेयमिति धर्मसंग्रहं संदधाति मिथुनं परस्परम् ।
आधये परमनेकजन्मनोरावयोरजनि पापसंग्रहः ।।'

' अयि ! किं ब्रवीमि परिपाकमंहसामतिभीषणो बक इति द्विषाचरः ।

स्वसुरादरात्स्वयमिवागतो यमो यमुनावनान्तमवलम्ब्य वर्तते ।।'

'मा भून्नाशो युगपदिति नौ भीरुभिर्जातु पौरैः
पूर्वैर्लब्ध्वाऽवसरमसकृत्प्रार्थनाभिः प्रकल्प्तम् ।
एकैकस्मिन्नहनि वितरत्येकमेकं पुमांसं
नित्यं तस्मै बलिमिह जनस्तुभ्यमन्नस्य राशिम् ।।'

'तादृशः प्रलयकालकठोरो वासरः स तु ममालयभूमेः ।
द्वारि तिष्ठति बकात्परितुष्टात्पारितोषिकमिवाथ जिघृक्षुः ।।'

'बालानिव प्रवयसोऽपि नराशनोऽयं
मुञ्जीत चेन्मम स एव हि पुण्यपाकः ।
बालेन भाव्यमिति तद्बलिषु व्यवस्था
कण्ठे पुनः कलयति क्रकचस्य घाटीम् ।।'

'संतानमूलमिदमेकमपत्यमास्ते
संवर्तकालसहजश्च स राक्षसेन्द्रः ।
संभूयते च समयः कृपया महत्या
संतीर्यतां कथमियं सखि ! मे विपत्तिः ।।'

'इत्युदीर्य सरभसावगाहनहृदयसमुत्कूलितं शोकसरःपूरमिव नयनसलिलं विशृंखलं खेलयन्त्यै तस्यै तनयेषु द्वितीयः समरेष्वद्वितीयः सुतः सखि ! ते दीयते । स एव तत्प्राणनाशने बली भविष्यति । मा भैषीः' इति सा नरदेवमहिषी-प्रत्यश्रौषीत् ।'

'अनयोरथ दम्पत्योरक्षुहेतोः शुचः पदे ।
आनन्दस्यातिरेको भूदादेश इव तत्क्षणम् ।।' २।४०-४६ ।।

एवं विप्रपत्न्या रोदनं, कुन्त्यास्तत्कारण प्रश्नः , विप्रपत्न्याः स्वशोककारणस्य स्वपुत्रमाविनाशस्यकथनं,कुन्त्यास्तदाश्वासनं च वर्णितं कविनाऽति सहृदयतया । तत्रविप्रपत्न्या माविपुत्र नाशालम्बितः तद्रूप सौकुमार्याद्युद्दीपितः रोदनाश्रुमोचनादिभिरनुभावितः , बकभयतैन्यविषादादि संचारिभावैः परिपोषितः शोकस्थायिभावकः करुणः परिष्पंश्चमत्करोतितरां सुतराम् ।-

पौरजनगतश्च मयस्थायिको बकालम्बनकस्तत्क्रौर्यादीपितः ,बलिसम्पादनाग्रसंको चाथनुर्भावितः,दैन्यावेगादिभिःसंचारिभिः पोषितो भयानकःपरिपुष्यन्ना स्वाद्यतामासादयति ।कुन्तीगतश्च विप्रदम्पति पौरजनापन्निवारणविषयक-उत्साहो निजद्वितीय पुत्र विश्राणनप्रतिश्रुत्यनुभावितः विषादधृतिमत्यादिभा वैश्चपरिपुष्यन्नुदयावीररसतामासादयन् हरति सहृदय हृदयम्।तत्र धर्मसंग्रहायक्रिय माण यत्नेन पापसंग्रहोत्पत्ति कथनरूपेण विचित्रालंकारेण(१)नयनसलिले शोक सरःपूरत्वेनोत्प्रेक्षा,बालबलिव्यवस्थाया क्रकचघाटीकलननिदर्शनया च शोकः उप स्क्रियते।बकबलिदिवसस्य प्रलयकालोपमया तदुपस्थितौ च परितुष्ट यमपारितोषि क-ग्रहणेच्छाहेतुत्प्रेक्षाया,बकस्य यमत्वेन उत्प्रेक्षाया संवर्तकालोपमया भयमुत्कृष्यते । कुन्ती कथने भीमवर्णने द्वितीयत्वादिनोल्लेखेन(२)भीमस्यबकसंहारक्षमत्वंव्यज्यते । शोकमय-वर्णने मृदुमधुराक्षरघटितेनदयावीरवर्णने च ओजस्विवर्णघटितेन वृत्य नुप्रासेन च तत्तद्रसानुगुणा-माधुर्यादि गुणानुसारिणा परमं नैपुण्यमुद्भावितं क विनाऽत्र । विप्रदम्पति शोकनिवारणेन कुन्त्याः कोऽपि भक्ति महिमाभिव्य ज्यते।विप्रदम्पतिगतत्वेन व्यज्यमाने हर्षे आदेशोपमाया उत्कर्षकत्वमेव ।

अथ कुन्त्या भीमसेनाय विप्रदम्पत्याश्वासनवृत्त निवेदनम्,भीमसेनस्य अन्नराशिशकटेन सह बकाभिमुखगमनम्,बकवनप्रवेशः,बकस्वरूपम्,तयोर्युद्धम्,बकस्य-वधः,आकृष्यपुरीपरिसरे तदानयनम्,विप्रैः साशीर्वादं भीमाभिनन्दनं च वर्णितं कविना विविच्यते तद्वर्णनं यथा-

हास्यरसः

"तमिमं प्रसुवा रहस्युदन्तं गदितो वायुसुतो बलावलेपात् ।
मनसा न बकं लिलेह राज्ञ्यामनसा धारितमन्नराशिमेव ।।" २।४७

अत्र बकचिन्तनाभावो भीमस्य निर्भयत्वं,शकटपरिमितान्नराशि चि

---

१ विचित्रं चेत्प्रयत्नस्य विपरीत फलोदयः।। चन्द्रालोके ८।२५। कुवलयानन्दे ।। ९४

२ एकस्याऽनेकधोल्लेखो यः स उल्लेख उच्यते ।। १०।३७। साहित्यदर्पणे ।

न्तनं च तस्य प्रियभोजनत्वं प्रत्याययत: ।मुखक्षालनात् प्राक् मनसा कवलग्रहणा-
म्भस्तस्य भोजनायोत्सुक्यं चञ्चलत्वं व्यनक्ति । महाशन: स, तस्य भोजनचिन्तन-
चालम्बनादीपनौ गम्यामुखविकासादयोऽनुभावा:, हर्षादय: संचारिभावाश्च सहृ
दयगतं हासं परिपोषयन्तो हास्यरसत्वेन परिणमयन्ति ।तत्र लेहने बकवधपोह-
न पूर्वकान्नशकटस्थापनेन परिसंख्यालंकार: । यमकानुप्रासाश्च तत्राऽनुकूल्यं श्रयन्ति ।

'अन्येद्यु: प्रात: -

'सशकटमधिरुह्यभीमसेनो
दधिकलशीकुलशीभरान्तराशिम् ।
बकभवनवनं विवेशशाखा-
नगरमिवाऽन्तकवीरराजधान्या: ।।'

'ककालोच्चयकल्पितान्तकचमूशाटीकुटीविभ्रमे
तत्र क्रुद्धतदौपवाह्यमहिषश्वासोग्रचक्रानिले ।
गृध्रध्वाङ्क्षशृगालघोषविकसद्रक्षोपदानस्तवे
भुञ्जान: शकटस्थ एव स तदा चक्रे महत्कैवलिम् ।।' २।४८-४९ ।।

अत्र बकभवनवनस्य अन्तकवीरराजधानीशाखानगरत्वोत्प्रेक्षाया ककालोच्च
यानां अन्तकचमूशाटीकुटीविभ्रम निदर्शनया(१) गृध्रादि घोषो रक्षा: स्तवाभेदप्रती
त्या निर्वर्तनरूपकेण च भयंकरत्वं सुतरामुत्कृष्यते । तादृशभयावहस्थलेऽपि निर्भ-
यत्वेन नि:शूकबल्यन्न भोजनेन च भीमस्य महावीरत्वं ध्वन्यते ।

'एवं को वाऽपराध्नोत्यमुमविगणयन्बाहुमत्रेति घुष्यन्
व्यक्तोरोरक्तरेखाकृतबिरुदजगद्धातुकत्वप्रशस्ति: ।
क्रोशन्मत्यार्द्रखादत्वरणपरिचलत्सूक्कलग्नास्थिदण्ड-
स्थूले दंष्ट्रे दधान: पवनभुवमपि प्राद्रवद्धातुधान: ।।'

---

१ संभवन्वस्तुसम्बन्धोऽसंभवन् वाऽपि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं दर्शयेत् सा निदर्शना ।।'
साहित्यदर्पणे ।१०।५१ ।।

"निजभुजयुगलीनियन्त्रणाभिर्नियमितयत्नपरस्परावुभौ तौ ।
निगडितनयनं निलिम्पपक्षैर्निरवहतां निपुणं नियुद्धशिल्पम् ।।२।५०-५१।।

अत्र यातुधानकनिष्ठोभीमसेनविषयको क्रोधः कटुपरुषरटनाऽभिद्रवणादिरनुभावैः ~~क~~० चापल्यगर्वावेगोग्रत्वादिभिः संचारिभावैः पोषितो रौद्ररसत्वेन परिणमति ।तत्र "अमुम्" इति पदवाच्यस्य सर्वसंहारकत्वरूपार्थे संक्रमणात् अर्थान्तरसंक्रमितध्वनिः तदृगर्वं व्यनक्ति । यातुधानालम्बनको भीमसेननिष्ठस्तन्मारणाय उत्साहश्च यातुधानयत्ननिरोधादिभिरनुभावैः धृतिगर्वामर्षादिभिः संचारिभिः पोषितो वीररसत्वेनाऽऽस्वादनीयो भवति । तत्र - रौद्रविभावानुभावेषु परुषसंयुक्ताक्षरघटितदीर्घसमासप्रचुरा उत्कटा गौडीरीतिः, उरोगतरक्तजगद्धातुकत्व प्रशस्ति रूपकम्, दंष्ट्रासु प्रस्थितदण्डोपमा च रौद्रमुत्कर्षन्ति । तथा वीररसे च नकारघटितवृत्त्यनुप्रासो चतुष्पदानां समाससद्भावात् किंचिदपकृष्टा गौडीरीतिश्च चमत्करिणौ ।

"ततः -

""पुत्रस्य वायोर्भुजदोर्लिलित्यं बकं वने तत्र चिरं चरन्तम् ।
निन्ये दशां कामपि राक्षसस्त्रीनेत्राम्बुवर्षर्तुविलासयोग्याम् ।।" ।२।५२।।

अत्राऽपि भीमगतोत्साहस्थायिको वीरस्तस्य भुजप्रहारादिभिरनुभावैः धृत्यादिसंचारिभिश्च सुतरां परिपोष्यते । "कामपि दशां निन्ये" इत्यादिशब्दैर्बकस्य मृत्युकथनरूपः पर्यायोक्तालंकारोऽभ्रूपकनिष्पादितोऽपि तत्राऽनुकूल्येन चमत्कारमादधाति ।

"तं विकृष्य पुरसीम्नि निशीथे तत्क्षणात्कुणपमर्शनदोषम् ।
मार्ष्टुकाम इव मारुतसूनुर्मातुरङ्घ्रिमुपसेवितुमागात् ।।
"आलोक्य यातुशवमेतदशेषपौरैरन्होमुखे परवशीक्रियते स्म चेतः ।
आश्चर्यपूरपरिमेलनफेनिलाभिरानन्दसागरतरङ्गपरम्पराभिः ।।
"भवनमेत्य तदा गृहमेधिनः पवनजे प्रवणीकृतमूर्धनि ।
प्रयुयुजे समभाशिषमक्षतैः प्रमुदितः पुरि तत्र महाजनः ।।" २।५३-५५।।

अत्र प्रथमपद्ये भीमगतो वीरस्थायुत्साहस्तस्य मृतराक्षसशवस्य पुरनिक

टानयनादिभिरनुभावैः धृत्यादिभिः संचारिभिः पोषितः कामपि चमत्कारभूमिमाधत्ते । मातृचरणसेवने कुणपस्पर्शदोषापाकरणेच्छा हेतूत्प्रेक्षावृत्यनुप्रासश्च तत्र सुतरामनुकूलौ ।

द्वितीय पद्ये यातुधानशवालम्बनकः पौरजनगतोऽद्भुतरसस्थायी विस्मयः उन्मेषरोमांचस्तम्भादिभिरनुभावैर्जाड्यहर्षादिभिः संचारिभिश्च पोषितः सहृदयानन्दाय कल्पते । आश्चर्ये पूरकत्व सम्बन्धातिशयोक्तिः, आनन्दे सागररूपकं, वृत्यनुप्रासश्च तदुत्कर्षाय कल्पन्ते आनुकूल्यं श्रयन्तः। आश्चर्यपूरमेलनकेनिलत्वेनआनन्दसागर तरंगाणामुत्कर्षो द्योत्यते ।

तृतीय पद्ये च पौरमहाजनगतो भीमसेन-विषयको रतिभावस्तदीयमहावीरत्व- राक्षसवध- पौरजनापन्निवारणोद्दीपितो तदीयाऽभिनन्दनेनाऽनुभावितः सुतरां चमत्कारमादधाति । प्रसादमाधुर्यगुणौ सर्वत्र संप्रयुक्तौ नितरामुपयुक्तावेव ।

(६) द्रौपदी विवाहः

अथ पार्थानां द्विजाद् द्रौपदी स्वयंवरवार्ता श्रवणम्, पाञ्चालपुरप्रस्थानम्, मार्गे चित्ररथगन्धर्वेण युद्धं मैत्री च , पाञ्चालपुरप्राप्तिः, कुलालगृहेवासः, स्वयंवरमण्डप प्रवेशः, द्रौपद्याः स्वयंवरमण्डपागमनम्, धृष्टद्युम्नघोषणा, राज्ञां लक्ष्यभेदप्रयासे वैफल्यम्, अर्जुनस्य तद्भेदेन साफल्यम्, द्रौपदीमादायस्वयंवरमण्डपान्निष्क्रम्य कुलालगृहं चागत्य मातृचरणवन्दनम्, च वर्णितं विविच्यते साम्प्रति, यथा -

"निशि जातु निकेतवेदिकाया निकटे सुप्तिसुखं निशोव्य पार्थाः ।
पथिकोऽपररात्रजागरूकः प्रबभाषे गिरमीदृशीं प्रसूतात् ।।"

'पाञ्चालिकां युवमनोरथसौधरत्न-
पाञ्चालिकां हृदि ममेति ममेति कृत्वा ।
अथ स्वयंवरमहाय नृपाः प्रयान्ति
दूतैः समं द्रुपदभूपतिराजधानीम् ।।'

'भोक्तुमन्नमपि सूपसमग्रं दोग्धुमप्यभिनवप्रसवा गाः ।
लप्स्यते द्विजगणोऽपि च तस्माद्वत्सलाद्दुहितुरुत्सवकाले ।।'

'न हि तत्र भवेदपार्थता विजयः सिद्धिमुपैष्यति स्फुटम् ।
युगपत्सुखमस्तु वो महद्भुतमागच्छत तन्महोजसः । ।।'

'इति वाचमुपश्रुतिं द्विजातेर्हृदि कृत्वा सुधयेव निर्मितां ताम् ।
पथि भूसुरसंघमैध्यमाजः प्रति पाञ्चालपुरं प्रतस्थिरे ते ।।' २।५६-६० ।।

अत्र द्विजमुखोद्गतायामुपश्रुत्यां पाञ्चालिकायाः स्वयंवरे श्लेषेण 'पार्थो पस्थितेरनिवार्यरूपेण आवश्यकतांप्रदर्श्य पार्थेषु विजय एव सिद्धिं प्राप्स्यती'ति सूचितः, तेन अर्जुनस्य कोऽप्युत्कर्षः प्रत्यायितः। युवमनोरथसौधरत्नपाञ्चालिकारोपात् रूपकेण पाञ्चालिकायाः परमरमणीयता वाञ्छनीयता च प्रकाशिता । उपश्रुतेः सुधानिर्मितत्वोत्प्रेक्षाया प्रकृतार्थोपस्कारः ।

'साक्षात्प्ररोहता भुजप्रतापानलेनेव फाल्गुनकरवेल्लितेन महता लाततेजसा निशि नितान्तसीमन्ततसंतमसया पदव्यात्रिविष्टपतटिनीं समया प्राविक्षत् ।'

अत्राऽपि अर्जुनगतोत्साहः स्वयंवरप्रदेशगमन विषयकः अलाततेजो ग्रहणानुभावितः धृत्यादिभिः संचारिभिः पोषितस्तस्य कमप्युत्कर्षं प्रकटयति । तत्राऽलाततेजसि भुजप्रतापानलोत्प्रेक्षा प्रकृतोपस्कारिका ।

'इन्दीवरात्प्रतितरङ्गमनुप्रविष्टै-
र्बिम्बैरिवाब्धिदुहितुस्तरुणीकदम्बैः ।
क्रीडन्समं पयसि चित्ररथो विलोक्य
पार्थान्रुरोध कुपितः प्रथनं चिकीर्षुः ।।
'अस्त्रमात्मसमनामदैवतं संप्रयुज्य समरे धनञ्जयः ।
तत्र तस्य रथमग्रवर्तिनं जातुषालयसहायमातनोत् ।।'

"गन्धर्वाणां पत्युर्गर्वजुषः सौरसेन्धवे तस्मिन् ।
पाथसि मङ्क्षुः शिशिरो रोधसि मङ्क्षुस्तु तापहेतुरभूत् ।।"
"सख्यस्य लाभात्सपदि प्रहृष्यन्कुशीलवेन्द्रः कुरुनन्दनानाम् ।
प्रादर्शयत्स्वां प्रथमं विनीतिं पश्चादमीषां पदवीं च रम्याम् ।।२।६१-६४

अत्र प्रथमपद्ये चित्ररथगतः शृङ्गारः पश्चात् पार्थानामागमनेन स्वजलकेलि विघ्नमवधार्य पार्थविषयकः युद्धोत्साहो दर्शितः तत्र जलधिकन्याबिम्बस्वरूपोत्प्रेक्षाया शृङ्गारालम्बनभूत तरुणीनां कोऽपि स्वरूपोत्कर्षः प्रकटितः । शृङ्गारे माधुर्यानुसारी मधुराक्षरघटितो वीरे च ओजोऽनुसारी संयुक्ताक्षरघटितो गुम्फः वृत्त्यनुप्रासश्च चमत्करोतितराम् । अत्र आग्नेयास्त्रस्य घर्मांशुसमनामदैवत रूपप्रकारान्तरेण, रथदग्धत्वस्य च जानुष्णालय सहायकरणरूपप्रकारान्तरेणकथनात् - पर्यायोक्तद्वयं रुचिरतरम् ।

द्वितीये चित्ररथालम्बनकः पार्थगतोत्साहः अस्त्रसन्धानादिचेष्टानुभावितः धृतिगर्वादि-संचारिभिः पोषितश्चमत्कारी । ओजोगुणानुसारी गुम्फो वृत्त्यनुप्रासश्च तत्राऽनुगुणो ।

तृतीये चित्ररथस्य पराजयः चतुर्थे च तस्य पार्थैः सहसख्यं तेषुविनयः-तान् प्रतिसख्यानुरूपरम्यमार्गदर्शनमवर्ण्यत । तेनाऽपि अर्जुनस्य कोऽप्युत्कर्षः प्रकाश्यते, तत्र तेनैव पराक्रान्तत्वात् । अत्रपङ्क्तिदीपकपदस्याऽवृत्या आवृत्तिदीपकम् (१) प्रदर्शनस्यविनीतिपदवीरूपकृत कर्मद्वयेन सम्बन्धात् तुल्ययोगिता च रुचिरे । छेकवृत्त्यानुप्रासावप्यत्र चमत्कारिणौ।

"धर्मभूरथ सहोदरैः समं धौम्यमध्वनि समीक्ष्य विश्रुतम् ।
प्राणिनामयमहिंसकोऽपि सन्पादपीडनमुषं कृप्तवान् ।।२।६५ ।।

अत्र पार्थानां धौम्यमुनि विषयको रतिभावो व्यज्यते । अहिंसके पादपीडनस्याऽननुरूपत्वाद् विषमालंकारोऽत्र चमत्कारकः ।

---

१ ---- दीपकावृत्तौभवेदावृत्ति दीपकम् ।।

"यथाऽऽतिथ्यविधौ प्रीतः स पुरस्कुरुते स्म तान् ।
तथाऽध्वगमने तेऽपि तं प्रश्रयवशंवदाः ।।" २।६६।

अत्र धौम्यमुनेः पार्थविषयकः पार्थानां च धौम्यमुनिविषयको रतिभावो व्यज्यते । परिवृत्यलंकारश्च(१) तदुपस्कारकः ।

"धौम्यस्य सुधामधुरिमधौरेयीभिः स्वयंवरकथाभिः ।
द्रुपदपुरःसरणिरेषां द्वित्राण्यभवत्पदानीव ।।"
"भूदेवेष्वक्षिति निबिडेषुमध्यभाजां पञ्चानामपि युगपत्पृथासुतानाम् ।
पुस्फोर द्रुपदपुरं पुरःप्रदेशे वक्त्राब्जे सरभसमक्षि दक्षिणं च ।।" २।६७-६८।।

अत्र प्रथम पद्ये उपमोत्प्रेक्षायोः वाक्यार्थोपस्कारकत्वं रुचिरम् । द्वितीय पद्ये ~~स्फुरणक्रियाकर्तृकस्फुरणक्रियाकर्तृक~~ स्फुरणश्लेषानुप्राणिताऽभेदातिशयोक्ति मूलिकायातुल्ययोगितायाः एकया स्फुरणक्रियया द्रुपदपुरदक्षिणनयनाभ्यां योगात् चमत्कारो द्रष्टव्य एव सचेतसाम् ।

"कुमारिकायाः द्रुपदस्य भूपतेः कुचोपमाद्रव्यमिवाभिवीक्षितुम् ।
कुरुद्वहास्तत्र पुरे कुतूहलात्कुलालगेहं प्रथमं समाविशन् ।।" २।६९।।

अत्रोत्प्रेक्षा वाक्यार्थोपस्कारिका रमणीया ।

अथ स्वयंवरमागतानां भूधानां वर्णनमीक्ष्यते , यथा -

"तामागमन्नथ पुरीं शतशः ससैन्याः
स्मारं युगोदयमिवाद्भुतमावहन्तः ।
भूपाः स्तुता भुजमुदस्य पठद्भिरग्रे
पद्यं निबद्धविरुदं पटुबन्दिवृन्दैः ।।२।७० ।।"
"द्यावाभूमी निरुन्धन् यदुबलरजसां श्रेणिभिः सीरपाणि-
र्वेगादागात्स वीरः स्वविनयगुरुणा शौरिणाऽन्वीयमानः ।
आहारश्चायुधं च द्विषदवमतये येन संसेव्यमाने

---

१ परिवृत्तिर्विनिमयोन्यूनाऽभ्यधिकयोर्मिथः । ११२ । कुवलयानन्दे ।

तै द्वै हालाशलत्वं रणमुवि वहतो नामतः कृत्यतश्च ।।'

'बिभ्राणो मणिदीप्र कुण्डलभरं कर्णत्रयं पार्श्वयो-
रंगे चातिमनोज्ञरूपमखिलेष्वंगेषु दुर्योधनः ।
सेनादुन्दुभिनादतुन्दिलनभाः स्वस्यानुबिम्बायिते-
रासीदत्स नवाधिकैः परिवृतप्रान्तो नवत्यानुजैः ।।' २।७०।७२ ।

अत्र प्रथमपद्ये राज्ञां, द्वितीये सीरपाणेः, तृतीये दुर्योधनस्य उत्साहो व्यज्यते , तदुपस्कारकतया प्रथमस्मारयुगोदयौत्प्रेक्षा राज्ञां रुचिरत्वं वीरत्वं च व्यञ्जयन्ती ,द्वितीये हालाहल शब्दगतश्लेष-मूलकतुल्ययोगिता बलस्यातिबलत्वं द्योतयन्ती तृतीये श्लेषश्चोपस्कुर्वन्ति तद्गतमुत्साहम् ।

अथ स्वयंवर वर्णनं समीक्ष्यते , तद्वर्णनं यथा -

'तदनु परितः कीर्णैः पुष्पैस्तरङ्गितसौरभं
मणिमयमहास्तम्भारूढावनीन्द्रपरम्परम् ।
अगरुजनितैर्धूपैरालिह्यमानवितानकं
स्वनितपटहं प्रापुः पार्थाः स्वयंवरमण्डपम् ।।'

'जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्यय-
प्राप्तेन्दीवरनित्यवासघटितश्यामप्रभा श्रीरिव ।
पाञ्चालस्य सुता ततः परिजनैः सार्धं पुरः पश्यतां
राज्ञां बुद्धिमिवाधिरुह्य शिबिकां रङ्गस्थलीं प्राविशत् ।।'

'द्रौपदीमुखशशिद्युतिसंपत्कौमुदीमहति रङ्गतटाके ।
पद्मचक्रयुगलं नृपतीनां तत्क्षणं विजघटे बहुदूरम् ।।'

'तां पश्यतः सदसि तस्य महीसुराणां
वामेतरे महति वासवनन्दनस्य ।
अन्तर्बलस्य सपदि प्रकटीबभूषो-
रुद्वेलनं किल भुजे स्फुरणं बभूव ।।'

तदनन्तरं सरभसमुपेत्य साक्षादादेष्टुमनाः प्रद्युम्न इव धृष्टद्युम्नः साय के: साकं सकाशमुपनीतं स्वयंवरदिदृक्षाया सपरिवारं प्रत्यासन्नमिव पन्नगपतिं वा

पं पुरस्कृत्य कन्यावलोकनधन्यान् राजन्यानेवमवादीत् -

'बाणेन संप्रति नृपा ! दिवि लक्ष्यमेत-
तच्छायवद्भुवि निपातयितुं पटुर्यः ।
मौर्वीमिमामिव स दक्षिण एव पाणौ
कुर्यात्स्वसारमभिदर्श्य मम स्वसारम् ।।'

'इत्थं प्रगल्भमुदिता रभसेन पीठा-
दुत्थाय चापमुपसृत्य करेऽपि कृत्वा ।
आत्मानमेव कृतयत्नमनेषुरार्तिं
मौर्वीलतां न तु महीपतिपक्षतयास्ताः ।।'

'दृष्ट्वाथ राजकमिदं द्विजसंघमध्यान्निर्गत्य संसदि निलिम्पपतेः कुमारः ।
चापे शरं करधृते समधत्त लज्जां भूपेषु भूरि कुतुकं वसुधेन्द्रपुत्र्याम् ।।

'वीरेण तेन विशिखेन विलूनमूलं
चक्रभ्रमेण पतयालु तदा शरव्यम् ।
अस्मिन्समाजवलये त्वयमेव दोष्णा -
नित्याहिताभिनयलीलमिवाबभासे ।।'

तदानीम् :-

'निष्पतत्सुरकरांजलिपुंजोत्पुष्पवर्षमभितः कुरुवीरम् ।
मन्दहास इति विक्रमलक्ष्म्याः संदधे सकलवेतसि बुद्धिम् ।।'

'पार्श्वालपुत्रीग्रहिताः कटाक्षाः पाण्डोस्तनूजं परितो ववलुः ।
मालिंग्य मालाऽवतरेदिहेति माध्वीलिहः पूर्वमिवोपयाताः ।।'

जनानान्तरनेत्रवारिसृष्टत्रिपथाहेमपयोजगुम्फितेव ।
बलवैरिभुवस्तयाधिकण्ठं वरणे चम्पकमालिका वितेने ।।'

'तदनु स महावीराग्रेसरः समग्रगुणशेखरितां नरपतिसुतामिव शरासनलतां मुद्वहन्राज्ञां बलमवज्ञाय समाजात्कोदण्डमाश्चक्राम ।' २ । ७३-८३ ।।

अत्र प्रथमपद्ये माधुर्यौजः प्रसादानां मधुरप्रसन्नवीरपरम्परावर्णनानुसारिणां तदनुगुणावृत्त्यनुप्रासस्य यमकस्य च चमत्कारो द्रष्टव्य एव । स्वयंवरे वस्तु

सम्पदुत्कर्षसाधितत्वस्य महावीरवर्णनस्य च गुणीभूतत्वात् उदात्तालंकारोऽप्यत्र रमणीयः ।

द्वितीयपथे पाञ्चालसुताया वीरावलीबुद्धेरपि आधारीकरणेनाऽधिग्रहणात् वीराऽतिशायित्वेन, पाञ्चाल सम्बन्धस्य च विधेयत्वेन दर्शितत्वात् महावीरजत्वेन, च किमप्योजस्वित्वोत्कर्षोध्वन्यते । अतस्तत्सम्बन्धिन्यां श्रीस्वरूपोत्प्रेक्षायामपि पादद्वयनिर्वर्त्य दीर्घ समाससंयुक्ताक्षरप्रचुरपदावली पूर्णा गौडीयारीतिरत्र प्रयुक्ता कविना सुतरां शोभावहा । उपमोत्प्रेक्षे अपि सुतरामनुकूल ।श्रीत्वेन उत्प्रेक्षाया स्वरूपोत्कर्षःबुध्द्युपमया च ओजस्वित्वोत्कर्षः प्रत्याय्यते ।

तृतीयपथे नृपतयो विस्मार्म चक्षूंषि द्रौपदीं द्रष्टुमलगन्नितिवस्तुनः प्रकारान्तरेण कथनात्मके पर्यायोक्तालंकारे मुखशशीत्यादि समस्तवस्तु विषयकसार्ङ्ग रूपकस्यार्ङ्गिताऽतीव रुचिरत्वापादिका, पर्यायोक्तस्येदृक् सुन्दरमुदाहरणंनान्यत्र प्राप्येत । पर्यायोक्तेन नृपाणां विस्मयाऽभिभूतता, तया च द्रौपद्याः सौन्दर्योत्कर्षस्य लोकोत्तरत्वं ध्वन्यते । प्रसाद माधुर्याऽनुगुणा वृत्यनुप्रासोऽपि चमत्कारकः । विरोधिनां विघटन वर्णने मनाग ओजो गुणानुसारिण्या दीर्घ समास घटित गौडीयरीत्या अप्यनुकूलत्वम् ।

चतुर्थपथे स्वयंवरे अर्जुनस्य भुजस्फुरणेन द्रौपदीलाभरूपमाविर्मूलं सूचितम् । प्रकारेणाऽनेन स्वयंवरमहानायकस्य तस्य स्मरणं सर्वथा समुचितम्, अन्यथा महाराजाधिराजं कमपिशरेण विध्यतो लताद्यन्तर्हितस्य कस्यचित् शबरस्येव द्विजसंघमध्यान्निष्क्रम्यलक्ष्यं सहसा पातयतोऽर्जुनस्य कोऽप्युत्कर्षो सहृदय पाठक हृदये ष्णोदीपात् । भुजस्फुरणस्य अन्तर्बलोद्वलनत्वेनोत्प्रेक्षा चाऽत्र सुतरामनुकूलाऽर्जुनस्य करिष्यमाण लक्ष्यपातन योग्यता सूचिका ।प्रसादस्य यथायुक्त प्रयुक्तयो र्माधुर्यौजसोश्च सन्निवेशोऽपि चमत्कारकः ।

ततो गधे- स्वयंवरसमेतान् राजन्यान् प्रति धृष्टद्युम्नवचनम् । स्वयंवरः कोऽपि वीरजनानां निकषदेशः । तत्रराजन्यानामाह्वानेन तान् प्रत्यादेशेन चतद्रूपेक्षाया कोऽप्युत्कर्षो धृष्टद्युम्नस्य प्रतीयते । तस्मिन् प्रद्युम्नोत्प्रेक्षा चात्र सु

तरामनुकूला, तस्य रूपतेजो बलौजस्वित्वादि प्रत्यायिका । चापे पन्नगपत्युत्प्रेक्षया ना यं साधारणजनवशीकरणीयः , महावीरेणैवाऽत्रेष्टव्यमु इतिध्वन्यते । राजत्यानां कन्यावलोकनधन्यत्वोक्त्या तेषां साफल्यस्य एतावतैव समाप्तिः सूचिता । अत्र माधुर्यौजोगुणानुरूपारचना वृत्त्यनुप्रासश्च यथायुक्तमेव प्रयुक्तौ कन्यावलोकनधन्यत्वस्य धृष्टद्युम्नगतोत्साहस्य चाऽनुकूलावेव ।

पंचमपद्ये - लक्ष्यस्य बाणेन स्वच्छायवद्भुविपातनसामर्थ्यरूपं शूरत्वं कन्यायाः प्रतिवादयतिवचने प्रसादौजोमाधुर्यगुणानुसारिण्या रचनाया यमकानुप्रासयोः उपमायाश्च सुतरामानुकूल्यम् ।

षष्ठपद्ये - राज्ञ्यानां सरभस चापोपसरणपर्यन्तमोजसः ततस्तस्यरभसस्याऽभावे माधुर्यस्य चमत्कारितैव । मौर्वीलताव्यपोहनरूपो परिसंख्यालंकारोऽपि सुतरांचमत्कारकोऽत्र ।

सप्तमपद्ये- लक्ष्यवेधनविषयकोऽर्जुनगतोवीरस्थायी उत्साहः चापशरसन्धानादिचेष्टानुभावितः धृतिगर्वादिसंचारिभावैः पोषितः सहृदयचमत्कारायैव। चाप-भूप-वसु चेन्द्रसुताधिकरणक शर-लज्जा-कुतुकानामेकसन्धानक्रियया योगात् तुल्ययोगितालंकारोऽपि सुतरां चमत्कारकोऽत्र ।

अष्टमपद्ये- लक्ष्यपातनाऽनुभावेन च वीररसस्थायी अर्जुनगतोत्साहः- सुतरामुत्कृष्यते । " अत्राऽर्जुन एव दोष्मान् " इति प्रदर्शनाऽनुकूलेन लक्ष्यस्य अर्जुनदिशि पतनेन(१) संभवद्वस्तु सम्बन्धनिबन्धनाया निदर्शनायाबोधनोत्प्रेक्षाङ्गभूतायास्तत्र - नितरामानुकूल्यम् ।

ततो नवमपद्ये - अर्जुनोपरिसुरगणाकृतपुष्पवर्षेणतस्यनितरामुत्कर्षः प्रतीयते । पुष्पवर्षे विक्रमलक्ष्मीगन्धहासोत्प्रेक्षायामाधुर्यौजोगुणानुसारी वृत्त्यनुप्रासस्य च सुतरामनुकूलता चमत्कारिता च ।

दशमेपद्ये - अर्जुनविषयकः पाञ्चालीगतोरतिभावः शृङ्गारस्थायी कटाक्षो

---

१ संभवन्वस्तुसम्बन्धोऽसंभवन् वापि कुत्रचिद् ।
यत्र बिम्बानुबिम्बत्वं दर्शयेत् सा निदर्शना ।। १०।५१। साहित्यदर्पणे ।

नुभावितः उन्मेषहर्षादिभिः संचारिभिः पोषितः कामपि चमत्कृतिमादधाति सहृदयानाम् । कटाक्षेषु माध्वीलिहोत्प्रेक्षा तेषां सुतरामुत्कर्षिका ।

एकादशे पद्ये - द्रौपद्याः शृङ्गारस्थायी भावो रतिः अर्जुनकण्ठेवरणमालिकाविताने नानुभावेन हर्षौत्सुक्यादि संचारिभावैश्च सुतरां पोषितो नितरां चमत्काराय, अर्जुनस्य च सख्य सर्वोत्तरोत्कर्षाय उद्दीपन विधया वीररसपोषाय च पर्यवस्यति ।

ततो गद्ये च अर्जुनगतो वीरस्थायुत्साहः समस्त राजन्य विजय विषयकः तदवज्ञानृपतिसुता चापलतोद्वहनाधनुभावैरनुभावितः धृतिगर्वादिसंचारिभिः पोषितो वीररसत्वेनास्वाद्यमानः सुतरां सहृदयानां चमत्काराय संपद्यते ।

एतदनन्तरं स्वयंवर विरोधिनो नृपा निगृह्यन्ते यथा -

' तदात्व एव खलु खलो यमखिलानस्मानतिस्मयेन विस्मरन्कस्मैचिद्दुहितरं विप्राय प्रायच्छदिति द्रुतं द्रुपदाय द्रोहमुन्निद्रयतः कतिचन राजन्यान्राजन्याभिमुखान्प्रति सुलभोन्मेषेण रोषेण, सरभसं भुजोन्नीतैरुपवीतैः कण्ठमावेष्ट्य ममायं यष्टेर्ममायं विष्टरस्य लक्ष्यमिति वचनेन चातिचापलं कुर्वाणान्धरणिगीर्वाणान् भवतां पुनराशीरेव जयराशीकरणायालमिति सस्मितं, निवर्तयन्नमर्त्यपतिकुमारो युधि समारोपितधनुर्गुणनिर्गलनिर्गलितेन शरनिकरेण तेषां परेषामधिकां-दिक्षि दिशि कान्दिशीकतां दिदेश ।'

' तावदस्य राजसूयस्य जंघालतामनुकुर्वद्भिरिव रथार्वद्भिरपरार्णवाभ्यर्णमवतीर्णवति तूर्णमर्णोजबन्धौ तेन निहितां दीप्तपरामिव तां दयितामनुरुध्यन्नयमपि घर्मोष्णस्तामेव वासभुवमाससाद ।'

' स्वेदाम्बुभिर्निटिलजैः पदयोः सवित्री-
मादीचकार स तया सह चापपाणिः ।
मोदाम्बुभिर्नयनजैस्तमियं च मौलौ
विस्मेरचेतसि कुलालवधूसमाजे ।। २ ।८४।।

अत्र प्रथम गद्ये - जन्यान्यभिमुखराजन्यगणालम्बनकः पार्थगतवीरस्थायुत्साहो राजन्यविषयक कोप विशिष्ट विप्रगणसान्त्वन राजन्योपरिबाणवर्ष

णादिभिरनुभावैरनुभावितो धृतिमर्षौग्र्यादिभिः संचारिभिः पोषितो वीररसतया परिणमन् सहृदयजनानन्दाय कल्पते । पार्थालम्बनको राजन्यगणगतोभयस्थायी तेषां पलायनादिभिरनुभावैरनुभावितः शंकाविषादादिभिरुन्नेयैः संचारिभिः पोषितो भयानकरसतया पर्यवस्यन् संपद्यते चमत्काराय । विरोधिराजन्यपरामर्शे ओजसः, विप्रगणसान्त्वने माधुर्यस्य, पार्थस्य बाणवर्षवर्णने पुनरोजसः समुपयुक्तत्वात् तत्तदनुसारिण्येव क्रमशः परुषकामधुरपरुषवर्णघटितारचना तदनुकूलोवृत्त्यनुप्रासश्चाऽपि चमत्काराभिकल्पतेतराम् ।

द्वितीयगद्ये- सूर्यस्तवर्णनेन सह दयितामिव जयश्रियं प्राप्तस्यार्जुनस्य दयितानुरञ्जनादिभिः गद्याग्रिमे पद्ये च सवित्रीपादवन्दनादिभिरनुभावैः स्वेदादि सात्त्विकभावैश्चाऽनुभावितौ धृतिहर्षादिभिः संचारिभावैश्च परिपोषितौ उत्साहौ मातृविषयकरतिश्च वीररसत्वेन भावत्वेन च चमत्कुर्वन्तावास्वादनीयौ भवतः सहृदयानाम् । सूर्यस्यार्यतां राजसघृजघ्रालतानुकरणोक्त्यार्यावर्द्भ्योऽपि उपमानभूत- राजसघ्रस्याऽधिकदूरदिङ्मागपर्यन्तधावित्वं वस्तु तेन च व्यतिरेक उल्लेखाया ध्वन्यते । द्रौपद्याऽग्निदीप्तिस्वरूपोत्प्रेक्षाया तस्या लोकोत्तरसुन्दरीत्वं तेनापि च व्यतिरेको व्यज्यते । धनञ्जयश्लेषमूलाऽभेदातिशयोक्त्या पार्थस्य धनञ्जयाभिन्नत्वप्रतीत्या दयितारूपदीप्त्या तस्ययोगस्य अनुरूपसंसर्गतयासमालंकारः (१) पद्येपरिवृत्त्यलंकारः पुत्रमात्रोरन्योन्यविषयकरत्युपस्कारकः ।

दयितानुरञ्जने-हर्षानुरूपया सवित्रीवन्दने विनयानुरूपया मधुराक्षरघटितवृत्त्यनुप्रासालंकृतया रचनयापि कापि चमत्कृतिराविर्भाव्यते । विप्रोऽप्ययं महावीरान् विजित्य नृपेन्द्रनन्दिनीं प्रापेति ज्ञानस्य कुलालवधूसमागतस्य विस्मय कारणता पार्थोत्कर्षद्योतिन्येव ।

---

१ समं योग्यतया योगो यदि संभावितः क्वचित् । १०।१२५। काव्यप्रकाशे ।

(६) द्रौपदी विवाहः पाण्डवानां पुनः स्वराज्यप्राप्तिश्च

अथ द्रौपद्याः विवाहे व्यासवचनेन पञ्चभिरेव पाण्डवैः सह कर्तुं द्रुपदराजेन स्वीकृते तन्मण्डनं , विवाहश्च कवि-वर्णितं विविच्यते , तद्वर्णनं यथा -

' अन्येद्युर्गृहमुपनीय पूजितांस्तान्
व्यासोक्त्या विदितवरः पुरामरातेः ।
पञ्चापि क्षितिपतिनन्दनासुतायाः
पाञ्चाली निशि परिणीतयेऽनुमेने ।।'

ततो पाञ्चाल्या विवाहायाऽलंकारैः सखीजनकृतं प्रसाधनं वर्णयति कविः यथा -

' ततः परमीदृशोत्सवश्रवणात्पुरमानन्दमनुभवन्तीभिरन्तःपुरिकाभिः परिवृतां तां सखीजना मण्डनमण्डपिकामुपनीय प्रसाधयितुमारभन्त ।'

' द्रौपद्याः पञ्चपत्नीत्वे द्रष्टुं लिपिमिवोत्सुका ।
सीमन्तशिल्पव्याजेन शिरोजान्व्यभजत्सखी ।।'

' मृगमदतिलकं रराज तन्व्या
मुखशशिना महसा बलाहृतायाः ।
चिकुरमिषजुषोऽपराधशान्त्यै
नमितमपत्यमिवान्धकारवन्व्याः ।।'

' अधिनासिकासिकाशिखरमाकलितं नवमौक्तिकं नरपतेर्दुहितुः ।
शुशुभे मुखाम्बुरुहमध्यवरस्मितहंसिकाजनितमण्डनमिव ।।'

' सुतरां जनमोदमादधाते सुतनोर्मौक्तिकरत्नकर्णपत्रे ।
परिचेतुमिवाननेन्दुसेवां परिवेषस्य शिशू समीपभाजौ ।।'

"तार्टके तरलमणिप्रभातरङ्गै तन्वङ्ग्या मुखमभितस्तदा व्यभाताम् ।
मूर्तत्वं प्रकटमुपेत्य जागरूके वर्णौ द्वे नयनविपाठयोरिवान्ते ।।"

"सख्याः करोऽञ्जनविधौ सकृदेव गन्तु-
मापाङ्गभागमपटुः श्रममानशे यः ।
रेखाधरनवगाभितयादृगङ्गं
पूर्वोक्तमेव स पुनः पुनरालम्बे ।।"

"सकलमपि वपुर्विभूष्य तन्व्याः सपदि सखी विपुलेक्षणाम्बुजापि ।
चिरतरमनवेक्ष्य मध्यदेशं करधृतकाञ्चिनकाञ्चिरेव तस्थौ ।।"

"काञ्चीकलापमणिबिम्बितपार्श्वयोषि-
त्कौशेयपत्रितरणीन्द्रसुता बभासे ।
आविर्भविष्यदधिगोष्ठ कटीनिमग्नं
वासःशतं जनदृशामिव सूचयन्ती ।।"

"आकृष्टपीडामददां पुरा हस्यास्तदा भाविषु वल्लभेषु ।
एवं विचिन्त्येव पादे लाक्षाकृतं धाम पपात तन्व्याः ।।"

"तस्याः सखीषु सकलास्वपि तत्तदङ्गै
वेगाद्विभूषितवतीषु विवाहवेषैः ।
कालक्षयासहनवृद्धपुरोहितानां
कोपस्य पात्रमभवत्कुचशिल्पकर्त्री ।।" २।८६-९६ ।।

अत्र अन्तःपुरिकाजनगतो वात्सल्यरतिभावः सखीजनगतश्च सख्यरतिभावः पाञ्चालिकाविषयकौ हर्षौत्सुक्यादिभिः संचारिभिः पोषितौ माधुर्यप्रसादानुगुणेन वृत्त्यनुप्रासेन तैस्तैश्चार्थालंकारैरुत्कर्षन्निमिः सहृदयानन्दाय कल्पेते । तत्र गद्ये प्रसाधनोद्योगारम्भः, प्रथम द्रौपद्यादिपद्ये- उत्प्रेक्षापह्नुत्या रुचिरः सीमन्तरचना व्यापारः, द्वितीये मृगमदेत्यादिपद्ये - व्याजापह्नुत्युत्प्रेक्षा रूपक निरूपितः कस्तूरिकातिलकालंकारः, तृतीये अधिनासिकेत्यादि पद्ये रूपकोत्प्रेक्षोद्भासितं नासामौक्तिकधारणम् , चतुर्थे सुतरामित्यादि पद्ये रूपकोत्प्रेक्षाराजितं कर्णपत्रन्यसनम् वर्ण्यते । पञ्चमे नयनेत्यादि पद्ये नयन विपाठान्तभागयोः कर्णान्तपर्यन्त विश्रान्तत्वात् नामार्थयोरभेदमाश्रित्य कर्णाटकेषु प्राक् कालप्रचलि

त समध्यबिन्दुक (०) ठकारस्य सौटंकमकस्य नयनविपाठान्तिमवर्णस्योस्मोत्प्रेक्षा>प्राकारसाम्यात् ताटंके क्रियते, अभेदातिशयोक्तेर्नयने विपाठरूपकस्य अवतर्त्रा>श्रुता, एवंनितरां चमत्कारकोऽत्राङ्गाङ्गिभावेन संकरोऽलंकाराणाम्, ष--ष्ठे संख्या-इत्यादि पद्ये नयनयोरञ्जने सलीकरस्य अपाङ्गभागपर्यन्तगमन पटुत्वसम्बन्धस्य सत्वेऽपि तदभेदकथनात् असम्बन्धाऽतिशयोक्तिः, सप्तमे एकलेत्यादि पद्ये मध्यदेशस्य सत्वेऽप्यभावकथनात् असम्बन्धातिशयोक्तिः ईदृशी अम्बुजोपमा च ,-अष्टमे- कार्श्येत्यादि पद्ये उत्प्रेक्षालंकारः, नवमे आतंके इत्यादिपद्ये हेतूत्प्रेक्षा, दशमे च तस्या इत्यादि पद्ये कोपेन वृद्धपुरोहितताऽऽवेगस्य कुचशिल्पविलम्बेन तद्वैपुल्यस्य च ध्वनिः । सर्वत्र तत्तदलंकारेणतत्तद्वर्ण्यभूषणानां तद्वारा तत्तद्वर्ण्यानां च सौन्दर्योत्कर्षः प्रतीयते तत्तत्प्रसाधनव्यापारेण वसखीजनगतो सख्यरतिभावोऽनुभाव्यते , परिपोष्यते च शर्वरीत्युक्त्यादिभिः ।

" एवमलंकृतामेनामालोक्य स्वयमपि संध्यारुणिमसंपादितलाक्षाकृत्यार्द्रनतिलकरञ्जितमुखभागां परिणेतुमिव प्रतीचीं> दिशमुपगतवति भगवति भासांनिधौ-

" तस्यामेव दशायां सपदि निजकुलोत्तंसपार्थोत्सवाना-
मालोकायेव साक्षाद्विशति हिमरुचौ यां शुभंयौ मुहूर्तं ।
सोपानैरध्यरुक्षान्मरकतखचितैर्वेदिमेते कुमाराः
सालंकाराः पुरोधः सरभसनिहितैः संविधानैः समग्राम् ।।"

" तत्र मुहूर्तगुणेष्विव समन्तादोजायमानेषु मन्त्रविदां वदनेष्विव शब्दायमानेषु वाद्येषु कुलपालिकाः कमनीयमणिकोरकितैः कनकभूषणैरविकृतसहजरामणीयकां कन्यकाममीषां सकाशे निवेशयामासुः ।

" पूतमाश्वैं कुशाङ्कूरैः पुरस्तान्मणिकुट्टिमे ।
प्राज्वलत्तस्य धौम्यस्य प्रतिबिम्ब इवानलः ।।"

" घर्मान्प्रजाश्च बहु संविनुतानयेति
शाम्यत्समिच्चटचटात्कृतिमिर्ब्रुवाणः ।
तामात्मजां द्रुपदराज इवानलोऽपि
प्रादादिवोन्नतशिखाग्रकरेण तस्मै ।।"

'अथ जातुषालयसमर्पणात्कृतं
परिपोषमस्य वपुषोऽभिवीक्षितुम् ।
स्पृहयालवः किल पृथासुताः क्रमा-
त्परिचक्रमुहुर्तभुजं वधूसखाः ।।'

'कठिनत्वसंपदवलेपभरात्कुवकुड्मलस्य कुरुवीरवधूः ।
कृतनिर्जयेव पतिपाणिधृतं पदमश्मनः शिरसि सा निदधे ।।'

'कन्यया म्युपहृता विधिलाजाः कन्दलत्यनलरोचिषि हेतुः ।
पृश्निवल्लभकराग्रविमर्दाद्बाहुवंशगलिता इव मुक्ताः ।।'

'विधिचोदनासु मणिदीपयष्टिकापरितः स्फुरत्प्रतिकृतेश्च सुध्रुवः ।
उभयोर्विवेचनाविधौ पुरोधसः स्खलनं बभूव न तु मन्त्रतन्त्रयोः ।।'

'बाहुप्रताप इव सादिणि हव्यवाहे +
सामन्तराजधरणीरिव याज्ञसेन्याः ।
कार्ष्णायसं क्रमश एव करं गृहीत्वा
हर्षेण वृद्धिममजन्नवनीन्द्रपुत्राः ।।'

'पञ्चालराजश्च स पाण्डवश्च पुष्यत्तमौ पूजकपूज्यभावम् ।
आद्यम्प्रविष्णुत्वमकिञ्चनत्वं व्यत्यस्यतां ताविव यौतकैस्तैः ।।' २।९७-१०५।

अत्र गद्ये सायंकालवर्णने प्रकरणानुरूपं भगवतः सूर्यस्याऽपिप्रतीचीगमनं तत्परिणायफलकमुत्प्रेक्ष्यते, प्रतीच्याः स्वालंकरणे श्रौपधा अलंकृतत्वालोकेन-हेतुकत्वोत्प्रेक्षा । तत्र वध्वाँ इव प्रतीच्या अपि सन्ध्यारुणिम्ना लाक्षाञ्जनकृत्यम् अकारणात् कार्यजन्मकथनरूपविभावनयामुक्ताञ्जनतिलकगत-श्लेषमूलकाऽभेदाऽतिशयोक्त्या च अञ्जनतिलकरञ्जितमुखत्वमुक्त्वा किमपि वैदग्ध्यमाविष्क्रियते । विभावनालंकारस्य श्लेषाऽतिशयोक्त्याश्चोत्प्रेक्षायामङ्गता । वर्ण्यमानाश्रयाः प्रतीच्याः स्वप्रसाधनेन परिणयोत्सुक्यं ध्वन्यते । माधुर्यमत्राऽनुकूलम् । वृत्त्यनुप्रासश्च तदनुसारी ।

प्रथमपद्ये तस्यामित्यादौ विवाहोपयोगिचन्द्र बलं दर्शितम् । पाण्डवानां कुलमूलपुरुषस्य चन्द्रस्य तद्विवाहदर्शनफलक गगनप्रवेशोत्प्रेक्षाया हर्षोत्सुक्या

दि ध्वनिः । कुमाराणामपि प्रसाधनादिभि र्हर्षोत्सुक्ये ध्वन्येते । प्रसादमाधुर्ययोः मनोगोजसश्च चन्द्रगतोत्साहोत्कर्षणेन चमत्कारितैव । वृत्यनुप्रासोऽप्यनुकूलः ।

ततो गद्ये 'तत्र मुहूर्तेत्यादिना विवाहस्थल सामग्री संभारविधिसंपादनाभमये समये ओजसः कुलपालिका कन्यका पर्यन्तेषु माधुर्यस्यौचित्यानुरूपा तद्व्यञ्जिका रचना चमत्कारितैव। मुहूर्तगुणादिदीपादीनां प्रकृतानामेव परस्परोपमयाऽत्र - संक्षेपेणवर्णनेनप्रौढिरपि काऽपि कविनाऽविष्कृता ।

ततो द्वितीये पूतेत्यादि पद्ये- अनलोपमानत्वेन घोम्यस्यौल्लेखात् तस्य महातेजस्त्वं विधिविधानेष्वस्खलितत्वं च ध्वन्यते । अनलवर्णने ओजोगुणस्य तदनुसारिणो वृत्यनुप्रासस्य चमत्कारितैव ।

तृतीये घर्मार्नित्यादिपद्ये घर्मप्रजयोरेक संञ्चयन क्रियायोगात् तुल्ययोगिता अने द्रुपदराजोपमा, शिखाग्रेङ्गुरूपकम्, अनलेप्रदानोत्प्रेक्षा चाऽत्र प्रकृतार्थमुपस्कुर्वन्ति, तेषांमोजसश्च चमत्कारोऽत्र दर्शनीयः ।

अथेत्यादि चतुर्थे पद्ये फलोत्प्रेक्षा प्रसादमाधुर्योजसां समुपयुक्तः सन्निवेशः , वृत्यनुप्रासश्च चमत्कृत्याधायकः एव ।

कठिनत्वेत्यादि पञ्चमे पद्ये अश्मनिपदनिधाने वध्वाः स्वकुचकुड्मलकठिनत्वकरणाकनिष्पितत्वस्य हेतुत्वेनोत्प्रेक्षा रुचिरैव । कुरु वीरवध्वा अश्मनिर्जयानुरूप एवौजोगुणस्तदनुसारि दीर्घसमास घटितो वृत्यनुप्रासश्च ।

कन्येत्यादि षष्ठे पद्ये - लाजेक्षुमुक्ता स्वरूपोत्प्रेक्षायां बाहौवंशोरोपात् तद्रूपकस्यावृता,तत् उत्प्रेक्षा, वृत्यनुप्रासश्च चमत्कारिणौ ।

विधीत्यादि सप्तमे पद्ये - प्रति कृति वध्वोरेकविवेचन क्रियायोगात् तुल्ययोगिता, मन्त्र तन्त्रस्खलनस्य व्यपोहनात् परिसंख्यालंकारस्य, वृत्यनुप्रासस्य च शोभादृश्यैव ।

औद्वित्यादौ अष्टमे पद्ये पाण्डुराजकुमारगतौ वरणीकरग्रहणे उत्साहेन (विधिज्ञो) वधूकरग्रहणे च रतिभाव-उभावचि कर ग्रहणवृद्धिलाभादिभिरनुभावितौ हर्षौत्सुक्यादिभिः संचारिभिः पोषितौ वीर शृङ्गार रसतया परिणमन्तौमिश्रिता -

न्नेव सहृदयानन्दायैवकल्पते। तत्र हव्यवाहे बाहु प्रतापोत्प्रेक्षायाः करशब्दगत-श्लेषस्य द्रुपदजायां तदीय घरण्योपमानस्याश्च नितरामुपकारिता । माधुर्यौजः प्रसादानां यथा युक्तं मिश्रणं वृत्त्यनुप्रासश्च चमत्कारायैव ।

नवमे पार्त्रालेत्यादि-पद्ये विवाहे यौतकानां दानैरादानैश्च द्रुपदपाण्डवयोः आढ्यत्वदरिद्रत्वयोः परिवर्तनोक्त्या परिवृत्त्यलंकारो(१) रुचिर एव।तत्र द्रुपदस्य दानोत्साहानुकूलौजोगुणानुसारी वृत्त्यनुप्रासोऽपि चमत्कारक एव ।

अथ द्रौपदी विवाहेन द्रुपदपूजया च जातोत्कर्षेषु पाण्डवेषु मत्सरिणां दुर्योधनादीनां द्रुपदपुरोधो,द्रुपदसैन्यैः सह तेषां युद्धम्,द्रुपदसैन्यानामपसरणे तैः सह अर्जुनयुद्धम् , तेषां पलायनम्, पाण्डवानां भगवतश्च द्रुपदकृतं विशेषतः पूजनम्, तद्वृत्तश्रवणेन धृतराष्ट्रस्य पाण्डवानाहूयतेभ्योभगवत्सन्निधौ-पुनरर्धराज्यप्रदानम्, धर्मसूनोश्च यौवराज्येभिषेचनम् कविना वर्णितं विविच्यते तद्वर्णनं यथा- यथा-

" एवमन्तरिक्षा निक्षिप्त लक्ष्यवेधन लक्षणेन शुल्कनिष्केण निजकण्ठ निष्कायित कन्याभुजलतानेतान्यधि कौन्तेयानवगन्तारो दुरन्तारोपित निवर्तन मतयो विकर्तन तनयोपाय विधेयैः सहायैः सह संमन्त्र्य समारब्धपूर्वस्य युद्धपलायनाध्ययनस्य द्वितीयवृत्तिविच्छित्तिं परिजिहीर्षमाणा इव शकुनिभागिनेया सेनापुरः सरनिःसाण निःसारित निःस्वानलालितैः क्वेलितैः कालितगवाक्षामोनरोध्यं द्रुपदपुरं पुनरपि निरुद्ध्य निरुच्छ्वासयां बभूवुः ।"

" तत्क्षणमेव सत्वरं निर्गतेषु विविधैरायुधैरशून्येषु द्रुपदसैन्येषु ।
" पृथासुतास्तेऽपि रथाधिरूढा द्विधा विचार्यैव पुरान्निरीयुः ।
शरैर्विधातुं द्विषतोऽपि चूर्णास्तत्सुभ्रुवामप्यलकानचूर्णान् ।।"
" शंखान्दध्मुस्ताउ यन्ति स्म भेरीश्चक्रुः क्वेलांश्चापनादान्विवव्रुः ।
सिद्धादीनां घोसदां लालनीये युद्धारम्भे ते द्वयेऽपि प्रवीराः ।।"
" अनयोर्बलयोर्महारथानामवलोकाय नभोजुषां सुरीणाम् ।
सुदृशां च परस्य सौधभाजां वरणस्त्रग्विधृतैव भेदिकाभूत् ।।"
आसीदतामाशु धनुर्धराणामासीदतां प्यत्करकौशलानाम् ।

---

१ परिवृत्तिर्विनिमयो न्यूनाऽभ्यधिकयोर्मिथः । ११२ । कुवलयानन्दे

"क्षणं मिथो बाणगणोपरोधाद्व्रणं न कस्यापि रणं नवं यत् ।।"
"द्विरदं द्विरदस्तुरगं तुरगो रथिकं रथिकः पदगं पदगः ।
इतरेतरमेत्य रणं विदधे दिवि नारदविस्मयनाकतरुम् ।।"
"रजोन्धकारेषु दृशोऽन्धयत्सु करैः करान्कौतुकसूत्रविभ्रान् ।
परामृशन्तौ युधि पाण्डुपुत्राः परस्परं पर्यहरन्प्रहारान् ।।" २।१०६-१११

अत्र "एवमन्तरिक्षे" त्यादि गद्ये दुर्योधनादीनां द्रुपदपुरोधेन अनूयामर्षापत्यादयोभावा ध्वन्यन्ते । तत्र लालित शब्देन वर्धितत्व बोधनाद् लालित शब्देन चापसारित्व बोधनाद् तदतिशयरूपौ अत्यन्त तिरस्कृत वाच्यौ लक्षणा मूलौ ध्वनी , लक्ष्यवैवर्ने शुल्क तिष्कारोपस्य प्रकृतोपयोगित्वात् परिणामः(१) कन्याभुजलतारोपाद् रूपकं,निष्कसादृश्याच्चोपमा,कुमाराणां कण्ठनिष्कायितक न्याभुजलतात्वेन कौन्तेयत्वावगमनाद् अनुमानालंकारः , दुर्योधनादीनां द्रुपदपुर रोधे युद्धपलायन-रूपाध्ययन द्वितीयावृत्तिविच्छेद परिजिहीर्षायां हेतुत्वेनोत्प्रेक्षा रूपकाऽनुप्राणिता , प्रकृतार्थोपस्कारकत्वेन चमत्कुर्वन्तितराम् ।

पृथासुतेत्यादि प्रथम पद्ये-पाण्डवानां युद्धोत्साहो ध्वन्यते। तत्र चूर्णा चूर्णविधानरूपविरुद्धक्रिययोः समानाधिकरण्येनोक्तत्वाद् विरोधाभास उपस्कारकः वीरा हि परस्परविरुद्धकार्याण्यपि कुर्वन्ति ।

शस्त्राणित्यादि द्वितीयपद्ये-उभय सैन्यगतवीराणां युद्ध विषायक उत्साहो ध्वन्यते, तत्र शस्त्रध्मानाद्यर्थे क्रियाणां(२)समुच्चयस्योपस्कारकता ।

अनयोरित्यादि तृतीयपद्ये-पुरसुरसुन्दरीणां युद्धदर्शन विषयकमौत्सुक्यं ध्वन्यते, अभेदेन ज्ञातासु तासु वरणमालिकया सुरसुन्दरीणां तदभावेन च पुरसुन्दरीणां ज्ञानाद् अनुमानालंकार द्वयम् , तेन पुरसुन्दरीणां सुरसुन्दरीभिः साम्य प्रतीत्या उपमा ध्वनिः ।

आसीदेत्यादि चतुर्थपद्ये- बाणमोचने वीराणां हस्तलाघवं ध्वन्यते।

द्विरदमित्यादि पञ्चमपद्ये- नारदविस्मयनाकतरु रूपकेण युद्धकौशलस्य को

---

१ विषयात्मतयाऽऽरोप्ये प्रकृतार्थोपयोगिनि परिणामः ।१०।३४ सा०द०
२ बहूनां युगपद् भावभाजां गुम्फः समुच्चयः । ११५। कुवलयानन्दे

ऽप्युत्कर्षो ध्वन्यते ।

रजोन्धकारेत्यादि षष्ठपद्ये- पाण्डवानां युद्धोत्साहो ध्वन्यते, तत्र-करस्थ कौतुकसूत्र चिन्द्रेन पाण्डवानुमानात् अनुमानालंकारस्योपस्कारकता ।

अत्र यत्र तत्र माधुर्यौजो गुणानुगुण्येन यथायुक्तमुपात्तानांछेकावृत्यनुप्रासानां यमकानां च मनोहारिता श्लाघ्यैव ।

' सोमकेष्वपसर्पत्सु सूर्यसूनोः शितैः शरैः ।
कूजयामास कोदण्डं कुलिशायुधनन्दनः ।।'

' तेन जनन इव प्रथनेऽपि वृकोदरद्वितीयेन करोदरपरिकर्मीकृतस्य कार्मुकस्य वर्मनिर्मार्थिभिः शरोर्मिभिर्निकृत्तमर्माणो भयविसारिभिः स्वेदवारिभिः स्वपदान्येव यानपदेऽभिर्षिञ्चन्तः समराजिरकन्दलितपार्थ्यशश्चतुर्थीचन्द्रकलावलोकनं परिहर्तुमिव मुखं निवर्त्य सौबलेयाः केवलैरेव बाहुभिः कुरुपुटभेदनं प्रति पलायाम्बभूवुः ।'

' बीभत्सुचापवितेषु महत्सु कर्मस्वेकं दृढं जगृहिरे युधि धार्तराष्ट्राः ।
वीक्ष्य स्थितेषु विमतेषु विलोलजीवं पृष्ठं प्रकाश्य गमनं पृथुनाजवेन ।।
' विजयात्परमेतेषामृजवोऽप्यतिमीषणाः ।
सद्यो गुणाः समुन्मेषवेमुस्तु धन्विनाम् ।।'
' ते निवृत्य नगरं समावमंस्तोषिता द्रुपदराजपूजया ।
अप्यशेषजनकेन शौरिणा जन्यभावमुपजग्मुषा समम् ।।'
पार्थ एव सहजेष्वखिलेषु प्रायशो युधि बलं श्रुतवत्याः ।
अन्वभूदधिकमीक्षणवृष्टीरर्जकांशमिव राजसुतायाः' ।२।११२-११६ ।।

अत्र प्रथमे-सोमकेत्यादि पद्ये - कर्ण युद्ध विषयको अर्जुनगतो वीररसस्थायुत्साहः कोदण्डकूजनादिभिरनुभावैः उन्नेयधृतिगर्वादि संचारिभिश्च पोषितो रसतां प्रपद्यमान आस्वाद्योभवति विदाम् ।ओजो गुणस्तदनुसारीवृत्यनुप्रासोऽपि च चमत्कारक एवात्र ।

गद्ये तेनेत्यादौ - कौरवयुद्ध विषयकोऽर्जुनोत्साहः शरवर्षणाद्यनुभावितः उक्त विधसंचारिभिः पोषितो रसतां श्रयन् रसनीयो भवति । अर्जुनविषय-

कं कौरवनिष्ठं भयं च स्वेदादि सात्त्विकभावैः हस्त्यश्वरथशस्त्रास्त्रादि त्याग-पलायनादिभिरनुभावैः आवेग दैन्य त्रासादिभिः संचारिभिश्च पोषितं भयानकरसतया परिणमन् च वर्णनीयो भवति सुधियाम् । वीर- भयानकानुगुणौ तत्र-तत्र प्रयुक्तौ वृत्त्यनुप्रासौ मनोरमः । पदैरवयान्त हत्यस्य पदानां यान पदैभिषौ वनरूप प्रकारान्तरेण उक्तत्वात् चापस्य कोण ग्रहणस्य च करपरिकर्मीकरणरूप प्रकारान्तरेण समाधाय पर्यायोक्तव्यम्, मुखनिवर्तने पार्थस्यश्चतुर्थीचन्द्रकलावलोकन परिहरण फलकत्वोत्प्रेक्षा, तस्यां चतुर्थी चन्द्ररूपकर्मणम् । बाहूनां सशस्त्रत्वव्यपोहनस्य आर्थत्वात् आर्थी परिसंख्या च भयानकमेव परिपोषयतः ।

द्वितीये पद्ये बीभत्सुचापेत्यादौ पूर्वोक्त भयानकस्यैव पलायनानुभावस्य वर्णनम्, तत्र परिसंख्यालंकारो बीभत्सुचापकर्मस्वैकतमग्रहणस्याऽन्यकर्मपरिसंख्यानात्मको भयानकोत्कर्षकः सुतरां चमत्कारी, तत्र च विलोल जीव शब्दगतश्लेषमूलकाऽभेदातिशयोक्तिरंगम् ।

तृतीये विजयादित्यादौ पद्ये - पाण्डवानां प्रभवो वर्ण्यमानस्तेषां महोत्कर्षाय परिणमति । तत्र गुणानामृजुत्वमीषणात्वयोर्विरुद्धयोः सामानाधिकरण्य वर्णनात् विरोधाभासः । गुणानां गुणत्वेन साम्येऽपि पाण्डव सम्बन्धिनां तेषामुत्कर्षोऽन्यसम्बन्धिनां च तेषामपकर्षो वर्ण्यमानो व्यतिरेकं प्रयोजयतः । उभावपि पाण्डव प्रभावोत्कर्षबोधनाय नितरामुपकुरुतः । वृत्त्यनुप्रासोऽपि ओजोगुणानुसारी तथा ।

चतुर्थे ते निवृत्येत्यादौ पद्ये पाण्डवानां द्रुपदराजकृतः पूजासम्मानोऽपि तेषां प्रभावोत्कर्षातिशयाय संपद्यते । तत्राशेषजनकस्याऽपि भगवतो जन्यत्वकथनेन विरोधः " भगवानपि पाण्डवानामनुकूलं इति वस्तु ध्वनयति । वृत्त्यनुप्रासोऽपि अनुगुणतयाऽत्र चमत्कारकः ।

पंचमे पार्थेत्यादिपद्ये - विजय एव समरसामर्थ्यातिशयोपलब्धिर्नेत्थित रपाण्डवेष्विति परिसंख्यालंकारो विजयस्य राजसुतावीक्षणवृष्टि रूपसम्मान-पात्रत्व औचित्यं गमयति । ईक्षणवृष्टौ अर्जकांश स्वरूपोत्प्रेक्षाऽपि तदनुगुणा । एवमर्जुनस्य वीरशिरोमणित्वं सुतरां परिपोष्यमाणं सहृदयजनचमत्कारातिशया

य पर्युदस्यति ।

युधिष्ठिरस्य पुनः स्वराज्य प्राप्तिः

अथ युधिष्ठिरस्य पुनः स्वराज्य प्राप्तिर्वर्णिता विविच्यते तद्वर्णनं यथा :-

" वृत्तान्तमेवमवकर्ण्य सराजवृद्धः
दात्रा सकाशमुपनाय्य सहानुजातैः ।
धर्मात्मजाय धुरि कंसभिदोऽर्धभावा-
दन्वर्थतामथ विमज्य ददौ स्वनाम्नः ।।"

" तस्मिन्नाहितलक्षणे नृपसुते राज्याभिषिक्ते सति
स्वान्यक्षीणि दधुर्यदम्बु शिशिरं लिप्तार्द्रके कुंकुमैः ।
रागं यद्बिभराम्बभूवुरवहन्यद्वर्णितं बन्दिभि-
र्निष्पन्दत्वमतः स्वदृष्टिरिति तं पौरा विव्रुः स्फुटम् ।।

२।११७-११८

अत्र वृत्तान्तेत्यादि प्रथमे पद्ये वंशवदैर्भ्रातृभिः स्वगुणैश्च प्रवर्धमान मान प्रभावस्य युधिष्ठिरस्य अर्ध राज्यप्राप्तिर्वर्ण्यते, तेन तत्प्रभावस्याऽतितरामुत्कर्षो ध्वन्यते । अर्धराज्य धारकत्वस्य पर्यायान्तरेण कथनात् पर्यायोक्तालंकारोऽप्यत्र च मत्कारकः ।

द्वितीयेऽपि पद्ये- धर्मतनयस्य राज्याऽभिषेके पौराणामानन्दो भितरां वैदग्ध्येन वर्णितः कविना । नृपाऽभिषिक्तत्व-कुंकुमलिप्तत्व-बन्दिवर्णितत्व जन्यहर्षहेतुक पौरजननयनाम्बुधारण- रागविशिष्टत्व- निस्पन्दत्वानां नृपसम्बन्धिभिस्तैरभेदात् नृपोऽपि पौरजननयनत्वेन प्रकाश्यते । तेन नृपस्य पौरजननयन-

स्वरूपत्वोक्त्या रूपके काव्यलिङ्गत्रयस्य तस्मिंश्चाऽभेदातिशयोक्ति त्रयस्याङ्गतया संकरेणाऽनेन पौराणामानन्दः तेन च नृपसुतस्य प्रजारञ्जकत्वं ध्वन्यते । तेन च-तस्य परितः प्रसृमर-प्रभावातिशयमहत्वं वीरत्व-महोत्कर्षश्च प्रतीयते । तेन-वीररसस्य कोऽपि परिपोष परिपाकः परिणमति ।

(१२) पाण्डवानां खाण्डवप्रस्थे वासः

अथ युधिष्ठिरस्य सानुजस्य धृतराष्ट्राज्ञया खाण्डवप्रस्थगमनम्, तत्र भगवदाज्ञया विश्वकर्मणाः गगनचुम्बिमणिमन्दिरैर्नगरनवीकरणम्, भगवति स्वपुरीं-प्रयातेनारदमुनेरागमगनम्, युधिष्ठिरादीनां मुनि-पूजनवन्दनादिकम्, मुनेः पाण्डवानामभिनन्दनम्, तदाज्ञया तेषामेकैकवर्षं प्रियया सहैकैकस्य वासप्रतिज्ञा, मुनेः प्रयाणम्, द्रौपद्याश्च पञ्चस्वपि पृथातनूजेषु यथासन्धं समानतया वर्तनम् च वर्णितं विविच्यते संप्रति, प्राक् तद्वर्णनं यथा-

" पितृव्यवाचाथ पृथातनूजो हरिं पुरोधाय समं बलौघैः ।
परस्परस्नेहमिवैष मातुं प्रस्थं ययौ खाण्डवशब्दपूर्वम् ।। "

" तत्र वनीमवति वनीपकजनमनीषितपूरकपुरुकुलावनीपसुरासुरभिगोष्ठीगोष्ठीने देशे स्मरणमात्रकृतसंनिधानेन सकलशिल्पपारदृश्वना विश्वकर्मणा स्वकर्मणा निर्मापितं रामणीयकावलोकनसुलभविस्मयमागुरुतरानमरान्वोढुमदामतया क्ष्मातलमवलम्बमानैर्विमानैरिवाभ्रंलिहैः कुरुविन्दमणिमन्दिरैर्जम्भरिपुनिवेशेन लम्भितत्तन्नामोपपदमिन्द्रप्रस्थमधिष्ठतायधिष्ठिराय निवेद्य स्वपुरेऽपि सुषमामीदृशीं परीक्षितुमिव स्यन्दनेन यदुनन्दनेन प्रययौ ।" ३।१।

अत्र यमकाऽनुप्रासानां अत्र पथे पुरमानविशेषावाचक-प्रस्थशब्दगतश्लेषमूलकाऽभेदातिशयोक्त्यनुप्राणिता पाण्डवानां खाण्डवप्रस्थगमने परस्परस्नेहमानफलकत्वस्योत्प्रेक्षा । पथे च कुरुकुलावनीपेषु सुरासुरभिरूपकम्, अमरेषु विस्मय-

मागुरुतरत्वसम्बन्धाभावेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः, तन्मूलिकाम णिमन्दिरेषु विमानोत्प्रेक्षा, कुरुविन्दमणिमन्दिरैः पुरस्य संपद्वर्णनात् उदात्तालंकारः, यदुनन्दनस्य स्वपुरी प्रयाणे तस्यां लाण्डवप्रस्थसुषमापरीक्षण फलकत्वोत्प्रेक्षा, इत्यर्थालंकाराणां च रामणीयक विच्छित्तिरपूर्वैव ।

ततः पाण्डवेषुनारदमुनेरनुग्रहो जातो वर्णितो विलोक्यते यथा-

"प्राणायमानमहिलामथ पाण्डुपुत्रान्
दीर्णाविमानतुलिकुरुदार भूपा ।
रणाजिनेन घटितोऽनुनयीयकृत्यो
वीणा विनोदरसिको मुनिराविरासीत् ।।" ३।२।

अत्र यमकानुप्रास चमत्कारो द्रष्टव्य एव, द्वयोरपि तयोः परमसात्विक मुनि-वर्णनानुकूल माधुर्यगुणानुगुण मधुराक्षरघटितत्वात् । पांचाल्यां प्राणोपमया तन्निमित्तक पारस्परिक पाण्डवबन्धुकुलस्य संभाविततया सदात न्मंगलाकांक्षिणो नारदस्य तदनुग्रहायामौचित्यं प्रत्याय्यते । तदनु-

"दृष्ट्वा नृपो देवमुनिं विनीतो मौलिस्रजां धूलिमधूलिवृन्दैः ।
सपंकमाधाय तदंघ्रियुग्मं विपंकमात्मानमयं व्यतानीत् ।।" ३।४।।

अत्र देवमुनि विषायिणी तत्स्वरूपस्वभावाद्बोधिता युधिष्ठिरगता रतिर्विनयनमनादिभिरनुभावैः पोषिता भितरां चमत्कृतिमादधाति। तत्र रत्यनुगुणमाधुर्यानुसारिभिराक्षरघटितोवृत्त्यनुप्रासः एकस्या एव मौलिमालाधूलिमधूलि वृन्दरूपकारणसामग्र्याः परस्परविरुद्ध-सपंकत्व-विपंकत्वरूपकार्यद्वयवर्णनरूपो पंकशब्दगतश्लेषमूलकाभेदातिशयोक्त्यप्राणितविषमालंकारश्च भृतरां चमत्कारिणौ। नमनस्यसपंकत्वाद्भानरूपप्रकारान्तरेण कथनात् पर्यायोक्तं विषमं गुणम् । ततो देवमुनिः पार्थानुवाच यथा-

"लाक्षागृहादवच्यावि साक्षादिव रतिः प्रिया ।
यद्व्यवाहि च युष्माभिस्तद्वयं हि नु सतां मुदे ।।"
स्वतोमातमतीनां वः कुतो वाऽन्यानुशासनम् ।
मौनं तु सुहृदाख्येये दूनं वक्तारमाविशेत् ।।"

"अष्टमी किल शिखा वधूरियं भाति याजमखवेदिबर्हिषः ।
यूयमध्वसरिता वृतान्वयाः पावनः खलु भवत्समागमः ।।"

"जायया च पतिभिश्च कदाचिज्जायते स्म नहि दम्पतिशब्दः ।
अद्भुतस्य खलु तस्य जगत्यामर्थतामनुभवन्ति भवन्तः ।।"

"एकस्मै स्पृहयालूनाभिष्टाय सुधियामपि ।
करस्थमेव ब्रुवते कलहं निधनावधिम् ।।"

"सुन्दोपसुन्दौ सहजावभीकौ सुरेष्विव क्वापि सुरार्युनायाम् ।
अन्योन्यमाहत्य पुरा यास्य मनोभवेषाविव लक्ष्यमास्ताम् ।।"

"तत्सौभ्रात्रशरव्यस्य द्वैधीकरणकेलये ।
भवतां मारचापेषू भवतां मा वधूकृते ।।"

"इति रहस्यं तपस्विनिदेशं शुभोदर्कं तर्कयन्तस्ते कौन्तेयास्तस्यैव समक्षमसि धारासङ्गन्धां संधामिमामाबबन्धुः ।" "एते वयं चातका इव जीवनमयं वर्षमेकैकम वलम्ब्य प्रियया सममनया सुखेन वत्स्यामः ।" "तथाभूतेष्वस्मासु यो मिथुनकृतोप वेशे देशे दृशापि प्रविशेत्सोऽयं वृजिनं विहातुमजिनं परिधाय सुकृतसार्थसमर्थापकती र्थपरिमृष्टास्वष्टासुदिक्षु तत्त्रिगुणसंख्यान्पदान्दापयेदिति ।"

"राजा निदेशकृदभूदिति धातृसूनोरन्तर्मुदो निरवधेरिदमास चिह्नम् ।
यत्तस्य पाणिकरोन्मृदुकण्ठगीतेर्वीणागुणे विवशरेखमगुलीनाम् ।।"

"तस्मिन्नमःसरणिमुत्पतिते मुनीन्द्रे सा तेषु पक्षिषु समं ववृते मृगाक्षी ।
सांक्रन्दनेषु विटपिष्विव दानलक्ष्मीर्मानोभवेषु जयसिद्धिरिवाशुगेषु ।।
।३।८-१६ ।।

अत्र "प्रथमे पद्ये "ममुदे" इत्यनुक्त्वा "सतां मुदे" इति सामान्योक्ति रूपया अप्रस्तुत प्रशंसया(१) पाण्डवानां लाक्षागृहनिर्गमात् पाञ्चालीविवाहाच्च-

---

१ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।
कार्येनिमित्ते सामान्ये विशेषो प्रस्तुते सति ।।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ।। १०।९९। काव्यप्रकाशे ।

जातस्याऽप्यात्मनो मौदस्य गूढतादर्शिता, तस्य महत्त्व विरागत्वाऽनुगुणा । क्रियासमुच्चयालंकारोऽप्यत्र रुचिरः(१) ।

स्वत इत्यादि द्वितीये पथे विदितवेदितव्यानामपि तेषामनुशासनस्यौचित्य-प्रतिपादने 'मदाख्ये ये माम्' इति विवक्षिते 'सुहृदाख्येयेवक्तारम्' इति सामान्योक्तिरूपयाऽप्रस्तुतप्रशंसया बाढं पराक्रम्यते । अन्यानुशासनाऽनौचित्ये स्वतोभातमतित्वस्य हेतुत्वाऽवगमात् काव्यलिङ्गं तत्राङ्गम् । यमकानुप्रासविच्छित्तिरपिश्लाघ्यैवाऽत्र ।

अष्टमीत्यादि तृतीये पथे पाञ्चाल्याः याज्ञसेनिमखशिखिशिखात्वेनोत्प्रेक्षा, पाण्डवानां च सुरसरिद्धृतवंशजत्वेन पावनत्वं प्रकाशितम्, तादृश्योः संसर्गस्याऽनुरूपत्वात् समालंकारौवृत्त्यनुप्रासश्चाऽत्र चमत्कारिणौ ।

जायेत्यादि चतुर्थपथे अनुशासनीयं वस्तूपक्रम्यतो मुनेः 'जायया च पतिभिश्च निर्वर्त्यमानस्याद्भुत' दम्पति' शब्दस्य पाण्डवानामर्थत्वप्रतिपादने पूर्ववाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम् यमकानि चाऽत्र विस्मयानुगुणानि ।

एकस्मै इत्यादि पञ्चमे पथे अनुशासनीयं विशदीक्रियते । करस्थशब्दस्यसन्निहितत्वातिशयबोधनेन अत्यन्ततिरस्कृताच्योलदाणामूलो ध्वनिः ।

सुन्देत्यादि षष्ठे पथे प्रसिद्ध निदर्शनमुपन्यस्यते । तत्र पूर्वार्धेऽप्रमीकशब्दगतश्लेषोपमयोश्चमत्कारः । उत्तरार्धे- पर्यायोक्तयोः 'मदनवशौजातौ , मृतौ चे' ति वस्तुनोः प्रकारान्तरेण कथनात्मकयोः श्लेषोपमायामङ्गतायाश्चमत्कृतिः काऽप्यपूर्वैव ।

तस्मैभ्रात्रेत्यादि सप्तमे पथे वक्तव्यमादिशति। अत्राऽपि 'मदन पारवश्येन भवतां भ्रातृस्नेहोमाग्नौ भवतु' इति वार्तायाः प्रकारान्तरेण कथनात्मके पर्यायोक्ते सौभ्रात्रेशरव्यारोपात् रूपकस्याङ्गता, यमक चात्र कामपि विच्छित्तिमेव विधत्तः ।

एवं पाण्डवानां सौजन्यादिभिरुद्दीपिता मधुरकल्याणकारिवचनैरनुभाविता मुनिगता तद्विषयिणी वात्सल्यरतिः सुतरां परिपोष्यते,चमत्कृतिं -

---

१ तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत्।

समुच्चयोऽसौ स त्वन्यो युगपद्यागुणक्रियाः।।१०।११६।काव्यप्रकाशे ।

चाऽधत्ते सहृदयहृदयेषु ।

ततश्चीत्यादि गद्येन- पाण्डवानां पारस्परिकी सन्धा प्रकाशिता ।- यस्मिन् अत्र सन्धायामसिधारोपमा, पाण्डवेषु चातकोपमा, जीवन-वर्षाशब्दगत श्लेषमूलाऽभेदातिशयोक्तिः, वर्षास्य दिनसंख्यात्रिगुणसंख्यकपदारूपप्रकारान्तरेण कथनात् पर्यायोक्तम्, यमकानि अनुप्रासाश्चाऽत्र चमत्कुर्वन्तितराम् ।

ततो राजानिदेशेत्यादि पद्येऽष्टमे- नारदस्य अन्तर्मुदो ज्ञापकहेतुरूपेण तस्य मधुरगायन-वीणावादनस्य बिबन्धनात् अनुमानालंकारोतिरुचिरः ।

ततो नवमे तरिमन्नित्यादि पद्ये- पञ्चपतिषु समान रूपेण वर्तने द्रौपद्याः पञ्चकल्पतरुगतदानलक्ष्म्याः कामपञ्चेषुगतजयसिद्ध्याश्चोपमाऽतीव चमत्कारिणी ।

(१३) अर्जुनस्य चौरापहृतविप्रगवानयनम्

अथ चौरापहृतगोधनस्यैकस्यविद्वि विप्रस्य राजद्वारमागत्य युधिष्ठिरोपालम्भनम्, अर्जुनस्य विप्राश्वासनम्, सशस्त्रचापस्याऽर्जुनस्य चौरहननं विप्रगवानयनं च कविना वर्णितं विविच्यते, यथा -

"विप्रः कश्चन तत्र जात्वथ भुजावुद्धृत्य चौरैर्हृता
गावो मे निखिला हतोऽस्मि विधिना वत्सोऽपि नो शिष्यते ।
राजन् ! राज्यमिदं विमुञ्च वसुधां शास्मीति सर्वान्नृपा-
न्किंवा हासयसीति रोषकटुवाग्द्वारं ययौ भूपतेः ।।३।१७।।

अत्र चौरकृतगवापहरणोन्नेयराजशासनशैथिल्योद्दीपितौ राजभर्त्सनविषयक कटुवचनानुभावितो विप्रगतौ ~~रक्षोरयमोषितः~~ क्रोधौ व्यज्यते । ब्राह्मणस्य तैजस्वित्वं निर्भयत्वं च तेन प्रकटी भवति । एवं कटुवाक्यानि ब्रुवत्यपिविप्रेऽर्जुनः सविनय एवाऽभूत् । यथा-

"दृष्ट्वा तं मधुरस्मितोऽथ विजयः कृत्वासनादुत्थितिं
नत्वाघ्रौ समवेक्ष्य भृत्यमिह मां ब्रूतन्नु । सहस्व क्षणम् ।
गावस्ते स्वयमाव्रजेयुरधुनेत्याश्वास्य दस्यून्पुरः
प्राविक्षन्मनसा ततस्तु नृपतेः शस्त्राय गेहं स्वयम् ।।३-१८।

अत्र अर्जुनस्यस्मितेन धीरत्वं आसनोत्थानपादनमनादिभिः विप्रविषायक आदरविनयौ च व्यज्यते, दस्यु विषायकश्च तन्निग्रहोत्साहः शस्त्रग्रहणयत्नानुभावितो धृत्यादि संचारिभावैः श्चपोषितो वीररसतां प्रपद्यते । प्रवेशनस्य दस्युगृहकर्मकतया क्रमशो वर्णनात् पर्यायोऽलंकारोऽत्रानुकूलः । ततः-

"तत्र तेन जगृहे तरस्विना चक्षुषा नृपतिरग्रनासखः ।
पाणिना च सशरं शरासनं पूर्तये सपदि विप्रवासयोः ।।३॥ १९।।"

अत्र विप्रवास श्लेषेण नृपतिशरासनयोरेकग्रहणक्रियायोगात् तुल्ययोगितया च कियत् संक्षिप्योच्यते कविना, तद् द्रष्टव्यमेव । विस्तृतस्याऽप्यर्थस्याऽत्र संक्षिप्यकथनात् समासख्यि प्रौढिभेदः। ततो -

"विनिर्गतौ सौ विशिखानिव स्वकान्
विमुक्तजीवान्विरचय्य तस्करान् ।
नितान्तवेगामिव गोपरम्परां
वितर्तयामास शुचं द्विजन्मनः ।।" ३।२० ।।

अत्राऽपि विमुक्तजीवनितान्तवेगशब्दार्थश्लेष सम्पादित साधर्म्यमूल्योपमया संक्षिप्य कथने कविना कियद् वैदग्ध्यं प्रकटी क्रियत इति द्रष्टव्यमेव सहृदयानाम् ।

(१४) अर्जनस्य प्रवासः उलूपी-चित्राङ्गदा-सुभद्राविवाहश्च

अथैकान्तस्थ सपत्नीक युधिष्ठिर दर्शनात् तत्प्रायश्चितरूपाय वर्षानिर्व

त्यर्थं प्रवासायाऽर्जुनस्य निष्क्रमणम्, तस्य उदीच्यांगमनम्, उलूपीनागकन्यया विवाहः, हिमालयदर्शनं च, ततः प्राच्यां गमनं महेन्द्राचलदर्शनं च, ततो दक्षिणायां गमनं कावेरी दर्शनं चित्राङ्गदा विवाहः, सेतुसमुद्रदर्शनं च, ततः प्राचेतसीगमनं गोकर्ण दर्शनम्, सुभद्रागुणश्रवणं तस्यां तस्याऽनुरागः, वर्षर्तुप्राप्तिः, तस्य भगवत्स्मरणं तद्दर्शनं तेनवार्ताश्च, भगवत्सम्मत्या तस्य रैवतक कुहरेस्थितिः, ततो तस्य बलरामकृष्णादिभिः कन्यान्तःपुरं नीत्वा निवासनम्, तत्र सुभद्रायास्तत्परिचर्यापरिचयानुरागाश्च ततो रात्रौ रथेन तयो निष्क्रमणं कुरुपुरप्राप्तिश्चेति वर्णितं विविच्यते, तद्वर्णनं यथा-

"प्रयाणलग्ने तदनु स्वमौलौ पार्थस्य जज्ञे नियमाभिषेकः ।
प्रागेव तीर्थोपगमात्पवित्रैर्वाष्पैर्नरेन्द्रस्य वियोगभीरोः ।।३।२१।"

अत्र युधिष्ठिरगतोऽर्जुनवियोगज्ञानोद्दीपितो बाष्पानुभावितो विषादभावो व्यज्यमानः सहृदयहृदयग्राहायैव । अत्र विभावना प्रकृतार्थोपस्कारायैव, + नाऽत्रोत्प्रेक्षा, नियमाभिषेकत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदक तीर्थोपगमत्वावच्छिन्न प्रतियोगिकाभाव सामानाधिकरण्येन कार्यस्य वर्णनोपालम्भात्, अन्यथा तीर्थोपगमाभावकथनस्य वैफल्यापत्तेः अतो हि अत्राभिषेकस्य न नियमाभिषेकत्वेन संभावना अपितु अध्यवसानमेव । पार्थस्ततः प्रागुत्तरां यां दिशमित्युच्यते यथा -

"स धीरधीरत्युच्छ्रितेन कृच्छ्रेण राज्ञा कृताभ्यनुज्ञो वल्कलं घनं घनाघलघनाय परिधाय मलयानिल इव मनुष्यधर्मणा राजन्वतीं काष्ठां प्रतिष्ठमानस्तपःप्रसादितस्य भगवतो भवानीवल्लभस्य साक्षात्कृपामिव भगीरथरथपथानुसारिणीतरंगिणीमुपगम्य तत्र पवित्रासु वीचिषु सायंतननियमाय क्रमोऽघमर्षणीर्जपन्मज्जनमकार्षीत् ।" ३।२१। गद्यम् ।।

अत्राऽर्जुनेमलयानिलोपमा, उत्तरस्याः घनदोपलक्षितत्व वर्णनात् उदात्तम्, गंगायाः प्रकारान्तरेण कथनात् पर्यायोक्तम्, शंकरकृपात्वेन संभावनाच्चोत्प्रेक्षा, इत्यर्थालंकाराणामनुप्रासयमकानां च शोभा द्रष्टव्यैव ।

ततस्तत्रैवाऽर्जुनस्य नागकन्यया मूढसंगम हरावांश्च ततो जात इत्युच्यते,

यथा-

' नालीकात्कुवलय संक्रमे स्खलित्वा
मग्ना यः पयसि रमैव तत्र काचित् ।
तं दृष्ट्वा भुजगसुता मिथो रिरंसुः
संतुष्टा हृदयमिवानयत्स्वगेहम् ।।
' प्रहृष्य हृदि तत्रैषा मनुष्यं फणिनां रतेः ।
संतर्पयितुमारेभे कंदर्पसममर्जुनम्।। '
' भोगाय तस्याभुजगेन्द्रपुत्र्याः फूत्कार एव स्फुटसीत्क्रियासीत् ।
कस्तूरिकाकोऽजनि कण्ठनील्यं फणामणिः पल्लवशेखरोऽभूत् ।।'
' पाण्योर्ज्यामर्शकाठिन्यं तस्य तत्कुचमर्दने ।
तस्याश्च तन्मुखास्वादे फलायाभूद्विजिह्वता ।।'
' सुखाच्चक्षुःश्रवस्तन्व्याः सुरते मीलनं दृशोः ।
चक्रे मणितवैदग्ध्यं तस्य काननकौमुदीम् ।।'
' श्लाघाकम्पात्प्रियरतेः शिरसोऽन्तःपथादधः ।
च्युतो मणिरिवेरावान्सुषुवे तनयस्तया ।।'
' इत्थैकिकां स रजनीमपनीय तत्र
श्वासैः समं स्वकुलसंभवपृष्ठमित्रैः ।
मुक्तस्तया तटगतोऽनुचरान्द्विजाती-
नन्तर्वतोऽद्भुतरसैरतनोत्स्ववृत्त्या ।।' ३। २२-२८ ।।

अत्र नालीकादित्यादि पद्ये - नागकन्याया अर्जुन विषया रतिः गृहे तदानयनानुभावैर्हर्षौत्सुक्यादि संचारिभावैश्च पोषिता प्रकाशते । रसोत्प्रेक्षा ऽत्र नागकन्याया स्वरूपसौन्दर्योत्कर्षिका, उपमा च समासाख्य प्रौढिगुण निर्वर्तिका तस्या विस्तृतस्याऽप्यर्थस्य संदीपणोक्तौ सहायभूतत्वात् ।

प्रहृष्येत्यादि द्वितीये पद्ये नागकन्यागतरत्यनुभावानां वर्णनम्, तत्र - कन्दर्पोपमा च आलम्बनविभावभूतस्याऽर्जुनस्य स्वरूपसौन्दर्योत्कर्षिका ।यमकानुप्रासावपि तत्रानुगुणौ ।

भोगायेत्यादि तृतीये पद्येऽपि नागकन्यागतरत्यनुभावस्य वर्णनम् । आरोप्यमाणानां सीत्कारादीनां प्रबलसंभोगोपयोगितयापरिणमनात्परिणामः(१) अनुप्रासानुगुण्यमपि रुचिरम् ।

पाण्यौरित्यादि चतुर्थे पद्ये नागकन्यार्जुनयोः कुचमर्दनाऽधरास्वादनयोः परस्परविषयकरत्यनुभावयोः तुल्ययोगितालंकारेण संदिप्यवर्णने दर्शितं चातुर्यं कविना। ध्वनितं च तेन द्वयोरौत्सुक्यमहाभागधेयशालित्वम् च काठिन्यद्विजिह्वतादोषयोर्गुणत्वेन वर्णनात् लेशालंकारो(२)ध्वन्यनुकूलः ।

सुखादित्यादि पञ्चमे पद्येऽपि उभयोरुभयगतरत्यनुभावयोर्वर्णने दृङ्निमीलनेन मणितेन च आनन्दमिमग्नतायाः हर्षौत्सुक्ययोश्च ध्वनिः।नागकन्यायाश्चक्षुःश्रवस्तया सुरते दृङ्निलीननेन श्रवणशक्तिनिरोधेऽर्जुनमणितं तयानशुतमितिवार्तायाः प्रकारान्तरेण कथनात् पर्यायोक्तालंकारोऽप्यत्र कानन-कौमुदी रूपक-मूलश्चमत्कारकः । एवं संभोगरतेरुभयनिष्ठायाः परिपोषोदर्शितः।

श्लाघेत्यादि षष्ठे पद्ये हेतूत्प्रेक्षायाः स्वरूपोत्प्रेक्षायाश्च विन्यासोऽपि चमत्कारकोऽत्र प्रत्यग्रजातस्य बालस्याऽरुण्य दर्शनाय मणिस्वरूपोत्प्रेक्षा नितरामुपस्कारिका ।

इत्येकीत्यादि सप्तमे पद्ये नागकन्यागत विप्रलम्भरत्यनुभावतया तस्या दीर्घनिःश्वासाः तद्व्यभिचिन्ताविषादादिसंचारिभावानां च व्यञ्जनया विप्रलम्भपरिपोषो दर्शितः । अत्रार्जुनस्य श्वासैः सह मोचनस्य कथनात् सहोक्तिः, तस्यां श्वासानां दीर्घपृष्ठ-पृष्ठोपमाया लुप्तता, आश्चर्यान्वितत्वस्य अद्भुतरसगर्भितत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम् । तत्रोपमालंकारोपपादितासहोक्तिः अनुभावोत्कर्षिका । द्विजातीनामाश्चर्यान्वितत्वस्यापि प्रकारान्तरेण संदोषेण च कथनात् कापि वर्णना प्रौढिः कवेः प्रकटी भवति ।

ततः-

"उलूपिकाया रतिदंशनैस्तैरुन्मस्तकं मोहमिवापनेतुम् ।

---

१ परिणामः क्रियार्थश्चेद् विषयी विषयात्मना ।। २१। कुवलयानन्दे ।

२ लेशः स्याद् दोषगुणयोर्गुणदोषत्वकल्पनम् ।। १३८ कुवलयानन्दे ।

उदग्रवीर्यौषधिजन्मभूमिममुमागुरुं शैलमयं प्रपेदे ।।'

'कालस्य कूर्वविशिखे पदयोः कृतान्ते हासस्य दानवपुरेष्ववलोकनस्य ।
शम्बायुधे पशुपतेरपदानपद्यं गायन्ति सिद्धमिथुनान्यशृणोत्स तस्मिन् ।।'

'तत्र तस्य हिमाचलस्य खरखुरपुटविनिमयविन्यासचन्द्रकितैरवतारपथैरपि रोमन्थकेनशकलतारकिते: प्रतीरनेरुतलोपवेशैरप्यनुमेयहरवृषभस्वैरविहारासु कटकसरसीषु वृजिनानि विशोध्य वनमदावलकलभविदलितसरलद्रुमप्रवालपरिमलसुरभिलेनोपत्यकावर्त्मना दिवि भुवि गतिकुशलाभ्यां महेन्द्राभ्यां परिगृहीतां हरितमवजगाहे ।' ३। २९-३० ।।

अत्र उलूपिकेत्यादि प्रथमे पद्ये- अर्जुनस्य हिमगिरिगमनमोहापनयनकलकत्वोत्प्रेक्षा, उन्मस्तक शब्दे लक्षणाया उद्भूतत्वस्याऽतिशयं प्रकटयन् लक्षणामूलोऽत्यन्ततिरस्कृतवाच्यो ध्वनिश्च चमत्कुरुतेतराम् ।

कालेत्यादौ द्वितीये पद्ये च - पशुपतेरतीतानां महतां कर्मणां हिमगिरिमहत्व प्रकाशकतया वर्णनात् उदात्तालंकारश्चमत्कारकः । अपदानकर्मगायनेन सिद्धमिथुनानां पशुपतिगतारतिशंसनव्यापारव्यक्त हर्षध्वनिना पोषिता प्रतीयते, तेन भावध्वनिरप्यत्र ।

तत्रेत्यादौ गद्ये च - यमकानुप्रासैः रोमन्थशकलेषु तारकारोपाद् रूपकेण, प्राच्याः पर्यायान्तरेण कथनात्मकेन पर्यायोक्तेन च श्लेषोपबृंहितेन चमत्कृतिरवहेलाकिंकिदिकेव सहृदयानाम् ।

'सम्फुल्यमानैर्नवकेतकपांसुगर्भैः
पर्यन्तनिर्झरजलैः फलिताभिषेकः ।
पार्थः स तत्र जनकाभिधयेव हृष्टः
पादैः चिरं परिचचार गिरिं महेन्द्रम् ।। ३।३१ ।'

अत्र केतकैर्निर्झरैर्महेन्द्रस्तेन च शोभिता प्राचीसंक्षिप्य सम्यग् वर्णिता । वृत्त्यनुप्रासः प्रसादमाधुर्यानुगुणः , अर्जुनस्य महेन्द्रपाद परिचर्यायां जनकाभिधाहृष्टत्वस्योत्प्रेक्षा अत्यन्तपर्वत-चरणवाचक- पादशब्दगतश्लेषमूलाऽभेदातिशयोक्तिस्तर्दङ्गम् ।

ततः -

"जलधितटपदव्या भर्करैश्चीरशब्दै-
रवमयमनुकुर्वन् राजतालीवनानाम् ।
रतिपतिरथकारैणाद्रिणा लांछितायां
दिशि विविधतटिन्यां ददर्शदुः प्रतस्थे ।।"

"अदृणां प्रचारादतिवर्तमानमालोकमालोकमसौ पयोधिम् ।
तटेन गच्छंस्तरसोपलेभे चोलीहरिद्रासुरभीन्समीरान् ।।"

"शैलो गर्भे शिशुरिव भुवः शासनाद्यस्य शेते
वातापिं यो जठरदहने कल्पयामास हव्यम् ।
दाक्षिण्यान्नम्रकरणमहिमा कोपलेशो यदीय-
स्तस्यावासं दिशमभिययौ तापसस्येन्द्रभूनुः ।।"

"धृत्वा फलेषु सलिलानि कावेरजायाः
साम्यं परीक्षितुमिवाम्रसरिद्गुणौघैः ।
अभ्रंलिहैर्निबिडितां तटनारिकेलै-
रालोक्य चोलवसुधामयमभ्यनन्दत् ।।"

"कालेन संगततमां कटुतामवेत्य
स्वर्गौकसामध सुधारसनिःस्पृहाणाम् ।
अभ्रंलिहः फलवतस्तटनारिकेलान्
सह्यात्मजासलिलवैवधिकानमंस्त ।।" ३।३३-३७ ।।

अत्र जलधीत्यादौ प्रथमे पद्ये भर्करैरवैरालम्बयद्भिस्तालीवनैर्जलधितट-भूः सम्यग् वर्णिता । वृत्त्यनुप्रासः, उपमा, दक्षिणायाः प्रकारान्तरेण कथन रूपं पर्यायोक्तं चात्र भाढं चमत्कुर्वन्ति ।

अदृणेत्यादौ द्वितीये पद्ये - नयनपथातिवर्तमानत्वरूपेण जलधिः संदो पेण चारुतया च वर्णितः । आलोकवीप्सयाऽर्जुनस्य हर्षोत्सुक्यादि ध्वन्य-ते । हरिद्रालेपसौरभेण चोलदेशस्य सन्निहितत्वं व्यज्यते ।

शैलेत्यादौ तृतीये पद्ये अगस्त्यमुनेः तद्वारा दक्षिणस्यादिशश्च प्रकारा

न्तरेण कथनात् पर्यायोक्तद्वयम्, तथाविस्मयापादकवृत्तैर्वर्णितस्य भगवतोऽगस्त्यमुनेः रूपलक्षणत्वेन दर्शितत्वादुदात्तालंकारश्च नितरां चमत्कुरुतः । तत्र चोपमायाः वातापिभक्षणस्य समुद्रपानस्य च पर्यायान्तरेण वर्णनात्मकं पर्यायोक्तान्तरद्वयस्य चाङ्गिता अनुप्रासाश्च परमविच्छित्याधायकाः ।

घृत्वैत्याद्योश्चतुर्थे पञ्चमे पद्ये फलैर्जलघृतौ गङ्गाजलसाम्यपरिक्षाणफलोत्प्रेक्षाया वैधर्म्यस्वरूपोत्प्रेक्षाया प्रसादमाधुर्यानुगुणैर्वृत्त्यनुप्रासैश्च नारिकेलानां तैश्च दक्षिणाब्धिजलस्य हृदयस्पृग्वर्णनमक्रियत कविना ।

"तत्र चित्राङ्गदा लेने व्यूढा राजकुमारिका ।
दर्शने दौहृदातौं च द्वयोरासीदनङ्गदा ।।"

"एलालवङ्गतरुपिप्पलिकापटीर-
ताम्बूलिकाक्रमुकदम्पतिभावरम्याम् ।
उद्यानभूमिमुपगम्य तया स पार्थः
सुस्थान्वितुः पदमन्यत बल्वजेभ्यः ।।"

"दिवसे शुभंयुगुणाकोरक्षिते दयितं हृदि स्थितमिवार्तिमती ।
अवतार्य सा भुवि कुमारमधादथ बभ्रुवाहन इति प्रथितम् ।।"

"तत्र स कानिचिदिनान्युषित्वा प्रयामीति भाषितस्य पक्ष्मावलम्बिबाष्पमेवोत्तरयन्तीं प्रेयसीं रहसि दृढालिङ्गनतरङ्गितवल्कलोत्तरीयमर्मरसहाध्यायि सीत्कृतं पुलकाङ्कुरे कपोलतले परिचुम्ब्य तस्याः कथंचिदुदञ्चितानुमतिर्निर्गत्य-"

।३। ४०-४२।।

अत्र प्रथमे पद्ये - चित्राङ्गदाया अर्जुनगतरतिविभावत्वम् सगर्भावस्थत्वं च वर्णितम् । अनुभावसंचारिण उन्नेयाः, अनङ्गदशब्दगतः श्लेषस्तन्मूलोविरोधाभासः, दर्शनदौहृदात्योरेकया अनङ्गदया योगात् तुल्ययोगिता च कक्षीकृत्य वर्णनसंकरोपे मृशं पराक्राम्यन्ति ।

द्वितीये- अर्जुनगतायाश्चित्राङ्गदाविषयकरतेस्तत्साहचर्यादयोऽनुभावाः हर्षौत्सुक्यादयश्च संचारिभावा वर्ण्यन्ते । उद्यानविहारस्य सुखे तस्य चैन्द्रपदावमाने हेतुत्वावगमात् काव्यलिङ्गद्वयेन स्वर्गति मणालूरपुरस्योत्कर्षं प्रतीत्या व्यति-

रैकः - ध्वनिः । तेन चोद्दीपनविभावोत्कर्षप्रतीतिः । वृत्त्यनुप्रासश्चाऽत्र शृङ्गारा ऽनुसारिमाधुर्यगुणाऽनुगुणः ।

तृतीये च बभ्रुवाहनस्योत्पत्तिः । दयितोत्प्रेक्षाया च पुत्रस्य पित्रनुरूपत्वं ध्वन्यते ।

गद्ये च - चित्रानुगुदा विप्रलम्भरतिः बाष्पादिभिरनुभावैः विषादादिभिः संचारिभावैश्च पोषिता प्रतीतिपथमवतरति । बाष्पे उत्तरारोपस्य प्रकृतोपयोगित्वेन परिणमनात् परिणामालंकारः । तस्य उपमाऽनुप्रासानां विच्छित्तिः रुचिरैव ।

'रत्नोदधिमिरिक्ष्वाकुपतिसेनाध्यक्षैरुत्पाटितानां मलयदर्दुरमहेन्द्रपादानां मूलशिलातलपरिदृश्यमानकरागुलिनखरेखाव्यावर्तितकुलिशमयोच्चलितशैलसंस्थानबुद्धिभिः संनिवेशावटैः स्थपुटितामटवीं विलङ्घ्य पुत्रीनिकारुष्णा पुलस्त्यान्वयस्य पुरीमुन्मूलयितुं प्रसारितेन भुवो भुजेनेव सेतुना कृतसीमन्तमुदन्वन्तमभजत ।'

'समीक्ष्य सेतुं रघुवीरनिर्मितं स चित्रभित्तीकृतघोर्घनध्वयः ।
दिनेशवंशस्य तपोविचारणे चिरावकाशं विततान चेतसि ।।'

'अबुधैर्वानरपातिताचलशिलासंघातनिष्पेषिता-
दक्षुण्णान्यैः कुणिभिः करेण च पदा क्षुण्णैः पयोमानुषैः ।
वीचीवीथिषु कीर्त्यमानमनघं वृत्तं रघूणां प्रभोः
श्लाघं श्लाघमसौ तटेन हरितं प्राचेतसीमभ्यगात् ।।३१. ४४-४५।।

अत्र गद्ये - उत्प्रेक्षायाऽनुप्रासैश्च सेतुः सम्यगवर्ण्यत ।

प्रथमे पद्ये- सेत्वालम्बनकः अर्जुनगतो विस्मयः स्तम्भादिभिरनुभावैः हर्षौत्सुक्यादिभिः संचारिभिः पोषितोऽद्भुतरसतयाऽऽस्वाद्यते । अत्राऽनुप्रासकाव्यलिङ्गश्लेषरूपकपर्यायोक्तानां च विच्छित्तिरपि आल्हादिकैव । तत्रविस्मयोचित्रस्य धिषि च भित्त्यारोपाद् रूपकं, विस्मये सेतुदर्शनस्य हेतुत्वावगमात् काव्यलिङ्गम्, चेतसि विचारणस्य प्रकारान्तरेणाकथनात् पर्यायोक्तम्, त्र शब्देश्लेषश्च स्पष्टान्येव ।

द्वितीये - पयोमानुषगतायां रघुपतिविषयायां रतेस्तद्वृत्तकीर्तनानुभावै

र्षादि संचारिभावैश्च पोषितायाः सागरवर्णने गुणीभावात् प्रेयोलंकार(१) सातिशय-सहृदय सहृदयाह्लादाय पर्यवस्यति । वीप्सया वीप्सायाश्चारोपाद् रूपकमनुप्रासैश्चत--त्रौत्कर्षकतयाऽनुगुणतां भजतः ।

" गोकर्णमित्य स कुलाद्रिसुताप्रियस्य
पुष्पाणि मूर्ध्नि निदधे पुरुहूतसूनुः ।
आगामिनां निजशरासनताडनाना
मत्रावकाश इति सूचयतेव दोष्णा ।।"

गोपृष्ठलग्नं कुलशैलकन्यासहायमन्तः सततं दधानः ।
आश्चर्यमेदिष्ट तमेव देवं गोकर्णवासं कुरुराजसूनुः ।।"

" पापापनुत्यै परिकल्पितो यः
प्रभासतीर्थे प्रथितेऽभिषेकः ।
सेतुं दृशा दृष्टवतोऽस्य सोऽसौ
साध्यं विना जागरितो बभूव ।।" ३।४६-४८ ।।

अत्र प्राचेतसीवर्णयिता कविना तत्र गोकर्ण-प्रभासतीर्थाभ्यां तस्याः परं पावनत्वं मनोरमत्वं च ध्वनितम् । तत्र उत्प्रेक्षा श्लेषमूलकविरोधाभासाऽनुप्रासानां चमत्कारो हृद्य एव । गोपृष्ठनिष्ठत्वगोकर्णवासित्वयोश्च विरोधः स्फुट एव ।

" पापापनोदे फलितेऽर्जुनस्य प्रागेव सेतोरवलोकनेन ।
प्रभासतीर्थे नियमाभिषेकः पश्चात्सुभद्रागमहेतुरासीत् ।।"
" ततो घनाविर्भवनाद्भियेव तत्रामलं मानसमस्य भेजे ।
कर्णान्तरक्ष्मौक्षपथेन शोभायशोमरालो यदुकन्यकायाः ।।"

---

१ रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा ।।
रसवत् प्रेय ऊर्जस्वि समाहितमितिक्रमात् ।
भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः ।। १०।९५-९७।सा०दर्पणे

स्मृतिपथस्थितयापि सुभद्रया जनसमक्षमिवासितुमाक्षमीः ।
द्विजकुलानि स तत्र समत्यजत्सहचराणि रतीशवशंवदः ।।'

'पयसा परिपूरितौ घटौ परिपश्यन्पथि पाकशासनिः ।
कमलाक्षकनीयसीकुचौ कलयामास करस्थताविव ।। ३।४९-५२।।'

अत्र सुभद्राविषयारतिस्तद्रूपमाधुर्यादिश्रुतगुणोद्दीपिता एकान्तसेवाचनुभावैरनुभाविता चिन्तौत्सुक्यादिसंचारिभावैः पोषिताच्च पूर्वरागाख्यं विप्रलम्भरसतांश्रयन् प्रतिपद्यते सहृदयाह्लादाय । तत्रानुप्रासः मानसशब्दगतः श्लेषः सार्द्धं समस्तवस्तुविषयक शोभायशसि रूपकमुल्लेखाश्च नितरां चमत्कुर्वन्ति चेतः सुधियाम् ।

वर्षा वर्णनम्

'चक्राह्वयीमदपश्यतोहरचलच्छम्पासमुन्मेषणैः
पुष्यत्केतकगन्धसिन्धुविलुठत्पुष्पद्रयान्धीकृतैः ।
मेदस्वीकृतकेकिनीकलकलैर्मेघैकराशामुखैः
पान्थानामपमृत्युभिः कतिपयैः प्रादुर्बभूवे दिनैः ।।'

'कालाम्बुदालिनलिकात्कणादीप्तिवर्त्या
संधुक्षितात्सपदि सध्वनिनिःसरद्भिः ।
वर्षाश्मसीसगुलिकानिकरैः कठोरै-
र्घर्माभियातिमवधीद्घनकालयोधः ।।'

'माध्वीलिहा विरुरुचे मलिनीकृताग्रा
कान्तारसीम्नि नवकेतकबर्हरेखा ।
दग्धाङ्गले स्मरभिया दयिताजनेन
संप्रेषिता पथिकभर्तृषु पत्रिकेव ।।'

'अर्जुनेषु सकलेषु विकासिष्वद्रिसीम्नि घृततादृशशब्दः ।
एक एव विशुशोष विशेषा देतदम्बुमृदनेहसि चित्रम् ।।'

"वियत्यशेषासु विदिक्षु दिक्षु वियोगशिल्पीन्द्रविनिर्मितायाः ।
तस्यामृगाक्ष्याश्च तडित्ततेश्च घनंजयः संविविदे न भेदम् ।।३।५३-५७ ।।"

अत्र सुभद्राविषयाया अर्जुनगतायास्तेरुद्दीपनरूपेणावर्णनं साधु वर्णितः कविना । तत्र तस्य घोरतरघोषगम्भीरसविद्युद्द्योतघनकटाटोपमुद्गयस्य वर्णने समुपयुक्तस्यौजसो व्यञ्जकतया संयुक्तादारघटितदीर्घसमास प्रचुरा गौडीया रीतिः कैकिनीकल-कलवर्णने मधुराक्षारघटितनातिदीर्घसमासा पाञ्चाली रीतिः तत्तदनुगुणो वृत्त्यनुप्रासश्च प्रयुक्ताः चमत्कुर्वन्ति वेतः सुधियाम् । पश्यतोहर शब्दे लकाणलकाणामूलोऽत्यन्त तिरस्कृतवाच्योध्वनिर्मदस्य नाशातिशयं व्यनक्ति । अपमृत्युयोधरूपकेऽपि तस्यौजस्वित्वाऽनुकूले केतक कुसुमदलस्य कष्टमयकथासंभृतपेशिकात्वेनोत्प्रेक्षाणामुद्दीपिकतातिशय द्योतकम् । अर्जुनानां विकासे समये समये एकस्याऽर्जुनस्य शोषहेत्वभावेऽपि शोष वर्णनाइ विभावनालंकारेण तद्गतरत्याः कार्श्यमनुभावः+ तद्व्यभिचन्तारश्च वेगदैन्याख्य संचारिभावाश्च दर्शिताः । कल्पनामयुयायदुकन्यका यास्तडित्ततेश्च भेदाऽनवगमात् सामान्यालंकारेण सह वर्णितोऽर्जुनस्याभक्तोऽनुरागः परां काष्ठामारूढ उन्मादाख्यस्मरदशा प्रयोजकोऽप्यभूदिति सम्यग् वर्णितः पूर्वरागश्चमत्कारीति सचेतसः ।

तदनु हरिसहोदरायाः सुभद्रायाः प्राप्तेः सर्वदा सहायत्वेन स्थितस्य तस्य हरेः कृपां विना खपुष्पायितेव स्यादितितमेव स्मरत्यर्जुनः, यथा-

"मन्मथे ज्वलति वासवसूनुर्मानसे परिणये यदुपुत्र्याः ।
लाजवापमिव कर्तुमुपेन्द्रं तत्सगर्म्यमथ चित्तमनैषीत् ।।" ३।५८ ।।

अत्र मन्मथेऽग्निधर्मस्य ज्वलनस्य वर्णनात् व्यङ्ग्यायाः मन्मथस्य अग्निरूपतायाः फलोत्प्रेक्षायामुत्वाद्गुणीभूतता, माधुर्यानुगुणो वृत्त्यनुप्रासश्च नितरां चमत्कुर्वन्ति ।

ततः -

"विजयो मधुरस्मितस्य भावं विदुषस्तस्य मतेन भिद्यवेषः ।
कुसुमास्त्रभयादिवातिगूढः कुहरे रैवतकस्य तिष्ठति स्म ।।"
"तदात्व एवाद्रितटात्पतिः श्रियः परिप्लवं तं प्रकृते शुभागसे ।

यदाशये ते शय एव तद्गवेदिति ब्रुवन्द्वारवतीं पुनर्ययौ।।३।६१,६३।।

भगवान् स्वादेशेन भिक्षुवेषेण रैवतकगव्हरे तिष्ठन्तमपि 'किमनेनभविष्यति' इति सन्दिहानं 'यदाशयेतेशयएवते भवेत्' इति ब्रुवन् तत्सन्देहं निवर्तयतीत्यनेन भगवतो भक्तवत्सलत्वं तन्मनोरथपूरणसन्नद्धत्वं च ध्वन्यते। भिक्षुवेषधारणेन अवहित्थाभावध्वनिः। परिप्लवत्वेन शंकाभावध्वनिः, तेन पूर्वरागः पुष्यतितराम्। गूढवासे भयस्यहेतुत्वेनोत्प्रेक्षा, यत्तत्पदपरामृश्यवस्तुन आशयशययोः क्रमेण कथनात् पर्यायालंकारश्च भृशं भासेते। माधुर्यानुसारी वृत्त्यनुप्रासोऽपि प्रकृतोपयुक्त एव।

तदनु भगवत्कृपया भिक्षुवेषोऽर्जुनो राजभवनमुपनीय कन्यकान्तः पुरं प्रवेशितः, सुभद्रैव च तत्परिचरणायन्ययुज्यत, सा च तं परिचरितुमारेभे, यथा -

'मार्गे शरत्रयमुष्य कृते विमुच्य
शेषं द्वयं पुनरिवोज्झितुमाकुलोभः।
शुश्रूषितुं तदनु सोदरयोदितायास्तन्व्याः स्मरो नयनमेव शरं व्यतानीत्।।'

'वपुषा मधुरेण सुभ्रुवो धनुषा चित्तभुवश्च तर्जितः।
तपसेव दिने दिने तनोस्तनिमानं जगृहे स मस्करी।।'

'प्रतिनिःश्वसिते दीर्घं पाणिना नासिकां स्पृशन्।
भावयामास पार्थोऽयं प्राणायामसमापनम्।।'

'कन्याकरे मृदुनति पादपद्मं पुष्यन्ति गात्रे पुलकांकुराणि।
हरे हरे माधव माधवेति हरिस्मृतेरन्यथयाऽप्यकार।।' ३।६४-६६,६८।।

अत्राऽपि सुभद्राविषयाऽर्जुनगता विप्रलम्भरतिरेव पूर्वरागरूपा कार्श्यदीर्घनिःश्वासपुलकादिभिरनुभावैः स्तब्ध्यग्लौल्यैश्च चिन्ताऽवहित्थौत्सुक्यादिभिः संचारिभिश्चभावैः परिपोषिता चर्वणाविषयतां याति सुधियाम्। न चाऽत्र - सुभद्रासंपर्के कुतोऽर्जुनस्य विप्रलम्भावकाश इति चेन्न यतोह्युच्यते 'रसगंगाधरे(१)यत्

---

१ रसगंगाधरस्य प्रथम आनने।

'संयोगश्च न दम्पत्योः सामानाधिकरण्यम्, एकतल्पशयनेऽपीर्ष्यादि सद्भावे वि प्रलम्भस्यैव वर्णनात् । एवं वियोगोऽपि न वैयधिकरण्यम्, दोषस्योक्तत्वात्,- तस्मात् द्वाविमौ संयोगवियोगाख्यान्तःकरणवृत्तिविशेषौ, यत्- संयुक्तो वि युक्तश्चाऽस्मीति धीः ।' एतदनुसारं सुभद्रासंपर्केऽपि अर्जुनस्य नास्ति तत्प्राप्ति धारणा अत एव तस्य कार्श्यं दीर्घनिश्श्वासादि युज्यते । स्मरे लुब्धत्वोत्प्रेक्षा नयनेशरस्य वपुष्यधनुष्टश्चारोपाद् दीर्घनिःश्वासानां प्राणायामसमापनेन पुल-काङ्कुराणां हरिस्मरणेन सुभद्राभिलाषातिरिक्तहेत्वन्तरमूलकत्वप्रकाशनात् च व्याजोक्तिश्च(१) तत्राऽनुगुण्यमेवाऽऽचरतः । विप्रलम्भानुसारिमाधुर्यगुणानुगुणो वृत्त्यनुप्रासोऽपि मनोरमोऽत्र ।

ततः सुभद्रायाः संन्यासि विषयकसंशये अर्जुनत्वेन तस्यज्ञाने प्राकट्ये च जाते सति बलरामस्यनगरेऽनुपस्थितौ भगवतश्चाऽऽनुकूल्ये तांस्वानुरक्तां वीक्ष्याऽऽ दायनक्तमेव नगरात् निःसृत्यरथारूढः स्वपुरमिन्द्रप्रस्थं ययौ, तत्र च सा सुतम-भिमन्युं सुषुवे, इति वर्णितं वैदग्ध्येन, यथा -

'एकदा निर्वर्त्य प्रत्यवसानकृत्यं प्रतिक्षणमिदुचापदुरप्रसंतक्षणेन सम-न्तात्पतितैः सत्वगुणाशकलैरिव स्वेदबिन्दुभिर्व्याकीर्णां चैनूरवीं त्वचमध्यास्य-विश्राम्यन्तं तं कुहनासंन्यासिनं घर्वित्रेण वीजयन्ती सुभद्रा तैस्तैरिङ्गितैर्यतित्वे संशय्य तस्य तत्त्वजिज्ञासया सविनयमनुरहसि व्यजिज्ञपत् ।।'

'तपस्विन्नथ मे प्रीतिस्तवाभ्यागमसंभवा ।
कन्यामौनाक्कीर्णित्वे कल्पशाखाशिखायते ।।'

इदानीमसौ,-

'यदवः खलु पुण्यराशयो यतिनामिन्द्र ! तवाङ्घ्रिसेवनात् ।
शिरसैकमवाप्य अद्रजो मनसान्यत्परिवर्ज्यते च यैः ।।'

'भगवन्नखिलं विबुध्यसे परमार्थं वद भावि मे शुभम् ।
प्रयता यतयो भवद्विधाः प्रणिधानेन हि दिव्यचक्षुषः ।।'

---

१ व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।। १०।११८। काव्यप्रकाशे ।

'अवकर्ण्य तदेष मीलितः क्षणमक्षणोः प्रतिवाचमाददे ।
बहुना किमयि! स्वकैर्गुणैर्विजयं प्राप्स्यसि योषितां कुले ।।'
'पादाङ्गुष्ठनखं यस्ते फाले कुर्याद्विशेषकम् ।
स नरोऽपि स्मरेणार्तः स्त्रीः स्यादाभिषं दृशोः ।।'
'इति सा तस्यक्ति वक्रिमस्पृशा वचसा श्रवसा च विकृतपूर्वैस्तैस्तैर्दक्षणैः सोऽयं संक्रन्दननन्दन इति निश्चयमणिं हृदयपेटिकापुटे निधाय 'भगवन्! भवद्-भिहितयोर्विजय-नरशब्दयोः क्रमेण धर्मिपरता च विशेषनामता च तव कृपया' - इति तस्मै व्रीडातरलतरनयनं वदनभवनं मन्ती तस्थे ।'
'यमेवमुद्दिश्य तवोक्तिमर्मणी स एष दासोऽस्म्यनुकम्पनीयः ।
इति प्रकाश्य क्षणमर्जुनत्वं चुचुम्ब तां चोरयतिः कपोले ।।'
'स्वेदाम्बुपूरभरिते मुदृशस्तदास्याः क्षौत्रे स्वकिंशुकशिलीमुखसीरकृष्टे ।
पुष्पास्त्रकर्षकवरः पुलकच्छलेन शृङ्गारबीजनिकरान्निविडानवास्सीत् ।।'
'तस्यामेव वधूमिमां स रजनौ सद्योऽनुकूलां रहः
पाणौकृत्य विलोकितोत्सवभरो द्राम्यां हरिभ्यामपि ।
पौरेभूमयथा जनेष्वजलतां प्राप्तेषु पार्थस्तया
जाग्रत्सारथिविद्यया सह रथारूढः पुरान्निर्ययौ ।।'
'आकर्ण्यैदं जृम्भितानां यदूनां पार्थोद्दिशात्क्रोधनत्वस्य जातेः ।
म्लानिं दातुं माधवो माधवोऽभूत्तत्रायत्ता कौरवी सा समृद्धिः ।।'
'रणोत्साहे शान्ते यदुजङ्घिमकीर्तिध्वजलतां
मुहुः स्मारं स्मारं कपटयतितां वल्गितकुचम् ।
हसन्त्याः प्रेयस्या दशनरुचिमित्रीकृतयशाः
शतार्जुनाविक्रात्सुरपतितनूजो निजपुरीम् ।।'
'ततो मुहूर्ते सकलाभिनन्दे कुरुद्वहानां कुशलोदयाय ।
सुतं सुभद्रा सुषुवेऽभिमन्युं प्रवीरसूः सा तमिव प्रवीरम् ।।'
'पाञ्चालपुत्री च पतिव्रतानां प्रधानभावे कृतपट्टबन्धा ।
पञ्चापि सद्यः प्रतिमूर्तिव स्वान्पतीन्पितॄणामनृणानकार्षीत् ।।३।६८-८०

अत्र प्रथमे गद्ये स्वेदाख्य सात्त्विक विकारा ऽनुभावेन साफल्यालाभवन्य आवेगाख्य संचारिभावो + व्यज्यमानो ऽर्जुनगतां सुभद्राविषयां विप्रलम्भरतिं पुष्णाति । स्वेदबिन्दुषु सत्वगुणशकलत्वेनोत्प्रेक्षा तत्रा ऽनुगुणा ।

ततस्तपश्चिन्नित्यादौ पद्यत्रये तस्य यतित्वे संशयानायाः सुभद्रायाः-तत्स्तुति पूर्वकः स्वभाविविषये प्रश्नः । तत्र यतिगतासुभद्राभक्तिः तत्स्तुत्यभिव्यक्ताचमत्कारिणी । तत्र एकस्य रजसः शिरसानुग्रहस्य अन्यस्य च रजसो मनसावर्जनस्य कथनात् परिवृत्यलंकारः(१), यतिगतभाविकथनसामर्थ्यस्य सामान्येनाऽर्थान्तरेण समर्थनात् अर्थान्तरन्यासश्च तदुत्कर्षायाऽलं प्रभवतः । यतिर्यदि सन्तोषजनकं किमप्युत्तरं यच्छेत् तर्हि यतिरेवाऽयम्, अन्यथा कोऽपि मायामनुज - इति विचार्य संशयानाश्चा अपि तस्याः प्रश्नः स्वभावि विषये युज्यते, भक्तिप्रदर्शिका स्तुतिश्च तस्या व्यवहारचातुर्य बोधिका ।

अवकर्ण्येत्यादि चतुर्थपञ्चमपद्ययोः सुभद्राया भाविविषयक प्रश्नस्य स्वविवाह विषयकत्वादेव सुसमुचितमवसरमवलोक्याऽर्जुनविजय नर शब्द श्लेषाभ्यां मर्जुनं प्राप्स्यसीत्यपि सूचितम्, सद्यो दृग्गोचरश्चासौ भवेदित्युक्त्या च पुरुषान्तरस्य तदानीमेव दृग्गोचरत्वस्याऽनुपपत्त्या अहमेव विजयोनरश्चेत्यपि ध्वनितम्। अत्र दर्शनस्य दृगाभिषत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम्। तदेतद् रहस्यमवाबुध्यत चतुरया सुभद्रया ।

ततो गद्ये- श्रुतपूर्वैस्तैस्तैर्लक्षणैःस्ववचन सूचितं तं सुभद्राऽयमर्जुन एवेति निश्चित्य परमं प्रीतास्वबन्धवदननमननयनवाङ्मिल्यादिभिरनुभावैः व्यज्यमानैरौत्सुक्य लज्जाहर्षादि संचारिभावैः परिपुष्टाम् अर्जुनविषयां स्वानुरक्तिं ध्वनितवती। ततः-

यमेवेत्यादौ षष्ठपद्येऽर्जुनोऽपि प्रेयसीं स्वानुरक्तां विज्ञायाऽत्मानं प्रकटितवान् । तत्राऽनुकम्पा प्रार्थना चुम्बनानुभावैः औत्सुक्यहर्षादिभिश्च संचारिभावैः सुभद्राविषयाऽर्जुनगतीरतिः जाड्यहर्षादिभावैश्च सुभद्रागताऽर्जुन विष-

---

१ परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ।। ११२। कुवलयानन्दे ।

यारतिः पोष्यते ।

स्वेदेत्यादौ सप्तमे पथे- स्वेदाख्यसात्त्विकविकारानुभावेन सुभद्रागतार्जुन विषया रतिर्ध्वन्यमाना हर्षजाड्याधैः संचारिभिः परिपोषिताऽऽस्वाद्यते। दौत्रशब्दगत श्लेषाऽनुप्राणितस्य सांगरूपकस्यपुलक व्याजापह्नुति घटितस्य चमत्कारोऽपि अत्र श्लाघ्यः ।

तस्यामित्यादौ अष्टमेपथे शुभाय शीघ्रतामेवोपयुक्तां मन्यमानस्याऽर्जुनस्य अनुकूलया प्रियया सह सधस्तस्यामेवरजन्यां रथेन निर्गमनम् वर्णितम् । तत्रद्वयोरानुकूल्येन सह निर्गमनेनाऽनुभावेन औत्सुक्यहर्षत्वरावेगादिध्वनिः तत्पोषिता परस्परविषया परस्परगतारतिरास्वाद्यतां याति सचेतसाम्। भगवतस्तन्निर्गमनदर्शनेऽपि मौनेनतद्विषये तत्सम्मतिः सूचिता । तेन भगवतोऽर्जुनगतः परमः प्रेमाध्वन्यते । ' भगवत आनुकूल्यात् सबला अपि पौरा अबला जाताः' इति श्लेषेण ध्वन्यमानो विरोधाभासोऽपि नितरां चमत्कारकः ।

आकर्ण्येत्यादि नवमे पथे पार्थवाक्यार्थोद्दीपितो यदूनां क्रोधः शान्तिंनीतः , तेन भावशान्तिरत्र ध्वन्यमाना भगवन्माहात्म्यगुणभूतत्वात् समाहितालंकारः , माधव रूपकेण भगवतो निजजनवत्सलत्वं, माधवशब्दगतार्थान्तरसंक्रमित ध्वनिना चोपादान लक्षणामूलेन माधवस्य महापुरुषत्वोचित निर्विकारत्वं-- ध्वन्यते । रूपकस्यध्वनेश्चैक विषयानुप्रवेश संकरः ।

रणेत्यादौ दशमे पथे सुभद्रागतो अर्जुनविषयकः तत्कपटयतितोद्दीपितो वलितकुचत्वदर्शनरुचिप्रकाशाद्यनुभावैरनुभावितो हर्षादिभिः संचारिभिः पोषितो हासो हास्यरसतां प्रपद्यते , तत्र कपटयतितायां यदुजङ्घिकीर्तिध्वजलतारोपाद् रूपकं यशसश्च दशनरुच्युपमा च प्रकृतानुकूलतया चमत्कुरुतः ।

तत इत्यादौ एकादशे पथे च - सुभद्रार्जुनयोः परस्परानुरागफलाभिमन्योरुत्पत्तिस्तयोर्दाम्पत्ये प्रमोद प्रवाहं प्रकटयति । सर्वत्रैवाऽत्राऽनुगुण्येन प्रयुक्तो माधुर्यानुगुणो वृत्यनुप्रासोऽपि चमत्कारक एव । ततो द्रौपदीतोऽपि पञ्चानां पाण्डवानां पुत्रोत्पत्तिः तस्याः स्वपतीनां पितृऋणमुक्तत्वकरणरूपप्रकारान्तरेण वर्णिता , तत् पर्यायोक्तम्, द्रौपद्याः प्रतिभूत्वोत्प्रेक्षा च सातिशयंचमत्कुरुतः ।

(१५) कृष्णार्जुनयोः जलकेलिः खाण्डवदाहश्च

अथ वसन्तग्रीष्मप्राप्तिः , कृष्णार्जुनयोश्च यमुनायां जलकेलिः, अग्नेराविर्भावः स्वक्षुधानिवृत्त्यै खाण्डवयाचना च , खाण्डवे अग्नेः प्रज्वलनं इन्द्रस्य जलवर्षाभिरग्निशमनं, अर्जुनस्य वर्षाजलवारणाय खाण्डवोपरि शरपञ्जरनिर्माणं पुनरग्नेर्ज्वलनं, क्रुद्धस्येन्द्रस्यार्जुनेन युद्धम्, इन्द्रस्य पलायनं, तृप्तस्याऽग्नेः स्वस्थानगमनं, कृष्णार्जुनयोश्च युधिष्ठिरसभीपागमनं चेति वर्णनं विविच्यते, तद्वर्णनं यथा -

' अथ तेषां तादृशं पुत्रोत्सवमाकर्ण्य ऋतुर्वसन्तसामन्तो राजन्यसंबन्धितया हर्षादिव समाजगाम ।'

'तदानीं भगवान्पवमानस्तु भीमस्य पुत्रोत्पत्तिनिमित्ताशौचवत्तया लोकस्पर्शाय संकुचन्निव कतिचन दिनानि मलयं विहाय पदमेकमपि न चचाल ।'

' एतेन खल्वकरुणेन तपागमेन जीवातुरद्य मम दूरत एव देशात् ।
उत्सारितो मधुरितीव रुषा वनान्ते तत्स्वागतं परभृतो न समाचचार ।।
' शिरीषपङ्क्तेः कुरुकामिनीनां शरीरवल्ल्या सह मार्दवेन ।
उपस्थिताभूदुपमा तदानीं तपः स्थितानां सुलभं हि सर्वम् ।।'
' कुरुकेलिवनेषु मल्लिकाकुसुमेषु भ्रमरावलिर्बभौ ।
ऋतुना मधुगन्धगुप्तये जतुनाग्रे निहितेव मुद्रिका ।।'
' शुभसौरभसंभृतानि मुमौ शुचिभूतान्यपि यानि पाटलानि ।
कलयेयुरतीव चित्रभावं क्षणपीतानि दृशा कथं न तानि ।।'
' सीमन्तविद्युदवतंसशिरीषचापं
कैश्यं घनोयमिति कैः सुदृशां न जज्ञे ।

Smt. HANSABA VAIDYA GUJARATI LIBRARY THE M. S. UNIVERSITY OF BARODA BARODA

तस्याध एव निटिले सततं यदासी-
त्तत्तादृशी सलिलशीकरदुर्दिनश्रीः ।।
उष्णैः करैरुरुरुचेः समन्तादूष्मायमाणाखिलदिङ्मुखस्य ।
आगन्तुमुन्हः सविधं स्वकालेऽप्यनीश्वरेवापससर्प रात्रिः ।।
वर्षास्वियं त्वरितमस्मदुपान्तभूमेरुन्मूलनं कलयतीति रुषावलीढैः ।
तीरद्रुमैः स्वनिकटादपसारितेव मध्यं जगाम सरितां सलिलस्य वेणी ।।
देशे देशे जडिमकुरङ्गास्तेजोमल्लैर्दिनकरमिल्लैः ।
धावं धावं प्रहरति राज्ञां धारागेहं शरणमवापुः ।।
ऊष्मोष्मर्तुसहने तपतावन्योन्यमेवाभिमुखा युवानः ।
वाचापि केचिन्मनसापि केचिद्दृशापि केचिद्दृढमालिलिङ्गुः ।।३।८०-८६।।

एवं पद्मेलिमां हेलिमयूकण्ठीरमकेलिं तस्य तनयाये निवेदयितुकामाभिरिव रामाभिर्निरन्तरोपान्तां दृगध्वनि वसन्तो वसन्तरतिकान्ताविव जयन्तजनकानन्तरजकौन्तेयौ परिपाटलहंसपाददुरवगाहवनजातसनाथे पाथसि रोधसि च विहारैस्तेषां दिनानामौपयिकमातिथ्यमापादयितुं तामेव भगवतीं सरितमापतताम् ।।

।३।८६। गद्यम् ।।

अत्र वसन्ते मलयमारुतस्य मन्दत्वम् सुरभित्वं च संकोचरूपहेतूत्प्रेक्षाया-सम्यग्वर्णयंत कविना । वृत्त्यनुप्रासोऽपि चमत्कारकः ।

ग्रीष्मे परभृतमौनम्, शिरीषपाटलमल्लिका समृद्धिः, दिवसस्यदीर्घत्वं मूष्माणत्वं च निशीथिन्या लघुत्वम्, सरितां सलिलवेण्याः कार्श्यम्, उष्णरश्मेः प्रखरतरकिरणत्वेन सर्वतः तापप्रसारः धारागेहेषु शैत्यम्, युनामन्योन्यालिङ्गनरुचिश्च चेति विषयान् वर्णयिता कविना यथायुक्तमुपात्तेन वृत्त्यनुप्रासेनतपोगतश्लेषमूलकाऽभेदातिशयोक्तिजीवितेनाऽर्थान्तरन्यासेन, समस्तवस्तुविषयकसान्द्रघनरूपकेण शुचि-पाटलशब्दगतश्लेषमूलकविरोधाभासेन , ~~उत्प्रेक्षाऽपह्नवोज्जीवितविरोध~~ विरोधघटितवाक्यार्थस्य चित्रभावे हेतुत्वावगमात् काव्यलिङ्गेन दृष्टस्य दृक्यीतत्वरूप प्रकारान्तरेण वर्णनात् पर्यायोक्तेम, रुक्षकर्षणजातशब्दगतश्लेषानुप्राणितया हंसपाददुरवगाहवनजातसनाथत्वेनैकधर्मेण पाथोरो-

घसोर्मीयोगात् तुल्ययोगितया, सांसृभिल्लरूपेणाङ्गेन उत्प्रेक्षासंसृष्टाऽविकृता काऽपि चमत्कृतिः कल्पते सचेतसामाल्हादाय नूनम् ।

वसन्तग्रीष्मयोरुभयोरपि शृङ्गारोद्दीपकत्वेन तयोः जलकेलिरनेषा पश्चाद् वर्णयिष्यमाणा जलकेलिरूपेण तस्य शृङ्गारविभावत्वमत्राऽविकृतम् ।

जलकेलिः

सम्प्रति कृष्णार्जुनयोर्नारीजनावृत्तयोर्जलकेलिं वर्णयति कविः यथा-

'कल्लोलजालकपटेन कलिन्दपुत्र्या
पादं प्रति प्रसृपे परमस्य पुंसः ।
तिष्ठन्ति मे पुनरिह त्रिजगत्पवित्राः
सख्यः कृतीति समवेदितुकामयेव ।।'

'तस्या जलेषु तरुणाम्बुदजातिवैरि-
ष्वावर्तजालमनयोरुभयोर्व्यतानीत् ।
वीचीकराग्रविनिवारितरामसीर
व्यावल्गनोपजनितव्रणगर्तशङ्कम् ।।'

'मुरारिनारी मुखपद्मपङ्क्तिजयेन यौद्धुं जलदुर्गपद्मैः ।
तीरेऽवतस्थे तिलकापदेशात्कृत्वा पुरः खेटकमण्डलानि ।।'

'तासां विलासगमनं समवेक्ष्य तत्र
लात्यत्वहेतुरपि लज्जितचेतनायाः ।
वेगाद्विरोभवनविघ्नतया मरालया
गत्या बभूव नितरां गतिमन्दिमश्रीः ।।'

'शनैः शनैस्तासु सरितमवगाहमानासु - कासांचिदौर्व्येव नितम्बबिम्बानि निजावकाशदानावलम्बितोन्नतिभिरम्बुभिः पुलिनानि निचोलयांचक्रुः ।।

'अपरासामभूयथेव नाभिकुहराणि जलघूर्णादावर्तजवावलेपभवालुम्पन् ।
इतरासां क्रुधेव कुचकलशाः क्षोभणात्कनकोकनदकोशान्विदलयांचक्रुः ।।'

"वदनोज्झकुम्भनिवहाद्भनिताजनानां
ग्रीष्मर्तुना विनिहितं ग्रहराजपुत्री ।
तापं पितुः स्वमहरत्तरलोर्मिहस्तै-
रन्यं न याति हि विभूतिरपत्यभाजाम् ।।"

"सुरनायकानुजमनोवशीकृतौ सुदृशो मुखैर्निपुणतां यथा ययुः ।
सरसीरुहैर्न नलिनीलतास्तथा सकचान्यमूनि विकचानि तानि यत् ।।"

"यमस्वसुः संनिधिमेत्य राज्ञी स्वकान्तिचोरं सुदृशामुरोजः ।
नालाग्रशूले नलिनं निवेश्य ववल्ग हर्षादिव वारिमध्ये ।।"

"व्यात्युद्दिकायां विपुलेक्षणासु वर्षान्नखद्योतवलक्षदाम्भः ।
सखीमुदारां सरितस्तु तस्याः करोऽप्यसावीदिव कंसहन्तुः ।।"

"उल्लासभाजा हरिणा प्रियायाः कल्हारमाल्ये कलिते कबर्याम् ।
अस्त्रैरसूयाहसितैश्च चित्रमुत्संसितं वक्त्रमभूत्सपत्न्याः ।।"

"श्लथं निमग्नग्रहणेषु कल्पयन्स्वयंग्रहाश्लेषसुखं यदूद्वहः ।
सवर्णविष्मा सलिले तडित्वतः सुखादगृह्णात्सुदृशस्तु ता न तम् ।।"

"फूत्कृतैः क्वचिदधःस्थितिचिन्हं बुद्बुदं हरिरुदस्य निमग्नः ।
कुर्वयन्प्रतिवधूं क्वचिदूरुस्तम्भमम्बुषु चुचुम्ब वरागूयाः ।।"

"क्रीडती मण्डलीभूय कृष्णयोरप्सु यौवते ।
तटिन्यास्तटयोः प्रान्ते तार्टके इव रेजतुः ।।" ३।१०७।१०१ ।।

"इति चिरं विहृत्य प्रतीरमुत्तीर्णाभिर्जलमेलनव्रीडादिव संकुचितात्मभिः-कुचैरानमिताभिस्तर्दुसर्युसंयुतशर्माणि मर्मरगिरा संस्तुत्य पवनचञ्चलैरञ्चलैः श्लाघमानानीव वसनानि निवसितवतीभिः कायकान्तिलताकोरकाणि कनकाभरणानि कामनीयकपुनरुक्तिमात्रस्य पात्रयन्तीभिर्वधूटीभिः सह तटाटवीं पर्यटतोस्तयोरग्रे दिशि दिशि कृशितशिशिरतराभीषुप्रकाशो जनदृशां कौशीकरणदेशिकः कोऽपि-महसां राशिराविरासीत् ।" ३।१०१। गद्यम्।।

अत्र कल्लोलेत्याद्यपद्यद्वये यमुनायावर्णने व्याजापह्नुत्युत्प्रेक्षायोरुपमा+रूपकभ्रान्तिमतां चार्टुगाङ्गिभावेन संकरश्चमत्कारकः ।

मुरारीत्यादि तृतीयचतुर्थपद्ययोः श्रीकृष्णनारीणां वर्णनम्। तत्र रूपकापह्नुत्योः, गतिमन्दिमाश्रिया अनिष्टसाधनत्वेनलेशालंकार(१)स्य च चमत्कारोऽपि श्लाघ्यः। तत आलम्बनविभावोत्कर्षः।

शनैरित्यादि गद्येऽपि तासां सौन्दर्यपरभागः परां काष्ठामारोपितोऽवर्ण्यत उत्प्रेक्षाभिः। एवमत्राऽप्यालम्बनविभावोत्कर्षः।

वदनेत्यादौ पञ्चमेपद्ये- तासां सलिलावगाहो वर्ण्यते, तत्राऽपिरूपकस्य स्वशब्दगतश्लेषमूलकस्य अर्थान्तरन्यासस्य च सन्निवेशो मनोरमः।

सुरेत्यादौ षष्ठे पद्ये - नारीजनानां सकचमुखसौन्दर्यस्योद्दीपकताऽतिशयो वर्ण्यते। तत्र सकच-विकच शब्दगतश्लेष मूलको व्यतिरेको नितरामनुगुणः।

यमेत्यादौ सप्तमे पद्ये तासां कुचसौन्दर्यस्योद्दीपकताऽतिशयो वर्ण्यते,- तत्र 'यमस्वसुः' पदस्य यमतुल्यदण्डनियमनरुचिमत्वाभिप्रायगर्भितत्वात् परिकरालंकारः(२) उपमारूपकोत्प्रेक्षाश्च सन्ति सचमत्काराः।

व्यात्युक्षिकेत्यादौ अष्टमे - श्रीकृष्णस्य तन्नारीणां चाऽन्योन्यगतस्याऽन्योन्यविषयकस्य शृङ्गारस्थायिरतिभावस्य व्यात्युक्षिकारूपोऽनुभावः प्रदर्श्यते, तत्रोत्प्रेक्षायां तद्गुणालंकार(३)स्यार्द्रता सुतरां चमत्कारजनिका। अनुभावेन हर्षौत्सुक्य संचारिभावध्वनिः, तत्परिपुष्टोरतिभावश्च शृङ्गारस्थायीप्रतीयते।

उल्लासेत्यादौ नवमे- हरेः उल्लासः प्रियाकबरीप्रसाधनं च इत्यनुभावौ तद्दर्शनेर्ष्यौ च हर्षौत्सुक्य संचारिभावौ प्रिया विषयक संभोग पोषयतः। अपरायाश्च अस्य शुष्कहासैरनुभावैः विषादासूया संचारिभावध्वनिः हरिविषयां तद्गतां विप्रलम्भरतिं पोषयति। अत्र कल्हारमाल्यकलनं प्रियाकबर्यां उत्तंसितत्वं च सपत्नीस्मरस्य वर्ण्यते, तेन कार्यकारणयोर्भिन्नदेशित्वादसंगतिरलंका

---

१ लेशः स्याद् दोषगुणयोर्गुणदोषत्वकल्पनम्।। १३८। कुवलयानन्दे।

२- अलंकारः परिकरः साभिप्राये विशेषणे।। क ६२। कुवलयानन्दे।

३ तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः।। १४१। कुवलयानन्दे।।

रः (१)

ग्लहेत्यादि दशमे पद्ये भगवद्गतोरतिभावः प्रियाविषयकस्तद्ग्रहणानुभावितः औत्सुक्यसंचारिभावपोषितः संभोगशृङ्गारतया परिणमन् चर्वणाविषयतांयाति ।

फूत्कृतेत्यादौ एकादशे पद्येऽपि प्रियाविषयकः भगवद्गतोरतिभावः फूत्कारचुम्बनाभ्यामनुभावितस्तद्व्यङ्ग्यौत्सुक्यहर्षसंचारिभावपोषितश्चमत्कारा य भवति सचेतसाम्। रूपकमत्रालम्बनविभावोत्कर्षकत्वेन नितरामनुगुणः ।

क्रीडतीत्यादौ द्वादशे पद्ये - यमुनाया एकस्मिन् तटे श्रीकृष्णस्य तद्वत् अपरस्मिन् तटे चार्जुनस्य प्रियाजनेन सहजलविहारकेलिरवर्ण्यत, तत्र च पृथक् पृथक् तटयोः मण्डलीभूय विहरतोर्वनिता समूहयोः साकल्येन चित्रणे नाट्यकयुगलोपमा नितरामनुगुणा ।

सर्वत्र प्रसादमाधुर्यानुगुणो वृत्त्यनुप्रासोऽपि चमत्कारकः ।

गद्ये च जलविहाराद्विरम्य वसनानि वसित्वा संदोपेण तटाटवीविहारो वर्ण्यते । यत्र यमकानुप्रासानां जलशब्दगतश्लेषमूलकक्रीडहेतूत्प्रेक्षायाः रूपकस्य च चमत्कारक कल्पतेतरां सहृदयजन श्लाघोदयाय ।

खाण्डववनदाहः

अग्रे च तत्रैवाग्नेराविर्भावो वर्ण्यते । वर्ण्यते चाग्निः तस्य स्वक्षुत्प्रशमाय कृष्णार्जुनसाहाय्येन खाण्डववनाशनम् च । यथा-

"उन्मिष्योन्मिष्य यत्नात्परिचलितयथापूर्वशक्त्याथ दृष्ट्या
तन्मध्ये वीक्ष्य कंचित्पुरुषमनुदितच्छायहस्तातपत्रम् ।
अद्राक्षीज्ज्ञातेयमौतौर्विदधतमनयोः प्रश्रयाश्चर्यलब्धा-
द्धैराज्यादाकुलाभूद्वदुकुरुवरयोस्तत्क्षणं चित्तसीमा ।।"

---

१ कार्यकारणयोर्भिन्नदेशतायामसंगतिः । १०।६६। साहित्यदर्पणे ।

"मुखेतिरोवेपथुभिर्वयः कृतैर्मुकुन्दवध्वः कृतसूचना इव ।
द्विजातिवृद्धस्य पथोऽस्य पार्श्वयोर्द्विधापसप्तुः सहसातिभीरवः ।।"
ताभ्यां ततस्तस्य पदोः पुरस्तादपक्रमात्मानमहो विधातुम् ।
स्पृष्टान्युदञ्चद्बहुघर्मतोयैरष्टाभिरष्टैरवनीरजांसि ।।"
"परस्परासङ्गफलप्रदित्सया स्वजन्मतारेन्दववासराविव ।
उपस्थितौ तावुपसृत्य संभ्रमात्स आशिषोऽनन्तरमेवमब्रवीत् ।।"
"क्षुत्प्रपीड्यति मामयि वीरौ । कुक्षिमेत्य चकितेव युवाभ्याम् ।
याच्यते तदशनं बहु भोक्तुं यस्य तृप्यति पुरातिथिरेषः ।।"
"इत्थं स्वदक्षिणाकरं पुरतः प्रसार्य
तस्यार्दतौ वचनपाण्यनुधाविवेगा ।
ताभ्यां तथेति फणितिस्तु समाललम्बे
सत्स्वर्थना फलमदोहृदमेव सूते ।।"

"इति मुदा कथितात्मयथातथाभावो भगवान्बृहद्भानुर्दन्तपटीयवनिकान्तर्नटत्स्मितयोर्देवकीपृथासुतयोर्धुरि गिरिदरीसतिधुरीणविभावरीचरसरीसृपदिविषदरीशमेदुरीकृतदुरीहिततापडवस्य खाण्डवस्य जगत्कण्ठेगडुत्वं तत्परिरक्षणदक्षस्य कृष्णस्तदाके पक्षपातं च विनिवेद्य युवयोः कटाक्षबलेन क्षणाद्विधक्षामीति-स्वमपेक्षितविशेषमाचचक्षे ।" ३। १०२+ १०७ ।।

अत्र द्विजवृद्धवेषेणाविर्भवति अग्नौ कृष्णार्जुनयोर्भक्तिस्तद्विनयनमनाम्न्यां मनुभाविता सुतरां चकास्ति । तत्र स्वकीयापक्वत्वापादनायस्विन्नस्वाष्टावनीरेणुस्पर्शवर्णनप्रयुक्तेन पापकर्दमवाचकपक्वशब्दगतश्लेषमूलकाऽभेदाऽतिशयोक्त्युज्जीवितस्य इष्टसिद्ध्यर्थमिष्टविपरीताचरणवर्णनरूपस्य विचित्रालंकारस्य(१) विच्छित्तिरपि चमत्कारायैव ।

वृद्धद्विजविषयकः सहसाप्यसरणानुभावितो वधूजनगतस्त्रासभावध्वनिरप्यत्र चमत्कारकः । उत्प्रेक्षा तत्रानुगुणा ।

---

१ विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् । १०।७२। साहित्यदर्पणे।

कृष्णार्जुनयोः सम्मिलितजन्मदर्वाचन्द्रवासरत्वेनोत्प्रेक्षया बुभुक्षितस्याग्नेर्यथेष्टभोजनावश्यमाविलाभो ध्वन्यते । कृष्णार्जुनयोस्तथेतिवचनस्य सामान्यार्थेन समर्थनात् अर्थान्तरन्यासः (१) ।

द्विजवृद्धस्य याथार्थ्येन स्वबुभुक्षितत्व कथनेन भोजनयाचनया च विभावाभ्यां विभावितः स्मितानुभावेनाऽनुभावितो हर्षाख्य संचारिभावपोषितो-हासोऽपि कृष्णार्जुनगतोऽपि संपद्यते प्रमोदाय सुधियाम् । तत्रस्मितेनट रूपकं -- प्रकृतोपस्कारकम् ।

यमकानुप्रासानामानुगुण्येन विन्यासोऽपि चाऽत्र श्लाघ्यः ।

ततः कृष्णार्जुनाभ्यां द्विजाति वृद्धवेषस्याऽग्नेर्मनोरथपूरणे स्वीकृते तेनाऽर्जुनाय सतूणीरद्वय गाण्डिवो रथश्चाऽर्पितो वर्ण्यते , यथा -

'भूसंज्ञया यदुपतेः पुरुहूतसूनुः
संतुष्यतोऽथ जगृहे स तनूनपातः ।
तूणौ च गाण्डिवसखौ तुरगांश्च शुभ्रा-
न्कान्तं रथं च नटता कपिकेतनेन ।।'

'मरुन्मनोमार्गणवैनतेयपृथग्जयात्तैरिव कीर्तिशावैः ।
चतुर्भिरश्वैः समुपास्यमानं स फाल्गुनस्तं रथमारुरोह ।।'

'दशमुखनगरे पुरानुभूतं दहनहठात्करणं पुनर्दिदृक्षुः ।
उपगत इव मारुतिः स साक्षादुदलसदस्य रथाग्रकेतनाग्रः ।।'

'तद्भुजावनुधावन्त्याः संग्रामेषु जयश्रियः ।
जघ्राद्वयधियं तूण्यौ जनयामासतुस्तदा ।।' ३।१०८-१११।।

अत्र प्रथमे पद्ये तुल्ययोगितायाः, द्वितीये- समुच्चय व्यतिरेकोत्प्रेक्षाणां, तृतीये सम्बन्धातिशयोक्ति समुज्जीवितोत्प्रेक्षायाः, चतुर्थेऽपि च पुनरुत्प्रेक्षायाः, तत्र तत्र च प्रसङ्गाऽनुगुण्यधारिणोऽनुप्रासस्य च चमत्कारो महतेप्रमोदाय भवति-मतिमताम् ।

---

१ उक्तिरर्थान्तरन्यासः स्यात् सामान्य विशेषयोः । १२२। कुवलयानन्दे ।

क्षणमलक्ष्यन्त ।'

'सविघज्वलनोष्मवीचिभिः सपदि म्लानकपित्थशाखिनाम् ।
परिपाकसिताः फलव्रजाः प्रबभुः स्फोटकबुद्बुदा इव ।।'
'निशि केवलं तमसि दीप्ततनुं निजजातिमोषधितरुं निखिलम् ।
हतरे विजेतुमिव ते तरवो दिवसेऽपि जज्वलुरतीवतराम् ।।'
'दृप्तदानवनिशाचरवर्गस्तत्र गाण्डिवभृता निहतोऽपि ।
तन्निषङ्गयुगबाणगणानां संख्यया प्रतिभटत्वमकार्षीत् ।।'
'ज्वालतापभरकुण्डलितार्ङ्गीः क्वेडसारघृतसेचनमृद्धीः ।
सर्पपुङ्गवततीरतिहृष्टः शष्कुलीरिव चचर्व कृशानुः ।।' ३।११२-१२३।।

भगवदनुज्ञयाऽर्जुन साहाय्येन च जातमिदमग्निज्वलनं वर्णनेनाऽनेन अतीव व्यापकं भीषणतमं च प्रतीयते । अत्रार्जुनगतो वीरस्थायिभाव उत्साहो बाणासनटङ्कार शरसन्धानादिभिरनुभावैस्तद्व्यभिचारिधृतिगर्वादिभिः संचारिभिश्च पोषितः सुतरां चमत्कृतिमादधाति । अत्र प्रयुक्तानामुपमा रूपकोत्प्रेक्षाणां वनप्रवालोपकण्ठ शब्दगतश्लेषाणां अग्नि हठात्क्रियानुरूपौजोगुणानुसारिसंयुक्तपरुषवर्ण घटितानां क्वचिच्च वनराजिश्री विलासानुरूपमाधुर्यगुणानुसारिमधुरवर्ण घटितानां च रचनानां चमत्कारोऽतितरां वर्णनोत्कर्षायकल्पते । उपमारूपकोत्प्रेक्षाणां, अजगराणां महीभृदशाग्रहणवर्णनरूपाया असंभवद्वस्तु सम्बन्धनिबन्धनरूपाया(१)-निदर्शनायाः गाण्डिवभृद्बाहुबलस्य मरुन्मल्ल-तृणकल्पत्वाभिमानाद् व्यतिरेकस्य, निशिदीप्ततनुम्य औषधिभ्यो रात्रिन्दिवं प्रज्वलन्ततरांखाण्डवतरूणामुत्कर्ष कथनादपरव्यतिरेकस्य, गाण्डिवभृन्निहतदृप्तदानवनिशाचरवर्गस्य असंख्यत्वं-तन्निषङ्गयुगबाणगणसंख्या प्रतिभटत्व रूपेण प्रकारान्तरेण कथनात्मकस्य पर्यायोक्तालंकारस्य च चमत्कारोऽत्र भूयसे प्रमोदाय कल्पते प्राज्ञानाम् । मन्ये वर्णनमेतत् खाण्डवेऽग्नताण्डवस्य चित्रमिव साकल्येनोपस्थापयति ।

---

१ संभवन् वस्तु सम्बन्धोऽसंभवन् वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं दर्शयेत् सा निदर्शना ।। १०।५१। साहित्यदर्पणे ।

सम्प्रतिखाण्डवदाहेऽर्जुनस्याऽद्भुततमा वीरापि तत्त्वविलासावर्ण्यन्ते, यथा-

"तावत्तदाकरक्षणाय सहसा शक्रोऽधिरुह्य द्विपं
वज्रं न्यस्य तदीयमूर्ध्नि मरुतां संनाह्यन्वाहिनीम् ।+
ब्रह्माण्डप्रतिरोधनेन विमुखैर्धूमैरिवाराध्यजे-
रातस्तार नभस्तलं जलधरैरारब्धघोरारवैः ।।"

"ततस्तैरनेकैर्नाकौकसामनीकैर्मत्सरेण तदुपरि निपात्यमानदिग्भित्तिशिखराणामिव वेगादापततां वारिधेर्वाडवहव्यवाडपि कवलितोऽयमस्माभिरिती व विद्युतः प्रकाश्य गर्जितेन तर्जयतामिवपर्जन्यानामासारसर्वाभिसारेण निर्वापितेवने मनाक् श्यामायमाने सति शोणायमानलोचनेन कपिकेतनेन तत्प्रतिचिकीर्षया शरकदम्बैरम्बरैरिवलम्बमाकलितां शालां क्लृप्तीकृत्य पुनरपि समुन्नीयमाननिज केतुरुषर्बुधो भगवानुद्दिदीपे ।।"

"तत्रान्तरे प्रोषितवल्लभतया प्रेम्णा कुमारमश्वसेनं निगीर्य दहनार्चिरुष्णासहिष्णुतया पुनरपि निवृत्य दिवं प्रयान्तीभिर्घनधारामिरिव पन्नगकन्यकाभिः सह वनादुत्पतन्तीं तक्षाक्कुटुम्बिनीमविलम्बितमेव श्वेतवाहनः शितमुखेन-शिलीमुखेन रसनायामिव ग्रीवायामपि द्विधा विदलयाञ्चक्रे ।।"

"नभसि कृते शरकूटे न पपाताशुगविनुन्नमम्बुमुचाम् ।
तस्मिन्खाण्डववह्नौ तक्षाकपत्न्याः कबन्धमेव परम् ।।"

"अथ स कुपितः स्वयं कौशिकोऽपि चकितचकितं वियति विहितोपसरणां नवजननीशोकदयनीयं हृतबालं तमहिबालं परिगृह्य लालनया परितोषमनैषीत् ।"

"सुतं तमभ्येत्य सुरैरशेषैः क्रुध्यन्नथायुध्यत घोरमिन्द्रः ।
चक्रे स दावस्य च तक्षकस्य यदग्निमत्तां यदनग्निमत्ताम् ।।"

"वनस्य तस्योपरि केवलं तदा सहस्रनेत्रस्य च सव्यसाचिनः ।
निर्धूमनीडोत्पतितानि पक्षिणां कुलानि कोलाहलकेलिमादधुः ।।"

"शरान्विषाठानपि पारदृश्वनः श्रुतेर्विधायाशु विमुञ्चतस्ततः ।
कुरुद्वहात्साध्वसरोगिणो हरेर्भुवि भिषग्दूतरप्रसर्पणम् ।।"

"जयन्तमेकं युधि सोढुमक्षमे जयन्तमन्यं सुतमीक्षितुं गते ।

पुरीं बलद्वेषिणि घोषकेतवाज्जहास शंखद्वितयं च कृष्णयोः ।।'

'ततः कृशानोर्विपरीतवर्णस्वनामवाच्यादिव भीतभीतम् ।
मयं वने दैत्यमयं ररक्ष स चक्रपाणेरिव शक्रसूनुः ।।'

'दोत्रमप्यधिपतिं कुरुपूर्वं संश्रितौ सपदि दैवबलेन ।
चर्वितुः सकलखाण्डवमग्नेस्तदाकावभजतां विघसत्वम् ।।'

'अथ स्मित्वा तुन्दं परिमृशति मन्दायितगतौ
समापृच्छ्य प्रीत्या त्रिदिवमुपयाते हुतवहे ।
रथाभ्यां मौनिभ्यां घनसलिलसेकेन महता
विजेत्रौ तौ कृष्णौ विविशतुरुपान्तं नरपतेः ।। ३।१२४-१३२।।

अथ प्रथमं तावदर्जुनरक्ष्यमाणखाण्डववह्निशमनविषयकः इन्द्रगतवीर रसस्थायी उत्साहः द्विपारोहण वज्रग्रहण सेनासन्नाहनादिभिरनुभावैः धृत्यादि भिः संचारिभिश्च पोषितः कल्पते चमत्काराय सचेतसाम् । तत्र संयुक्त-परुषा क्षर-घटिता रचना, तादृशक्षार-वर्णानुप्रासश्च सुतरां दीपयति वीरानुगुणमो-जोगुणम्। तत्रैव उत्प्रेक्षा अपि वीरानुगुण्यः सुतरां चमत्कारिकाः ।

ततस्तादृगिन्द्रसैन्य-प्रतिरोधविषयकोऽर्जुनगतो वीरस्थायी उत्साहः- पर्जन्यासारसर्वाभिसारकृतवनवह्निशमनोद्दीपितः नयनशोणत्व-शरकदम्बकरणाकनि रवलम्बाम्बरगतशालानिर्माणमरुत्पतिप्रतिरोधनपराभवनादिभिरनुभावितो मर्ष धृतिगर्वादि संचारिभावैश्च पोषितः सुष्ठुतरां चमत्कृतिमादधानः परं वीरत्वो त्कर्षं प्रत्याययति अर्जुनगतम् । तत्र ओजोगुणानुसारिणी वृत्त्यनुप्रासस्य ~~[illegible]~~ उपमा रूपकोत्प्रेक्षापह्नुतिश्लेष- यमकानां च तत्र तत्राऽनुगुण्य विधायिनां चमत्कारोऽपि साधीयानेव । अम्बुमुक्तबन्धपातव्यपोहनपूर्वक तडाकपत्वीकबन्धपा तवर्णनात् परिसंख्यालंकारः, यमकस्य मय शब्द-विपरीतवर्णवाच्यत्वरूपप्रकारा-न्तरेण कथनात् पर्यायोक्तालंकारः ,दावतडाकयोरग्निमत्तानग्निमत्ताभ्यां पर्याय णान्वयात् यथासंख्यालंकारः, विपाठानामपि श्रुतिपारुष्यत्वविरोधाभासोऽपि पाठश्रुतिश्लेषोज्जीवितः, पत्रिगतश्लेष-मूलकः श्लिष्टपरम्परितरूपकं उपमापह्नु त्युत्प्रेक्षाः च सुतरां चमत्कुर्वन्तितराम् सुतराम् ।

ततः पराभूतपाकशासनगतोभयानकस्थायिभयमपि तदीयापसर्पणादिभि रनुभावितं शङ्कात्रासावेगादिभिः संचारिभिश्च पोषितं स्थाने विदधाति विच्छित्तिम् ।

पर्यन्ते जलकेलिवनविहारादावनुभूतः कृष्णायोः परस्परविषयकः परस्परगतः स्नेहः साहचर्यानुभावितः उन्मेषधृतिहर्षादिभिः पोषितोऽपि परमामास्वादनीयतां कोटिंगतश्चमत्करोति सचेतो जनमनःसु ।

(१६) युधिष्ठिरस्य राजसूययज्ञः

अथ इन्द्रप्रस्थस्थिताय युधिष्ठिराय मयेनसभामणिसभानिर्माणं राजसूययज्ञं कर्तुं च नारदमुनेराज्ञा, कृष्णामाहूयतेनमन्त्रणा, भीमार्जुनसहितस्य कृष्णस्य जरासन्धवधाय प्रस्थानम्, भीमस्य जरासन्धेन गदायुद्धं तद्वधश्च, भीमादीनां दिग्विजयः, दिग्विजय-प्राप्तवसूनां वैपुल्यम्, कृष्णस्याऽपि विपुलवसूनामानयनम् च वर्णितं कविना विविच्यते, तद्वर्णनं यथा -

"याते ततो निजपुरीं यदुवंशकेतौ
राज्ञे मयो मणिसभां रचयांबभूव ।
यस्यां रुचं समवलोक्यशुचाऽधुनाऽपि
जीवं गतागतजुषं वहते सुधर्मा ।।" ४।१ ।।

"अत्र प्राणगुरुभयवाचकशब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणिता सुधर्मायाः शोकाभावेऽपि तत्सम्बन्धातिशयोक्तिः चमत्करोतितराम् । तया सुधर्मातो मणिसभाया उत्कर्षद्योतको व्यतिरेको व्यज्यते ।

"तामधिष्ठास्नुमभ्येत्य तं मखं कर्तुमन्वशात् ।
विपश्चीरवसारज्ञो नृपं चीरवसांवरः ।।" ४ ।२ ।।

"अत्र नारदमुनेः प्रकारान्तरेण वर्णनात् पर्यायोक्तालंकारः प्रकृतोप-

स्कारकः ।

"ततो दूताहूतः पुरुहूतानुजो निरन्तरायमेव महान्तं सप्ततन्तुमुपहर्तुमनसः कौन्तेयस्योपान्ते रहसि मुहूर्तं संमन्त्र्य साक्षादुत्साहप्रभावाभ्यां मूर्तौ मन्त्र इव तत्प्रहिताभ्यां गन्धवहसुधान्धोधिपनन्दनाभ्यामनुसंधीयमानगमनो नदीतटाकैर्द्विमातृकतया स्वपालयितारमनुकुर्वतो विविधान्यदुर्लभवसुधान्यसमेधितवसुधान्मगधानवगाह्य विशृंखलामोदितगिरिव्रजमपि शृंखलाखेदितमहीभृत्कुलं जराघटितदेहमपि देदीप्यमानबलसंपन्नमाशाजेतारमपि परार्थापहारजागरितारं मागधमपि विगीतव्यापारं द्वैमातुरं महारथं जरासंधं पृथिवीनाथमेत्य प्रथनं ननाथ ।।"

"तत्क्षणमीतितितिक्षायां त्वमष्टादशकृत्वो दृष्टापजयोऽसि, अयं पुनरितरः किशोरः" इति कृष्णावुभावप्यवधीर्य हिडिम्बबककुटुम्बशोकोदयादारभ्यप्रवीरजनकर्णिकामोक्तिकायमानकीर्तेरात्मनः संमुखीनं दृढतरपरिकरबन्धौ जरासंधं गन्धवहनन्दनः पञ्चदशदिनानि नियुध्य तेषां तृतीयभागपरिसंख्यानपदाभिधेयेन सह योजयामास ।।"

"हते तस्मिंस्त्रयो दीप्रा हरिप्रस्थमुपाययुः ।
आगामिनि मखे हव्यमादित्सव इवाग्नयः ।।"

"कृष्णो गते यदुपुरीं क्षितिपानुजानां
जित्वा दिशः प्रतिनिवृत्तवतां चतुर्णाम् ।
कोशे ममुः परमसिप्रवरा गृहीता
दोष्णोर्बलेन महता न तु हेमपुञ्जाः ।।"

"उपायनत्वेन नृपाय सर्वदत्तेषु वित्तेष्वखिलेषु भूपैः ।
पार्थस्य पुर्याः क्षितिरेव भेजे वसुंधरावाचकवाच्यभावम् ।।"

"नरदेवमगाज्जये प्रतीच्या नकुलेनैव वसूनि विस्तृतानि ।
दधदानकदुन्दुभिस्वनेर्यां दलयन्नानकदुन्दुभेः कुमारः ।।" ४।२-६।।

एवं राजसूयाय दिग्विजयायोपक्रम्यन् युधिष्ठिरः कृष्णपरामर्शेन प्रथमं महाबलिनं विरोधिनं च मगधराजं जेतुं कृष्णेन सह भीमार्जुनौ प्रेषितवान्, भीमेन चाऽसौ नियुद्धे हतः । ततः सर्वा अपि दिशो भीमार्जुननकुलसहदेवैर्जिताः, त

त्र तत्र च राजसमूहैरुपायनीकृतानिविविधान्यपरिमितानि वसूनि इन्द्रप्रस्थमानीतानि-
इयन्त्यासन्, यानि तत्र न ममुः । मागधजये भीमार्जुनयोरिव प्रतीचीजये नकुलस्याऽपि साहाय्यं कृतवान् भगवान् कृष्णः । तदिदं कविना महता वेदव्यासेन वर्णितमस्ति । तत्र मागधे भीमेन हतेऽपि तज्जये भीमार्जुनाभ्यां सह गतस्य कृष्णस्यैवोत्साहो प्रघननाथनानुभावितो धृतिगर्वादि संचारिपोषितोनितरां प्राधान्येन चमत्कृतिमादधाति । तत्र प्रघनगतश्लेषमूलकाऽभेदाऽतिशयोक्तिः प्रघनस्याऽभीष्टमत्वमभिव्यञ्जयद्वाचितुर्भगवतः कमपि महान्तं वीरत्वोत्कर्षं ध्वनयति । मागधवर्णने प्रयुक्तो श्लेषमूलको विरोधोऽलंकारोमागधस्य दुष्टत्वं वध्यत्वं च व्यनक्ति । मूर्तमन्त्रत्वोत्प्रेक्षायाभगवतः कूटनीतिनिपुणत्वं ध्वन्यते । मगधानामन्यदुर्लभवसुधा त्य समेधितत्वकथनेन इतरदेशेभ्यः उत्कर्षप्रतीत्या व्यतिरेकध्वनिः ।

तत्रैवौजोगुणानुसारिणौ यमकानुप्रासावपि चमत्कारिणौ । मागधस्य पञ्चताया पञ्चदशतृतीयमागपरिसंख्यानपदाभिधेयत्वेन कथनात् पर्यायोक्तालंकारः । मागधस्य पृथ्वीनाथविशेषणं प्रघनदानाभिप्रायगर्भितत्वात् परिकरालंकारः । कौशमितत्वेऽसीनां ग्रहणात् हेमपुञ्जानां च निषेधात् श्लेषमूलकः परिसंख्यालंकारश्चाऽतितरां चमत्कुर्वन्ति । पार्थपुर्या एव वसुन्धरावाचकवाच्यत्वेन ग्रहणात् - अन्यपुरीणां चाऽर्थनिषेधात् सोऽयं परिसंख्यालंकारो युधिष्ठिरस्य परमैश्वर्यश्रीसम्पन्नत्वं ध्वनन द्वारा व्यतिरेकालंकारं ध्वनयति ।

ततः -

"हरिणा स ततः कृताभ्यनुज्ञो हविरादातुमिवागतेन साक्षात् ।
क्रमवेदिपुरोधसां समूहैः क्रतुमाहर्तुमुपक्रमं प्रचक्रे ।।"

"प्राग्वंशेऽप्युत्तमे तिष्ठन् प्राग्वंशं पुनराविशत् ।
कुरीरशिरसा पत्न्या कुरुवीरः स दीक्षितः ।।"

"आप्सातुमिच्छुरनलो हविरत्र रुच्य-
मानीलघूमकुलनिर्गमनाय देशात् ।
जग्धान्पुरा जतुनिकेतनमिच्छिखण्डान्
कुद्दालस्थितानिव ववाम गुरूनजीर्णान् ।।"

"तत्प्रवर्ग्यैजनितं दिवि धूमचक्र-
मालक्ष्यते स्म विबुधान्प्रति पावकेन ।
आनाकदुर्वहविहंविणेन वेगा-
दाहवानपत्रवलयं किल नीयमानम् ।।"

"मेदस्विनं विपुलखाण्डवभक्षणेन
देहं निजं चलयितुं शिखिनोऽभिलाषम् ।
उद्गम्य संज्वलितुमुत्तरवेदिकाया-
मालम्बनाय किल यूपवरोऽन्तिकेऽभूत् ।।"

"बिम्बेन संगं विसपुष्पबन्धोर्नाथः कलानां न यथा विदध्यात् ।
तथैव देवास्ततृपुस्तदानीमत्यद्भुतानां हविषां विशेषैः ।।"

"सर्वेषु वर्णेष्वपि दातुरस्मात्संप्राप्तवत्स्वर्गमजातशत्रोः ।
नवर्ण एकस्तु कदापि लेभे नार्थं क्रतूनामिह सार्वभौमे ।।"

"तत्र नानाजनपदमेदिनीवल्लभमौलिमुकुटमणिकिरणपल्लविते यज्ञवाटेत्रिपथगापृथातनूजाभ्यां नियुक्तो, वैमात्रेयैर्भ्रातृभिर्जतुभवनवनसवनेषु पृथक्पृथगाराधिततया स्वेनाप्यातिथ्यायामन्वयमाणेन वीतिहोत्रेणेव ज्वलता हैमपात्रेण परिष्क्रियमाणपाणितलः सहदेवो निखिलभक्तजनकृत्यनिर्वहणभारेणेव निभृतावयवसभ्यलोकलोचनपद्मयुगलपंक्तिपरस्परवैमुख्यवदान्यरूपकोमलिमानं महर्षिजनवलयमध्यमहेन्द्रनीलरत्नं चिरंतनं पुमांसं समासाद्य प्रथममर्घ्येण परिपूजयांचक्रे ।।"

"तावत्प्रकोपात्तरलाधरस्य प्रतिक्रियातीक्ष्णभयानकस्य ।
वेदीभुवं तत्र विहाय वह्निश्चैद्यक्षितुश्चित्तमिवाविवेश ।।"

"सदसि न विकृतो यदच्युतोऽभूत्स तु परुषाक्षरमण्डलेन शत्रोः ।
बहिरवसदुपेत्य तच्छ्रवोभ्यां बहुतरकुण्डलनीलरत्नलक्ष्यात् ।।"

"अश्लीलवागिह समाप्तिमती न वेति
संद्रष्टुकाममिव दानववैरिचक्रम् ।
कल्पान्ततिग्मकरकल्पमनल्पवेगं
कण्ठे विभेद रणकर्मणि दामघोषम् ।।"

'इति तस्य दुर्मतेरायुषा सह समापिते सवनकर्मणि निर्मितावभृथाप्लवनमुपदात्वेन दत्तपूर्वाणि वित्तान्युत्तमर्णानिव पुनर्द्विगुणमेव ग्राहितान्सर्वानुर्वीपतीन् प्रस्थापितवन्तं पौरवं तमनुज्ञाप्य वैद्यनिघनोत्सवेन सुदर्शनस्येव स्वपुरजनलोचनस्यापि नवाम्रकणिकार्द्रतामनुभवितुमना इव सनातनः पुमान्पुरीं पुरानुभूतकुशस्थलीनाम्नीं प्रतस्थे ।।' ४।७-१६ ।।

एवं हरिणाकृताभ्यनुज्ञो युधिष्ठिरः सपत्नीको यज्ञायदीक्षितः सन्-यज्ञिय विधिविधान विशेषज्ञैः पुरोहितवर्गैः क्रतुवरमुपक्रम्य सविधि समापयामास । तत्र विपुल हविर्विशेषाणामुपयोगस्य, यज्ञियविधिनिर्वहणस्य, देवानां तृप्तेः, सर्ववर्णजनमनोरथानां पूर्तेः, नानादेशराजसमूहसहयोगस्य, तद्विपुल सम्मानस्य, महर्षिसङ्घानामुपस्थितेः, भगवतः प्रथमपूजायाः, शिशुपालवधस्य च वर्णनं महताचातुर्येण कृतमस्तिकविना । तत्र युधिष्ठिरस्य भगवतोऽनुज्ञाग्रहणेन प्रथम पूजनेन च तद्विषयको बहुमानो भक्त्यतिशयश्च द्योत्यते, वैदिकविधिविधानेषु च निष्ठया तदनुष्ठानेन च धृत्यादि संचारिभावपोषितं तस्य धर्मवीरत्वं व्यज्यते। सर्ववर्णविषयकस्तदैन्यस्वविषयानुरागोद्दीपितो विपुलार्थवितरणानुभावितो - धृतिमत्यादि संचारिभावपोषित उत्साहस्तस्यास्यमानो दानवीरत्वेपर्यवस्यति। सर्वोर्वीपतीनां युधिष्ठिरायोपदात्वेन द्रविणराशिसमर्पणेन तेषां तद्विषयको-बहुमानः प्रेममावः प्रकाशते, तथा युधिष्ठिरस्याऽपि तैभ्य उपदात्वेन प्राप्तानां द्विगुणीकृत्य प्रत्यर्पणेन तेषु सम्मानः स्नेहश्च प्रस्थाप्यते ।

सर्वत्रैवाऽत्र यथायुक्तं गृहीतयोर्माधुर्यौजसोरानुगुण्येनोपात्तैर्वृत्यनुप्रासोयमकालंकारश्च शोभामेव वर्धयतो बन्धस्य ।तत्र तत्र चोपमारूपकोत्प्रेक्षापह्नुति सहोक्तिश्लेषविरोधाभासा अपिवर्ण्यार्थिनामुत्कर्षायोपयुज्यमानाश्चमत्कुर्वन्त्येव । तत्रैव सम्यजनलोचनानन्दकरेत्यर्थस्य सम्यलोकलोचनपद्मयुगलपरिक्तवैमुख्यवदान्यत्वरूपेण प्रकारान्तरेण वर्णनात् पर्यायोक्तम् , चन्द्रकलादायः कदापि न मवेदित्यर्थस्य कलानांनाथेविसपुष्पबन्धोर्बिम्बेन संगं न कदापि विदध्यादिति प्रकारान्तरेण वर्णनात्परंपर्यायोक्तम्, तच्च देवानां तादृशतृप्त्याः सम्बन्धस्याऽभावेऽपि तत्सम्बन्धकथनात् सम्बन्धातिशयोक्त्युज्जीवितम्, राजसूये युधिष्ठिरा

तु सर्ववर्णानामर्थप्राप्तौ सत्यामपि न-वर्णस्य सदैवार्थप्राप्त्यभावस्य प्रकाशनात्-वर्णार्थिशब्दद्वयगतश्लेषमूलका भेदातिशयोक्त्यनुप्राणिता व्याजस्तुति(१)श्च नितरां चमत्कुर्वन्ति ।

शिशुपालस्य भगवद्विषकः क्रोधः कटवागाद्यनुभावितः असूयोग्रत्वादि--संचारिपोषितो अनौचित्यप्रवृत्तत्वात्(२) रौद्राभासतया पर्यवस्यन् आसादयति आस्वादनीयताम् । तत्र ओजोगुणानुसारिणी संयुक्तपरुषाक्षरघटितारचना तदनुगुणो वृत्यनुप्रासः अन्त्यानुप्रास++प्रासोयमकमुत्प्रेक्षा च सुतरामावहति चमत्कृतिम् ।

भगवतः शिशुपालं तृणाममन्यमानस्य नैश्चल्यं मौनं च धृतिमावमभिव्यज्य तस्य महापुरुषत्वं ध्वनयतः । शिशुपालकण्ठच्छेदकस्य सुदर्शनचक्रस्य छेदने करणभूतस्याऽपि सम्बन्धाऽतिशयोक्तिमूलकमारोपितः कर्तृत्वं भगवतो महापुरुषत्वस्य धीरोदात्तनायकत्वस्य चाऽनुरूपमेव । नवास्त्रशब्दगतश्लेषमूलकोपमाया उत्प्रेक्षायाश्च प्रकृतार्थोपस्कारकत्वम् ।

(१७) दुर्योधनस्य द्यूतसभा पाण्डवानां पराभवश्च

अथ राजसूययज्ञेन पाण्डवानामुत्कर्षेणासन्तप्तोदुर्योधनस्य मातुलाय स्व दुःखनिवेदनम्, मातुलस्य द्यूतलीलया पाण्डवसर्वस्वापहरणाश्वासनम्, मणिमण्डपिका प्रवेशोत्सव व्याजेनाऽऽहूतस्य सानुजस्य युधिष्ठिरस्य हस्तिनापुरागमनम्, तत्र धृतराष्ट्रवन्दनम्, रात्रौ तत्रवासः, अपरेऽहिन द्यूतसभा, शकुनियुधिष्ठिरयोर्द्यूतकेलिः, युधिष्ठिरस्य तत्र पराजयः, दुर्योधनवचसा दुःशासनस्य कचे गृहीत्वाऽऽ

---

१ उक्तिव्यजिस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः । ७०। कुवलयानन्दे ।

२ अनौचित्यप्रवृत्तत्व आभासौ रसभावयोः ।। ३।२६२। साहित्यदर्पणे ।

नीताया द्रौपद्याः अधोवस्त्राकर्षणम्, द्रौपद्याः क्रन्दनं, भगवत्कृपया दुःशासनकृष्यमाणद्रौपदीवस्त्रस्य सततवर्धनम्, श्रान्तस्य दुःशासनस्य भुविपतनम्, भीमार्जुनयोः धार्तराष्ट्रशतस्य कर्णस्य च वधप्रतिज्ञा, द्रौपद्याः दुर्योधनं प्रति सक्रोधमुत्युशापः, द्यूतापहारितं राज्यं दत्वा स्वपुरंप्रस्थापितस्य युधिष्ठिरस्याऽमित्रा हूतस्य पुनर्द्यूतकेलौप्रवृत्तिः, द्यूतपणाऽनुसारं पराजितस्य युधिष्ठिरस्य स्वराज्यं-त्यक्त्वा वनवासाऽङ्गीकारश्च वर्णितं कविना विविच्यते, सम्प्रति तद्वर्णनं यथा-

"अन्धभूपतनयोऽपि बलौघैर्हास्तिनं पुरमवाप्य विलग्नाः ।
सौबलिं गिरमसौ बलवन्तं दुर्विचाररचनासु चचर्ल ।।"

"अग्नेरपत्यमिति हैम यदाहुरेत-
न्मिथ्या न मातुल ! विरोधिमखेऽनुभूतम् ।
तत्स्मर्यमाणमखिलद्विजतिपोपनीतं
नक्तंदिवं दहति चित्तमिदं यतो मे ।।"

"बलात्कुचं परिजहास समावलोके
मां द्रौपदी मणिभुवि स्खलितं यदुच्चैः ।
तत्साधु जातमिति वक्तुमिव स्नुषां स्वां
मत्प्राणवायुरयमुत्क्रमणेच्छुरास्ते ।।"

"अधुना युधि सेनाभिर्विधुन्वानो धरातलम् ।
विधाय निधनं तेषां निगृह्णीयामिमां शुचम् ।।"

"इति निगद्य व्रीडाव्यथानयोः संगमे निमग्नमेनमभग्नकैतवबन्धुःगान्धारपतिरुत्तारयितुमेवमुत्तरमादत्त ।"

"जय्यतां कथमुपैति तेऽर्जुनो वत्स ! यद्युधि मयात्पलायिताः ।
केवलं हरिमुखा न नामतो वेगतोऽपि मरुतोऽभवन्पुराः ।।"

"तं वीक्षितुं जगति शक्नुयुरत्र के वा भीमं प्रलोपधृतभीमगदाऽकबाहुम् ।
एकैकमुष्टिहतये स्म भवन्ति नालं यस्याहवे बकबृहद्रथभूरिडिम्बाः ।।"

"ताभ्यामुपास्यमानस्य तपसस्तनुजन्मनः ।
व्यापादेऽपि प्रसक्तिः का विशेषाद्वादृशां रणे ।।"

`तथाप्यहं तु तव च तेषां च परस्परं विभवे परिपणनपदाधिरोहिणि काणाददाममाणेन जगत्सामान्यतामदासंप्रदायेन तं पराजयघण्टापथे संचारयिष्यामि ।`

`वित्ते हृते दरिद्रास्ते विसृष्टा बन्धुभिः स्वयम् ।
विनाशं वा शुचा यायुर्विदेशं वाऽथ लज्जया ।।`

`त्वं ततस्तु सुखमात्मसंयुतैः सोदरैः सदृशसंख्यकाः समाः ।
नीरराशिहरिनीलमेखलां निःसपत्नमनुभुङ्क्ष्व मेदिनीम् ।।`

`इत्थंकारं रहसि कल्पिते कैतवदुरध्वे तावुभावप्यनुधावितुं दिव्यवदुषा तेनान्धेन वसुन्धराधिपतिना नवमणिमण्डपिकाप्रवेशोत्सवव्याजादाहूतः सानुजोधर्मजः कुरुपत्तनमुपेत्य बन्धुतया प्रत्युद्गम्यमानो दुस्तरं भाविवनवासवर्षैकैकमेकैकेन प्रणिपातपुण्येन सुप्रतरं कर्ष्यन्निव पितृव्यं द्वादशकृत्वः पदयोः प्राणंसीत्।`

`अवभृथाम्बुकणैरिव नूतनैरधिगतामथ जालकमौक्तिकैः ।
स्वकबरीं द्रुपदस्य सुतापि सा सुबलजापदयोः समनीनयत् ।।`

`अनुजाभिरनामयानुयुक्तैरभिनन्द्य क्रतुलाभलालनाभिः ।
सदनाय ससर्ज तं विनीतं स धृताकारनिगूहनो महीपः ।।`

`तावन्मदीयतनुभेदिभटान्तहेतु-
वैरं मिथः प्रभविता कुरुभूभुजां श्वः ।
-इत्यन्तराहितशुचेव दिशि प्रतीच्यां
मन्दायमानमहसा रविणा निषेते ।।`

`दिग्धे संतमसैः सान्द्रैर्दिशापदिशचत्वरे ।
सर्वाः प्रजास्तदा राज्ञा समारुक्षान्दृशा तुलाम् ।।`

`मनुजावलीनयनवर्त्मनै पुनर्मघवादिदेवममभावगोचराः ।
ककुभो विभेजुरमृतांशुभानवः काणमेव तं प्रथमशैलरोहिणः ।।४-१७-३०।`

एवं कविनाऽत्र दुर्योधनस्य राजसूये युधिष्ठिरोत्कर्षं दृष्ट्वा लज्जितत्वम्, असहिष्णुतयाऽन्तस्तप्यमानत्वम्, द्वेषविषाविष्टत्वम्, पाण्डवहनन-दुःसाहसोद्यतत्वम् च साधुस्फुटीकृतं मातुलेन शकुनिना सह वार्तालापे । शकुनेस्त-

त्प्रतिवादेऽपि भीमार्जुनोपास्यमानस्य युधिष्ठिरस्य युद्धेऽजय्यत्वं द्यूते पराजयत्वं सर्वस्वहीनत्वं नष्टराज्यत्वं पलायितत्वं च प्रतिपाद्य दुर्योधनस्य निःसपत्नभूलोकराज्यभोगप्राप्ति संभावनाऽपि सम्यक् प्रकटीकृता । ततः पुत्रश्यालकमतमनुसरताऽन्धभूपेन छलेन आहूतस्य सानुजस्य युधिष्ठिरस्य विनयभावोऽपि साधु समुद्भावितः ।ततोऽत्र सूर्यास्तमनं चन्द्रोदयश्च वर्णिते ।

तत्र दुर्योधनसन्तापे विषाददैन्यावेगध्वनिषु काव्यलिङ्गालंकारो वृत्त्यनुप्रासश्चाऽनुकूलौ ।

दुर्योधनविषयकद्रौपदीहासस्य दुर्योधनगतविषादाङ्गत्वात् रसवदलंकारः, तत्र च फलोत्प्रेक्षाऽनुगुणा ।

दुर्योधनस्य युधिनन्द- पाण्डव वधदुःसाहसोत्साह प्रकाशनेन चापल्यभावध्वनिः , तत्र च ' विधुन्वानः ' इति वर्तमानकालिकेन शानचा युद्धे सेनाभिर्धरातलकम्पनस्य पाण्डवानां वधस्य स्वशोक निग्रहस्य च संभावितेऽपि पौर्वापर्ये समकालिकत्व वर्णनादक्रमातिशयोक्ति(१) र्नितरामनुगुणा ।

शकुनिवाक्ये युधि भीमार्जुनयोरजय्यत्वाजेयत्व प्रतिपादने काव्यलिंगमु मरुद्रुपकं च युधिष्ठिरस्य च व्यापादाविषयत्व प्रतिपादने परिकरोऽर्थापत्ति(२)श्च नितरां चमत्कुरुतः सर्वेऽप्यलंकाराः तेषां प्रभावोत्कर्षं बाढं प्रकटीकुर्वन्ति । तत्र इन्द्रादिदेवजेतृत्वस्य अर्जुनाऽजय्यत्वोपपादकत्वेन काव्यलिङ्गस्यश्लिष्टभीमशब्दस्य सद्यः परपराभाकत्वाऽभिप्रायगर्भितत्वेन परिकरस्य, बक हिडिम्बादीनां भीमाभिमुखस्थित्यदामत्वे का वाऽन्येषां कथेत्यादोपेणाऽर्थापत्तेश्च स्पष्टता प्रकटैव । द्यूते च तेषां पराजये दुर्योधनस्य राज्यसुख संभावनायां शतसमा इत्यस्य आत्यसंयुतैः सोदरैः सदृशसंख्यकाः समाः इति प्रकारान्तरेण कथनात् पर्यायोक्तं नीरराशि हरिनीलमेखलारूपकं च क्रमशो मेदिनी भोगस्य दीर्घकालिकत्वं स्पृहणीयत्वं च ध्वनतः ।

---

१ अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः । ४१। कुवलयानन्दे ।

२ दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ।। १०।८३। साहित्यदर्पणे ।।

युधिष्ठिरस्य द्रौपद्याश्च क्रमशो धृतराष्ट्रस्य गान्धार्याश्च पदयोर्मुने नाऽनुभावेन उभयोः क्रमशः उभय विषयिका भक्तिर्ध्वन्यते, हर्षौत्सुक्यादि संचारिभावैश्चाऽसौ परिपोष्यते । तत्र फलोत्प्रेक्षा न मनोचित्य द्योतते न स्वरूपोत्प्रेक्षा च कबरी शोभोत्कर्षकत्वेन चमत्कारिण्यावेव ।

धृतराष्ट्रस्य स्वकीयाकारनिगूहनेनावहित्थभावध्वनिः प्रकृतोपयोगित्वेन चमत्कारोत्थैव ।

सायंकालवर्णने रविमहसो मन्दत्वे हेतूत्प्रेक्षा अन्धकार प्रसारे सर्वेषा मन्धभूयत्युपमा, चन्द्रोदये च अमृताऽशुभानूनां मधवादि दिग्विभागस्य मनुजावली नयनसंचारफलकत्वेनोत्प्रेक्षा नितान्तमेव चमत्कुर्वन्ति । तत्र तत्र वृत्यनुप्रासोऽपि चमत्कारक एव ।

अथ युधिष्ठिरस्य ऋजुत्वं द्यूतपराजयादिकं वर्णितं कविना, यथा-

"अथोपकार्यामधितिष्ठतोऽस्य संदर्शनायानिशमापतद्भिः ।
अशेषपौरैरति बाल्यमित्रैरशेषि किंचिन्न तया रजन्या ।।"

"धर्मजन्मा ततः कर्म निर्मायाहर्मुखोचितम् ।
सभां स मासुरां पौरैर्मूर्धन्यैः पाण्डवेदिभिः ।।"

"तत्र चित्रीयमाणेष्वनल्पचतुरिमजल्पाकेषु समाशिल्पेषु दृशं परिकल्पयतः प्रज्ञादृशं निकषा मूर्ते तृतीयगुणा इव दिविषद्दृषमनीलदृषदासने निषीदतोऽमुष्य कुरुकुलप्रदीपस्य प्रतीपं निविशमानः क्षत्रियः स्थानाद्भ्रंशयितुं साक्षात्कृतसंनिधी रिक्तमध्यमवर्णया तदीयाभिख्यया वाच्यो ग्रहविशेष इव प्रासङ्गिकेन पथा दुरोदरविहारावतारमचिरमभिरोचयामास ।।"

"अथ सदसि महत्यामाज्ञयासौ नियत्याः
सुमतिमपि विमुह्य द्यूतमार्गे प्रवृत्तम् ।
बहुषु जनपदेषु प्राप्नुवत्सु ग्लहत्वं
सपदि सुबलसूनुर्धर्मसूनुं विजिग्ये ।।"

"एकेन यत्सुबलभूर्युपदृग्गृहीतु-
मक्षोण सर्वविषयान्नृपतेरशक्नोत् ।

अस्मात्परं जगति वाच्यतयाभ्युपेत्य तिष्ठेत किं नु परमाद्भुतवाचकाय।।

" प्रतिदेवनमेवमेव भूषाः प्रचुरान्रत्नचयांश्च हैमराशीन् ।
सहजान्सह जायया स्य जित्वा स तु गान्धारपतिर्जगर्ज हर्षात्।।४।३१७३५

अत्र युधिष्ठिरस्य पौरजनस्नेहास्पदत्वम्, धार्मिकत्वम्, शकुनिवाग्जाल मुग्धत्वेन दुरोदरप्रवृत्त्यार्जुत्वम्, उत्तरोत्तर पराजयानुभवेऽपि स्वीकृत दुरोदराविचलितत्वम्, सहजानां जायायाश्चाऽपि पणेऽपहारेऽवर्ण्यत वैदग्ध्येन कविना । तत्र वृत्त्यनुप्रासस्य यमकस्य च चमत्कारेण सह उत्प्रेक्षा, शब्देः प्रकारान्तरेण कथनात् पर्यायोक्तम्, अक्षविषयशब्दद्वयगतश्लेषमूलकाऽभेदातिशयोक्त्यनुप्राणितं-काव्यलिङ्गमपि चात्र भृशं चमत्कुर्वन्ति ।

उत्तरोत्तर हानेरनुभवेऽपि अङ्गीकृतादविचलनेनाऽनुभावेन युधिष्ठिरगतो धृतिभावोऽपि ध्वन्यमानश्चमत्करोतितरां सचेतोजन-चेतांसि ।

एवं द्यूते पाण्डव-जयेनैव सन्तोषश्चेत्समभविष्यत्, तर्हि सर्वनाशोनाऽभविष्यत् कौरवाणाम्, किन्तु दैवस्य विपरीतत्वात् द्वेषदुर्ग्रहग्रस्तो दुर्मतिर्दुर्योधनः-पाण्डवजयेन गर्जतिशकुनौ तेषामपमानकुकर्मण्यपि प्रवृत्तोऽभवत्, यथोक्तं तत्र -

" घटीचेटी नोऽभूदबहुपतिवधूटी द्रुपदजा
वराकीं तामत्रानय परिषदीत्यग्रजगिरम् ।
हरन्द्वैतीयीकः सुबलतनयासूनुषु जवा-
त्समुत्तस्थौ साक्षादवनिमवतीर्णौ यम इव ।।"

" दृष्ट्वा भिया सदसि धावनमाचरन्त्याः
कैश्ये चकार स कराऽगुलिमानताऽग्र्याः ।
वक्षोरुहेषु च महीपपुरंध्रिवर्गा
नासाग्रसीम्नि सुधियश्च नदीसुताद्याः ।।

" तत्र स दुर्मेधा बलवदाकर्षणोद्भिद्यमानानि स्वेदपृषन्तीव भूषाजाल-कमुक्ताफलानि धारयन्त्याश्चिकुरभारात्करतलनिष्पीडननिर्गलितां कालिमधारा मिव निर्भरकुवलयगर्भकमाल्यरसकरीमश्रुभिः सह वर्षन्त्यास्तस्याः पातिव्रत्यलक्ष्मी निवासस्फटिकप्राकारमिव दुकूलमप्याहर्तुं प्रावर्तत ।।"

"तादृक्षो समुपस्थिते परिभवे सभ्येषु वाचंयमे-
ष्वाध्यायत्सु विधेर्बलं स्वदयितेष्वन्येष्वशक्तेष्वपि ।
निश्चित्यार्तिमतां गतिं यदुपतिं नीव्यां करौ कुर्वती
सा चक्रन्द तदोच्चकैरिह हरे ! त्रायस्व हा मामिति ।।"

"तस्याः सभायां ह्रियमाणवस्त्रात्तन्व्या नितम्बात्सहसाविरासीत् ।
कंसारिकारुण्यपयः पयोधेः कल्लोलमालेव दुकूलपङ्क्तिः ।।"

"हृते हृते वाससि हृद्यरूपं वासोऽन्तरं यद्ववृधे वराङ्ग्याः ।
नरस्य तेनैव न कस्य तत्र चित्तस्य नाव्योऽजनि चित्रपूरः ।।"

"अदृश्यस्यापहारेऽपि वर्धितौनेकवाससः ।
अम्बरप्रायता तस्या मध्यस्योमयथाप्यभूत् ।।"

"चेलानि कर्षंश्चिरमन्धसूनुस्तस्यास्तु नग्नकरणः स नाभूत् ।
श्रमात्स्खलित्वा धरणौ पतन्सन्दन्तावलेरेव जनव्रजानाम् ।।"

"अथ तथाभूतपरुषयोषाभिषङ्गरोषकलुषेण पृषदश्वजनुषा परिषदि भीषणमेवं बभाषे ।।"

"उरसि स्खलदुष्णं मृगाक्ष्याः समितावभ्रमिदं यथाहमक्ष्णा ।
द्विषतः कवकर्षिणोऽप्यमुष्या रसनेनानुभवेयमेवमेव ।।"

"किं च सरसीव चलत्कबन्धबन्धुरे समराजिरे तामरसच्छदानिवशतमपि विमतानेतान्हेमन्त इवाहं घार्तराष्ट्रशबदशेषां महागदापत्तिं गमयिष्यामीति ।।"

"तत्र सुत्राम्णः पुत्रोऽप्येवं प्रतिजज्ञे, -

"उत्सेकात्कृतहस्ततालममुना गान्धारपुत्र्यीभुवा +
राधासूनुरसौ जहास सदसि ग्राम्यं ब्रुवन्यत्ततः ।
यस्यां जात्वपि देहिनोऽभ्युदितता नैवाभिनिर्मुक्तता
स्यातां द्वे अपि गाण्डिवौ मम तु तां निद्रामुं नेष्यति ।।"

"इति तयोस्तादृशेन वीरवादेन "अयि ! सुखमिहास्स्व" इति करास्फालननिदर्शिते स्वयन्येव तव मृत्युः स्यादिति सुयोधनंप्रति याज्ञसेन्याः शापेन च मयात्तगन्धाभ्यामन्धदंपतिभ्यां यथापुरं राज्यं प्रत्यर्प्य हरिप्रस्थं प्रति प्रस्थापितो-

युधिष्ठिरः पुनरपि कृतमन्त्रैरभिन्नैरयमाहूतमात्रोऽर्धपथाद्विधिना गलहस्तिकया विनिवर्तित इव तामेव सभां प्रत्यावर्तत ।।'

'भूताभिविष्ट इव बोधवतां वरोऽपि
भूयोऽपि धर्मतनयः सह सौबलेन ।
आधत्त देवनविहारमनार्यजुष्ट-
माधत्तरं विजहदेव पणोऽपि योऽभूत् ।।'

'क्षितवे शकुनौ वशंवदान्किरति स्वेन करेण पाशकान् ।
विजयेन सदा पुरस्कृतोऽप्यभवत्तेन स पृष्ठतः कृतः ।।' ४।३६-४६।।

एवं दुर्योधनस्य पाण्डवद्वेषदुष्टतया पश्यत्सु स पाण्डवेषु सभ्यजनेषु-द्रुपदजायाः सभायामानयनाय सन्यक्कार वचनं दुःशासन प्रेरणम् , दुःशासनस्य-कैश्ये गृहीतायाः सभायामाकृष्टायाश्च तस्या दुकूलापहरणचेष्टनम् , तादृक्परिभवे अशरणायाः क्रन्दन्त्यास्तस्याः स्वत्राणाय भगवत्प्रार्थना, एकस्मिन् वसने-दुःशासनेनाकृष्टे परस्यवसनस्यैवं वसनपरम्पराणां द्रुपदजामध्यदेशाद् भगवत्कृपया-ऽविभविन वसनजालाकर्षण श्रमाद् दुःशासनस्य स्खलित्वा भुविपतनम् , तथाभूत-घोरतमस्त्रीपराभवक्रुद्धस्य भीमस्य युद्धे दुःशासनवक्षाः शोणितपान सर्वधार्तराष्ट्रवधप्रतिज्ञाघोषणम्, अर्जुनस्य च कर्णहनन निश्चयोद्घोषणम्। द्रुपदजायाश्च दुर्योधनाय सक्थिघातजभृत्यु शापदानम्, तद्भीतस्य धृतराष्ट्रस्य यथापूर्वं राज्य-प्रत्यर्प्य हरिप्रस्थं प्रति युधिष्ठिरस्य प्रस्थापनम्, शकुन्यानुरोधेन युधिष्ठिरस्य-अर्धपथाद् विनिवृत्य पुनरपितां सभामागत्य वनविहार पणेन द्यूतेप्रवृत्तस्य प्रत्य--र्थिभिःकूटपराजय इति वर्णितं कुशलेन कविनाऽतिमार्मिकतया ।

तत्र दुर्योधनदुःशासनयोर्दुश्चेष्टाभिरनुभावैः तदव्यग्र्यैश्चगर्वामर्षासूया चापल्यादि-संचारिभावैश्च पाण्डव द्रुपदजा विषयको दुर्योधनदुःशासनगतः क्रोधोमणिसभायां दुर्योधनस्खलनजातद्रौपदीहासस्मरणोद्दीपितोऽनौचित्यप्रवृत्तत्वात् आभासतयाऽभिव्यज्यते । यत्र दुःशासनस्य यमत्वेनोत्प्रेक्षणा संयुक्त परुषाक्षर-घटनात्मिका गौडीयारीतिस्तद्घटित एव च वृत्त्यनुप्रासः सुतरामनुकूलः ।

क्रुद्धस्य दुःशासनानुधावनाद्द्रौपदीहासस्तद्विकायकोद्रुपदजागतस्तदनुधावनक्रम-

न्दनाद्यनुभावितो दैन्यावेगत्रासादि संचारिभावैः पोषितोभयस्थायिभावः परिपुष्यन् भयानकरसतया चर्वणाविषयोभवति सचेतसाम् । महीपपुरन्ध्रिवर्गाणां वक्त्रोरुहेषु भीष्मादीनां नासाग्रभागे स्वकरस्थापनानुभावेन विषादभावध्वनिः । संदोपेण वर्णनात्मक समासाख्य प्रौढिगुणः तुल्ययोगितालंकारश्चा त्र नितराम नुकूलः । मदुमधुरवर्णघटितो वृत्त्यनुप्रासश्च चमत्कारक एव ।

द्रुपदजाकचाकर्षण दुकूलाहरणचेष्टाभिरनुभावैस्तव्यङ्ग्यैरसूयामर्षचापल्यादिभिश्च संचारिभावैः पोषितो दुःशासनगतः पाण्डव विषयकः स क्रोधोप्यनौचित्य प्रवृत्तत्वादाभासरूपतया च वर्णगोचरतामायाति सचेतसाम् । ओजो गुणाव्यञ्जकः संयुक्तपरुषवर्णघटितोगुम्फः, वृत्त्यनुप्रासः, उत्प्रेक्षाश्च तत्राऽनुगुणा एव । मध्यस्याऽम्बर प्रायताया: अदृश्यत्ववर्धितानेकवस्त्रत्वाभ्यामुपपादनात् का व्यलिङ्गद्वयं बाढं चमत्कारकम् ।

द्रुपदजायाः स्वत्राणार्थक भगवत्प्रार्थनात्मकाक्रन्दनेन अनुभावेन तद्गत-दैन्यावेगविषादभावा ध्वन्यन्ते । वृत्त्यनुप्रासो त्र चमत्कारकः ।

द्रुपदजाकट्टिप्रदेशात् दुकूलपरम्पराणामाविर्भावे तच्चदालम्बनोद्दीपनकः-सभ्यजनगतो विस्मयस्तदीयनयनविस्फारादिभिरनुभावितः आवेगजाड्यादि संचारिभावैः पोषितोऽद्भुतरसतया चवर्णागोचरतां याति सचेतसाम् । तत्र दुकूलपरम्पर्यां कंसारिकारुण्यपयः पयोधिकल्लोलमालात्वेनोत्प्रेक्षा विस्मयोत्कर्षकत्वेन सुतरामनुगुणा । द्रुपदजामध्यस्याशून्यत्वेऽपि शून्यत्व परिकल्पनमूलक सम्बन्धातिशयोक्तिहेतुका आकाशोपमा प्रचुरवस्त्ररूपतया वस्त्ररूपकं च एकाम्बररूपश्लिष्ट-वाचकानुवेश संकीर्णत्वेन तस्य च - मध्यदेशसम्बन्ध्यम्बर प्रायताया अदृश्यत्व-वर्धितानेक वस्त्रत्वाभ्यामुपपादनात् का व्यलिङ्गद्वयेऽङ्गीता नितरां चमत्कुरुते ।

दुःशासनस्य द्रुपदजानग्नीकरण प्रयत्नसत्वेऽपि तत्फलानुत्पत्त्या विशेषोक्तिः, इष्टार्थासंपत्त्या द्वेष्टविपरीत स्वपतनसंपत्त्या च विषादनम्, जनहासपात्रस्वस्य जनावलीदन्तव्रजनां नग्नीकरणात्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तं. नग्नीकरणस्य पश्चात्यां व्यपोहनात् जनव्रजदन्तावल्यां च स्थापनात् परिसंख्या चाऽत्र सातिशयं चमत्कुर्वन्ति सचेताजनमनस्सु । दन्तावलीदर्शनानुभावेन व्यक्तो ह

र्षादि संचारिभिश्च पोषितः सभ्यजनगतो दुःशासन विषयको हासः आस्वा यते हास्यरसतया सहृदयैः । तत्र विशेषोक्ति विषादनालंकारौ तदुत्कर्षकत्वेन नितरामानुगुण्यमाधत्तः । पर्यायोक्तं तु उक्ति वैचित्र्यमात्रपर्यवसायि। वृत्यनुप्रासोप्यत्र रुचिरः ।

द्रुपदजावमाननाजन्यक्रोधकलुषित मनसोभीमसेनस्योक्तौ तादृशवचनानुभावेन तदवमाननाविभावकः उग्रताभावो ध्वन्यते । तत्र अग्रसमिति शब्दगतश्लेष मूलकाभेदातिशयोक्तिद्वयं, तन्मूलकं द्रुपदजादुःशासनयोरस्त्र प्रतियोगित्वं समितिग तत्वं च साधारणधर्मद्वयं , तन्मूला च द्वयोरुपमा, तथाकबन्ध-धार्तराष्ट्र-गदा पत्ति-शब्दगतश्लेषमूलकाभेदातिशयोक्ति निर्वर्तित सामान्यधर्ममूला चोपमा परम्परा चातितरां चमत्कुरुते । ओजसोऽत्र संयुक्तवारघटितरचना व्यङ्ग्यस्यानुगुण्यम्।

एवं तादृक्क्रोधकुलुषितहृदयस्याऽर्जुनस्याऽपि तादृग्वचनानुभावेन द्रुपदजावमानकालिक राधासूनु ग्राम्यवचनहासविभावकः उग्रताभावो ध्वन्यते । तत्र मृत्योः अभ्युदितताऽपि निर्मुक्तताविरहितनिद्रात्वेन रूपेण प्रकारान्तरेण कथनात् पर्यायोक्तम् । मारणोकरणभूतस्याऽपि गाण्डिवस्य कर्तृत्वोक्त्याऽर्जुनस्यधैर्यगाम्भीर्ये ध्वन्येते । संयुक्तवारघटितरचना व्यङ्ग्यौजसोऽत्राऽनुकूल्यम् ।

एवं दुर्योधनस्य " अग्नि सुखमिहास्वे ति करास्फालनेन द्रौपदीं प्रति स्वसक्थिदर्शन विभावेन " सक्थिन्येव तवमृत्युः स्यादि ति द्रौपदीशापानुभावेन द्रौपदीगतोऽप्यौग्र्यभावो ध्वन्यते ।

भीमार्जुनवीरवादेन द्रुपदजाशापेन च विभावेन अन्धदम्पत्योर्यथा पूर्वं राज्यस्य युधिष्ठिराय समर्पणानुभावेन तद्गतस्त्रासभावो ध्वन्यते ।

अभित्रैर्धृतकैतवे पुनराहूतस्य युधिष्ठिरस्याऽधंपथात् पुनस्तत्सभां प्रत्यावर्तनेनाऽनुभावेन तद्गतोधृतिभावो ध्वन्यते । अनार्यजुष्टस्याऽपि स्वीकृतपूर्वस्य द्यूतस्य निषेधस्ततः पलायनमेव स्यात्, तच्च वीराणां कृते प्रातीपिकं न कदाचिदपि शोभावहम्, अतो भवतु पुनरपि द्यूतविहारः, काचिंत्तेति धृतिरेव व्यज्यते,-नतु मोहः । पुनः सभा प्रत्यावर्तनस्य विधिकर्तृकगलहस्तिका करणक-विनिवर्तनत्वेनोत्प्रेक्षाऽपि तत्राऽनुकूलैव ।

आचाररहित देवनविहारे वाच्यत्वेनरूपेण प्रकारान्तरेण पणास्यवन विहारस्य कथनात् पर्यायोक्तालंकारः , विजयशब्दगतश्लेषमूलकाऽभेदातिशयोक्तिजीवितो युधिष्ठिरपराजितत्वस्य विजय पश्चात्कृतत्वरूपप्रकारान्तरेण कथनादपरः पर्यायोक्तालंकारश्च नितरां चमत्कुरुतः पुनर्युधिष्ठिरस्य द्यूतपराजितेर्वर्णने ।

(१८) पाण्डवानां वनविहारः

अथ द्यूतापहारितसर्वस्वानां पाण्डवानां वन-विहारः,स्तुतिभिः प्रसन्नात् सूर्यदेवो दत्ताक्षयान्नपात्रप्राप्तिः, मार्गेमीमस्य किर्मीर राक्षस वधः-भगवद्व्यास दर्शनम्, तस्य शोकाकुल पाण्डवाश्वासनम् च वर्णितं कविना विविच्यते, सम्प्रति तद्वर्णनं यथा -

" उत्थायाथ क्षितीन्द्रः क्षणमपि धरणौ स्थातुमस्यामयुक्तं
प्रत्यर्थिस्वीकृतायामिति सह सहजैः सत्यसंधः सजानिः ।
पाणौ कार्तुनिधाय प्रसुवमतितरामन्तरुच्यमानां
पद्भ्यां प्रापद्वनानि व्यथितहृदमुचत्पौरलोकस्तु दृग्भ्याम् ।।"

" कान्तारवर्त्मनिमृगाः पुरतो निषण्णाः
शान्ताकृतेः सधनुषोऽपि निषङ्गिणोऽपि ।
उत्थाय तस्य पटुमर्मरचारु चीरं
रोमन्थलोलचिबुकेन मुखेन जघ्नुः ।।"

" परागपूर्णे पथि तस्य पादरेखा घटस्य प्रतिमा मनोज्ञाः ।
भक्त्योपनीता वनदेवताभिः पाद्योदकुम्भा इव जाग्रति स्म ।।"

" क्रमेण ते सजानयो विलङ्घ्य विविधानि निपिनानि जह्नुमुनिकर्णशष्कु

लीपथवशेन शिक्षितेर्गतिविशेषैरिव गभीरैरावर्तैरुपार्जितजनताहृतानि संसारचक्राणिव दर्शयन्तीं कोकनदवदनोदितैरिव कोककुटुम्बकूजितैः कुमारस्य देवव्रतस्य कुशलं पृच्छन्तीमिव भागीरथीं पुरस्कृत्य तत्र तां निशीथिनीं पश्चाच्चक्रुः ।।'

'अपरेद्युरतिमात्रबुभुक्षितानुयात्रिकसत्रिजनपरित्राणाय पवित्रैः स्तोत्रैः प्रसेदुषा चित्रभानुना दत्तमक्षय्यमन्नपात्रमादाय ते कलत्रे निदधुः ।।'

'वनं ततः काम्यकमेत्य तेषु वसत्सु भीमस्तु नियोद्धुकामम् ।
किर्मीरमुग्रं कुणपाशनेन्द्रं क्षिप्रं तदाहारदशामनैषीत् ।।'

'ततश्चरन्द्वैतवने स सार्धं वध्वा कदध्वालसतामबुद्ध्वा ।
मूलानि सर्वस्य शुभस्य भूपो मूलानि जग्राह मुनीन्द्रसङ्घात् ।।'

'तत्राथ ते सत्यवतीसुतस्य पादारविन्दात्प्रविसृत्वरीभिः ।
नखप्रभाभिर्नवपुष्पपक्वतीर्जह्नालतानां जनयाम्बभूवुः ।।'

'तस्मिन्कवौ तापसयूथनाथे स्वातीमथाजग्मुषि वासभूमिम् ।
तेषामतिक्षामतया युतानां शुचादिदेशेष्वतिवृष्टिरासीत् ।।'

'प्रसृमरतनुभासा प्रावृषेण्यान्स मेघा-
न्दिशि दिशि विदधानो दीर्घदर्शी तदानीम् ।
कुरव इति महान्तं शब्दमाजिघ्रतोऽपि
स्ववचननिपुणिम्ना तानशोकानकार्षीत् ।।' ४।४७-५४ ।।

एवं वनाय निर्गतस्य सानुजस्य धर्मजातस्य मार्गेसुरतरङ्गिणीसङ्गमः, सूर्यप्रसादादक्षय्यान्नपात्रप्राप्तिः, काम्यकवनेभीमेन किर्मीरवधः, द्वैतवने मुनिजनैः समागमो भगवद्व्यासदर्शनं च, तेन तेषां सान्त्वनं चोपनिबद्धमति नैपुण्यानि पुण्येन कविना ।

तत्र द्यूतस्वीकृतपणानुसारिणा वनगमनस्वीकारेण युधिष्ठिरस्य तदनुयायिनां च पत्नीसहोदराणांलोकोत्तरं धीरत्वमभिव्यज्यते । अन्तस्तापेन पुरुकुत्सिकस्य कुन्तीगतो विषादोऽपि व्यज्यते । पुरवासिजनस्य च तदानीमश्रुमोचनेन संभावितं तद्विरहजन्यं विषादः संचारि, तत्र च पाण्डवबन्धुविषयक पुरवासिजनगतो रतिभावो गुणीभूतोऽवतरति प्रतीतिपथम्, तेन तत्र विपिन

वनगतश्लेषमूलका -

नीरोभय वाचकभेदातिशयोक्त्या भिन्नस्यैक वन प्राप्ति रूपधर्मस्य वनगत श्लेष मूलक क्षितीन्द्र पौरलोकाभ्यां प्रकृताभ्यां योगात् तुल्ययोगिता, क्षितीन्द्र व न प्राप्तेः पौरजन विषादे हेतुत्वाऽवगमात् काव्यलिङ्गेनाऽङ्गभूतेन संकीर्णा-कवैवर्णनास्वीकृतसमासाख्य प्रौढि गुण प्रकाशकतया चमत्कारोत्तिराम् ।

युधिष्ठिरस्य शान्ताकृतिनाऽपि महत्यामपि विपत्यां दुःखाभिभवाभावात् लोकोत्तरमेव धीरत्वं प्रतीयते । मृगस्वभावोक्तिश्च नितरामनुकूला । नृपस्य धनुर्निषङ्गयुक्तत्वेऽपि तत्कार्यस्य मृगगतभयस्याऽभाव वर्णनाद् विशेषोक्तिः ।

युधिष्ठिरस्य पादरेखासु भक्त्या वनदेवतोपहृतपाद्योदकुम्भत्वोत्प्रेक्षाया महापुरुषत्वं ध्वन्यते ।

भागीरथी-वर्णने वृत्त्यनुप्रासः, उत्प्रेक्षाः, भागीरथी प्रार्थणायामि नीयापनयोः पुरस्करण- पश्चात्करण रूपेण प्रकारान्तरेण कथनात् पर्यायोक्त द्वयं च नितरां चमत्कुर्वन्ति । बुभुक्षित क्षात्रिजनत्राणोपायकरणेन नृपस्य धृतिम ति-भावौ तद्गता भक्तिश्च ध्वन्यते, अक्षय्यान्न पात्रदानेन सूर्यस्य पाण्डवगत-वात्सल्यं व्यज्यते ।

भीमकृतकिर्मिरनामक- कुणपाशन वधस्य तदाहार(कुणपरूप) दशाप्राप ण रूप प्रकारान्तरेण वर्णितत्वात् पर्यायोक्तमपि चमत्कारकम् ।

द्वैतवने युधिष्ठिरस्य मुनिजनकृताभिनन्दनेन तद्विषयस्तद्गतो नुरागः- प्रतीयते । तत्रैव भगवतो व्यासस्य दर्शनेन तेषां तद्वन्दनेन च तद्गता तेषां भक्तिरभिव्यज्यते, तत्र पाण्डवानां स्वजटालतानां तन्नखप्रभाभिः पुष्पपङ्क्तजनन रूपोक्तिप्रकारान्तरेण तद्वन्दनस्य कथनात् पर्यायोक्तं रूपकमूलकमतिरमणीयम् ।

भगवतो व्यासस्य पाण्डववासभूमावागमेन पाण्डवानां रादनेन विषा दभावोदयो ध्वन्यते । तेषां धीरत्वेऽपि स्वकुलवृद्धहितैषिजन प्राप्तौ हृदयवैकल व्यस्य स्वाभाविकत्वात् न तन्महत्वापकर्षकत्वम् , यत उक्तम्- " स्वजनस्य हि-दुःखमग्रतो विवृतद्वारमिवोपजायते ।" अत्र कवि शब्दश्लेषोज्जीवितं साङ्ग रूप-कं नितरामनुगुणं सातिशयचमत्कृत्याधायकम् च ।

व्यासकृतपाण्डवसान्त्वने विषादस्य निवृत्या विभावशान्तिः ध्वन्यते ।

(१)। तत्र दीर्घदर्शिविशेषणेन व्यासस्यभाविशुभज्ञानेन तेषां शोकनिवर्तकत्वाभिप्रायगर्भितत्वात् परिकरालंकारः, "अशोकवृक्ष इति" शब्दगतश्लेषमूलको - विरोधाभासः, स्वतनुकान्तिकरणकप्रावृषेण्यमेघकर्तृत्वस्य व्यासेऽसम्बन्धेऽपि-तदुक्त्या सम्बन्धातिशयोक्तिश्च + तत्राऽनुगुण्यमादधाना नितरां चमत्कुर्वन्ति। सम्बन्धातिशयोक्त्या भगवतो जगज्जीवातुत्वस्य ध्वनिरपि प्रकृतेऽनुकूलायतेतराम्।

(१६) अर्जुनस्य तपस्या शिव-प्रसादश्च

द्वैतवने महर्षिव्यासाद् भगवतः शिवस्य प्रसादनी प्रतिश्रुतिविधां प्राप्य हिमाचलं प्राप्य तपश्चचाराऽर्जुन इत्यादि वर्णितं कविना समीक्ष्यते। तद्वर्णनं यथा -

"तस्मात्प्रतिश्रुतिरिति प्रतिपद्य विद्या-
मालिङ्ग्य धर्मतनयेन विसृज्यमानः।
पार्थो हिमाचलमगात्परमास्त्रमाप्तुं
शंभोः कृपाजलनिधेश्चरणार्चनाभिः॥"

"यस्मिन्हिमानीभृति यद्गावृन्दमङ्गेषु सर्वेष्वपि मञ्जुलेषु।
नखम्पचोष्णां नलिनेक्षणानामुरोजमेवातितरामुपास्ते॥"

"यो वत्सतामेत्य वसुंधराया निपीय रत्नावलिकान्तिपूरान्।
मनःशिलाप्रस्रवरीमिषेण दरीमुखैरुद्गिरतीव तृप्तः॥"

"आरोहतस्तं तरसा समीरकिशोरकः स्वेदजलाणुराजिम्।
निपीय तस्याननपद्ममाध्वीं द्विरेफभावं प्रकटीचकार॥"

"शिवाख्ययोरेकतनुत्वकारणं त्रिलोकपित्रोर्महसोस्तपोवनम्।
मिथोऽर्च्यमानं मिथुनैस्तपस्विनां तथेच्छुभिस्तत्र ननाम पाण्डवः॥"

---

१ भावस्य शान्ता बुद्ध्ये सन्धिमिश्रितयोः क्रमात्।
भावस्य शान्ति रुदयः सन्धिः शबलता तथा॥ ३।२६७। सा०द०

'तत्र दर्भदलमुष्टिमाहरन्संनिधास्यदृषभोपदामिव ।
चित्तमीशपदयोः समादधच्चक्रमारमत दुश्चरं तपः ।।'

'चतुरस्तपः स्थितिविशेषविधौ चरणं निधातुमखिलेन निजम् ।
स जुगुप्समान इव शत्रुजिते प्रपदेन तिष्ठति भुवः स्म तले ।।'

'भानौ ललाटन्तपभानुजाले प्रविष्टदृष्टिं परितस्तमग्निः ।
भूयोऽपि भोक्तुं विपिनं विशेति प्रेम्णोपरुन्धन्निव दृश्यते स्म ।।'

'तपोविधौ स पावकेन सर्वदिक्षु वासवि-
स्तदा बभूव वेष्टितो घर्मभ्रियत्वबान्धवात् ।
अजीजनत्तमर्गराजमग्र्यं । वैरिणं भवा-
नितीव रोषतो दिनेश एव चक्षुरक्षिपत् ।।'

'पाराशरिप्रापितमन्त्रभागैराराधयन्शंकरमन्तरङ्गैः ।
सप्तापि वर्षाण्यतपसा विजेतुं सप्तत्वमाप स्वयमेक एव ।।'

'फलपर्णजलानिलाशनानि प्रविहाय क्रमशस्तपस्यतोऽस्य ।
विषयेषु न लोलतां प्रपेदे विजयस्याङ्गगणः कराग्र एव ।।'

'तत्तादृशेन तपसा तरणीन्दुमौलिं
तन्वन्दयापरवशं तनयो मघोनः ।
पादाग्रमेव धरणौ प्रणिधाय तस्था-
वुद्यम्य बाहुमुपरीव फलानि लिप्सुः ।।'

'निरुध्यवायुं निभृतं तपस्यतः
शिरःसमुत्था दशदिग्व्यवर्तिनी ।
नटत्स्फुलिङ्गा नवधूमसंततिः ~~स्फुटीचकारास्य घर्मभ्रियामिधाम्~~
स्फुटीचकारास्य घर्मभ्रियामिधाम् ।।' ४।५५-६७ ।।

एवमर्जुनस्य महर्षेर्व्यासात् प्रतिश्रुतिविद्याप्राप्तिः, तपसे हिमाचलप्रस्थानम्, हिमाचलवर्णनम्, तत्रार्जुनतपश्चर्या चाऽवर्ण्यन्त सम्यक् कविना ।

यत्र प्रस्थाने धर्मराजेनालिङ्ग्य विसर्जनेन तद्गतमर्जुनविषयकं वात्सल्यमभिव्यज्यते, धृत्यादिकोन्नेयभावध्वनिश्च तत्पोषकः । रूपकवृत्त्यनुप्रासयोश्चा

त्र चमत्कारिता ।

यदादम्पतीनामालिङ्गनाद्यनुभावेन हर्षादि संचारिणा च पोषितो रतिभावः शृङ्गाररसतां प्रतिपद्यमानोऽपि हिमालय वर्णनाऽङ्गभूतत्वेन गुणीभूतः सन् रसवदलंकाराभिख्यामाश्रयति । यदासुन्दरीणां सर्वेषु अङ्गेषु मञ्जुलेषुसत्स्वपि वक्षो मेव यदौरुपास्यतेतराम्, नेतरत्, इत्यत्र मञ्जुलत्वस्य सर्वोपासना हेतोः सत्यपि सर्वोपासनारूपकार्यानुत्पत्या विशेषोक्तिः , नलिनोपमावृत्यनुप्रासश्च चमत्कुर्वन्ति ।

हिमाचल वर्णने तस्य रत्नसम्पत्तिमत्वोक्त्या उदात्तालंकारः, व्याजापह्नुतिः, उत्प्रेक्षा, अनुप्रासश्च चमत्कुर्वन्तितराम् । तत्र शितिपोवनस्य दम्पत्योरेकतनुत्व कारणत्वस्य तपस्विमिथुनसेव्यत्वे कारणत्वावगत्या काव्यलिङ्गम् । तस्मिन् अर्जुनस्यतत्याऽनुरक्तिमाहात्म्य ज्ञान पूर्विका प्रतीयते । तत्र काव्यलिङ्गस्य वृत्यनुप्रासस्य च नितरामानुगुण्यम् ।

अर्जुनतपोवर्णने भगवद्विषयारतिस्तच्चिन्तनाद्यनुभावैः हर्षधृत्यादि संचारिभावैश्च पोषिता प्रतीयते । तत्र वृत्यनुप्रासः, उत्प्रेक्षाणां, धनञ्जय शब्दगतश्लेषमूलिका हेतूत्प्रेक्षा, सप्त- शब्दगतश्लेषमूलकौ विरोधाभासफलोत्प्रेक्षालंकारौ, फलपर्णादीनां क्रमेण हानक्रिया सम्बन्धात् पर्यायालंकारः, अङ्गागुणश्लेषमूलकः परिसंख्यालंकारः, अर्जुनशिरसः स्फुलिङ्गविशिष्ट धूमसंततिनिर्गमनस्य तदीय धनञ्जयाख्यास्फुटीकरणे हेतुत्वावगत्या काव्यलिङ्गम्, च मृशमानुगुण्यमादधति, चमत्कुर्वन्ति च सचेतोजनमनांसि ।

ततः परं तपस्यतोऽर्जुनस्य सन्निधौ भगवतोः पार्वती परमेश्वरयोरागमनम्, वर्णितं समीक्ष्यते, तद्वर्णनं यथा -

"तस्याथ नारदमुखात्तपसः प्रभावं
श्रुत्वा हरस्त्रिजगतामधिपो दयालुः ।
दिव्या दृशा सदसि सूचिततद्दिदृक्षो-
दित्सन्नभीष्टमपि लुब्धकतामयासीत् ।।"

"हेरम्बगण्डमदपङ्कविशेषकौ तौ

स्कन्दोपवाह्यशिखिपिच्छकृतावचूडौ ।
भूषाघुनीतटतरुच्छदकल्पवस्त्रौ
कोदण्डिनौ व्यरुचतां कुहनाकिरातौ ।।'

'शबरत्वजुषः वरस्य पुंसः शशिखण्डान्नु शकारसंविधानम् ।
भजति स्म तदा शिखण्डभावं भगवन्मस्तकभूषणं यदेषः ।।'

'तदानीमेव रजतगिरिशिखरान्निर्गच्छन्तौ, किमेतदिति सांशयिकैरपितदनुसरणोचितवेषरचनानुकूलैः प्रमथकुलैः परिवार्यमाणौ, समुच्चलितलाङ्गूलभ्रमितस्तबावद्भिर्दूरचारभ्रमविदारितवदनलम्बमानरसनाग्रनिपातिनीभिः सुणिकाकणिकाभिर्वनपद्धतिं शुद्धतरीकुर्वद्भिर्दृढतरश्वसितकम्पमानावयवैस्तेषु वनगुल्मेषु श्वापदानन्विष्यान्विष्य हुंकारमाचरद्भिर्विश्वनिगमविश्वकद्भुभिरविमुच्यमानपार्श्वभागौ, दीपकमृगायमाणनिजहरिणशावकपार्ष्णिभागानुधावनौ, भाविनि पदे पदे वनदेवताभिरर्घ्यमाणसुरतरुप्रसवास्तरणेन प्रशमिततुहिनजडिमोद्वेगेन हिमवतः कटकपथेन सविलासं संचरमाणौ, कावेतौ कदाचिदप्यदृष्टपूर्वौ वनमस्मदीयमाक्रमेते इति रोषकषायिततया निवारयितुकामैरपि तेजोविशेषेण प्रतिहतोत्साहैरन्यैः शबरयुवभिः केवलमवलोक्यमानौ, जटावल्लरीमूलपल्लवमुकुलीभवदञ्जलिभिस्तपस्विपुञ्जैर्नभसि विमानवेगं निरुध्य हर्षाश्रुभिर्मरुद्भिरर्च्यमानजयशब्दौ, तौ जगदादिमौ दम्पती सनियममुपासीनस्य शुनासीरसुतस्य तपोवनसीमानं शनैः शनैरासीदताम् ।।'

तत्र खलु,-

आपादलम्बजटमातपमात्रभक्ष्य-
मूर्ध्वीभवद्भुजमुदारतपःकृशाङ्गम् ।
दृष्ट्वाऽनुगृह्य कुरुवीरमुनीन्द्रमेनं
त्रेधा बभूव सुतवत्सलता भवान्याः ।। ४।६८-७१ ।।

एवं नारदमुखश्रुतार्जुनतपोमहिम्नोर्भगवतोः पार्वतीपरमेश्वरयोर्लुब्धकशबरवेषस्वीकरणम्, अर्जुनतपोवनसीम्नितयोः समागमनम्, वर्णितमतिवेदग्ध्येतात्र कविना ।

तत्राऽर्जुनायाभीष्टदित्सोरपि भगवतो लुब्धकत्वात् श्लेषमूलो विरोधाभासः ।

अर्जुनतपश्चर्ययाप्रसेदुषोऽपि भगवतो भक्तेन सह शबरवेषेण केलिचिकीर्षया तस्य भक्तेऽर्जुनेऽनुग्रहातिशयो ध्वन्यते । शबरवेषस्वीकारे भगवता गजानन गण्डमदपङ्केन विशेषकधारणम् स्कन्दवाहनशिखिपिच्छेन चूडाभूषणम् च भगवतो गजानन स्कन्दविषयक वात्सल्यं ध्वनयतः , वृद्धा हि कदाचित् प्रेम्णाऽपत्यत्य क्तं वस्त्वप्युपयुञ्जते ।

भगवतः शबरभावे कवेः कल्पनाशक्तेरद्भुतत्वमपि द्रष्टव्यम्- यत् वरः- पुमान्(शिवः) शबरो जातः , शशिखण्डश्च शिखण्डो जातः , अतः शशिखण्डस्य शिखण्डभावे तदीय आद्यवर्णः शकार एव वरस्यपुंस आदौ लग्नः, तेन सवरात् - शवरो जातः । अद्भुतैवेयं कल्पना तत्र- शशिखण्डशकारस्य वरेण सम्बन्धाभावेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः तद्घटितवाक्यार्थे शशिखण्डस्य शिखण्डभावाप्ति बोधक वाक्यार्थस्य हेतुत्वावगमात् काव्यलिङ्गम् , शशिखण्डस्य शिखण्डत्वप्राप्त्यभावेऽपि तद्वर्णनादपह्नवसम्बन्धातिशयोक्तिः । वर-शबर-शिखण्ड-शशिखण्ड-शब्दानां तद्वाच्यानां चाऽभेदाभावेऽप्यभेदवर्णनादभेदातिशयोक्तिश्चेत्युष्टयम् च चमत्कुर्वन्तितराम् ।

शबरवेषेऽपि भगवतो निगमपरम्परा सेव्यत्वेन तन्महिमा, वनदेवतानां कल्पतरुकुसुमैः मार्गस्तरणेन, तपस्विनां मरुतां च साञ्जलिबन्ध जय जय घोषणेनाश्रुणा च तद्गता भगवद्विषयारतिर्हर्षादि संचारिपोषितो व्यज्यते ।

तपश्चर्या कृशाङ्गमूर्ध्वबाहुं जटिनं चार्जुनं वीक्ष्य तपस्विन्नपिभगवत्या गजमुखशिखिवाहन समप्रेमप्रकाशने तदीयोत्कटतपश्चर्यायास्तद्विषयकभगवतीवात्सल्ये हेतुत्वागत्या काव्यलिङ्गम्, तेन चार्जुनस्याऽनन्यलभ्यस्य लोकोत्तरोत्कर्षस्य ध्वनना द् व्यतिरेकालंकारध्वनिः ।

ततः परं पार्थस्य तपोवने मायावराहस्य तमनुसरतः किरातरूपिणः- शिवस्याविर्भावः, तस्याऽर्जुनेन सह कृतकलहो वर्णितो विविच्यते, तद्वर्णनं यथा-

" कौदयन्नथ महीं खुरपातैः कोऽपि कोपकुटिलो वनकोलैः ।

घोरघूत्करणघोणमुपागात् कुक्षिमाश्रमभुवः कुरुसूनोः ।।

'तं वीक्ष्य रौद्रवपुषां मृगशावकेषु
त्रासाद्विशत्सु कटिलम्बितवल्कलागात् ।
पर्याकुले कलकलैरपि पक्षिजाले
पार्थो निवृत्य नियमाज्जगृहे शरासम् ।।'

'मुनिरेष यदाऽभ्ययाद्वराहं मुखरज्यालतिको जवाज्जिघांसुः ।
शबरो ददृशे तदाऽभिधावन्धनुराकृष्य सहानुयायिवर्गैः ।।'

'मा मुञ्च बाणं मदनुद्धृतेऽस्मिन्नपेहि जाल्मेति किरातनेतुः ।
वचः स लक्ष्यं मनसो न कुर्वन्वराहमस्त्रस्य चकार लक्ष्यम् ।।'

'शिलीमुखाभ्यां शिवसव्यसाचिनोः समुज्झिताभ्यां युगपल्लिटेस्तनौ ।
समं विभज्यायुरभुज्यत क्षणात्सहोदराभ्यामिव पैतृकं धनम् ।।'

'ततः कुपितोऽपि कुरुप्रवीरस्तपःशान्ततया नातिपरुषमेवमुवाच ।'

'अस्मिन्ममावसथमापतिते मया प्रा-
ग्लक्ष्मीकृते शबर । यत्प्रहृतं त्वया तत् ।
शापस्य वाथ धनुषोऽसि वशे तथापि
सोढं ममाद्य तपसा च भुजोष्मणा च ।।'

'इति तस्य मुनेरन्तर्दर्पसपरीवाहवेणीमिव वाणीमाकर्ण्य क्षौणीधरन्वापि सस्मितं प्रत्यभाणीत्,' ४। ७२-७७ ।।

वराहवर्णने स्वभावोक्तिश्च चमत्कारिणी । मृगशावकानां वल्कलप्रवेशेन पक्षिणां कलकलेन वराहविषयकस्तप्तशस्त्रासो व्यज्यते ।

अर्जुनस्य वराहवधविषयकः- मृगपक्षिकुलत्रासोद्दीपितः तदभियानशरचापसन्धानादिनाऽनुभावितो धृत्यमर्षादिसंचारिभिः पोषित उत्साहो वीररसतयाऽऽस्वाद्यते ।

ततोऽर्जुनेन सह शबररूपिणो भगवतः कृतकलहे अर्जुनस्य भर्त्सनावचनैरनुभावितो धृतिगर्वामर्षादि संचारिभिः पोषितः शबरचेष्टासोल्लुण्ठनवचनाद्युद्दीपित स्वाद्विजयविषयकः उत्साहो वीररसतया स्वाद्यमानः कल्पते सहृदय-

जनानन्दाय । तत्र शबरवचसोलक्ष्यत्वमपोह्य वराहस्य लक्ष्यत्वस्वीकारात् परिसंख्या, शबरस्या जुर्नशापधनुर्वशतायाश्च तुल्यबलत्वेन वर्णनात् विकल्पः (१) अर्जुनतपोभुजोष्मणोः सहनरूपैक क्रिया योगात् तुल्ययोगिता, अर्जुनवाण्यादर्परसवेणीत्वेनोत्प्रेक्षा च प्रकृतोपकारकत्वेन मृशं चमत्कुर्वन्ति ।

ततः कपटकिरातस्य अर्जुनेन सह वाक्कलहो युद्धं तच्छौर्य दर्शनेन प्रसादश्च वर्णितानि विविच्यन्ते, क तद्वर्णनं यथा -

"मृदुबुद्धिरहं । वचसैव लक्ष्यसे मृगहिंसनं विपिनसीमनीदृशम् ।
शतशः स्वधर्म इति पठ्यते बुधैः शबरस्य वा वद तपोधनस्य वा ।।"

"तत्स्वकुलाचारादप्रमाद्यते मह्यमयुक्तकारिणापि त्वया कियद्दूरं प्रकाश्यते तपसीव बाहावप्याहोपुरुषिका ।।"

"संदृश्यते खलु तपस्तव शुद्धमेत-
वज्जन्तुहिंसनविधौ दृढबद्धकक्ष्यम् ।
आस्तामिदं भुजबलं च मृगात्ययेऽस्मि-
न्साहायकं यदुपजीवति मे शरस्य ।।"

"ईदृशीं वचनरीतिमपास्यन्नेहि सान्त्वय कियानसि मे त्वम् ।
अद्विणा किंचिदरुणिम्नि जगत्यामन्तकोऽपि मदतीव बिभीयात् ।।"

"इति शंकरस्याहंकारवादेन सातङ्कः कुरुकुलशशाङ्कः पुनरपि कामपि किरमेव प्रकुरयामास ।"

"यस्माद्वनेचरकुलाधम । जल्पसि त्व
मेवं मनः पुलकयन् स्वजनस्य दृप्तः ।
तस्मादसंशयमुपान्तजुषः किरात्या-
स्ताटङ्कमेव सहसे न कपोलमित्रम् ।।"

"तादृग्वचः श्रवणादाहि मुनेर्निशम्य-
सर्वे गणा हृदि रुषा निजिघांसवोऽपि ।

---

१ विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ।। १०।८४।। साहित्यदर्पणे ।

देव्या विलोक्य वदनं स्मितगर्भगण्डं
तूणार्धकृष्टविशिखेन करेणतस्थुः ।।'

' अथ भिल्लमल्लकुरुवल्लवुभौ परिफुल्लकुलशल्यपल्लवैः ।
स्थगितावलोकसरणिं दिवौकसां समरं मयूकरजवं वितेनतुः ।।'

' श्लथसन्धिगरुद्विमरेष बाणैः श्रवणालम्बिजपादाशुत्रधर्षात् ।
प्रमथेशमवाकिरत्स दिव्यं प्रतिमालिङ्गमिव प्रसूनपुञ्जैः ।।'

' सरुषीव हरे विकृष्टचापे सशरं शैलसुतापि जातशङ्का ।
मघवत्सुतमङ्गलाय देवी मनसा यातहृषुः श्रुतिं जजाप ।।'

' ससंभ्रमाकृष्टधनुर्गुणोऽपि शंभुः कृपाम्भोनिधिरिन्द्रसूनौ ।
संबन्धमात्रान्कतिचिच्च देहे चक्रेऽपराद्धान्कतिचिच्च बाणान् ।।'

' विगाहय शंभुं विजयस्य बाणाः पुनः पदत्वं पुपुषुर्न दृष्ट्योः ।
नरादुदाराद्भिगम्य लुब्धं न मार्गणा यान्ति खलु प्रकाशम् ।।'

' निःस्वे निषङ्गयुगले नितराममर्षी
चापेन मूर्ध्नि गिरिशं पुर एव देव्याः ।
पार्ष्णिप्रमुक्तधरणिः प्रजहार वेगा-
त्कुर्वन्व्रणं स कुटिलं शशिखण्डमित्रम् ।।'

' धनुषाभिहतात्समुत्थितैर्धरकन्यारमणस्य मस्तकात् ।
विपुलैरिव रक्तशीकरैर्विनिपेते मणिभिः फणाभृताम् ।।'

' देवरय तस्य जगतां जनकस्य चित्ते
पार्थप्रहारजनुषः प्रमदाम्बुराशेः ।
भूषाधुनीतटभुवि द्विपवक्त्रबाल्य-
वप्रक्रियाभिरुदितः प्रमदः कणोऽभूत् ।।'

' स गाण्डीवदण्डोऽपि खाण्डवे तत्काकवधूवधसाधनतया चिरमयमस्मत्कुलविरोधीति क्रोधनैस्तस्य जटावनकुटुम्बिभिः कुण्डलिभिर्भंदित इव तत्क्षणं नालक्ष्यत ।

ततोऽयं दैवविपर्ययः किमुतामुष्य माया किमिति चिन्तापरतन्त्रेणापि-

धैर्यदत्तहस्तोत्साहेन ' तिष्ठ तिष्ठ जडात्मन् ! एवमर्जुनं निर्जित्य यशोऽर्जितुमिच्छसि ?' इति कृततर्जनेन सितवाहनेन वृषवाहनं प्रति नियोद्धुमारेभे ।'

' परुषे मुनिमुष्टिताडने पतिते लुब्धकवामवक्षसि ।
शिथिला जगलुः किरातिकायाः सितगुञ्जामणिहारयष्टयः ।।'

' उपवासकृशे भृशं मुनेरुरसि स्वीकृतमुष्टिमार्दवः ।
प्रजहार हरोऽपि पीडनात्परिहर्तुं किल कार्त्तवीर्यहृत् स्वमिवास्य हृदुगतम् ।।'

' इति परस्परमुष्टिप्रहारवृष्टिपरिमुष्टवनकुसुमपरागभस्माङ्गरागौ सरभसमेकेन बाहुना जटासु गृहीत्वा परेण बाहुना वलयितगलनालौ तौ शबरतपोधनौ यदामहत्यामधित्यकायामपाततां तदा फटिति घटितझारदरीगर्भनिरुद्धसिद्धमिथुननिबद्धहाहाकारस्तीव्रखनदूरोत्सर्पिवी विवेगोत्पाटितोत्कृष्टमुनिजनपर्णशालासहस्रसुरस्त्रवन्तीपूरो दर्वीकरविमुक्तवराहवीकरणपटुभारो यमुर्वीधरपतिरासीत् ।।'

' अवाङ्मुखत्वेन निपात्य शंभुना सुमुज्झितोऽयं ददृशे विमोहितः ।
तवाद्य जामातरि मे दशामिमां निवेदयेत्यद्रिमिव ब्रुवन्रहः ।।'

' पार्थस्य तस्य भुजयोः परमेश्वरोऽसौ
वीर्यं विलोक्य युधि विस्मयमानचेताः ।
चापव्रणे सुरनदीकणसेकशङ्का-
मप्युत्सृजन् मुहुरकम्पयदुत्तमाङ्गम् ।।' ४।७८-९४ ।।

ततोऽर्जुनस्य भर्त्सनावचनोद्दीपितः सोत्प्रासपेदास्मितवक्त्रवचनाऽनुभावितो धृतिगर्वादिसंचारिपोषितोऽर्जुनविषयकः शबरगत उत्साहो वीररसतयाऽऽस्वाद्यते । तत्राक्षेपोपमारूपकचमत्कारः श्लाघ्यः ।

पुनरर्जुनस्य शबरं प्रतिभर्त्सनावचने पूर्ववत् शबरविषयकोऽर्जुनगत उत्साहो वीररसतां प्रतिपद्यते । तत्र च मर्तुमिच्छसीति वस्तुनः ' असंशयमुपान्तजुषः किरात्याः कपोलमित्रं ताटङ्कमेव न सहसे' इति प्रकारान्तरेण कथनात् पर्यायोक्तं - चमत्कारि ।

अर्जुनस्य तादृग्वचनविभावितस्य तूणीराद्विशिखाकर्षणेनाऽनुभावितस्यौग्र्यस्य देवी स्मितहेतुक तूणाकृष्ट क्ति विशिखविशिष्टकरावस्थित्या व्यङ्ग्या

~~व्यक्तिः~~ शान्तिः प्रमथकुल-गता चमत्करोतितराम् ।

अथ कृतकयुद्धे अर्जुनस्य तु शबरविषयकस्तच्चेष्टोद्दीपितेन जर्जन बाण-वर्षण- धनुर्दण्ड-प्रहारमुष्टिताडन- बाहुयोधनाद्यनुभावितो धृतिगर्वामर्षादि संचारिभाव पोषित उत्साहो वीररसतया परिणम्यास्वाद्यते । हन्त सरुषीव-जाते जातशङ्काया देव्या ' यातङ्कषुः ' श्रुतिजपेन अर्जुनविषयकं वात्सल्यं व्यज्यते, तत्रोपमोत्प्रेक्षायाश्चमत्कारिता तु अस्त्येव, सहैव दर्शनस्य दृष्टिपदतापोषणरूपक प्रकारान्तरेण वर्णनात् पर्यायोक्तम्, शर्वं प्रति त्यक्तानां शरणां लोप समर्थने-नर-लुब्ध-मार्गण- शब्दगतश्लेष मूलकोऽर्थान्तरन्यासश्चातीव चमत्कुरुतः ।

शबररूपिणो भगवतस्तु भक्तेनाऽर्जुनेन सह केलिकुतूहलितैव, येनाऽर्जुन-बाणवर्षणानन्तरं भगवान् सरोषो न जातः , अपि तु सरोष इव जातः , येन भक्त विषयकाऽनुरागगोपनेन अवहित्थाख्यभावो ध्वन्यते । एवमर्जुन-शरचापलोपनस्यापि उद्देश्यं तस्याशक्तताविधानेन विजयलाभो नास्ति , अपि तु एतदनन्तरं किमयं करोतीति जिज्ञासाकौतुकमेव । तेन धनुषा शिरसि प्रहारे-भगवान् अर्जुने प्रसन्न एव जातो मनसि। प्रसादोऽसौ भगवतः शिरोगतसुरसरितटे गजानन षप्रक्रियाभिरुदितं प्रसादमपि व्यनक्ति । अत्र गजानन विषयक प्रसादादपि अर्जुन विषयकप्रसादाधिक्यस्य प्रकारान्तरेणकथनात्मकात् पर्यायोक्तालंकारात् व्यतिरेकालंकारध्वनिरपि सुतरां चमत्कुरुते । अर्जुने भगवति रस सरुषीव जाते भगवत्यास्तन्मृगलाय रोषशान्तिकामनया ' यात इषुः ' इत्यादि श्रुतिजापेन तस्याऽर्जुनविषयकं वात्सल्यं शङ्काभाव पोषितं ध्वन्यते । एवमर्जुनेन सह तत्पातनमूर्छापर्यन्तेन बाहुयुद्धेनाऽपि भगवतस्तद्विषयकं गाढवात्सल्यमेव तस्य कृतकलहेन तदीय हर्षोत्सुक्यादि परिपोषितं ध्वन्यते ।

ततश्चिरात् प्राप्त चैतन्योऽर्जुनः स्वरूपेणाग्रे सर्वत्रा प्यत्र यथायुक्तमुपन्यस्ताः शब्दालंकारा पि चमत्कारिण एव तिष्ठन्तं भगवन्तं विलोक्य प्रमुदितः प्रणम्य क्षमां याचितवान् प्रसन्नाच्च तस्मात् पाशुपतास्त्रं प्राप्येत्यादि वर्णितं कविना समीक्ष्यते । तद्वर्णनं यथा -

' तथाविध एवाऽसौ चिरादाचरित चेतनास्वागताचारः शनैरुत्थाय पुर

महोत्सो

तो घण्टाघणाघणात्कार सहचरेण कण्ठगर्जितेन कर्णयोः कल्पितसुधारसमोदो-
दिवासं, भुजमूल प्रसारितगिरिजापाणियुगलनखराङ्कुरधोरणी द्विगुणीकृतहा
रमणिरमणीय वक्षसम् , पारिषदगणा-जलिकमलवनमध्यराज हंसायमानम्, -
मार्दवमरितशार्दूलचर्मनिर्मितपल्ययनपर्यङ्को परिभागतिर्यगर्पित चरणपल्लवसंवाहन-
परेण शिलादकुमारेण च दर्पदुर्ललन निवर्तनाय मुखबन्धकर्कश कनक
शृङ्खलेन निरुध्य मुहुर्मुहुः करपुटास्फालितककुदशृङ्गेण भृङ्गिणा च लक्ष्यमाणो
भयपक्षभागम्, गाण्डीवदण्डताडन परिपीडितचूडाशशिनमाश्वासयितुमवतरद्भिरु
डुनिकरैरिवसुरतरुकुसुम वर्षैरवकीर्यमाणम्, जटास्मकुशचीरधारिभिस्तैरेव चतुर्भि
राम्नायपुरुषैः परिपठ्यमानशतरुद्रीयविरुदप्रबन्धम्, अम्बरे सविधमवलम्बमानै
स्तुम्बुरुप्रभृतिभिः सुरवैणिकैरुपवीण्यमानभक्तजनरक्षणापदानप्रकरणम्, कर्ण
पूरीकृततमालमञ्जरीमधुमिषेण कटाक्षात्साक्षात्कृपामिव वर्षन्तम्, प्रज्वलद्भिः
परिष्कारपन्नगफणारत्नैर्नूत्नैः शरन्नैरिवाऽनुरज्यमानावयवर्म्, अवतंसशशिकला
परिगलित्किरणधारापातशीतासहिष्णुतयेव दन्तपटगर्भवर्तिनास्मितेन सूचितहृदय
प्रसादम्, ममव भगवन्तं महादेवमुद्वीक्ष्य पक्ष्मतरुहविटपिसमुत्पाटनपटुभिः प्रमोदा
श्रुपूरैर्नदीमातृकायमाणपुलकाङ्कुरः सविनयमुपसृत्य पादारविन्दयोः सहस्रकृत्वः-
प्राणंसीत् ।।`

`स्वामिन् ! मया जडधिया त्वयि देवदेवे वाचा शरेण धनुषा दृढमुष्टिनाच।
यत्ते चतुर्विधमकारि रणे तदागः क्षान्तव्यमद्य भवता करुणार्णवेन ।।`

`इति विज्ञापयन्तमेनं पारिजातपल्लवतल्लजप्रतिमल्लस्य पाणितलस्य परा
मर्शेन प्रमुषितव्रणवेदनाङ्गं प्लवङ्गकेतनमनङ्गशासनोऽप्येवमवादीत् -

`यथा तृतीयेन युधि प्रवीर ! तवापराधेन भवामि तुष्टः ।
तथा न भक्त्या तपसां विभूत्या क्रतुप्रसूनार्चनया च लभ्या ।।`

`इति सुधामाधुरीधुरीणं वचनमभिधाय-,
तत्क्षणाद्धनुरिषूनपि तांस्तान्संनिधाप्य विभुरस्त्रमपि स्वम् ।
पाण्डवाय धनुराहतिरीतेः पारितोषिकमिव प्रदिदेश ।।`

`तस्याथ पाशुपतलाभदुरापदीप्ते-

रक्षणोः समक्षामपरिष्वङ्गपक्षैः ।
आश्चर्यवृष्टिरखिलैरनुगामिभिः स्वै-
रन्तर्दधे स भगवानमृतांशुमौलिः ।। ४।६४-६८ ।।

एवमर्जुनस्य सचेतनत्वम्, भगवद्दर्शनम्, प्रणामा अपराधक्षामापनम्, भगवतः प्रसादः, अर्जुनायपाशुपतास्त्रदानम्, अन्तर्धानं च साधु वर्णितं कविना ।

तत्र भगवत आविर्भूयस्वदर्शनप्रदानस्मितादिनाऽनुभावितं हर्षादि-संचारिभावपोषितमर्जुनविषयकं वात्सल्यं ध्वन्यते । तत्र पारिषदगण-निगमपुरुष-तुम्बुरु प्रभृतिगतस्तन्मनस्तवनादि चेष्टानुभावितो हर्षौत्सुक्यादि संचारिभावपोषितो भगवद्विषयकभक्तिभावो ध्वन्यमानो गुणीभवतीति प्रेयोलंकारः इतरेऽपकोत्प्रेक्षापह्नुत्यलंकाराश्चैकवृत्त्यनुप्रासाश्च चमत्कुर्वन्तितराम् ।

अर्जुनस्य स्वापराधक्षामापनाय कृतेनभगवत्स्तवेन तद्गतो भगवद्विषको-गाढानुरागस्तत्प्रसादोद्दीपितो हर्षावेगादि संचारिभावैः पोषितो भक्तिरसतया स्वाद्यते । तत्र समुच्चयस्य रूपकस्याऽनुप्रासस्य च मधुराक्षर घटितस्य प्रसाद-माधुर्ययोश्च नितरामानुगुण्यम् ।

भगवतोऽर्जुनस्य परामर्शेन प्रशंसया च तस्मै स्वास्त्रस्य धनुषाणानां च प्रदानेनाऽनुभावितं तद्विषयकं गाढं वात्सल्यं हर्षधृति-संचारिभावैः पोषितं नितरां चमत्कृतिमादधाति । तत्रोपमासमुच्चयोत्प्रेक्षाः चमत्कारिण्य एव । भगवतोऽर्जुनाश्वासनवचने प्रसादमाधुर्ययोरभिव्यञ्जिका शिरसि घनुराघातस्य वीरपरितोषिक प्रदान वर्णने वीरानुकूलौजोभिव्यञ्जिका रचना तदनुसारी चाऽनुप्रासश्चापि चमत्कुर्वन्ति स्म ।

अत्र भगवतोऽर्जुन प्रसादेन स्वपाणिना तदङ्गपरामर्शनेन तस्मै स्वास्त्रदानेन च प्रबन्धगतेन वस्तुना अर्जुनस्य लोकोत्तरोत्कर्ष प्रतीत्या प्रबन्धगतो व्यतिरेकालंकारो ध्वन्यते, तेन अर्जुनोऽर्जुन इव इत्यनन्वयः (१) तेनाऽर्जुनसमोऽपि परो नास्तीति असमश्च(२) ध्वन्यते । तेन चार्जुनगतस्य वीरत्वोत्कर्षस्य परमः परि

---

१ उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ।। १०।२६। साहित्यदर्पणे ।

२ सर्वथैवोपमान निषेधोऽसमालंकारः ।। द्वि०आ०। रसगंगाधरे ।

पोषः प्रतीति पथमारोहति ।

(२७) अर्जुनस्याऽमरावतीवासः

इतः परमर्जुनस्य मातलिद्वारा पाकशासनानुशासनमादाय स्वर्गमनादि कं किं कविना वर्णितं समीक्ष्यते । तद्वर्णनं यथा -

" अथ सविधतपोधनैः कृताशीरमरपतेर्धृतशासनः स पार्थः ।
व्यजितपवनं समातलिः सन्नथमधिरुह्य मुदा दिवं प्रतस्थे ।।"

" नाकमेत्य धनुरङ्कितदोष्णा नायको दिविषदामतिहृष्टः ।
नाम फाल्गुन इति ब्रुवता स्वं नन्दनेन जगृहे पदयुग्मे ।।"

" पाणिना परिमृशन्मुनिमुख्यः पद्मलीकृतजयन्तमहेर्ष्यः ।
आदरेण घुरि नाकिगणानामासनार्धमधिरोपयति स्म ।।"

" सदसि वसति तस्मिन्सार्वभौमे कृतज्ञां
कपटशबरबाणैः कल्पिताद्रिव्रणोऽपि ।
निखिलसुरवधूनां नेत्रसूधाः समेता
निशितकुलिशकल्पा निर्दयं सन्निपेतुः ।।"

" आस्थानसीम्नि तनयाङ्गिरसेन युद्ध-
माकर्ण्य हर्षविकसन्मनसो मघोनः ।
अङ्गे खिले प्रसरतां पुलकाङ्कुराणा-
मङ्गानां सहस्रतयमेव बभूव विघ्नः ।।"

" आज्ञया पितुरमर्त्यसमाजादग्रतः स्वचितमङ्गलवाद्यम् ।
वारणेन्द्रमधिरोप्य जयन्तो वैजयन्तमनयद्विजयं तम् ।।"

" आनतस्य पदयोरथ जिष्णोराशिषोऽनुपदमिन्द्रपुरंध्रीः ।
पारिजातकुसुमस्य परागैः फालसीमनि ललाम चकार ।।"

"पुनः पुनस्तत्र पुलोमपुत्र्या जघन्तशक्रां दधतः स्वकान्त्या ।
नरस्य मौर्वीकिण एव दोष्णोनांमग्रहेषु स्खलनं न्यरौत्सीत् ।।"

"पितुरिवास्खलितां दिवि गायकात्पिककुलादुतकण्ठरवोदयः ।
परिहृतामृतदिव्यजनावृतः परिशिशील स गीतकलामपि ।।"

"तमुर्वशी तत्र कदाचिदैत्य स्वयं रहः कर्मणि भग्नकामा ।
अये पृथापत्य ! तवाभिधेव क्लीबत्वमेतीति शशाप कोपात् ।।"

"तद्बुद्ध्वा हरिरूचे तं शापोऽयं वत्स ! ते मुदे ।
चित्रसेनोचितविधायाः सहकृत्वा भवेदिति ।।"

"अथ कदाचिदस्त्रशिक्षासमाप्तौ गुरुसमर्पां गुरुदक्षिणात्वेन विषमकुलपतां निवातकवचानां सहस्रादशेषा स्वमरतरुकादादिदिव्य शिरसि निहितपत्तिकरीटोबलदाश्वोऽयं मातलिपरिकल्पितरथ्येन नन्दनवनमन्दपवनसंदीयमानकेतनस्पन्दनेन स्यन्दनेन निर्गत्य विलूलितहरिवित्पथः पाथोनिधौ रसातलकुलकोलाखनीवीकृत-वीचीरवंसातलकुहरमुखं निरुध्य रणप्रस्तावं वितरते ।।"

"तावदनाकर्णितपूर्वगाण्डीवविस्फारश्रवणादसंपूर्विकया युगपदभिपेतुषो दिविषदवध्यभावादध्यातमरणास्त्रिप्रं शतप्रविशाणितविवरादुरुसः कृतप्राणैः प्राणैस्त्रिकोटिशो निवातकवचानपि प्रवातकदमानेव विरचय्य नभसि प्रमादपतितेन पर्वसूपरिक्षेपेणेव स्फटिकप्राकारेण परिगुप्तिमतो हिरण्यपुराद्विदितवृत्तान्तुजनवृत्तान्ततया रोषादभिगम्य कलहायमानान्कालकेयानपि कालोहातिथीन्या शुषेण मन्त्रपूतं निमन्त्र्यन्त्रिक्षे ।।"

"अवायुनेयाः शरदभ्रपंक्तीरविधमानास्तमयाश्च ताराः ।
दैतेयसंहारभवाः स जिष्णुर्दिवि प्रतिष्ठापयति स्म कीर्तीः ।।"

"हतरिपुं विनिवृत्तमवेक्ष्य तं हरिरुवाच गुरुः सह तुष्टवत् ।
नयनवारिभिरुन्मनसाप्लुतं न ददृशे तिलमात्रमपि व्यक्तम् ।।"

"पुरि वज्रिणः पुरुतुतिप्रसरत्पुलकाधमग्नभुजवापकिणः ।
मनसैव पञ्च शरदोऽप्सरसां वसति स्म पञ्चशरदो विजयः ।।"५।१-१४।।

एवं विजयरथमातलिनासहरथमारुह्य नाकगमनम्, तत्रेन्द्रवन्दनम्, तत्रैव

णा शच्या च विजयाभिनन्दनम्, इन्द्रात् अस्त्रकलायाः चित्रसेनगन्धर्वाच्च गीतकलायास्तेन ग्रहणम्, उर्वश्यास्तच्छापः, तस्य इन्द्राज्ञया निवातकवचकालकेयपिशाचादीनां कुलहननम्, तेन इन्द्रादिसुरप्रतोषः, पञ्चवत्सरान्ते तस्याऽमरावत्यां वासश्च वर्णितानि कविना ऽति कौशलेन ।

तत्राऽर्जुनस्य हिमाचलात् प्रस्थानसमये तपोधनाशीर्भिस्तेषां तद्विषयकं वात्सल्यं व्यज्यते ।

नाकागमनविषयकेन्द्रशासनाङ्गीकारेण तद्विषयकोऽर्जुनस्य भक्तिभावः प्रतीयते, अग्रे इन्द्राभिनन्दनेन च प्रतीयमानविनयहर्षादि संचारिभिश्चाऽसौ परिपोष्यते ।

इन्द्रस्य पाणिनाऽर्जुनपरामर्शेन स्वासनार्धोपवेशनेन गिरिशतथुद्धरणा पुलकितत्वेन, सर्वपुलवाच स्वनंवारणेन्द्राधिरोपणेन जयन्तसहचरीकृतस्य तस्य वैजयन्तप्रासादप्रस्थापनेन चानुभावितं हर्षादि संचारिभावपोषितमिन्द्रस्यार्जुनविषयकं वात्सल्यमास्वाद्यमानं नितरां चमत्काराय कल्पते।तत्र अर्जुन इन्द्रादरेण ईर्ष्यया जयन्तस्य ईर्ष्याभावो ध्वन्यते । पुरन्दरस्यार्जुन दर्शनेन हर्षोत्सुक्यनापल्यभावाऽनुरागश्च व्यज्यते, तत्र आर्द्रव्रणोकुलिशकल्प वस्तुपतनस्याननुरूपत्वात् विषमालंकारः , तस्मिन् कुलिशोपमाया उपस्कारकता । इन्द्रपुलकाङ्कुराणां विकासेऽपि प्रसारामावात् विशेषोक्तिः वाक्यार्थोपस्कारिका ।

वैजयन्तेऽर्जुनस्य शच्यभिनन्दनेन तद्विषयको भक्तिभावो हर्षविनयादि पोषितः प्रतीयते । शच्याश्च तदभिनन्दनेन तद्विषयकोहर्षमानादि संचारिपोषितो वात्सल्यरस आस्वाद्यमानश्चमत्कारोतितराम् ।

अर्जुने शच्या जयन्तश्रुत्या सन्देहालंकारः । अर्जुनस्य गानकलाशिक्षणे स्वरेण कोकिलकण्ठस्वरजय वर्णनात् व्यतिरेकालंकारः। उपमा ,मधुरवर्णरचितो माधुर्यव्यञ्जको वृत्यनुप्रासः , तादृश एव छेकानुप्रासो यमकालंकारश्चाऽत्र भृतरामानुगुण्यं विदधानाः कल्पन्ते चमत्कारातिशयाय ।

अर्जुनविषये रुद्रः कर्मभग्नकामायाः उर्वश्याः शापेनाऽनुभावितो अमर्षभावो ध्वन्यते । तेन चाऽर्जुनस्य कोऽपि चरित्रोत्कर्षः प्रतीयते ।

अस्त्रविद्या प्रदानेन स्वकिरीटपरिधापनेन च इन्द्रस्य अर्जुनविषयकं वात्सल्यमेव प्रतीयते तदीय हर्षादिपोषितम् ।

अर्जुनस्य निवातकवचकालकेयादि रक्षाकुल हननविषयक उत्साहस्तदीया भियानशरवर्षणं पाशुपतास्त्रमोचनादिभिरनुभावितो धृतिगर्वादि पोषितो वीररसतयाऽऽस्वाद्यमानश्चमत्कारोतितराम् नितराम् । तत्र रूपकानुप्रासयमकानामानुगुण्यम्, तत्र निवातकवचत्वप्रवातकवचत्वयोर्विरुद्धयोःसामानाधिकरण्येन वर्णनात् विरोधाभासः, कालकेयानां हननस्य कालेहातिथीकरणरूपप्रकारान्तरेणकथनात् पर्यायोक्तम् च वाक्यार्थोपस्कारके । अर्जुनकीर्तीनां शरदभ्रपंक्ति-तारापरम्परारूपेण वर्णनात् मालारूपकम् तदुपस्कारकम् । पञ्चशरदभ्र रूपपञ्चाकारयमकमपि रोचकम् ।

रक्षाकुल हनन प्रतुष्टेनेन्द्रेण सुरपुरि पञ्चवर्षपर्यन्तं निवासनात्। सुरैश्च स्तुतितत्सम्माननात्, अर्जुनस्य कोऽपि लोकोत्तर उत्कर्षः प्रतीयते । सुरस्तुतिविभावितः पुलकाङ्कुरानुभावितोऽर्जुनगतो हर्षोद्रिक्त कोऽस्मात्च तस्य प्रमोदपूरपरिवाहप्लावितता ध्वन्यते । तेन च अर्जुनः सर्वेभ्योऽपि महावीरेभ्योऽपि परमभागधेयोत्कर्षवानिति व्यतिरेको व्यज्यते । ततश्चाऽर्जुनसदृशः अर्जुन एवेत्यनन्वयो ध्वन्यते, ततश्च अर्जुनसमः कोऽपि वीरो नाऽस्तीत्यसमालंकारश्च, ध्वन्यमानानां चैषामेक प्रबन्धगतवस्तुव्यङ्ग्यत्वेन एक विषयानुप्रवेशसंकरः ।

महर्षेर्व्यासात् प्रतिश्रुतिविधांप्राप्य तपसे हिमाचलं गतस्याऽर्जुनस्य भगवतो महेश्वरात्पाशुपतास्त्र प्राप्तिं सुरेन्द्रानुरोधात् अमरपुरगमनादिकं युधिष्ठिरो महर्षेर्लोमशादाकर्ण्य प्रमुमुदे, विविधानि तीर्थान्यटन् बदरिकावनं ययौ, एतदादिकं वर्णितं यथा -

"तस्य वृत्तिमधिगम्य लोमशाद्धर्मजोऽपि मुदितः सहानुजैः ।
प्राप्ततीर्थमुनिसेवनः क्रमात्पावनं बदरिकावनं ययौ ।।"

"तत्र ब्रह्मपरायणैर्मुनिगणैः संसेव्यमानान्तिकौ
सङ्घर्षौ यमिनौ निरीक्ष्य स नरं नारायणं चाख्यया ।
अर्जुनानिशमान्तरेण महतीमेकां दामां संस्पृशन्

बाह्यैरष्टभिरङ्गकैरपि परां पस्पर्श पार्थः कामाम् ।।'

'अत्र विलोकनैर्विश्रमशालिभिस्तयोर्भवाध्वगानामवधूनितक्लमः ।
निवासमालम्ब्य तपोवने तदा विवासदुःखाद्विरराम पार्थिवः ।।५।१५-१७।

अत्र युधिष्ठिरस्य तीर्थमुनिगणसेवनेन नरनारायणदर्शन प्रणमनादिभिश्चानुभावितस्तद्विषयको रतिभावो हर्षादिभिः संचारिभावैश्च पोषितोभवितरसतयाऽस्वाद्यते । तत्र उभयविधकाम्योरेकेन स्पर्शेन योगात् तुल्ययोगिता, रत्यनुसारि-माधुर्यगुणानुगुणमधुरवर्णघटितयमकानुप्रासाश्च बाढं चमत्कुर्वन्तीतस्माम् ।

(२१) भीमस्य हनुमद्दर्शनम्

अथ द्रौपदी-प्रार्थनया कल्हारमुकुलानयनाय भीमस्य प्रस्थानम्, मार्गे हनुमद्दर्शनम्, तयोरालापः भीमाय हनुमति विशालस्वरूपप्रदर्शनम्, भीमस्य हनुमत्स्तुतिः, हनुमतो भीमे प्रसन्नता, चेत्यादि कविना वर्णितं विविच्यते सम्प्रति प्राक् तद्वर्णनं यथा -

'एकदा तत्र स्नुषावत्सलतयेव मारुतेन पुरतो नीतमटवीपर्यटनखेदसंपदामसासहिमन्यङ्करणकलिकुलचेतसामासेचनकमकृणां कमपि कह्लारमुकुलमादाय 'क्वलभ्येत पुनरेतादृशम् ?' इति कौतुकहर्षाभ्यां सूचिततर्षया पार्षत्या रहसि याचितः पार्षदश्रेष्ठः क्षणं विचिन्त्य तद्विचिकीर्षयादिशमुदीचीं प्रतस्थे ।।'

'क्षिप्रं विलङ्घ्य गिरिशैवलिनीवनानि
गच्छन्नसौ पथि ददर्श कपिं महान्तम् ।
दूरम्यामवन्तमरिपक्षनदाहकाले
निद्रां भयादुपगतामिव कुम्भकर्णात् ।।'

'कपिकुञ्जरं सुकृतपुञ्जमञ्जनापवमानयोरवलमानमध्वनि ।

'विषयं दृशोरथपुरो वृकोदरः स चकार साधु विहितादिमीलनम् ।।'

'अथ रसौ गभीरमभाषिष्ट च,-

'कस्त्वं निरुध्य पदवीमविनीतबुद्धे !
निद्रास्यपेहि न सहे गमने विलम्बम् ।
क्रोधो भुजामिव ममाद्य हिडिम्बहन्तु-
रुद्यद्गदां तव तनूमपि मूढ ! कुर्यात् ।।'

'क्रौर्यस्पृशा तदनु कौरवसार्वभौम-
वाचातया सपदि मारुतनन्दनस्य ।
दृग्द्वारपक्ष्मपुटयुग्मकवाटकूट-
निद्रार्गलाहरणकुञ्चिकया बभूवे ।।'

'इत्थं गिरा किंचिदुदीर्य तस्य लाङ्गूलमात्रे तरलः कपीन्द्रः ।
कोपारुणाक्षं कुरुसिंहमेनं स्वापारुणाक्षः स्वयमेवमूचे ।।'

'भद्र ! स्वस्त्यस्तु तुभ्यं चिरमिह जगया निद्रयाप्यातुरोऽहं
प्रत्युत्थानादिकर्मण्यपटुरवयवैरस्मि तस्मात्त्वमेव ।
जात्यावस्थानरीत्यापि च विपिनपथे प्राप्ततिर्यक्त्वमेनं
बालाग्रे मां विकृष्य द्रुतमभिलषितप्राप्तये साधयेति ।।'

'इत्युक्त्वा सज्जा परिघं निधाय वल्कं दृढं च परिधाय भुजार्गलाभ्याम् ।
तं क्रष्टुमेव न शशाक स तु प्लवङ्गो बालस्थया घनतयास्य मनश्चकर्ष ।।'

'तदनु विस्मयव्रीडापारदृश्वना मातरिश्वसूनुना 'त्वं वासवलोकवासिषु कोऽसि ? इति पृष्टः कपिर्कुञ्जरः स्वमभिज्ञानायां प्रभञ्जनेन संजातं जानकीजानेर्हृदयरञ्जकं लेखवाहकं व्याजहार ।।'

'सबहुमानं तस्य वचनमाकर्ण्य,-

'प्रीतेन तेन पुनरप्यधिपः कपीनामूचे तथा यदि भवानघुनार्थयेऽस्मम् ।
कर्तुं तनुं नयनयोः पथि तावकीनां तत्तादृशीमुदधिपल्वलतासवित्रीम् ।।'

'इत्युक्तोऽयं प्रवृद्धोऽङ्गैर्हेलया रुरुचे निजैः ।
वैमात्रेयस्य तस्येव मार्गं स बुबुदामपि ।।'

त्रस्तस्य तद्भपुरुदीक्ष्य सजातिशङ्किमैनाकसंशयकुठारितपक्षलोपम् ।
मोहे यथा नयनयोर्मुकुलीबभूव बोधे तथैव करयोरपि युग्मस्य ।।'

' प्रमोदात्परिपुष्यद्भिः प्रतिक्षणमथोद्गतैः ।
भीमेनाप्युदपादीव भ्रातृवृद्धिविडम्बना ।।'

' सविनयमेवं व्यजिज्ञपच्च,-

' प्रार्थ्यमानपददर्शनं चिरात्पश्यतः पथि भवन्तमग्रजम् ।
विस्मयाम्बुनिधिरेष मेऽधुना वीरवर्य ! भवतापि दुस्तरः ।।'

' राघवस्य सहजादपि त्वयि प्रेमवृत्तिरधिकेति मे मतिः ।
यामिनीचरवधोत्सवे यतो लक्ष्मणादधिकमंशमग्रहीः ।।'

' आर्य ! क्षमस्व मम वागपराधमुग्र-
मित्यानतं चरणयोश्चिबुके गृहीत्वा ।
जिघ्रन्शिरस्यवरजं मुमुचे हनूमान्
भीमोऽप्यमुष्य विरहासहनोऽश्रुबिन्दून् ।। ५।१७-३१।।

एवं द्रौपदी प्रार्थितकल्हारमुकुलानयनाय भीमस्य उदीचीं दिशं प्रतिप्रस्थानम्, मार्गे तस्य हनूमन्मेलनम्, तयोः परस्परालापः, हनूमतो विशालरूपप्रदर्शनम्, भीमस्य हनूमत्स्तुतिः, हनूमतो भीमं प्रति स्वप्रेमप्रदर्शनम्, इत्यादिकं वर्णितं कविनाऽतिकौशलेन ।

तत्र द्रौपद्या भीमं प्रति कल्हारमुकुलयाचनया भीमस्य च तदानयन संरम्भेण अन्योन्य विषयकोऽन्योन्यगतोऽनुरागो हर्षौत्सुक्यादि संचारिभिः तर्क धृत्यादिभिश्चोभयगतैः परिपुष्यन् शृंगाररसतया परिणमति । तत्र कल्हारमुकुलस्याऽनेकैः प्रकारैरुल्लेखात् उक्तेः उल्लेखालंकारः ।

ततो गिरिनदीवनानां लंघनेन भीमगत उत्साहः कल्हारमुकुलानयनविषयकः धृत्यादिभिः पोषितो वीररसतया प्रतीयते । तत्र मार्गेस्थितं निद्रायमाणं महान्तं कपिं स्वकार्यविघ्नतयाऽवगच्छन् तद्भर्त्सनावचनैर्भीमगतस्यौग्र्यभावस्य ध्वनिः प्रतीतिपथमवतरति । तत्र रूपकम् उद्यद्गदश्लेषमूलोपमोत्प्रेक्षा च चमत्कारिणी।

तादृक्क्रूरवचनैरप्युद्विजमानस्य कपीन्द्रस्य भीमं प्रति स्वस्तिवादेन स्व

स्य जरानिद्रातुरत्वेनोत्थानापटुत्वात् बालाग्रेकर्षणाय पश्चात् स्वेष्टसाधनार्थक गमनाय च भीमं प्रति कथनेनानुभावितो भीमविषयकोऽनुरागो धृति चिन्तादि संचारिपोषितो वात्सल्यरसतया परिणमति ।

ततः प्रयत्ने कृतेऽपि कपीन्द्र बालाग्रस्य भीमेनाऽऽकृष्टुमशक्यत्वात् भीम गतो कपीन्द्र विषयको विस्मयो जाड्यलज्जादि संचारिभावपोषितोऽद्भुतरसतया परिणमति । तत्र कपि बालाग्रकर्षणे प्रवृत्तस्य भीमस्य प्रयास वैफल्यात् तन्मनसः कपिना कर्षणाच्च विषादनालंकारः, भीमस्य विस्मितत्व व्रीडितत्वयोः विस्मयव्रीडापारुश्व रूपप्रकारान्तरेण वर्णनात् पर्यायोक्तम्, जरानिद्रयोरेकेन आतुरत्वेन योगात् जात्यवस्थानरीत्योश्चैकेन तिर्यक्त्वेन योगात् तुल्ययोगिता, तत्र तिर्यक् शब्दगतश्लेषमूलाऽभेदातिशयोक्तेरप्युता । निद्रावाचोर्गलाकुञ्चिकारोपात् परम्परितरूपकम् च रुचिरतराणि प्रकृतार्थोपस्कारकाणि च ।

कपीन्द्रस्य जानकीजानिहृदयस्थकुकलेखवाहकरूपेण स्वपरिचयदानेनतद्गतो जानकीजानिविषयकोऽनुरागो धृतिहर्षादि संचारिभाव परिपुष्टोभक्ति रसतया परिणमति ।

हनूमत्त्वेन कपीन्द्रपरिचय प्राप्तौ भीमस्य प्रीत्या तद्विशालरूप दर्शन प्रार्थनया चाऽनुभावितो हर्षौत्सुक्यादि संचारिभिः पोषितो हनूमद्विषयकोऽनुरागः पुष्यन् प्रतीयते । तत्र तत्पुच्छविशालताया प्रकारान्तरेण कथनात् पर्यायोक्तालंकारः ।

भीमप्रार्थनया कपीन्द्रस्य प्रवर्धनेन भीमं प्रति अनुरागो हर्ष भाव पोषितः प्रतीयते । तत्र कपीन्द्रवर्धने भीमवचनस्य हेतुत्वावगत्या काव्यलिङ्गम्, उपमा चाऽलंकारौ सुतरामनुगुणौ ।

प्रवर्धितहनूमत्स्वरूपदर्शनेन नयनमुकुलीभावेन करयुगलमुकुलीभावेन अङ्गपरिपोषेण चाऽनुभावितो भीमगतो कपीन्द्रविषयको विस्मयस्थायिभावस्त्रासमोहजडता बोधहर्ष संचारिभावैः पोषितोऽद्भुतरसतया परिणमंश्चमत्करोति सचेतोजनमनःसु । तत्र तद्वपुषोऽतिविशालत्वस्य मनाक संशय कुठारित पदालोपत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम्, नयनकरयुगल्योरुपमा मुकुलीभावगतार्थ श्लेष

मूलकाऽभेदातिशयोक्तिनिर्वर्तित समान धर्मप्रयुक्ता उपमा चातितरामानुगुण्यं विद धानाश्चमत्कुर्वन्ति नितराम् ।

एवं महावीरस्य महारूपदर्शनेन स्तुतिवादैः कामापनवचनैश्चाऽनुभावितो हर्षमत्यादि संचारिभावैः पोषितो भीमस्य हनूमद्विषयकोऽनुरागो भक्ति रसतया पर्यवस्यन् आस्वाद्यते सहृदयैः ।'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहोभक्ति रिति नारदीयं भक्ति लक्षणमत्र सुतरां घटते । तत्र विस्मयेऽम्बु-निधिरूपकम्, विस्मयाम्बु निधेरितराम्बुनिधिभ्यः लक्ष्मणाच्च हनुमत उत्कर्ष क थनाद् व्यतिरेकद्वयम्, लक्ष्मणात् हनूमत उत्कर्षे तस्य तदपेक्षयाऽधिकरक्षास हन नस्य हेतुत्वाऽवगत्या काव्यलिङ्गम्, याभिर्भीमविस्मयाम्बुधिविस्ता रातिशयस्य च प्रकारान्तरेण वर्णनात् पर्यायोक्तद्वयम्, च नितरां मनोहराणि।

स्तुतिदामापन वचनैस्तुष्टस्य हनूमतो भीमचिबुकोन्नमन शिरोघ्राणा-भ्यां तद्विषयकः स्नेहो हर्षादि संचारिपोषितो वात्सल्यरसया परिणम्ना स्वाद्यते सहृदयैः । हनूमताभीमस्य विसर्जनेन तद्विरहज्ञानज भीमाश्रुपातेन च तद्गतो विषादभावोदयो ध्वन्यमानश्चमत्करोति ।-तत्र तत्र एकस्या मोचन क्रियाया ह नुमता भीमेन च योगात् तुल्ययोगिताऽपि नितरां चमत्कारिणी ।

'गच्छतोऽस्य पथि मारुतेः पुरो गन्धमादनमभूत्कुलाचलः ।
वानरेन्द्र इव गाढवीक्षिकावासनाभिरविमुक्तदृक्पथः ।।'

'अलकेशयोषिदलकेशयैः सुमैः
सुरभिं प्रमोदसुरभिं नमःसदाम् ।
शिखरे स तस्य महतीमुदग्दिशो
मणिदर्पणीमिव ददर्श वापिकाम् ।।'

'यदाधिपस्य यशसीव गृहीतदेहे
दृष्ट्वा मयादपगते सति हंसयूथे ।
कदानिवेशितगदः स विगाह्य तोयं
फुल्लानि हल्लककुलान्यखिलान्यलावीत् ।।'

'तदात्व एव तद्भक्षिणः 'कस्त्वं रे जाल्म ! आयुष्मभूमिमारुरुक्षसि?'

इति समन्ततो निरुन्धानानामन्वर्थतावलम्बकतया लोहितायितानां लोचनानां-प्रतिबिम्बैस्तां सरसीं पुनरपि सौगन्धिकान्तर्वर्तिनीमिव कुर्वतः क्रोधवशान्नाम यातुधानान् स भीमो रंहसा समुपवृंहित सिंहनादश्चिरमुपोषितस्य परिघस्य पारणां परिकल्पयाञ्चक्रे ।'

' रक्ताः सुतारक्तनदीमहाद्रेर्विष्वक्पतन्ती वियतिस्थितानाम् ।
धातुक्षयीतिबुद्धेः करावलम्बंकलयाञ्चकार ।।'

' पर्वतस्याऽग्रवस्तुन्यः प्रवस्तुं नेच्छतीं दृशम् ।
उत्खाय समहामत्तादुपासीददुपत्यकाम् ।।'

' तदानीमितरेष्वपि भ्रातृषु कमलपालिकासूनोः स्कन्धभागशिबिकामधिरुह्य तस्यैव कटकमुखमागतेषु सत्सु याकृतिरादरेण रहसि तां विकसितां कुसुमसंहतिं भूतानुरागभ्रमदां प्रमदां प्रत्युपदामकरोत् ।।'

' सरसीव कवेऽप्यस्या घार्तराष्ट्राकुलीकृते ।
कृष्णे तया वरतनोरूर्मिमत्यलिमाधुरे ।।' ५। ३२-३७ ।।

ततो भीमस्य गन्धमादन कुलाचल प्राप्तिः तस्य च वासनारूपेण दृक्पथवर्तमान वानरेन्द्रत्वेन उत्प्रेक्षाया वर्णनं कवेः नितरां चमत्कारकम् ।

गन्धमादनशिखरे स्थितायाः वापिकायाः ~~प्रमोद सुसम्पित्वे च वर्णनाद्~~ अलकेशमणिदर्पणीत्वेन तत्रत्य हंसयूथस्य मूर्त तच्छोरूपत्विनवर्णनादपिरूपकोत्कृष्ट्य-नितरां चमत्कारकम् ।

तत्र कल्हारकुसुमलवनेन क्रुद्धानां परुषवचनैरभ्यापततां च वधेनाऽनुभावितो धृतिगर्वौग्र्यादिभावपरिपोषितो भीमगतोत्साहो वीररसतया परिणमन्नास्वाद्यमानश्चमत्करोतितराम् । तत्र हनूमतः परिघपारणाकरणरूपेण मृत्योरायुधभूमित्व रूपेण प्रकारान्तरेणावर्णनात् पर्यायोक्तद्वयम्, रक्तनद्याः धातुक्षरी बुद्ध्या भ्रान्तिमान् चातितरां रुचिरार्णिमुत्प्रेक्षा च चमत्कारोतिराम् ।

भीमस्य द्रौपद्यै कुसुम संहति समर्पणेन द्रौपद्यास्तद्ग्रहणेन चाऽनुभावितोऽन्योन्यविषयकोऽन्याऽन्यगतोऽनुरागो हर्षादि संचारिभावैः पोषितः शृङ्गाररसतया स्वाद्यमानश्चमत्करोतितरां सुतराम् । तत्रोत्प्रेक्षाघार्तराष्ट्राकुली

कृतशब्दगतश्लेषोपमा अपि नितरां चमत्कारिण्यः ।

सर्वत्रैव चात्र यथायुक्तमुपयुक्तप्रसादमाधुर्यौजोगुणा गुणानां प्रसन्नमधुरौजस्विरचनानां कोमलापरुषोपनागरिकावृत्तिविद्योतितानां तदनुसारिणामेव मधुरपुरुषकोमलवर्णघटितानां वृत्त्यनुप्रासानां श्रुत्यनुप्रासानां यमकानां चापि तत्र तत्र सातिशयं चमत्कारितैव । भीमस्य कपीन्द्रभर्त्सनावचने तत्कर्षणचेष्टाया रक्षोवधस्य च वर्णने ओजसः । कपीन्द्रस्तुतिदामापनादिवर्णनेषु च माधुर्यव्यञ्जनस्यौचित्यमेव ।

(२२) भीमकृतो जटासुरवधः

ततो भीमे कामपि तटाटवीं गते जटासुरस्य युधिष्ठिरादीनां स्कन्धमारोप्यनयनम्, मार्गे मिलितेन भीमेन तद्वधश्च वर्णितं कविनावेद्यते, तद्वर्णनं यथा-

'अथ कदाचिदाखेटाय तटाटवीं पर्यटति तस्मिन्बकद्विषि जटो नाम दुर्जटः सुरारिरुटजमुपेत्य वेदिकया वैतानतनूनपात इव दयितया सह त्रीनपि तान्वीरान्स्कन्धमानीय जवात्कैनचिदपदिशपथेन प्रतस्थे ।।'

'गतागते तत्र घटोत्कचेन जटेन च स्कन्धधृतस्य राज्ञः ।
पादार्पणालाभशुचा वनं तत्पत्त्रिनादैरिव रोदिति स्म ।।'

'वनं यियासोः कठिने सभान्ते जटासु रोधो न बभूव यस्य ।
वने विजृम्भत्करुणे तु तस्य जटासुरोऽधोऽजनि धर्मसूनोः ।।'

'नीत्वाकिमेष वनसीम्नि सुदूरमेता-
नत्रैव हन्मि सहसेति धियैव तिष्ठन् ।
आलक्ष्यतायममरारिरनुष्णजघ्नौ
गन्तुं पदात्पदमपि क्षितिपानुभावात् ।।'

'मध्येमार्गं वनान्तान्मदगजगमने मारुतौ संमुखेऽस्मि-

न्सार्धं तेनाथ योद्धुं धृतरभसमनास्तीव्रदर्पप्रसारः ।
दैत्यस्थान्राजपुत्रान्दितितलमनयद्बाहुना स्कन्धमध्या-
त्क्रोधान्धोऽरत्निसीम्ना स पुनरनिलभूदारुणं तस्य शीर्षम् ।।
निपेतुषस्तस्य निकृत्तमूर्ध्नो नितान्तभारेण वनान्तभूमिः ।
निम्नामवद्दूरमसृग्निजैः प्रतीकैरिव संकुचन्ती ।।
निष्कण्टकामवत्सर्वां निहतेऽस्मिन्वनावनिः ।
उत्कण्टकामवत्प्रीतेरुन्नत्या सा तु पार्श्वती ।। ५।३७-४३

एवं जटासुरेण युधिष्ठिरादीनामपहरणम्, मार्गेमिलितेन भीमेन तस्य-वधश्चावर्ण्यते कविना वैदग्ध्येन ।

तत्र भीमजटयोर्विकटार्थयोर्वर्णने विकटैव परुषावारघटिता रचना। युधिष्ठिरादिनयनविषयको जटासुरगत उत्साहो तच्चेष्टयाऽनुभावितोऽपि अपरिपुष्टत्वादनुचितप्रवृत्तत्वाच्चाभासरूप एव । तत्रापह्रियमाणानां द्रौपदीयुधिष्ठिरादीनां वेदिका वैतानवह्न्युपमया सेवनीयानां जिघांसयापहरणस्याऽनौचित्यं तेन चासुरस्यातिनृशंसत्वमाततायित्वं मारणीयत्वं च ध्वन्यते ।

जटासुरस्य भीषणत्वेन तद्विषयकभयस्य पतत्त्रिकलकलैरनुभावितत्वात्-त्रासाऽऽवेगादिपरिपुष्टत्वाच्च भयानकरसतया परिणमति । तत्रोत्प्रेक्षायाश्चमत्कारित्वम् ।

वनं ययासोरित्यादि पद्ये सभास्थलात् वनप्रदेशस्य सकरुणत्वेनोत्कर्ष प्रतीत्या व्यतिरेकालंकारो व्यज्यते । तद्व्यञ्जकं च - सभास्थलस्य कठिनहृदयत्वात् तत्र युधिष्ठिरस्य जटासुरोधो न बभूव, तत्तत्रसंगतमेवेति, वनप्रदेशस्य च विजृम्भकरुणत्वात् तत्र युधिष्ठिरस्य जटासुरोधो बभूव, तत्तत्रापि सुसंगतमेव, इत्यनुरूप संसर्गस्योभयत्रापि वर्णितत्वात् समालंकारद्वयम् । तत्र च जटासुरोधो - विजृम्भत्करुणशब्दगतश्लेषमूलकाभेदातिशयोक्तिद्वयस्यांगता । 'मन्त्रिक्रोशन्ती'तिवत् समान्तशब्दस्य तत्रस्थितजनेषु लक्षणैव । एवं सुतरां चमत्कारकोऽत्र कवेर्वाग्विलासः।

ततो द्रौपदीयुधिष्ठिराद्यपहरणोद्दीपितो जटासुरविषयको भीमस्य-क्रोधस्तस्योग्रादि संचारिभावपोषितः तद्वधानुभावितः परिपुष्यन् प्रतीतिपथ

मवतरति । तत्र संयुक्तपरुषवर्णघटिता रचना भीमक्रोधानुगुणौजोगुणानुसारिण्येव । वृत्त्यनुप्रासोऽपि तादृग्वर्णघटितत्वात् तदनुसार्येव । क्रीतितलनयनरूपैकधर्मस्य राजपुत्र- जटासुरशीर्षाभ्यांयोगात् तुल्ययोगितालंकारोऽपि वर्णनैकौकत्वेन ओजोऽनुसारिरसद्योतकत्वेनाऽनुगुण एव ।

मृतनिपतित जटासुरभारेण जाते भूम्या निम्नत्वे स्पर्शसंकोच हेतुकदूरम वनोत्प्रेक्षाऽतीव रमणीया ।

भीमकृतजटासुरवधेन वन्यानां द्रौपद्याश्च प्रीतिहर्षवर्णने हर्षभावध्वनिः। तत्र वनावनि शब्देन तत्रत्य जनालक्ष्यन्ते । एकजटासुरवधेन असंभावितस्य सर्वस्यापि वनावन्यानिष्कण्टकत्वरूपकार्यस्य संपत्या विशेषालंकारः(१) तत्र कण्टकशब्दगतश्लेषमूलकाऽभेदातिशयोक्तेर्ध्वनिता । पार्षत्या उत्कण्टकत्वाकारणेनाक्षि जटासुरवधेन उत्कण्टकत्ववर्णनात् विभावना, तत्रापिकण्टकशब्दगतश्लेषमूलाभेदातिशयोक्तेर्ध्वनिता । एवं सोऽयं वाग्विलासोऽपि कवेरतितरामेव चमत्कारकः ।

अथ भीमेन क्रोधवशदैत्यानां जटासुरस्य च वधेकृतेहिमगिरौ वसतां युधिष्ठिरादीनामर्जुनप्राप्त्याऽऽनन्दः, अर्जुनवृत्तस्यसबहुमानं श्रवणम्, वनवासचर्या च वर्णितापि कविना विविच्यन्ते , तद्वर्णनं यथा -

" ततस्ते श्वेताद्रिं चिरमधिवसन्तः कुरुवराः
क्षितीशस्य प्राप्त्या मुदमनुबभूवुर्निरवधिम् ।
कथाशेषीकारात्त्रिदशरिपुवर्गस्य बहुधा
धनुर्ब्रह्मौज्यत्वं शतमखभुजे स्थापितवतः ।।"
" तमनुक्रमभाषितेर्युद्धं स बहूकृत्य चलाचलेन मूर्ध्ना ।
अनुजैर्नृपतिः समं हिमाद्रेर्न्यवृतद्धैतवनं नितान्तहृष्टः ।।"
" नरेन्द्रपुत्राः सह याज्ञसेन्या न केवलं तत्र तपोधनानाम् ।

---

१ यदाधेयमनाधारमेकं चानेकगोचरम् ।।
किंचित्प्रकुर्वतः कार्यमशक्यस्येतरस्य वा ।
कार्यस्य करणं देवाद्विशेषस्त्रिविधस्ततः ।।१०।७३-७४। सा०द०

नेत्राणि जह्नुर्नियमैः कृशाङ्गा नेदीयसीनां वनवीरुधां च ।।' ५।४४-४६

अत्र अर्जुनप्राप्त्या तद्धेतुना च विभावरूपेण मूर्धचालनादिना चानुभावेन-युधिष्ठिरगतो हर्षभावो ध्वन्यते । तत्र त्रिदशरिपुवर्गहननस्यतत्कथाशेषीकारूप प्रकारान्तरेण कथनात्, इन्द्रभुजस्य युद्धेविश्रान्तेश्च धनुर्ज्याभोज्झकत्वस्वीकारूपेण-प्रकारान्तरेण कथनात् पर्यायोक्तद्वयम् वाक्यार्थोपस्कारकतयाङ्गम् ।

वनवासनियमकृशाङ्गानां पाण्डवानां तपोधनवनवीरुदुभयेषां नेत्रहरणो नैकेनधर्मेणाश्लेषमूलकेन सम्बन्धात् तुल्ययोगितालंकारो वाक्यार्थोपस्कारको ऽतितरां रुचिरः ।

(२३) ~~दुर्योधनस्य गन्धर्वैर्बन्धनं युधिष्ठिरेण तन्मोचनं च~~

गन्धर्वणां दुर्योधनबन्धने युधिष्ठिरस्य तन्मोचने च

अथ दुर्योधनो वनवासदुःखितान् पाण्डवान् खेदयितुं स्वंवैभवं दिदर्शयिषन् महताबलेन वनंजगाम, तत्र च गन्धर्वैर्बद्धः , अर्जुनेन च ततो गृहीतो युधिष्ठिरसमीपमानीतस्तेन बन्धनान्मोचित इत्यादि वर्णितं समीक्ष्यते सम्प्रति, तद्वर्णनं यथा -

' तदनु स खलु मानी सर्वसाम्राज्यलक्ष्मीं
प्रचिकटयिषुरेषां प्राप्तकार्श्यान्नतीनाम् ।
कुरुनृपतितनूजो घोषयात्रापदेशा-
दमजत बलसंघैरावृतस्तं वनान्तम् ।।'

' कणाभिलैस्तत्र करिव्रजानां चलत्सु सर्वेषु चमूरजःसु ।
रजस्तु चित्ताश्रितमस्य राज्ञो बलादिवार्च्यत्वमेव तस्थौ ।।'

' तत्र रज्जुनहनस्य भाविनः स्थानसूचनकृती इवाद्रिदे ।
धारयन्भुजयुगेन कौरवः सैनिकान्स विबभाज पङ्क्तिशः ।।'

' अभ्रंलिहस्य वटभूमिरुहस्तलेऽसौ

स्थित्वाऽशृणोत्तदनु वैणिकगीतिरीतिम् ।
सङ्गीतमण्डिरसिकं सह बन्धुवर्गै-
राकारयन्निव सुराधिपगायकेन्द्रम् ।।'

'तावत्तस्य धार्तराष्ट्रस्य चेष्टितरौक्ष्यं निरीक्ष्य नितरां क्रुधान्धः सुधान्धः पतिनिदेशेनवनावनिदेशेऽवतीर्णस्तूर्णं विधृतकृपाणबाणचापकलापतनुत्रसेनश्चित्रसेनश्चिरक्षुधितस्तरक्षुश्चमूरुततिमिव चमूमुं निवार्य क्ष्वेलया लोलयन्नेके ।'

'भटेषु धावत्सु भयेन कर्णः क्रुधा हसन्कुञ्जरमभ्युवारः ।
करेण विस्फारितकालपृष्ठो जगाम शत्रुं जगदेकवीरः ।।'

'स्वसमानं नान्यवर्येव नटद्गुणाद्धनुषश्च्युतैः स युधिदेवगायिनाम् ।
अतिरक्ततां गलत्लेकवर्तिनीमखिले वपुष्यपि चकार सायकैः ।।'

'गगने शिरश्चलयतः श्रवोज्झिलाङ्गलितापि दूरमवतंसमञ्जरी ।
पुनरुन्नमद्भिरिषुपक्षवायुभिः पुरतोऽभवत्कलहभोजिनो मुनेः ।।'

'हस्तैः प्रवीणैरखिलेऽपि कर्णे सुधां विमुञ्चन्सुरगायिवर्गः ।
अयुक्तमेतत्पुनरत्र कर्णे विपाठवर्षं विससर्ज घोरम् ।।'

'तदनु विश्वातिशायिनो विश्वावसुकुमारस्य शरगणेन सह जवकृते कृतपणबन्ध इव धावति राधेये क्रन्दत्सु कुरुवृन्देषु च सर्वेऽपि गर्वेण गन्धर्वभटाः सुयोधनमायोधनधरणीमध्यमाजं रश्मिभिरवबध्य गर्जन्तो रभसवजं निर्जरपथमनेषुः' ।

'नयत्स्वमुं वैरिषु नाकमार्गं विषादभाजां विपिने कुरूणाम् ।
तत्तादृशि व्रीडभरेऽपि तेषामुत्त्रासभावं न जहुर्मुखानि ।।'

'तस्यान्तःपुरसुभ्रुवो विगलितैर्बाष्पाम्बुभिः पङ्किले
मार्गे मन्दितवेगपादगतयो वक्राः स्खलत्पाणयः ।
आजग्मुस्तमजातशत्रुमजहत्कारुण्यमंघ्रिद्वये
कुर्वत्स्त्यो नमितं स्त्रियैव पुरतो दत्तार्घसाहयं शिरः ।।'

'सगद्गदमेवमभिदधुश्च ,-

'संद्रष्टुं तव पादमूलमधुना सर्वैः समं बन्धुभि-
र्देव ! प्रातरमागतं वनतले लेशेन हेतोर्विना ।

पापः कश्चन गायको दिविषदां हा हन्त बद्ध्वा दृढं
निःशंकैरुपवीणितो निजमटैरग्रं नयत्युच्चकैः ।।'

'तदद्य नः कण्ठभुवि स्तुवाणां तवैव पादं शरणं गतानाम् ।
वास्तव्यतां मंगलसूत्रिकायाः प्रसीद दातुं प्रथमानकीर्ते ! ।।'

'इति तापिदीनभावं पुरोधाय निवेदितस्य राज्ञो निदेशेन निर्गत्य सत्व रमुधावतां भूदण्डमिव कोदण्डमपि कोपेन कुटिलीकुर्वतां भीमप्रभृतीनां चचेलितवि स्फाराभ्यां तत्कर्णं वियदखिलं विकस्वरनिजगुणमासीत् ।।'

'अर्जुनस्त्वेवमुवाच,-

'क्व गायका ! यूयमुपात्तवीणाः क्व चापधुर्याः कुरुवंशभूपाः ।
अहो रणे चापलमीदृशं वः स्वमूलकं वा परमूलकं वा ।।'

'वृषाकपेर्लक्ष्मणचिह्नदायी वने जनोऽस्मिन्वसतीति वार्ता ।
पपात कर्णे भवतां न किंस्विच्चदीदृशं साहसमातनुध्वे ।।'

'भ्राताधुनासौ न विसृज्यते चेत्तथात्र संनह्यतु गाण्डवो मे ।
यथा महेन्द्रः परिगृह्य वीणां स्वबाहुकीर्तिं स्वयमेव गायेत् ।।

'इति विजयस्य वीरवादेन पुनरपि निवर्तमानेवीणामंसेषु निबध्य बाणा सनमेव करे कूजयद्भिस्तैर्नभश्चरैः समेषां सकलविमानिकपरिषदं रुरुधितीर्णनि द्रार्मुनो महान्सर्मुरोऽभूत् ।।'

'गम्भीरगाण्डवगुणाङ्गलितैः पृषत्कैर्गण्डस्थले हृदि भुजे गमितव्रणास्ते ।
गर्वं क्षिवहाय चकिता गगनान्तराले गन्धर्वभावसदृशं गमनं वितेनुः ।।'

'वीणाः समस्ता विजयेन कृत्ता गन्धर्वसैन्याङ्गलिता निपेतुः ।
आयुष्मती केवलमालुलोके हस्ताग्रवीणा दिवि नारदस्य ।।'

'एतावतीति युधि मार्गणचारशक्तिः
स्पष्टीबभूव सुरगायकपाण्डवानाम् ।
तेषां ययुः शरकुलानि हि लक्ष्यमात्रं
लक्ष्यं विभिद्य पुनरायुरन्तमेषाम् ।।'

'तत्र शक्रसुतस्य तादृशं विक्रममभिनन्द्य कृतसंधानेन गन्धर्वराजेनसमर्पितं पौरु

षहीनमिदं न पुरस्करणीयमिति बन्धनमिषेण पश्चादुपनीतबाहुयुगलं सुयोधनमादाय ते भीमादयो वसुधाधिपस्य सन्निधिं प्रत्यनयन् ।।'

'तं वीक्ष्य तत्र तरुमावरणं भजन्ती
सा पार्षती सविधवल्लिपरम्परासु ।
हासैः करागुलिबिलादसकृद्गलद्भि-
राकालिकीं कुसुमपंक्तिमिव व्यतानीत् ।।'

'वीरप्रजातैस्त्रिभुवनतले विश्रुते नः कुलेऽस्मि-
न्नुत्पद्य त्वं बहुभिरनुजैरास्थितोऽप्याधिपत्यम् ।
स्वं मर्षुं किमिह भजसे वत्स ! नीचैः प्रणीतं
राजन्यानां परपरिभवो राजयक्ष्मा हि कीर्तेः ।।'

'इत्थं निगद्य सरलेन युधिष्ठिरेण
बन्धाद्विमुच्य बकविद्विषता विसृष्टः ।
मानं च्युतं मृगयमाण इवातिनम्रो
वाचंयमेन स यशो महता बलेन ।।'

'यं प्रायं बहुमिच्छन्ति जना जीवितुमुत्सुकाः ।
उपाविक्षत्तमेवासौ पथि प्राणान्सुजिक्षितुम् ।।'

'तस्मिन्व्रते स्वपनलब्धसुरारिसाह्यस्त्यागे तनोस्तदनु बन्धुतया निषिद्धः ।
तस्माद्वनात्पुनरपि प्रतिपद्य धैर्यं धुष्यद्बलो निवृते कुरुराजधानीम् ।।'

तत्र खलु ,-

'कदापि मा बन्धय गायकैर्मामितीव हव्यैरमृतायमानैः ।
संप्रीणयन्निन्द्रमथाभिमानी स पौण्डरीकं क्रतुमाजहार ।।' ५।४७-७०।।

एवं दुर्योधनस्य पाण्डवान् स्ववैभवं दर्शयितुं घोषयात्राव्याजेनतद्वासवनप्रान्ते गमनम्, तत्र तस्य बान्धवैः सह वैणिकगीतश्रवणम् , तद्दुश्चेष्टाकुपितशक्रप्रेरितगन्धर्वराजेन तन्निग्रहणम्, ततस्तदन्तःपुरपुरन्ध्रीणां तद्रक्षणाय युधिष्ठिर प्रार्थनम्, युधिष्ठिरप्रेरितभीमार्जुनादीनां गन्धर्वैः सह संयुगस्तत्र पराजितैर्गन्धर्वैर्निबद्धस्य दुर्योधनस्य तेभ्यः समर्पणम्, तथाभूतस्य दुर्योधनस्य तैर्युधिष्ठिरसमीपमा

नयनम्, युधिष्ठिरस्य बन्धुनान्मोचितं दुर्योधनं प्रति भर्त्सनावचनानि, लज्जितस्य-दुर्योधनस्य प्रायोपवेशनप्रतिज्ञा, बन्धुभिः स्वप्ने सुरारिभिश्च प्रायोपवेशनान्निवर्तितस्य तस्य पौण्डरीकयागश्चेति वर्णितानि कविनाऽति वैदग्ध्येन ।

तत्र दुर्योधनस्य दुःखितपाण्डवदुःखाकरणविषयकोत्साहः तदीयदुश्चेष्टाभिरनुभावितः गर्वाऽसूयाचापल्यहर्षादिभावैश्च पोषितोऽवतरति प्रतीति पथम् उत्साहः, किन्तु पर्यन्ते तस्य विध्वस्तत्वात् युधिष्ठिरसदृशज्येष्ठभ्रातृरूप गुरु जनपराभवन विषयत्वाच्चाऽऽभासरूपता । कर्णादिनिलरूपकारणसत्वेऽपि दुर्योधन चित्तरजसश्चञ्चलत्वाभाव वर्णनाद् विशेषोक्तिः, तत्रजः शब्दगतश्लेषमूलकाभेदा-तिशयोक्तिरनुप्राणिका, रजसश्चञ्चलत्वाभावे बलस्य हेतुत्वेनोत्प्रेक्षणात् हेतूत्प्रे-क्षातत्रायम् । कौरवमुखानामुत्तानता हानकारणस्य व्रीडभरस्य सत्वेऽपितत्कार्या नुदयाद् विशेषोक्तिः, तथा पह्नुत्युत्प्रेक्षोपमाः जनयन्ति सङ्कतिशयांचमत्कृति म् । दुर्योधनदुर्ललितोद्दीपितस्तद्विषयकः सेनाभिः बाणासारैश्च तद्बलाकुलीकरणा नुभावितो चित्रसेन-गन्धर्वराजगतः उत्साहः क्रोधोग्रतादिभावैः पोषितो वीररसतामुपयाति।

ततो कर्णस्य सक्रोधस्य बाणवर्षणादिभिर्गन्धर्वजयविषयक उत्साहो धृतिगर्वादिपोषितो वीररसतां प्रतिपद्यते । कर्णमित्रस्य तत्समाननामावयवरूपेण कथनात् पर्यायोक्तम्, गन्धर्व गलत्तलवर्तिरक्तत्वस्य तदखिलदेहैकरसन्धर्वणात् रक्तत्वश्लेष मूलकाऽभेदातिशयोक्त्युज्जीवितः पर्यायः ।सर्वकर्णेषु सुधारस-सेकिनः सुरगायि-वर्गस्यैकस्मिन् कर्णे बाणवर्षणकर्तृत्व-संसर्गस्याऽननुरूपत्वात् कर्णशब्दगतश्लेषमूल काऽभेदातिशयोक्त्यनुप्राणितं विषमम्, उत्प्रेक्षा च विशेषतश्चमत्कुर्वन्ति ।

ततो गन्धर्वैर्बध्यमानीयमानस्य दुर्योधनस्यान्तःपुरपुरन्ध्रिजनस्य युधिष्ठिर चरणशरणागतस्य तन्मोचनाय प्रार्थनायां विषाददैन्येध्वन्येते । "अस्माकं वै धव्यं रक्ष्वीति"वस्तुतो "अस्माकं मूलसूत्रिकायाः वास्तव्यतां दातुं प्रसीदे" ति प्रकारान्तरेण कथनात् पर्यायोक्तमत्र चमत्कारकम् ।

ततो युधिष्ठिराज्ञया गन्धर्वगणाद् दुर्योधनं मोचयितुं निर्गतानां भीमा र्जुनादीनां चेष्टाभिरनुभावितः धृतिगर्वादिपोषितस्तद्गत उत्साहो वीररसतया

पर्यवस्यन् चमत्करोतितराम् । तत्र 'अस्माकं भ्राता(दुर्योधनो) न विसृज्यते चेत् यूयं(गन्धर्वाः) बाणैरस्माकंमरिष्यथ, तिवस्तुनः 'मम गाण्डिवस्तथासंनह्यतु यथा म हेन्द्रः स्वबाहुकीर्तिं वीणां परिगृह्यस्वयमेव गायेत्' इति प्रकारान्तरेण कथना त् पर्यायोक्तम् , गाण्डिवगुणगलितबाणजातव्रणत्वस्य गन्धर्वाणां कपोल-हृदग भुजैर्योगात् तुल्ययोगिता, 'चकिता गन्धर्वा पलायध्वं' रिति वस्तुनो- गन्धर्वभावसदृशं गमनं स्वीचक्रुरिति प्रकारान्तरेण कथनात् पर्यायोक्तम्, तत्रैव- गन्धर्वाणां गन्धर्वसदृशगमन स्वीकरण-कर्तृत्व संसर्गस्या नुरूपत्वात् समालंकारोऽपि प्रभवन्तितरां सचेतोजनमनःसु चमत्कारातिशयजननाय । तत्र गन्धर्वश्लेषमूलकाभेदा तिशयोक्तिरनुप्राणिका ।

गन्धर्वाणां दुर्योधन सैन्यजये तच्चेष्टाभिरनुभावितो धृतिगर्वादिपिश्च पोषित उत्साहो वीररसतां प्रतिपद्यते, किन्तु पाण्डवैः सह युद्धे तेषां पलायना दिचेष्टाभिरनुभावितं विषादावेगचापल्यादि भावैश्च परिपोषितं भयं भयानक रसतां प्राप्नोति । गन्धर्वशराणां लक्ष्य-पर्यन्तगामित्वात् पाण्डवशराणां च ल क्ष्यभेदन-पूर्वकपुनरागामित्वाद् व्यतिरेकोध्वन्यते ।

गन्धर्वैर्यो गृहीतस्य पृष्ठ-बद्धहस्तस्य दुर्योधनस्य भीमादिभिर्युधिष्ठि रसमीपायने साम्राज्य-गर्वापमाणस्य दुर्योधनस्य अपराधिन इव निगडितत्वेनोद्दी पितोऽसक्रुद्ध सेनानुभावितो हर्ष चापल्यादि संचारिभावैः पोषितो पार्श्वती- गतो हासो हास्यरसतां प्रतिपद्यते । तत्रोत्प्रेक्षा चमत्कारिणी ।

बद्धगृहीतानीतदुर्योधनदुर्दशादिभावितो तदपकर्षवर्णनाऽनुभावितो यु धिष्ठिरगतो विषादभावो ध्वन्यते । तत्र कुरुकुलोद्भवत्वादिकारणकलापसद्भा वेऽपि नीच-प्रणीतमर्यादाऽभावरूपकार्यस्यानुक्त्याद् विशेषोक्तिः , अर्थान्तरन्या सश्च चमत्कारिणौ ।

युधिष्ठिरेण बन्धनान्मोचितस्य दुर्योधनस्याऽतिनम्रत्वेन लज्जाभावध्व निः , प्रायोपवेशन-निश्चयेन विषादभावध्वनिः, बन्धुतया प्रायोपवेशन-निषे धेन पुनरपि स्वव्यापार-प्रवृत्त्या धृतिभावध्वनिः, कुरुपुरमुपेत्य तस्य पौण्डरी- कयागानुष्ठानेन गन्धर्वपराभवादि-दुःखगोपनात् अवहित्थभावध्वनिश्चात्र नितरां

चमत्कुर्वन्तो दुर्योधनस्य दुर्ललितजनितमपकर्षं बोधयितुं सुतरां प्रभवन्ति ।

सर्वत्राप्यत्र वीररसे ओजस्विनी रौद्रे च ओजोतिशय विशिष्टा संयुक्तप रुषवर्णघटितारचना, हर्षविषाददैन्यध्वनिषु हास्ये च मधुरकोमल वर्णघटिता माधुर्यद्योतिनी रचना, तदनुसारिण एव च छेकवृत्त्यनुप्रासाः यमकालंकाराश्च चमत्कुर्वन्तितराम् काव्यम् ।

(२४) युधिष्ठिरस्यधर्मदर्शनम्

ततः पुनर्द्वैतवनं प्राप्ते सानुजे युधिष्ठिरे तत्र कस्यचिद् विप्रस्य अरणि मादाय हरिणस्यपलायनम्, तमनुधावतः पार्थान् बहुदूरमाकृष्य हरिणस्यान्तर्धा नम्, मध्यन्दिनेजाते सति हरिणमिव सलिलमपि विचिन्वतां भीमादीनां कांचि द् वाप्तीं प्राप्य सलिल पानोद्यमे निष्प्राणीभूयभूपालः, तान् दृष्ट्वा पृष्ठत आ गतस्य युधिष्ठिरस्य परिदेवनम्, ततोऽदृश्यपुरुषस्य प्रश्नानां तेनोत्तरदानम्, त तः प्रसन्नस्य धर्मस्याविर्भूय भीमादि संजीवनम्, 'त्रयोदशे वर्षे वेषान्तरवतो भव तः कोऽपि न जानीयात्' इति वरं तमरणिं च दत्वाऽन्तर्धानम् इत्यादि व-र्णितं विविच्यते, तद्वर्णनं यथा -

"तावत्पार्थास्तेऽपि पुनः काम्यकसीमां
हित्वा सूर्यैर्भूविबुधानामनुयाताः ।
तीर्थव्रातान्विस्मृतपूर्वानवगाढुं
वध्वा साकं द्वैतवनारण्यमवापुः ॥"

"तत्र कदाचिदाश्रमद्वारि 'हा हा महाभागाः ! मम होमसाधनमरणि-मपहृत्य हरिणोऽयमितो धावति' इति बाष्पायमाणस्य कस्यचिदग्रजन्मनः शो कनिवारणाय चक्रीकृत्य चापमनुधावतस्तान्पार्थान् पार्श्वलताताडतानुरुक्तनवकि सलयजालमुत्प्लवनवेगपवनबहिर्ज्वलद्धनिशिखाकन्दलमिवारणिं विषाणयोर्बिभ्राणः कतिष्णुचित्पदेषु सुग्रह इव कतिष्णुचिद् दुरासद इव विचित्रगतिः कोऽपि कृष्णा सारो दूरमाकृष्य स्वयमन्तरधात् ॥"

'तदनु ललाटान्तपनखम्पचहेलिधूलिभ्यां द्यावापृथिवीभ्यामुदन्यावदान्यमहिम्नि दिनयौवने प्रादुर्भवति सति प्रकृतमर्थमिव पानीयमपि इतस्ततो विचिन्वद्भिरनुजैः सह कस्यचिद्विशालस्य वनशालस्य मूलभुवं तच्छायामण्डलमिव पाण्डवः शनैः शनैरुपससर्प।।'

'तत्रानिलैः कमलगन्धिभिरुच्यमाना-
माशां गतेषु सलिलाय चिरायितेषु ।
भीमादिषु क्षितिभुजा परितप्य भेजे
तेषां पदानुसरणादथ कापि वापी ।।'

'तस्यास्तटे कमलिनीदलपात्रपाणी-
स्तान्पृक्तिशो निपतितानवलोक्य वीरान् ।
बाष्पाम्बुभिः प्रथमदर्शितमार्गयेव
तन्वा नृपस्य चरणौ सहसा निपेते ।।'

'स नृपतिर्दृशेऽधिकवत्सलः सपदि मूर्च्छितधीर्निभृतायुकः ।
स्वयमपि प्रविमज्य तदा दशामनुभवन्निव तामनुजाश्रिताम् ।।'

'नासाविलोभनपटून्नवपद्मगन्धा-
नादाय तत्र मधुपैरनुसेव्यमानाः ।
वर्धिष्णुचेतनमसुं वनवापिकायाः
कल्लोलमल्लपवनाः कलयांबभूवुः ।।'

'ततः क्षणादेव किंचिदुद्गम्य परितः शून्यशून्या दिशो दशापि विलोकयमानः शनैः शनैरुपसृत्य शोकक्लेशेन करांशुलेन तान्भ्रातॄन् पर्यायवृत्त्या परामृश्य वनविहगमृगपानसौकर्याय सुतरां दुस्तरां तां सरसीमिव पूरयितुं बाष्पधारामपि वर्षन् धर्मसूनुरेतं विलपितुमारभत,-

'वीरा ! भवद्विपदि देवपरम्परापि
दूरेतरां प्रति परान्न गिरां प्रवृत्तिः ।
हा हा दशेयमिह वोऽथ कुतोऽवतीर्णा
मामन्तरेण भवतां किमिदं प्रयाणम् ।।'

`दैवं कठोरचरितं दयया विहीनं
माद्रीसुतावहह मातृमुखानभिज्ञौ ।
कन्दाङ्कुराणि च फलानि च भक्षयित्वा
कान्तारसीमनि मयाचरितुं न सेहे ।।`

`स्वयमव्रण एव यो भवान्व्रणमाधत्त हरस्य मस्तके ।
व्रणमायुषि पार्थ ! तस्य ते विदधाति स्म मृधंविनैव कः ।।`

`वत्स द्वैषिनियुद्धजीवनभुज प्रस्थानिषे मारुते
कर्णाकर्णिकिया निशम्य भवता प्राप्तामवस्थामिमाम् ।
शोकैकेक्षणनिश्चलैकवलनगरीभाजां च बाष्पायितुं
स्वस्त्रीयैः सह सौबलस्य च मुदा कोऽप्येष कालोऽयभूत् ।।`

`मय्यप्यसूनिह विमुञ्चति याज्ञसेनी
सा श्वापदामिषमबुद्धगतिर्भवेन्नः ।
हा माद्रि ! कुन्ति ! युवयोर्वनभूमिरेव
पुत्रप्रसूतिविषदोः पदतां प्रपेदे ।।`

`कूटस्थशीतकरकुक्षिगतं कुरुभ्रुं
कुर्वन्स्वजातिकृतकोपरसातिरेकम् ।
कोदण्डमप्यगणयन्कुलिशास्त्रसूनोः
क्वासौ स्थितो बत मृगः कुलहानये नः ? ।।`

`इत्थं विलप्य नृपतौ स्वयमप्यमीषा-
मन्तस्य हेतुरिदमित्युदकं सरस्याः ।
पातुं प्रवृत्तवति कोऽपि पुमानदृश्यो
गम्भीरमाह गगनस्थित एव वाचम् ।।`

`राजन् ! मदुक्तिसरणेः प्रतिवाक्यदानं
देवोऽप्युपेत्य जलमत्र न पातुमीष्टे ।
एते मदीयमवमत्य वचोऽवलेपात्
पीताम्भसः सपदि बिभ्रति दीर्घनिद्राम् ।।`

`तत्प्रत्युदीर्घं जलमत्र पिबेति वक्तुः
प्रश्नानसौ दिविचरस्य पटूत्तरैः स्वैः ।
प्रत्युद्ययौ बहुमतैर्वनदेवतानां
मिन्दोः करानिव तरङ्गकुलैः पयोधिः ।।`

`तदनन्तरम्,-`

`कटिलम्बितवल्कलो जटालः कमनीयस्मितधौतयज्ञसूत्रः ।
कुशबर्हवतंसितः स देवः कुरुराजस्य पुरोऽवतीर्य तस्थौ ।।`

`स तु तत्र लोकातीतेन राकाशतमिवाकारयता निजेन तेजसा कुड्मलीकृतकरकमलयुग्मं तमात्मसंभवं प्रेममेदुरमेवमवादीत्,-`

`अये वत्स ! मां धर्ममवेहि । विमतजनवितीर्णं विविधं विपिनक्लेशमनुभवतो भावं बुभुत्सुरेवमाचरिषम् । तद्बहुधा परीक्षितेन भवतः शीलेन सर्वज्ञसेव प्रश्नोत्तरेण च प्रसेदिवानस्मि । तस्मान्ममानुग्रहेण स्वप्नान्निवृत्तैरिव भूयोऽप्युत्थितैरनुजन्मभिः सह त्रयोदशीं शरदं वैषान्तरवन्तं भवन्तं कोऽपि न जानीयात्` इति वर्मणिं च विस्मयविस्मारितनयनपरिस्पन्दनाय निजनन्दनाय प्रतिपाद्य स पुमानन्तर्दधे ।।`

`तत्तादृशो भगवतो वचसा निकाम-
मासाद्य मोदभरमाश्रममागतानाम् ।
प्राप्तारणेर्द्विजवरस्य शुचेव साक-
मन्तं जगाम समयोऽपि महानमीषाम् ।।`

एवं युधिष्ठिरस्य द्वैतवनगमनम्, तत्रत्यतीर्थावगाहनम्, हरिणस्य तत्रकस्यचिद्विप्रारणिमादायपलायनम्, अन्तर्धानं च तदन्वेषणाय मध्याह्नेपिपासया सलिलान्वेषणाय च गतानां भीमादीनामागमनविलम्बे जाते तानन्विष्यतो युधिष्ठिरस्य वापीसमीपं गतस्य निष्प्राणतया पतितानां भीमादीनां दर्शनं परिदेवनं स्वजीवनत्यागं च चैष्टनं नभःस्थादृश्यपुरुषवाणीश्रवणं च , युधिष्ठिरप्रश्नोत्तरदानेन प्रसेदुषः तस्याऽऽविर्भूय युधिष्ठिराय स्वस्य `धर्मोऽस्मीति` परिचयदानम् चैत्यादिसम्यग्वर्णितमस्ति कुशलेन कविना ।

तत्र पार्थानां द्वैतवनतीर्थानामवगाहनेन तद्विषयारतिरुन्मेषहर्षादिभावसङ्चरिता प्रतीयते ।

हरिणाकृतारणिहरणे बाष्पायमानत्वेन विप्रगतो विषादभावो ध्वन्यते ।

हरिणानुधावनादिनानुभावितोधृत्यावेगादिसंचारिभावसहितो रण्यानयनविषयक उत्साहः प्रतीयते । तत्र हरिणस्वभावोक्तिरुत्प्रेक्षा च प्रकृतानुगुणे । ओजोगुणव्यञ्जकौ संयुक्तपरुषवर्णघटितौ छेकवृत्त्यनुप्रासावपि तत्रानुकूलौ ।

सूर्यतापादिविभावितः, वृक्षामूलसेवनानुभावितः पार्थबन्धुगतः श्रमभावो व्यज्यते । उपमा तत्र प्रकृतमध्यूहन वर्णन पूरिका ।

कापीतटप्रान्ते निष्प्राणतया पतितभीमादि विषयकस्तत्स्वरूपगुणानुद्दीपितो युधिष्ठिरगतः शोकस्तद्रोदनभूपतनादि चेष्टाभिरनुभावितो विषादावेगासूयामोहविबोधस्मृतिदैन्यादिसंचारिभावैश्च पोषितः करुणरसतयापर्यवस्यति । तत्रोत्प्रेक्षाः, एकचक्रनगरीभाजां स्वस्त्रीयसहित सौबलस्य च बाष्पायित त्वरूपैक धर्मयोगात् तुल्ययोगिातता, मारयतिस्मेत्यर्थस्य आयुषिन्नणं विदधातिस्मेति प्रकारान्तरेण कथनात् पर्यायोक्तम्, पुत्रप्रसूतिविपदोरप्येकवनभूमेरेव पदलक्ष त्वोक्त्यातुल्ययोगिता च नितरांचमत्कारीणि । शोकानुगुणा प्रसादमाधुर्य गुणाव्यञ्जकमृदुमधुरवर्णघटिताश्छेकवृत्त्यनुप्रासाः अप्यत्र चमत्कारिणः ।

युधिष्ठिरसौशील्यसमुचितोत्तरदानविभावितः आविर्भवनसदृशमाषण वरदानादिभिरनुभावितस्तद्विषयको धर्मगतः प्रेमाहर्षादिभावैः पोषितो वात्सल्यरसतया पर्यवस्यन् चमत्कारोतितरां सुतराम् । तत्रोत्प्रेक्षा, छेकवृत्त्यनुप्रासाश्चाऽपि तदनुरूपाश्चमत्कारिणः ।

एवमदृश्यवाक्श्रवणातिलब्धस्वपुरुषाविर्भवनादिविभावितः तत्प्रसादारणिवरदानोद्दीपितः करकमलकुड्मलीकरणादिभिरनुभावितो विस्मयजाड्यधृतिहर्षादिसंचारिभाव पोषितो धर्मराजविषयको युधिष्ठिरगतः स्नेहोभक्तिरसतया पर्यवस्यन्नास्वादनीयो भवति सहृदयानाम् । नयनपरिस्पन्दविस्मरणेन-

व्यज्यमानं विस्मयकृतजाड्यस्यापि धर्मविषयकयुधिष्ठिरगतमाहात्म्यज्ञानानुमापकत्वात् तत्सहकृतस्यैव च तद्विषयकस्नेहस्य भक्तित्वेन पर्यवसानात् स्थायिनोऽपि विस्मयस्योद्बुद्धमात्रत्वेन भक्तिरसे संचारित्वम्, तदुक्तम् साहित्यदर्पणे[1] उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते (५)। नारदभक्तिसूत्रे चोक्तं भक्तिलक्षणे यथा "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिः" इति । धर्मतेजसिराकाशताऽकारकत्वोत्प्रेक्षायाधर्मस्य चन्द्रातिशायितेजास्कत्वप्रतीत्या व्यतिरेकालंकारो ध्वन्यते । राकाशताकारितया संभावितधर्मतेजसि युधिष्ठिरकरकमल कुड्मलीकरणकर्तृत्व संसर्गस्याऽनुरूपत्वात् समालंकारः ।

अन्तशब्दगताऽर्थश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितः सहोक्त्यलंकारः, वात्सल्यभक्तिरसानुगुणा प्रसादमाधुर्यव्यञ्जकमृदुमधुरवर्णघटितचेकवृत्त्यनुप्रासयमकालंकाराश्चाऽत्र चमत्कुर्वन्तितराम् ।

(२५) पाण्डवानां जयद्रथनिग्रहः

ततो युधिष्ठिरस्य सानुजस्य पुनः काम्यकवनप्राप्तिः, तत्र तृणाबिन्दुवचनेन तदाश्रमे निवासः, मुनिदारैर्याज्ञसेन्याः सकौतुकं दर्शनमभिनन्दनं च , पाण्डवेषु मृगयांगतेषु जयद्रथेनाऽपहरणम्, मृगयानिवृत्तेषु तेषु युधिष्ठिराज्ञया भीमार्जुनाभ्यां तस्य निग्रहणम्, युधिष्ठिरसमीपमानयनम्, युधिष्ठिरस्य तद्भर्त्सनं मोचनं चेत्यादि वर्णितं वीक्ष्यते सम्प्रति। तद्वर्णनं यथा -

"भूपोऽपि तां वनभुवं प्रविहाय भेजे
भूयः सकाम्यकतपोवन मण्डलानि ।

---

१ साहित्यदर्पण तृतीयपरिच्छेदे कारिका २६१

किमीरनाशमुदिताखिलतापसौघ-
स्वाध्यायघोष मुखरीकृतदिङ्मुखानि ।।'

'मृदुकिमिर्वनवल्लिकन्दमूले-
र्विहितातिथ्य विधिः स तत्र पार्थः ।
स्थितिमाचरतिस्म हृष्टचेता -
स्तृणबिन्दोर्वचने तपोवने च ।।'

'प्रासूत या सदसि पट्टपटीरसंख्याः
सैणासमागतवतीति सकौतुकाक्ष्यः ।
वेणीघरामुटजसीमनि याज्ञसेनीं-
विस्मित्य वल्कलंवसं ददृशुर्गृहिण्यः ।।'

'तत्तादृशोकरेऽस्या विविधवनभवं कन्दमूलोपहारं
दातुं लज्जापबोधैस्तलमभिममृशुर्धर्मदारामुनीनाम् ।
यस्य स्पर्शानुभावादविरतमुदितैः पायसैरेव दिव्यैः
किंचिद्भाण्डं वनान्ते तनुमधिजनस्यातनोदन्यथार्थम् ।।'

'दिशि दिशि मृगयायै तेषु यातेषु जातु
स्वयमुटजमवाप्तः सोमकेन्द्रात्मजायाः ।
लपनशशिमहिम्नालघ्वयमास वेलाम्
तरलितमकराक्रस्तल्दाणां सिन्धुराजः ।।'

'ततः क्रन्दन्तीं कुररीमिव रुदतीमेनां पुरस्तादधिरोप्य सूतकरतोत्रलब्धा दण्डाध्यापित वेगतन्त्रपारीणार्थ्येन घनतरजघनपयोधरभाराक्रमण विनम्रीकृत पूर्व भागतया पार्थदर्शन शंकया निकुब्जीभूयेव धावता शतांगेन निमिष चूर्णितपरिणाहवनीपथं जयद्रथं पुनरप्याश्रमपदमाश्रित्यनिशमितप्रमदावार्तेन पार्थेन दावार्तेनेव पूर्वजेन नियुक्तो जटारिकिरीटिनो रोषविद्रुमलता किसलयैरिवलोचनैः शरासनं विकीर्य मृगया निवृत्तमात्रेण चरणेन द्रुतमन्वद्रवताम् ।।'

'ततः क्षणादेव कर्णपूरवनकुसुमस्रक्सौरभजिघ्रत्सैन्धवीकेन घर्मांभ्रेयेन सर्पता

कृतोद्धृतत्रासतया विनय विपर्ययो विधामिवकृष्णां विमुच्य कृतपलायनः स दुर्मेधाः पुनः प्रधावितेन मागधविरोधिना रुरुधे ।।'

'कचेगृहीत्वामुवि पातितस्य
कठोरवारिश्यपरस्य शत्रोः ।
तंताडने मारुतिरात्मपाणेः
सञ्चात्रयामास पदं च वामम् ।।'

'सौवीरमर्तुरथमूर्धनि पङ्क्तिबूडाः
कल्पाः क्षुरेण पवनात्मभुवा विरेजुः ।
दर्वालमूमकलिका इव शाम्यतोऽन्त-
स्त्रासाम्बुभिः स्मरशरानलपङ्क्तिकस्य ।।'

'विमानमनुजनीतं वीक्ष्य भूयः स्मितास्यः
कृतनति शिरसं तं केशसारे हृतेऽपि ।
त्वदसुहरणभागें दुःशलेवाऽगलानः
क्वचिदपि कुरुमैवं कुत्सितेत्युत्ससर्ज ।।'

'दीनधीः स तपसा हिमशैले वृक्षपर्थं पुरहराद्गृह्यालोः ।
लाददे वरमथो विजयौ द्राक्तन्तरेण युधिपाण्डवरोधम् ।।'

'पार्थाश्च कृच्छ्रादुतीर्णा पार्क्तीं प्राप्यरेमिरे ।
हेमन्तात्पद्मिनीं मुक्तां हेलेरिव करांकुराः ।।'

एवं युधिष्ठिरस्य काम्यकवनगमनम्, तत्र तस्य मुनिभिरभिनन्दनम्, तृणाबिन्दुतपोवनेवासः, मुनिपत्नीभिद्रौपद्याः सकौतुकमीक्षणमभिनन्दनं च , पाण्डवेषु मृगयायैगतेषु द्रौपद्या जयद्रथेनकृतापहरणम्, मृगयावि निवृत्तेषु पाण्डवेषु-
~~कृष्णायाश्चकथनेकृष्णायाश्चकथनेकृष्णायाश्चकथनेक

वापरायणत्वेन च विप्राणां स्वाध्यायानुरागोऽतिथिजनस्नेहश्च हर्षादिभावैः परिपुष्टावगम्येते ।

तृणाबिन्दुमुनिवचनेन तदीयतपोवने युधिष्ठिरस्य निवासस्वीकारेण-तद्विषया भक्तिः प्रतीयते । युधिष्ठिरादरेण तृणाबिन्दोरपि तस्मिन् वात्सल्यं प्रतीयते । उभयत्र हर्षवृत्त्यादयः संचारिभावाः प्रपोषकाः । अत्र तृणाबिन्दुवचन-वनाभ्यां वाक्यैक्यात् तुल्ययोगितालंकारो वर्णनसंदोपमानुगुणत्वेन चमत्कारकः ।

मुनिपत्नीनां द्रौपदी-सकौतुकरूक्मकुण्डलिका-दर्शनानुभावितः स्मृति-हर्षौत्सुक्यादि-पोषितो विस्मयस्तद्गतोऽद्भुतरसतां प्रतिपद्यते ।

दिव्यपायसेनातिथिजनपोषिकायाश्चाक्षय्यायाः कृते वन्यकन्दमूल समर्पणेन मुनिपत्नीनां लज्जाभावो दर्शितस्तत्र अतिथिजनतनोः पुष्टत्वस्य अन्यथार्थत्वेन(अतनुत्वेन) प्रकारेण वर्णितत्वात् पर्यायोक्तालंकारः ।

जयद्रथस्य द्रौपदीहरणेनौत्सुक्यवापल्यध्वनिः । तत्र वेला-मकरांक-सिन्धुराजशब्दगतश्लेषमूलकं सांगरूपकम्, उपमोत्प्रेक्षा , दूषितशब्दगतोऽत्यन्ततिरस्कृतवाच्याख्यो ध्वनिश्चातितरां चमत्कुर्वन्ति । सवेगत्वस्य वेगतन्त्रपारीणत्व रूपप्रकारान्तरेण कथनात् पर्यायोक्तमपि च रुचिरतरम् ।

भीमधनञ्जययोरनुधावनबाणवर्षणादिना विभावितः पार्वतीत्यागपूर्वं कपलायनेनानुभावितस्त्रासावेगादि संचारिभावैश्च पोषितो जयद्रथगतो भयस्थायिभावो भयानकरसतां प्रतिपद्यते । तत्रोपमाऽनुगुणा ।

बाणाहत्या हस्तपादाभ्यां ताडनेन च भीमार्जुनगतो जयद्रथविषयकः क्रोध उग्रतादिभावैः पोषितो रौद्ररसतया परिणमति । तत्रोपमोत्प्रेक्षासांगरूपकाणां चमत्कारिता ।

युधिष्ठिरसमीपमानीतस्य जयद्रथस्य वदननमनादिना लज्जाभावध्वनिः । युधिष्ठिरस्य सस्मितं तद्-त्यागेन च तद्-मर्त्सनया धृतिमत्यसूयाभावः व्यज्यन्ते । तत्र जयद्रथस्य मुण्डनेन केशभाराभावेऽपि शिरोनमनेन विभावना, रूपकमालोपश्च-चमत्कुर्वन्ति ।

कृच्छ्रमुक्तपार्षतीप्राप्त्या विभावेन रमणेनानुभावेन च पाण्डवगतो
हर्षोध्वन्यते । तत्र समस्तवस्तु विषया सावयवोपमा चमत्कारिणी ।

सर्वत्रा प्यत्र भक्ति-वात्सल्याद्भुत-वीर-रौद्र-भयानकरसेषु मधुरा कोमलापरुषा च रचना , माधुर्यौजः प्रसाद व्यञ्जिनी, तदनुसारिण एव च वृत्त्यनुप्रासाः सातिशयं चमत्कारका एव ।

(२६) कर्णस्य इन्द्राय कवचकुण्डलदानम्

कदाचित् सहस्ररश्मिः सहस्त्रादास्यार्जुनहित काम्यया तत्प्रतिपन्थिनः कर्णात् कवचकुण्डलाभियाचनाभिलाषं मनोगतं वीक्ष्य 'माऽभूत् कर्णस्याऽहितम्' इति बुद्ध्वा कर्णमुपेत्य सत्यां तथाचनायां निषेधितव्यमितिसूर्यकृतधर्मतः कर्णस्य तदुत्तरदानं चेत्यादि वर्णितं कविना विविच्यते सम्प्रति , तद्वर्णनं यथा -

'तत्रान्तरे ज्वलितवर्णवपुःकदाचि-
दर्धेषु शब्द इव कर्णमुपेत्य रात्रौ ।
भासांपतिः कृतनमस्करणाय तस्मै
प्रेम्णाऽऽशिषः प्रणिजगादयवीयसीं गाम् ।।'

'अहमहर्गणिनाथोऽनुग्रहान्मे पृथाया-
मयिजननमगास्त्वं वत्स ! कोशोगुणानाम् ।
तदिदमिहरहस्यं शासनं गृह्यतां मे
तनयकुशलयोगे तातपादा यतन्ते ।।'

'मुखसन्धानविश्लेषमुक्ते कवच कुण्डले ।
तवैते भूषणेशोभां तन्वाते परदुर्लभाम् ।।'

'एतानि याचितुमिहद्विजवेषगूढं
मा लब्धकाममसराधिपतिं कृथास्त्वम् ।

'आज्ञापथात् स्खलसि चेदणुमात्रमस्मा-
द्ध्यो भविष्यसि सुखेन रणे रिपूणाम् ।।'
'इत्थं निशम्य तां वाचं राघेयो रचितस्मितः ।
हर्षार्द्रांजलिनासाकमाददे प्रतिभाषितुम् ।।'
'तवार्यमेति प्रथिते पि शब्दे
मयार्यं । मेत्यर्थिजनेषु दानम् ।
निषेधरूपे निदधातिपार्गे
पदं कथं वा भवदीय जिह्वा ।।'
'सततं स्वदर्थिसदसे बहुदातुं
सकुतूहलस्य पुरुषास्य जगत्याम् ।
उदकौर्मिका काष्ठताहिविभूषा
कनकौर्मिका तु परमंगुलिभारः ।।'
'दिवसेश यः खलु शयः प्रतिकर्तुं
घृतलालसो भवति नार्थिषु दैन्यम् ।
प्रतिपादयेत्स तु कथं पुरुषस्य
प्रतिकूलवर्णनिजनामपदार्थम् ।।'
'यश एव जन्मफलमात्मवता-
मिदमेषितव्यमति यत्नभरात् ।
अपि भूषितं गुणगणैरपरै-
रयशस्विनं त जगदाद्रियते ।।'
'व्यापृतावितरणोपनिषत्सु
व्याहरन्ति हि विपश्चिदधीशाः ।
स्पर्शनेन रहितावितिहेतो-
लुब्धकं च कृपणं च समानौ ।।'
'दृष्टे वनीपकजने वदनं स्मितेन
दानाम्बुनाकृतलं यशसा दिशश्च ।

शुम्भीकरोति विवशः स्वयमेव दाता
कस्तादृशं प्रतिनिवर्तयितुं क्षमेत ।।'

'वाञ्छामनाप्तेन वनीपकेन
सहासवो दातृजनस्य यान्ति ।
तदद्य शक्रार्चनया धृतासो -
र्भावी वधो मे परमो हि लाभः ।।'

'यद्गोष्ठीप्रतिहारभूतलशिलाचिन्तामणिः कल्पका
यस्माऽऽरामवृक्षद्रुमाश्च सुरभिः सा होमधेनुः पुनः ।
तादृग्याचति चेदुपेत्य मघवा संपूर्यतत्कामनां
त्रैलोक्यस्य वदान्यसंसदुपरिस्यामेष मे निश्चयः ।।'

'वीक्ष्यवन्ध्यवचनोऽपि गुणज्ञो
विस्मयाऽम्बुनिधिवीचिषु मग्नः ।
पद्मबन्धुरितिवादिनमेनं,
पाटलस्मितरुचिर्गिरमूचे ।।'

'अये वत्स ! भवतो भाषितं कामभेवस्थूललक्षाणाममूदृशं तु तव मतं पुनरपि मम रसनां निदेशावशेषपथपान्थां निर्मिमीते ।।'

'अथवा त्वं शुनासीरस्य मनीषितस्य पूरणात्पूर्वमेव पूर्वदेवगर्वनिर्वापणपूर्वहृतया कुलिशमपि चिरारूढकलंकाङ्कुरजर्जरितधाराशतमातन्वतीं तदीयां शक्तिमाघत्स्वेति ।।'

'ततस्तथेति परमर्द्धीकृत्य पश्यतस्तनूजस्य समक्षमचिरेण स मरीचिमाली-वरमाचलशिखरपरिशीलितविहारमिहापि समाचचार ।।'

एवं कर्णं प्रति सूर्यस्येन्द्राय कवचकुण्डलदाननिषेधः, कर्णस्य तदुत्तरे-दानावश्यकतायाः प्रतिपादनं चेत्यादि सम्यग्वर्णितं कुशलेन कविना ।

'तत्र सूर्यस्य कर्णं प्रतिहित कथनार्थं स्वयमागमनतत्कथनादिभिरनुभावितः मतिहर्षशंकादिभिः संचारिभावैश्च पोषितः कर्णविषयकोऽनुरागो वा

त्सल्यरसतया पर्यवस्यन्नास्वाद्यते सहृदयैः । अत्र रूपकमर्थान्तरन्यासः, आशिषो नन्तरम् इत्यस्य आशिषोयवीयसीम् गाम् ऊचे इति प्रकारान्तरेण कथनात् पर्यायोक्तम् च चमत्कारकाणि । माधुर्यगुणानुगुणा रचना तदनुसारिणश्च छेकवृत्त्यनुप्रासाऽपि चमत्कारिण एव ।

कर्णस्य सूर्यनमस्कारेणेन सूर्यं प्रति हर्षादिभिरुन्मेषैर्भावैः पोषितो भक्तिभावो ध्वन्यते । इन्द्रमाहात्म्योद्दीपितः दानमहत्वप्रतिपादनादिनानुभावितो हर्षधृतिस्मृतिमत्यादि संचारिभावपोषितः कवच कुण्डलदानविषयकः कर्णगत उत्साहो दानवीररसतया परिणमंश्चमत्करोतितरां सुतराम् । तत्र सूर्यवाचकस्य अर्यमा पदस्य दातृत्वाभिप्रायगर्भितत्वात् कवि परिकरः, ततो दातुर्यस्मणो दाननिषेधकर्तृत्व संसर्गस्याननुरूपत्वाद् विषमम्, सूर्यस्य कथनेनौचित्यप्रतिपादनादाक्षेपः, कनकोर्मिकात उदकोर्मिकायाः कृ करघृतायाः उत्कर्ष प्रतिपादनाद् व्यतिरेकः 'यशो इत्यस्य शय्यं प्रतिकूलवर्णनिजनामपदार्थत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम्, यशसोजन्मफलत्वस्य तदेषितव्यत्वे अयशस्वित्वस्य च जगदाद्रियमाणत्वाभावे हेतुत्वावगत्या काव्यलिङ्गद्वयम्, 'स्पर्शने शब्दगतश्लेषमूलक 'दान-स्पर्शैः भेदातिशयोक्त्यनुप्राणितोपमा, वदन-करतल-दिगात्मक कर्मकारकाणां स्मित-दानाम्बु-यशोरूपकरणकारकैर्यथाक्रममन्वयात् यथासंख्यालंकारः, उभयेश्चतेः-शुभ्रीकरण क्रियारूपैकधर्मसम्बन्धात् तुल्ययोगिता च , चिन्तामणि- कल्पवृक्ष-कामधेनूनां क्रमशो मघवता समाप्रतिहारभूतलाशिलात्वेन आरामवृक्षद्रुमत्वेन होमधेनुत्वेन चोपयुज्यमानत्वेन तद्धैभव प्रतिपादनात् उदात्तालंकारः, तेन च मघवतोऽनन्यसामान्योत्कर्षप्रतीत्या व्यतिरेकध्वनिः , तेन च कर्णस्येन्द्रविषयकमहात्म्यज्ञानपूर्वक गाढानुरागः प्रतीयमानस्तद्गते कवचकुण्डलवितरणोत्साहे गुणीभावाद् प्रेयोलंकारः परमां चमत्कृतिमादधाति सहृदयजनमनःसु । प्रसादमाधुर्यौजोगुणानुगुणाः कोमलमधुर-संयुक्तपरुषवर्णघटिता रचनास्तदनुसारिण एव च वृत्त्यनुप्रासा अपि चमत्कारिण एवात्र ।

ततः कर्णस्य लोकोत्तरदानोत्साहेन विभावितस्य विस्मयोद्बुद्धमात्रत्वाद् तद्विषयकसूर्यगतवात्सल्ये संचारिभावत्वम् । कर्णप्रशंसयापि सूर्यगतवात्सल्यपोष

कस्य हर्षभावस्य ध्वनिः । तवमतं मां पुनर्वक्तुं प्रेरयति' इति वस्तुनः 'ममरसनां निदेशावशेषपथपान्थां निर्भिमीते' इति प्रकारान्तरेण कथनात् , 'मरीचिमाली तिरोबभूवे'तिवस्तुनश्च 'चरमाचलशिखरपरिशीलितविहारं समाचचारे' इति प्रकारान्तरेण कथनात् पर्यायोक्तध्वनिः, पुनर्वचनावसरे सूर्यस्य स्मितरुचेः पाटलत्वकथनात् श्वेतायां स्मितरुचौ रक्तवर्णाधरविभायाः संक्रम प्रतीत्या तद्गुणालंकारः ध्वनिः , रूपकं चात्रसातिशयां चमत्कृतिमादधति । अत्र ओजो गुणस्य पथे-मनाग् विस्मयानुगुणतया गद्ये च वात्सल्येऽपि गद्योचित्यानुगुणतया च तदनुसारिणी रचना तथैव च लेकवृत्त्यनुप्रासा अपि चमत्कुर्वन्तितरां सुतरामत्र ।

एतदनन्तरं कर्णं प्राप्य मघवतःस्ततः कवचकुण्डलयाचना, कर्णस्य च-तद्वितरणं वीक्ष्यते सम्प्रति , तद्वर्णनं यथा -

'कतिपयदिने काले याते ततो भृगुतां पतिः
सदसि तनयं भानोरेत्यार्थिचाटुशताकुले ।
कवचमतुलं वाचाऽयाचत्सकुण्डलमादरा-
दयमपि तथेत्युक्त्वा शक्तिं ततो जगृहेऽद्भुताम् ।।'

'नकारमेते वहतो रिपू ममेत्यमर्षभारादिव शस्त्रधारया ।
सुतो रवेर्दंशनकर्णविष्टने स्वयं समुत्कृत्य ददौ विडौजसे ।।'

'निशम्य तत्कल्पतरोर्द्रियां च्युतैश्चिरार्जितैस्त्यागयशोभरैरिव ।
सुपर्वमुक्तैः कुसुमैर्न केवलं तदङ्गनिर्वाणाश्च सुगन्धयोऽभवन् ।।'

'जाग्रत्सु सर्वविषयेषु तस्य कर्णस्य कर्णः पुनरर्थिने स्वाम् ।
हिरण्मयीं यद्दिततार भूषां तन्नामसाम्यं ध्रुवमत्र हेतुः ।।'

'आपृच्छ्य तं तदनुनाकपतिः सुधर्मा-
मासाद्य सिद्धमरुदप्सरसां समाजे ।
प्राशंसदस्य चरितं सविधे सुरम्या
रोमन्थमप्यविगणय्य निशम्यमानम् ।।'

एवं शक्रस्य कर्णं प्रति कवच-कुण्डलयाचना, तस्मै तस्य तद्दानम्, तेन-सुरगणमुक्तकुसुमानां वर्षा, शक्रेण तस्य सुरसमाजे प्रशंसा चावर्ण्यन्त कविना को

शलेन ।

तत्र कर्णस्य शक्रप्रार्थनोद्दीपितः स्वतनुकर्तनकवचकुण्डलोत्कर्षणादित्वेष्टानुभावितः कवचकुण्डलवितरणविषयक उत्साहोहर्षधृतिमत्यादि संचारिभावपोषितो दानवीररसतया परिणतश्चमत्कारभूमिमभूमिः सन् समास्वाद्यते सहृदयैः । उत्प्रेक्षालंकाराः, सुगन्धित्वधर्मस्य कर्णाङ्गेन अर्बुदेशैश्च योगात् तुल्ययोगितालंकारो वृत्त्यनुप्रासश्चाप्यत्र चमत्कारिणः ।

सुरपतेः कर्णप्रशंसया तद्विषयको रतिभावो हर्षादिव्यभिचारिसहकृतः प्रतीयते । सुरपतिकृततत्प्रशंसया च सुरभेरोमन्थत्यागपूर्वकतच्छ्रवणेन तद्गतः कर्णदानविषयको जाड्यध्वनिसहकृतो विस्मयोऽद्भुतरसतया पर्यवस्यति । तत्र श्लेषवृत्त्यनुप्रासौ रमणीयौ ।

(२७) पाण्डवानाम् प्रविदितवासः

काम्यकद्वैतवनादिषु विपिनेषु निवसतां तीर्थमुनिजनान् परिचरतां च पाण्डवानां द्वादशवर्षाणि व्यतीतानि, त्रयोदशे वर्षे च तैरन्याविदितैर्वस्तव्यम् द्यूतकैतवलिपणानुसारम्, अतोऽज्ञाता वस्तुं प्रवृत्ताः पार्थाः सर्वाननुचरान् द्विजगणान् द्वैतवनं च विहाय विराट्राजस्य मत्स्यपुरीं ययुः । तत्रादौ बहिःपुर्याः स्मशानस्थशमीतरोः स्वास्त्राणि निदधुः ततस्ते विराटसभां प्रापुरित्यादिवर्णितं वीक्ष्यते सम्प्रति, तद्वर्णनं यथा -

"तदनु ते भरता व्यवधाश्रयाच्चरमहायनलंघनकादिणाः ।
अतिचिरं रविमाण्डविवर्धितानुचरानिव तामटवीं जहुः ।।"

"तदनु तदनुचितवचनसाहसाधिगतवाहसाधिपवपुषं नहुषमोदरदमुनेः शमनाय चतुरर्णविवारिकादिणाः पारिकादिणाः अगस्त्यस्य कोपोदिताच्छापोदधेरुत्तरैरुचार्य तस्मादेव विस्मारितनिजविधिदुर्विलसितया तया वरारोहया सह दुःस

हनिजधामपिधानवेदग्ध्यमभ्यसितुकामा इव ते मात्स्यनगरस्य नातिसमीपपितृवनगामिनीं शमीममजन् ।।`

`क्रमेण मत्स्येन्द्रपुरोपकण्ठे करालमापुः पितृकाननं ते ।
वधूद्वहां भाविनि सूतजानां वधप्रदेशस्य दिदृक्षयेव ।।`
`शमीतरौ तत्र निधाय शस्त्रममी तदन्तर्ज्वलदग्निकल्पम् ।
जगाहिरे वेषमिवान्यमुच्चैर्ध्वजं विराटस्य पुरं प्रवीराः ।।`
`समत्वमुत्कर्षनिकर्षयोः स्वं संदर्शयिष्यन्निव धर्मसूनुः ।
क्रमेण हंसः परमो हि भूत्वा कंकत्वमापद्यत सद्य एव ।।`
`पुरार्जुनस्येव यतित्वमेतदस्यापि कामप्यपरां सपत्नीम् ।
संपादयित्वं नु मनेति कृष्णा तथाविधं वीक्ष्य नृपं शशंके ।।`
`त्रिदण्डकाषायकमण्डलूज्ज्वलो
जपस्फुरद्दन्तपटो युधिष्ठिरः ।
उपानहं दारुमयीं पदास्पृशन्
उपासदत्संसदि मेदिनीश्वरम् ।।`
`दृष्ट्वा तमुत्थितो मात्स्यो धृतप्रश्रयविस्मयः ।
तत्पादपांसुं फालान्ते चक्रे तं पुनरासने ।।`
`दुर्वीरगर्वसिहनोऽथ भीमो दर्वीकर्मादर्शितसूदभावः ।
शोणाधरालोलुपसूतसूनोः प्राणानिलान्पारयितुं किलासीत् ।।`
`पितुः सखायं परिपूज्यमेवं दिने दिने तृप्तिमिवोपनेतुम् ।
सूदाकृतिः सोऽपि ययौ विराटं वृकोदरो वृत्तशरावपाणिः ।।`
`कुलशैलशृङ्ग इव जृम्भमे तदा
कुरुकुञ्जरे चलति कम्पनं मुहुः ।
वसुधैव तस्य न पुरस्य केवलं
बहति स्म कीचकभुजाप्यदक्षिणा ।।`
`महानसे वर्तयतो जनस्य स पतिः कृतः ।
महानसेवर्तयतो मात्स्यं स्वादुषु कर्मसु ।।`

स्त्रीत्वेन योगः खलु वीरगर्ह्यः पुंस्त्वेन चान्तःपुरवासविघ्नः ।
इतीव षण्ढत्वमवश्यभाव्यमादाय पार्थोऽपि जगाम मात्स्यम् ।।'

' कृतवसतिरसौ नृपस्य कन्या
गृहभुवि नर्तयति स्म तालपाणिः ।
मधुकरमुखरौ लता वनान्ते
मलयगिरेरिव मारुतप्ररोहः ।।'

' मम ध्वजाङ्कस्य बिभर्ति संज्ञामसाविति प्रेमभरादुपेतः ।
प्रसूनधन्वेव सुतोऽपि माद्र्या मत्स्येन्द्रमागत्य ननाम मूर्ध्ना ।।'

' तं पश्यन्कुलं राजा तन्द्रालुर्दृङ्निमेषेणे ।
निजां मत्स्येश्वराभिख्यां निनाय प्रकटार्थताम् ।।'

' कशां करे स बिभ्राणं शशाङ्ककुलभूषणम् ।
मन्दुरापतिमालेने तं दुरापपराक्रमम् ।।'

' अस्मच्चिरोषितवसतेर्भवितान्तहेतु-
रेतैर्दिनैः कतिपयैरिति जानतेव ।
पाण्डोः सुतेन वरमेण च तस्य राज्ञो
वृन्दं गत्वा प्रजुगुपे पृथुकौतुकेन ।।'

' आगता नगरवासवाक्ष्या देवतेव विपिनस्य पार्षती ।
केलिपुष्पमिव दन्तकङ्कतं बिभ्रती नृपवधूमुपागमत् ।।'

' सैरन्ध्रीरूपभाजोऽस्या जातिनैच्यान्नतं शिरः ।
सुदेष्णायास्तु तां दृष्ट्वा सुन्दरीं व्रीलगौरवात् ।।'

' वनभुव इव माधवोदयश्रीर्मनुजपतेरवरोधयोषितोऽसौ ।
अनुदिनमखिलालिलालनीयैरलमकरोच्चिलकैरतीव दृश्यैः ।।'

' अनन्तरं स्ववशा पाञ्चालसुता मृशमादृतकङ्कतमतिरसोत्पादनचणमधिकशो मनाटनपाटवमाश्रितगन्धर्वकुलमाकलितगोत्रान्तरं पञ्चधा रूपमुद्भ्रयन्ती पञ्चापि पती ननुयातवती ।।'

' विमतानपि तर्जित्वा विवासमिव दायकः ।

अद्यैष्यकुरुतावृत्तिमवनीन्द्रेण धर्मभूः ।। ६।१-२१ ।।

एवं वर्षपर्यन्तमज्ञातवासाय पार्थानां मत्स्यपुराभिगमनम्, पितृवनशमीतरौ स्वशस्त्रनिक्षेपणम्, वेषान्तरमाधाय नृपसमीपोपस्थानम्, द्रौपद्याः नृपपत्नीसविधगमनम्, स्व स्वकार्याणां सन्तोषजनकत्वेन निर्वहणं च वर्णितं कविनाति वैदग्ध्येन ।

सर्वत्रैवात्र पाण्डवानां द्वादशवर्षयापन इव गुप्तवासेन त्रयोदशवर्षयापनेऽपि गूढ उत्साहो वेषान्तराधानादिभिरनुभावितः धृतिप्रभृति संचारिभावैश्च पोषितो वीररसो गाढगूढतया ध्वन्यते ।

विराटनृपतिकन्यानां शिक्षणे तदन्तःपुरे षण्ढरूपेण स्थितस्यापार्जुनस्य तन्नर्तन सहकृततालपाणित्वगायनमुखरत्वादिभिरनुभावितो हर्षादिसंचारिभावपोषितः स्नेहो वात्सल्यतया परिणमति । तत्र माधुर्यानुगुणा मृदुमधुरवर्णघटितौ लाटवृत्त्यनुप्रासौ, उपमा, उत्प्रेक्षा, काव्यलिङ्गम्, ~~लाटानुप्रासो वृत्त्यनुप्रासो~~, लघुयमकम्, पादयमकम् च नितरां चमत्कुर्वन्ति ।

एवं भीमस्य सूतसुतप्राणानिलप्राणाफलोत्प्रेक्षाया उत्थापके हेतौ-दवीकारादर्शितसूदभावे पदगतश्लेषमूलकाऽभेदाऽतिशयोक्तिः, भीमकीचकनिष्किकम्पनस्यपुरवसुधया कीचकभुजया च योगात् तुल्ययोगिता, पञ्चबालसुतायास्तत्पतिभिः पञ्चभिरपि सादृश्ये पञ्चत्वा स्वरूपोच्चयनस्य हेतुत्वावगत्याकाव्यलिङ्गम्, तस्मिंश्च आवृतकङ्कत प्रभृतिपदगतश्लेषमूलकाभेदातिशयोक्तिरंगता, मत्स्यराजपत्नीशिरसोन्नीतगौरवनतत्वेपरमसुन्दर्याद्रौपद्या विशेषण-विषयागुणीभूतस्य सौन्दर्यस्य हेतुत्वावगमात् सम्पन्नेन काव्यलिङ्गालंकारेण राजपत्नीतो द्रौपद्याः सौन्दर्यकृतपरमोत्कर्षप्रतीत्या व्यतिरेकध्वनिः । हंसस्य ककृत्व प्राप्ताककशब्दगतश्लेषमूलको विरोधाभासः, ककपादपासुककल्पकर्मणोः कालान्तासनरूपाधिकरणयोश्चैककरणरूपक्रिययायोगात् तुल्ययोगिता, निर्निमेषत्वस्य दृन्निमेषणतन्द्रालुत्वरूपप्रकारान्तरेण वर्णनात् पर्यायोक्तम्, तद्घटितवाक्यार्थस्य मत्स्यराजनिर्निमेषदर्शनरूपवाक्यार्थे मत्स्येश्वरशब्दगतश्लेषमूलकाभेदातिशयोक्तिघटिते हेतुत्वावगत्या काव्यलिङ्गम्, वृक्षाविशेष-विशेषकोभयवाचकतिलकशब्दगतश्लेषमूलकाभेदा-

तिशयोक्त्यनुप्राणितामाधवोदयाश्रिया सैरन्ध्र्युपमा, चात्रविशेषतश्चमत्कुर्वन्ति तरां सुमनोजनमानसेषु ।

(२८) भीमस्य कीचकवधः

अथ कविना कृतं कीचकवधवर्णनं विविच्यते, तद्वर्णनं यथा-

'अथैकदा सुदेष्णायाः प्रेषणेन मदनोत्सवानुसवाय वासवायतनसदृशं वास गृहमागतां कौरवाधमकरपरिक्लेशादिव विवर्णेन वाससावगुण्ठितार्द्धां नखशिखरम्परासेवनलालसतयेव प्रपदसंमुखीनलोचननीलोत्पलां राजीवशंक्रयानुव्रजता राजहंसेनेव-राजतभाजनेन राजितकराङ्गुलां पाञ्चालसुतां विलोक्य पञ्चेषुबाणवञ्चितविवेको मञ्चादुपसृत्य किंचिदाकुञ्चितमौलिः कीचको नीचां वाचमुवाच,-'

'इदमेव हि सद्म भद्रभद्रं यदिदानीं तव मार्दवज्ञमद्रेः ।
अयमप्यहमस्मि धन्यधन्यो हरिणादिव । त्वदपाङ्गगोचरो यः ।।'

'नतगात्रि ! यदागमेन मां नयसे मोदगिरेरधित्यकाम् ।
चिरपुण्यफलोदयश्रियां दिवसो वैजननस्तदेष मे ।।'

'अन्वर्थंता मालिनि ! तेऽभिधायाः कुतो न जागर्त्यधुना कचेषु ।
तस्याः प्रतीपोदितवर्णवृत्तेरर्थोऽथवालंकरणं श्रयीषु ।।'

'बाह्वोरनल्पदत्वस्य बाले ते कारणे उभे ।
एकं तयोस्तु लावण्यमितरन्नावगम्यते ।।'

'अरम्यभावं भजते जगत्यामङ्गेषु किंचिद्विकलोऽपि लोकः ।
संदृश्यसे त्वं निखिलेन बाले मध्येन हीनापि मनोज्ञमूर्तिः ।।'

'न पल्लवस्तन्वि ! न विद्रुमश्च ताम्रोऽधरोऽयं तव बिम्बमेव ।
चन्द्रो यदि स्यात्तव वक्त्रमेतच्चन्द्रस्य बिम्बं सहजं हि लोके ।।'

"कान्ते ! तवाननमिदं कमलावलीषु
भ्रष्टुं पुरा सरसि विस्मृतमेव धात्रा ।
पश्चाद्विचिन्तितवता तदुपान्तभागे
संदृश्यते विरचितः खलु हंसपादः ।।"

"कूपस्य तीरे निवसन्नपायं को वा न धत्ते वद कोमलाङ्गि ! ।
त्वन्नाभिकूपस्य वसन्हि तीरे न दृश्यते संप्रति मध्यभागः ।।"

"अदीर्णवक्त्रशशिसेवनलाभतोषा-
दालिङ्गितामिव मिथो रजनेस्त्रियामीम् ।
त्रेधा विभज्य रचितां वहसेऽद्य वेणीं
कं सिंहसंहननमूहयितुं विमुक्तम् ।।"

"सुदति ! बहुपरागधूसरापि त्वमपहरस्यधुना मनो मदीयम् ।
रतिरिव हरकोपदह्यमानस्मरतनुधूमलतावृताखिलाङ्गी ।।"

"त्वामुल्लसद्बिम्बफलाधरां मे मामप्यकर्णावशुगमर्दितं ते ।
विद्रुक्रमस्मिन्विजने प्रदेशे पद्मानने ! पातुमयं हि कालः ।।"

"इति तस्य तादृशं वचनमाकर्ण्यापि चित्तचम्पकमंजरीञ्चरीकायमाणपञ्चशर विकारा पञ्चाली गिरमिमां स्मररागतिमिरकौमुदीमुदीरयामास,-"

"अन्तःपुरेषु विहरन्नयि कीचक ! त्वं
सैरन्ध्र्ये स्पृहयसीति विगर्ह्यमेतत् ।
रम्येषु कल्पकुसुमेषु चरन्द्विरेफो
रज्येत किं पितृवनद्रुमगुच्छिकायाम् ? ।।"

"प्रतायते चपलता पतिवर्त्नीषु या हठात् ।
इष्टार्थसिद्धेः प्रागेव दिष्टान्तं दोग्धि सा नृणाम् ।।

"गन्धर्वाः सन्ति मे कान्ता बाधते यान्स्मरोऽनिशम् ।
स्वाभिख्यां स्वास्त्रसंख्यां च वहन्तीतीर्ष्यया किल । ।"

"दौष्यतामवतंसास्ते स्वरूपं नैव केवलम् ।
गोपायन्त्यप्रमोदेन परेभ्यो मां च मानिनः ।।"

"तदद्य पथि वामेऽस्मिन्संप्रतिष्ठासुसे यदि ।
ते तुं त्वां वारयिष्यन्ति दक्षिणो विधृतक्रुधः ।।"
"~~सकोऽविवृतेऽक्षिकपिव्यक्तकृष्टिकपक्षः~~ ।।"
"इत्युक्त्वा सा महिषी कुरूणां शैशुषीमती ।
सद्यो निववृते तस्माच्चित्तवृत्तिरिवात्मनः ।।"
"यथा यथाऽस्या धावन्त्या रिंखणेन पदोर्युगम् ।
तथा तथा रुषारुण्यं तस्याश्चक्षुरपि ।।"
"कृष्णा ततस्तेन कृतान्तभासा केशे गृहीता भुवि पातिता सा ।
पर्यायबद्धोद्यमविश्रमाभ्यां पद्भ्यां कराभ्यामपि पर्यधावि ।।"
"प्रहारमीत्यैव तदा मृगाक्ष्या नाड्यां क्वचिद्यान्तरधत्त संज्ञा ।
उद्गम्य सा दूरतरं प्रहर्तुर्दृढाट्यामास दृशौ चिराय ।।"
"तदनु शनैः शनैरुत्सृष्टो धरातलपरागधूसरिमतिरोहितदीधितितयावा सरापलपितमहौषधिलतेव विलुलितचूर्णकुन्तलतया चक्रवाताकुलीकृतवालधूलिका - चमरीमृगीव सूतान्ववायजनपदस्य प्रथमामीति वाधामिवबाष्पधारामुत्सृजन्ती क्व चिदपि शरणमलभमाना सा याज्ञसेनी मन्दं मन्दं तत्रैव भवनमभिजगाम ।।"
"दृष्ट्वा तां ज्ञातवृत्तान्तो देव्या गेहे चरंजनः ।
नयनाम्भो विमुमुचे न तु किंचन भाषितम् ।।" ६।२१-४२।।

एवं विराटराजपत्न्या सुदेष्णाया आसवानयनाय प्रेषिताया: पाञ्चाल्या: कीचकावासगमनम्, तत्र तां दृष्ट्वा कामातुरस्य कीचकस्य तां प्रतिचाटूक्तयः स्वाभिलाषप्रकाशश्च, द्रौपद्यास्तद्भर्त्सनम्, ततः प्रतिनिवर्तमानायाश्च तस्याः कीचकेन प्रताडनं च सम्यग् वर्णितमस्ति कविना त्र ।

तत्र प्रारम्भे पाञ्चाल्या विवर्णवाससावगुण्ठितत्वेऽप्यतिरोभावनीयसौन्दर्य सुषमा शालीनतापरमोत्कर्षश्च साधुवर्णितौ , तत्रोत्प्रेक्षावृत्त्यनुप्रासाश्चाददति कमपि चमत्कारम् ।

पाञ्चालसुतासौन्दर्यहृतस्थानाद्युद्दीपनविभावैर्विभाविता तद्विषया कीचकरतिः तदीयचाटूक्तिभिरनुभाविता हर्षौत्सुक्यादि संचारिभावपोषिता शृङ्गार

रसाभासतां प्रतिपद्यते , पार्श्वात्यास्तस्मिन्ननुरक्तत्वात्, तदननुरक्तत्वस्य लक्ष्य त स्याः कीचकमत्सनेनाऽवगमात् । अननुरक्तनायिकायां रतेः प्रवृत्तत्वे तस्या अनौचित्यम्, अनौचित्यप्रवृत्तत्वे च रसभावानामाभासरूपत्वमुक्तं साहित्यदर्पणे, यथा ' रतौ तथाऽनुभयनिष्ठायां -- -- शृंगारेऽनौचित्यम्' इति ' अनौचित्य प्रवृत्तत्व आभासौ रसभावयोः' इति च ।(१)

तत्र कीचकवाक्योक्तिषु प्रारम्भे स्वसद्मनोभद्रत्वस्य स्थापनात् अन्यदीय स्य च तन्निषेधात् परिसंख्या, त्वयादृष्टः इत्यस्य त्वदपाङ्गगोचरत्वरूपेण प्रकारान्तरेण अद्यमे चिरपुण्यफलान्युद्धितानि इत्यस्य च तद्भेजनरूपप्रकारान्तरेणकथनात् च पर्यायोक्तद्वयम् । सद्मनो तिभद्रत्वे तस्य मालिनीचरणमार्दवज्ञत्वस्य स्व स्या तिधन्यत्वे मालिनीनयनगोचरत्वस्य स्वस्य तदागमनहेतुकमोदपर्वताधित्यका-नयने वर्तमानदिवसस्य चिरपुण्यफलोदयवेजननत्वस्य च हेतुत्वावगत्या काव्यलिंग-त्रयम् , ' अत्र सद्मनि तवमृदुचरणावागतौ' इत्यर्थस्य ' एतत् सद्मतवचरणमार्दव-ज्ञम्' इति प्रकारान्तरेण ' मां मोदातिशयं प्रापयसी' त्यर्थस्य च ' मां मोदगि रेराधित्यकां नयसि' इति प्रकारान्तरेण कथनात् पर्यायोक्तद्वयम् । मोदगिरिरूपकं च चमत्करोतितराम् ।

' तव कचाः कुसुमालंकृताः कथं न सन्ति' इत्यर्थस्य ' हेमालिनि ! त व कचेषु त्वदभिधाया अन्वर्थता कथं न जागर्तीति' प्रकारान्तरेण ' नीलिमा'-इत्यर्थस्य च ' तव मालिनीत्यभिधायाः प्रतीयोदित्वर्णोक्तेरर्थः' इति प्रकारा न्तरेण चवर्णनात् पर्यायोक्तद्वयम् ।

' तव बाहवोलावण्यमनर्घुदं(कामोत्पादकम्) इति विधेयविधया कार्यमनर्घ्र गदत्वमनुक्त्वा तदीयकारणस्य लावण्यस्योक्तत्वादेकाप्रस्तुतप्रशंसा , ' तव बाहवो र्नर्घुदत्वस्य (केयूरराहित्यस्य) कारणं किम्' इति कारणभूतं प्रश्नमनुक्त्वा त त्कार्यभूतस्य तत्कारणज्ञत्वाभावस्यकथनाच्च अपराअप्रस्तुतप्रशंसा । तत्र च ' अन गद' शब्दगतश्लेषो विशेतश्चमत्कारकः ।

' मध्येन हीनापि मनोज्ञमूर्तिः' इत्यत्र ' मनोज्ञताया: कारणस्य सम ध्यत्वस्याभावेऽपि कार्यस्य मनोज्ञत्वस्य वर्णनाद् विभावनालंकारः , तेनेतरेभ्य

(१) साहित्यदर्पण टिकका-२६२, २६३, २६४ ॥

स्तस्याऽसौन्दर्योत्कर्षाध्वननाद् व्यतिरेकालंकारो व्यज्यते ।

मुखवर्णने 'तवायमधरो बिम्बमेव, अस्यमुखचन्द्रसहजत्वात्' इत्यनुमानालंकारः, तत्र बिम्बगतश्लेषमूलकाभेदातिशयोक्तेः, बिम्बचन्द्ररूपकयोः, अधरस्य पल्लवचिह्नमत्वनिषेधादपह्नुतिद्वयस्य च नितरामेव चमत्कारिता ।

तत्रैव 'तवाऽऽननं कमलम्' इत्याननस्य कमलाभेदरूपकारणमनुक्त्वा 'इदं तवाऽऽननं कमलावलीषुन्नष्टव्यम्' इति कार्यस्योक्तत्वादप्रस्तुतप्रशंसा, तस्याश्च 'तवाऽऽननं धात्राकमलावलीषु न्नष्टुविस्मृतम्, तत्र हंसपादस्य दर्शनात्' इत्यनुमानालंकारेऽगता, एवं 'हंसपाद' शब्दगतश्लेषमूलका भेदातिशयोक्तेरपि तत्राऽगता । अप्रस्तुतप्रशंसया मुखस्यकमलाभेदव्यञ्जनाद् रूपकध्वनिश्चमत्करोतितराम् ।

मध्यभागस्य सत्वेऽपि तदभावकथनादसम्बन्धातिशयोक्तिः, नाभिकूपरूपकं च तयोश्च नाभिकूपनिकटस्थमध्यभागापायस्य सामान्येनार्थेन समर्थनादर्थान्तन्यासेऽगतापि चमत्कारिणी ।

वेणीवर्णने 'इयं केनचित् सिंहसंहनेन पुंसावियुक्ता, वेणीधरत्वात्' इत्यनुमानालंकारः, तत्र च वक्त्रे शशिरूपकस्य वेण्यां त्रियामात्रियामीत्वोत्प्रेक्षायाश्चाऽगता, केन वियुक्तासीतिकारणे प्रष्टव्ये किं विरहप्रयुक्तं तव वेणीधारणमिति कार्यप्रश्नादप्रस्तुतप्रशंसा, तस्यामनुमानस्याऽगता चमत्करोतितराम् ।

अङ्गलावण्यवर्णने 'परागधूसरितत्वरूपकारणस्य सत्वे तत्कार्यस्य मनोहारित्वाभावस्यानुत्पन्नत्वात् विशेषोक्तिः, तस्यारत्युपमाया अङ्गता । विशेषोक्त्या मालिन्यङ्गलावण्यस्य बाधकाबाधितत्वरूपः कोऽप्युत्कर्षातिशयो ध्वन्यते ।

विजनेऽस्मिन् प्रदेशे आवयोः संभोगस्यायंकाल इति कीचकवचने 'पानकाले प्रदेशविजनत्वस्य हेतुत्वावगत्या काव्यलिङ्गम्, उल्लसद्बिम्बफलाधरोति मालिनी विशेषणस्य तत्पानयोग्यत्वाभिप्रायगर्भित्वात्, अनङ्गाङ्गमर्दितेति कीचक विशेषणस्य च तत्पानावश्यकताभिप्रायगर्भितत्वात् परिकरद्वयम्, 'पातुं' पदगतपानरक्षणात्मकक्रियाद्वयसमुल्लेखः पातुं पदगतपानरक्षणक्रिययोर्हेतुमतोरक्रमादक्रमातिशयोक्तिः श्लेषानुप्राणितम्, एवमेतानि अङ्गाङ्गिभावेन संकीर्यसुतरां चमत्कुर्वन्तितरां सचेतोजनमनःसु ।

कीचकस्य चाटूक्तिरूपकारणस्य सत्वेऽपि मालिन्याः पञ्चशरविकार-रूपकार्यस्यानुदयवर्णनाद् विशेषोक्तिः, चम्पकमञ्जर्या चञ्चरीकस्येव मालिनीचित्ते पञ्चशरविकारस्यात्यन्ताभावो व्यङ्ग्य उभयो रूपमाप्रयोजको धर्मश्च मालिन्याः परमशालीनतोत्कर्षं ध्वनयतः । मालिन्याः कीचकं प्रति स्मररागतिमिरकौमुदी रूपगिर उदीरणे चित्तचम्पकमञ्जरीचञ्चरीकायमाणपञ्चशरविकारैस्तिलद्विशेषणत्वेन गत्या काव्यलिङ्गम् युक्तत्वद्योतकत्वात् परिकरः तत्राङ्गभूतं परम्परितरूपकं चातितरामेव हरन्ति सुमनोजनमनांसि ।

कीचकवचनानन्तरं मालिन्यास्तद्भर्त्सना वचने कीचकस्यान्तःपुरविहार रूपकारणस्य सत्वेऽपि सैरन्ध्रीस्पृहान्यूना भावरूपकार्यानुदयस्योक्त्या विशेषोक्तिः, अन्तःपुरविहारिणः कीचकस्य सैरन्ध्रीस्पृहायाः कल्पकुसुमचारिणो द्विरेफस्य पितृवनद्रुमशुच्छिकारागितायाश्च बिम्बप्रतिबिम्बभावाद् दृष्टान्तालंकारश्च कीचकविषयकासूयाभावध्वनौ सुतरामानुगुण्यमाचरतः ।

"मयि तव चापल्यं मृत्युदायि स्यादे" ति विशेषे वक्तव्ये "पतिपत्नीषु चपलते" त्यादि सामान्योक्त्या अप्रस्तुतप्रशंसा, चपलताया इष्टार्थसिद्धिसाधनत्वेन मतायास्तद्विपरीतदृष्टान्तसाधकत्वेन कार्यकारणयोः संसर्गस्यानुरूपत्वाद् विषमम् चेति द्वयोरपि मालिनीगतोऽयभाव ध्वनावनुकूलता ।

मालिन्याः स्वपतीनां स्मरसुन्दरत्ववीरवरत्वाभ्यां प्रतिपादनेन "त्वं तेषां पुरो न किमपि वस्त्वसी" ति कीचकस्य स्वपत्यपेक्षायाऽतितुच्छत्वध्वननाद् व्यतिरेकध्वनिः, स च कीचकविषयकासूयाभावध्वनावानुगुण्यमाचरति। तत्रैव स्मरस्य गन्धर्वबाधने ईर्ष्यायाः हेतुत्वेनोत्प्रेक्षा, तत्र चैकवहनक्रियया स्वामिख्या स्वास्त्रसंख्योर्योगात् तुल्ययोगितयाङ्गाङ्गितया संकीर्णेऽपि भावध्वनावानुकूल्यमाचरतः ।

गन्धर्वकर्तृकगोपनक्रियायाः स्वरूपमालिनीभ्यां योगात् तुल्ययोगिता, तिरोधापन-रक्षणोभयार्थबोधकगोपनशब्दगतश्लेषः, वामपथप्रस्थानेनाशक्यदक्षिणपथगमनरूप व्यापारस्यापि सिद्धत्वोक्त्या विशेषालंकारः, सव्येतर-यम पुरयायीत्युभयार्थबोधकदक्षिणशब्दगतश्लेषश्च, परस्परमङ्गाङ्गितया संकीर्णाः की

(१) भेदाभिन्नयोर्बिम्बत्वं दृष्टान्तस्य तत्त्वं हि। कुवलयानन्दः ५२ ॥

चक्रविषयके ध्वन्यमान औग्र्यभावेऽनुकूलतामादधति ।

कीचकगृहान्निवृत्तौ पाञ्चालदुहितुर्धावनेन कम्पनमूर्मिभिः कीचक विषय कं भयं त्रासावेगमोहशंकादिभावैः पोषितं भयानकरसतां भजते। पाञ्चाली प्रतीपत्व वाक्यारुष्याद्युद्दीपितः + अनुधावननयनारुण्यताडनादिभिरनुभावितः चापल्यौग्र्यामर्षादिसंचारिभावैश्च पोषितः कीचकगतः पाञ्चालीविषयकः क्रोधो रौद्ररसतामाश्रयति ।

ताडितायाः पाञ्चाल्या धूलिधूसरत्व-विलुलितचूर्णकुन्तलत्व-रोदनाश्रुमोचनादिभिरनुभावैः विषाददैन्यावेगाश्च मोचितद्रौपदीगतं ध्वन्यते ।

पाञ्चालीदुरवस्थादर्शनखिन्नस्य विराटराजान्तःपुरपरिजनस्याश्रुमोचनेन विषादो ध्वन्यते ।

सर्वत्रैवात्र शृङ्गाराभास-रौद्र-भयानक करुणरसेषु यथायुक्तमुपनागरैर्मधुरपरुषकोमलवर्णैरचिता वृत्त्यनुप्रासाः, छेकानुप्रासाः, उपमाः, उत्प्रेक्षाश्च प्रकृतवृत्तानुरूप्यमेवानुसरन्ति ।

इतः परं याज्ञसेन्यामहानसशायिनं भीमं प्रति रात्रौ स्वपराभवनिवेदनं भीमेनकृतदाश्वासनम्, कीचकस्य पुनर्द्रौपदीं प्रति चाटूक्तयः, भीमकथनानुसारं द्रौपद्याः कीचकं प्रति रात्रौ मेलनाय ताण्डवपण्डपसंकेतस्थानसूचनम्, संकेतभुविभीमेनकृतः कीचकस्यवधः, कीचकबन्धूनांकीचकरसशानयानस्तम्भदारुणिद्रौपदीबन्धनं कीचक चितायां तत्पातनंच, द्रौपद्याहाहाकारं श्रुत्वा आगतेन भीमेन कीचकबन्धूनां नाशः एतदादिकृतं वर्णनं विविच्यते , तत्रादौ तद्वर्णनं यथा -

" सायं महानसशयं शनकैर्ययौ सा
भीमं रहः पृथुशरावकृतोपधानम् ।
धूमाधिरोहमलिनं वसनं वसानं
नीलाम्बुवाहपरिवीतमिवाचलेन्द्रम् ॥"

" निःश्वस्य दीर्घमियमन्तिकमावसन्ती
स्पृष्टेन बाष्पसलिलैः कुचयोः स्खलद्भिः ।
बुद्धेन तेन किमिदं व्यसनं तवेति

पृष्ठा सगद्गदमुवाच विषण्णचेताः ।।`

`किमथ मे दुःखमपत्रपा का को वीरपत्नीत्वपदेऽभिमानः ।
सर्वं गतं कीचकनीचशृंगादुद्धृत्वा कचे ताडनमाप्तवत्याः ।।`

`मयि दुःखेन घुष्यन्त्यां मत्स्याधिपसभान्तरे ।
तथ्यस्येव यतेरासीद्धर्मसूनोरुपेक्षाणम् ।।`

`बुभुक्षाते न जीवन्तीं मारितामेव मां नृपः ।
कल्याणं खलु तत्तस्य कंकभावभृतोऽधुना ।।`

`तस्यैवाज्ञापथे जग्नं चरता स्खलनं विना ।
भवता खलु निःशंकं परामर्श्यां कचे परैः ।।`

`दुःशासनादप्यधिकादुपराधः सूतात्मजोऽयं न निहन्यते चेत् ।
आधे कचग्राहिणि नाशितेऽपि समायुषौ वेणिमवेहि मां च ।।`

`अयं बलीयानिति ते मतिश्चेदन्यत्र मां क्वापि नयस्व मीरुम् ।
अज्ञातवासेऽप्यनुभूयमाने रक्ष्यं हि शीलं कुलपालिकानाम् ।।`

`श्रुत्वा वधूगिरमिति स्वपनोपनीतं
शोणत्वमदिणा पुनरुक्तयतो रुषापि ।
तस्याधरोष्ठमुदवेपत निर्गमिष्य-
त्क्रूरारिरावलिविमर्दनशंकयेव ।।`

`गदापि सा तिष्ठतु मे गभीरा नियुद्धशास्त्रं मयि निर्मिमाणे ।
क्व मेघवाहः क्व महालवाहः क्व तार्क्ष्यवाहः क्व महोक्षवाहः ।।`

`हिडिम्बकिर्मीरबृहद्रथात्मभूबकादिहत्यातरतस्त्रपाम्बुधौ ।
निमज्जनायैव भुजस्य मेऽधुना सृजस्युं कीचकसूदनोद्यमम् ।।`

`तथाप्युदास्यमेतस्मिन्ननौपयिकमेव मे ।
क्रोदीयानपि वध्योऽकुलस्त्रीघ्वहमहीयसाम् ।।`

`अये तन्वि ! किं बहुना ,-`

`तस्यासृजा यावकिताङ्घ्रिमस्थ्नां चूर्णेन कर्पूरमथाङ्गरागाम् ।
अकीर्तिमष्टाप्यभिलिप्तनेत्रीमलंकरिष्ये मम वीरलक्ष्मीम् ।।`

"वीरश्रियः शिल्पमिदं मयोक्तं यथार्थभावादनुभूय सद्यः ।
सैरन्ध्रिकाचारविनोदनेऽपि तवानुसारेच्छुमवेहि मां त्वम् ।।"
"त्वया पुनश्च स्मितपूर्ववाचा प्रत्युत्पतन्त्येव कटाक्षखेलैः ।
क्रीडां विधातुं क्रियतामुषस्य संकेतभूस्ताण्डवमण्डपोऽयम् ।।" ६।४३-५७।।

"इत्याश्वासितवतः पत्युरनुमत्या पुनरागत्य नैपथ्यभवनमधिशयालोस्तस्याश्चेतसः पलायमानस्य भयभरस्य सापि विभावरी सहचरी बभूव ।।" ६।५७।गद्यम् ।

एवं भीमं प्रति पञ्चालदुहितुः कीचककृतस्वपराभवनिवेदनम्, भीमकृतं तस्या आश्वासनम्, कीचकस्य पञ्चालदुहितरं प्रति पुनश्चाटुवचनानिभीमपरामर्शानुसारं पञ्चाल्याः कीचकाय रात्रौ मेलितुं सुस्थली संकेतभूसूचनम् , संकेतस्थले समागतस्य कीचकस्य भीमेन वधः , कीचकवधनिमित्तं मालिनीमवगत्यकीचकावरजैः कीचकहन्तिमयानस्तम्भदारुणि तां बध्वापितृवनं नीतायास्तस्याः कीचकचितायां-यातनम्, पञ्चाल्या हा हाकारश्रवणेनागतस्य भीमस्य कीचकानुजानां विनाशनम् चेति महत्या प्रौढ्या वर्णितमस्ति कुशलेन कविना ।

तत्र पञ्चाल्या भीमं प्रति कीचककृतस्वपराभववर्णने कीचककृतदुर्व्यवहारस्मरणविभावितशुचनादिनानुभाविता दैन्यविषादग्लान्यादयोभावाध्वन्यन्ते । भीमस्याचलेन्द्रेणोपमया तन्महत्वाभिव्यक्तिद्वाराविपन्नजनाश्रयणीयत्वं ध्वन्यते ।

द्रौपदीवचने कीचकताडनस्य सर्वनाशे, तस्य च दुःखापन्नपाण्डवीरपत्नीत्वाभिमानाग्राह्यत्वे हेतुत्वावगत्या काव्यलिंगध्वनिः ।

मत्स्याधिपसभान्तरे दुःखेन घुष्यन्त्या द्रौपद्या कङ्कत्वापन्नस्य युधिष्ठिरस्य उपेक्षाया तस्यास्तस्मिन्नसूयाभावध्वनिः । तस्मिंश्च भारतत्वप्रकारकद्रौपदीविषयके युधिष्ठिरबुभुक्षायां तदीयकङ्कत्वापन्नत्वस्य हेतुत्वावगत्याकाव्यलिंगम्, सन्यासिविशेष- गृध्रवाचककङ्कशब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितं नितरामनुगुणम् ।

"ज्येष्ठभ्रातुराज्ञापथे चरता भवता(च भीमेन) निःशङ्कमहं परैः कचेपरामर्श्या अत्र द्रौपद्याः स्वस्याः परैरपरामृश्यत्वेऽपि परामृश्यत्वकथनात् अत्यन्त विरुद्धत्वाद्व्याघात

तिरस्कृतवाच्यरूपोलक्षणामूलो सर्वथाऽस्पराभृश्यत्वातिशयध्वनिः, तेन च द्रौपदीगतामर्षकोपध्वनिः ।

कीचकनाशाभावे वेण्याः स्वस्याः(द्रौपद्याः)श्च समायुष्टवरूपैकधर्मयोगात् तुल्ययोगिता अर्थान्तरन्यासश्च पञ्चाल्याः कोपामर्षादिभावान् पोषयन्ति।

द्रौपदी वचनश्रवणानन्तरं तद्वचनोद्दीपितः कीचकवध विषयको भीमोत्साहस्तन्नयनारुण्य- कीचकनाशनिश्चयवचनादिभिरनुभावितो मर्षाग्रतक्रोधादिभिः संचारिभावैश्च पोषितोवीररसतां प्रपद्यते । अत्र भीमस्य द्रौपदीं प्रत्याश्वासनवचने उत्प्रेक्षादीपरूपकार्थान्तरन्यासाश्चितरामनुगुणाः ।

हिडिम्बादिहन्तुर्मम(भीमस्य) कीचकहननेनत्रपाम्बुधिनिमज्जनमेवस्यात्, इति रूपकघटितवस्तुना कीचकोमदग्रे तितुच्छे इत्यादौपालंकारध्वनिः ।

द्रौपद्या भीमेनाश्वासितत्वे तद्गतकीचकमयेन सहविमादरीपलायाम्बभूवे तिवस्तुनः पलायमानभयमरसहचरीभावनकर्तृत्वेन रूपेण विभावयाः कथनात् पर्यायोक्तम्, तेनोक्तसहोक्तलंकारस्य ध्वनिः । पलायनगतनाश-गमनरूपार्थद्वयश्लेष मूलका, भेदातिशयोक्तिश्चात्रास्ति ।

'अन्येद्युरेत्य चपलः पुनरब्रवीत्तां
मुग्धे ! प्रसीद मयि तुल्यनिशारपात्रे ।
केलीषु हार्दकलहेषु च केशकृष्टिं
पादाहतिं च दधती कुरु वैरशुद्धिम् ।।'

'पञ्च सन्तु घवास्तेभ्यो मुञ्च भीतिं मयि स्थिते ।
पञ्चवक्त्रे वने दृष्टे किं चरेयुः परे मृगाः ? ।।'

'मस्तकेऽञ्जलिपद्मस्य मम सम्प्रतिमानिनि !
प्रसादशंसिनं पादं प्रसन्नचारिणम् ।।'

'इत्थमतिवेलं प्रलपन्तमेनं प्रत्यरुचिमुखसाचीकरणो त्रपाहेतुकतामभिनयन्ती सा कुन्तीस्तुषा तृषार्तिभूतेव वचनमिदं किंचिदुर्व्वयाञ्चकार,-

'अयि भद्र ! जगदिदमारुद्रं द्रावयितुमनिद्राणस्य शम्बरद्विषः शासनमुद्रणाय हृष्यति को वा जनः ? । किन्तु इयानेवप्रस्तुते वस्तुनि विशेषः ।।'

(१) प्रकाशेऽयं ध्वनीभूतव्यङ्ग्यं काव्यमेव दृश्यते ।
यत्र व्यङ्ग्यान्वये काव्यं गौणत्वं स्यात् प्रकर्षवत् ।। ३५ । २ अलंकारः ।

"स्त्रीपुंसयोर्भाविनटौ मिथौ यौ पूर्वस्तयोर्व्रीडतिरः पटेन ।
चिरायते स्पष्टयितुं स्वरूपं परस्तु तन्नोत्सहतेऽनुमन्तुम् ।।"

"किं बहुना,-

"गीर्भिस्तवाद्य चतुराभिरुदर्यस्ते मे
गन्धर्वदण्डनभयं त्वदवाप्तिविघ्नः ।
तस्माद्भजस्व रतिसौख्यभराय रात्रौ
भीमे स्थिते तमसि नर्तनगेहमध्यम् ।।"

"तथेव लीलां तनवानि तत्र तल्पान्तसीमानमुपेयुषस्ते ।
मूयो यथान्तःपुरिकाजनानां वक्त्रं न पश्येरतिसुन्दरीणाम् ।।"

"एवं मृगाक्ष्या वचनमाधिकस्य दाक्षिण्यपटलीभूतकर्णपुटः प्रमोदार्णवजलमानुषायमाणहृदयः सदनमासाद्य समालम्भनपूर्वेण सलिलावगाहेन विरजीकृताङ्गोऽयमन्तरिव बहिरप्यवलिप्तः, ततः परं भगवति निजतनयप्रजावतीमनोरथसिद्धिं संपादयितुमिव कमलबन्धौ चरमसिन्धौ निमग्ने ध्वान्ते निरुध्यमानदिविषदध्वान्ते ~~ध्वान्तकदम्बे~~ संभृतसंभोगसंविधानः कीचको निर्वर्तितराजभोजनपरिवेषणाकृत्येन पवमानसूनुना प्रविष्टपूर्वं तदेव नर्तनमण्डपमगाहत ।।"

"क्व सालभञ्जिकेवासि मालिनि । स्तम्भपार्श्वगा ।
इत्यसौ भीमतल्पान्तमासासाद शनैः शनैः ।।"

"ततस्तं वल्लोऽपि स्त्रैणसमुचितेन कण्ठस्वरेण मृदुलमेवं जगाद,-

"वधूशतमनादृत्य मामपेक्ष्य यदागतः ।
तत्त्वां बहिर्गतप्राणं मन्यते मे मनोऽधुना ।।"

"एवमुक्तवते वृकोदराय कीचकः पुनरपि वाचं मृदुपदामुपदां विदधे ।।"

"गन्धर्वानपि दयितांस्तृणाय मत्वा
मामेवं रतिविषये प्रतीक्षसे यत् ।
दैवत्वादपि सुतनु ! त्वयाधुना मे
मर्त्यत्वं जगति महत्तरं हि कल्पम् ।।"

"सुराधिकत्वेऽपि पदे वितीर्णे मह्यं तवास्त्येव हि कृत्यशेषः ।

कुरुष्व मेरोरधिके कुचे मां सुधाधिकं पाय्य ममाधरोष्ठम् ।।'

'इत्थं ससान्त्ववचनोदयमर्धमुच्चै-

मारोढुमानमितपूर्वतनोः स भीमः ।

मुष्ट्याहतिं निटिलसीम्नि चकार शत्रो-

रायुर्लिपिं शिथिलयन्निव धातृदत्ताम् ।।'

'गम्भीरयेताः स तु कीचकोऽपि गन्धर्वबुद्ध्या प्रतिहन्तुमेनम् ।

सद्यो भविष्यः शवतादशायाः साधारणीमेव बबन्ध मुष्टिम् ।।'

'जवं भजन्तौ जयतर्षयन्तौ रुषं वहन्तौ रुधिरं किरन्तौ ।

परस्परं तौ पटुशब्दवन्तौ नियुद्धवन्तौ नितरामतान्तौ ।।'

'अट्टेलितारावमदीरयादमबीडाक्रश्लाघमवाटुगुम्फम् ।

अनुच्चनिःश्वासमहुंक्रियाकमनूतपूर्वं तदभूनियुद्धम् ।।'

'शिलीमुखैश्चित्तजवापपुष्टैर्दत्तानि रन्ध्राणि वपन्निजाङ्गे ।

समीरजातेन विधूनितोऽपि स कीचको नैव चुकूज किंचित् ।।'

'तस्मिन्नाहते निपतिते बकवैरिमुष्ट्या

रङ्गेण तेन रभकम्पि चलत्पताकम् ।

पार्थाच्चिरेण परिशीलितमुद्गराद्यैः

कन्याजनैरभिविडम्बयतेव नाट्यम् ।।' ६।५८-७३ ।।

'तदनु तत्र मण्डपे पिण्डतया कृतं तस्य दस्योस्तरसं तरसा विलोक्य प्रहर्षवत्या पार्षत्या श्लाघापूर्वमाघ्रातभुजः कुरुव्याघ्रो निर्गत्य यथापुरमविकृतमानसो महानसोदरं प्रविश्य सुखेनाधिशिश्ये ।।' ६।७३। गद्यम् ।।

पुनरन्येद्युः कीचकस्य मालिनीसमीपमागत्योक्तेषु तच्चाटुवचनेषु अननुरक्तनायिकाविषयतया प्रतीयमानायाः कीचकरतिराभासरूपतैव । तत्र चापल्यादयो व्यभिचारिणोभावाः ।

तत्र 'मयि दृष्टे तव पक्ष्माऽपिवाः स्थातुं न शक्यन्ती'तिप्रस्तुत वक्तव्ये 'पङ्कजवक्त्रेवनेदृष्टे किं चरेयुः परागाः' इत्यप्रस्तुतस्य सदृशस्योक्त्या अप्रस्तुतप्रशंसा भीतिमोचने सुरामानुगुण्यमाचरति ।

'मालिनि ! ममस्तकेऽञ्जलिपद्मस्य सहचारिणं प्रसादशंसिनं पादं-प्रयच्छे' त्यत्र पादस्य अञ्जलिसहचारित्वकथनेन तस्य पद्मरूपत्वप्रतीत्या रूपकध्वनिः।

कीचकवाक्योक्त्यनन्तरं वीरपत्न्याद्रौपद्या वाक्चेष्टादिभिरनुभावितः धृतिमतिग्लान्यवहित्थादिभिः पोषितः कीचकपातन विषयक उत्साहो वीररसतांश्रयति । तत्र द्रौपद्याः स्वमुखस्यारुच्यासहिष्णुतयाकृतत्वेत्रपाहेतुकताभिनयेन व्याजोक्तिः , रुद्रादीनां क्षुद्रेण शक्रेणाहूतोऽतिशयित प्रभावप्रतीत्या व्यतिरेकध्वनिः । 'भीमे तमसि स्थिते' अत्र क्रमपरिवर्तनेन 'तमसिभीमे स्थिते' एवं जातायां याजनायां 'भीम' शब्दगतश्लेषेण 'मदीयताडनायाः फलं प्राप्यताम्' इति गूढोऽभिसन्धिरपि द्रौपद्याः स्वगतोध्वन्यते । द्रौपदीलीलाविधानस्य कीचककर्तृकान्तःपुरसुन्दरीमुखदर्शनाभावे हेतुत्वप्रत्यक्षात् काव्यलिङ्गम्, तेन द्रौपद्याः तदन्तःपुरसुन्दरीभ्यः द्रौपदीलीलायाश्च तल्लीलाभ्य उत्कर्षप्रतीत्याव्यतिरेकद्वयध्वनिः तथैव द्रौपदीगताभिसन्धिचारितार्थ्येन कीचकस्य अन्तःपुरसुन्दरीजनमुखदर्शनाभावे-तन्मरणरूपे हेतोः प्रतीत्या काव्यलिङ्गस्य ध्वनिरपि । एवमुत्प्रेक्षारूपकाण्यप्यानुगुण्येनोपात्तानिसन्ति चमत्कारकाणि ।

द्रौपदीवचनश्रवणाव्याभूढस्य कीचकस्य वर्णने रूपकोत्प्रेक्षाश्लेषयमकानां प्रकरणानुसारितया चमत्कारितैव । तच्चेष्टाभिश्च ध्वन्यते तद्गतौत्सुक्यभावः।

भीमस्य नर्तनगेहप्रवेश-श्लिष्टवचन-कीचकप्रहारपातनादिभिरनुभावैः धृत्यवहित्थामर्षौग्र्यक्रोधादि संचारिभावैश्च पोषितः कीचकमारणविषयक - उत्साहो वीररसतां प्रपद्यमानश्चमत्कारोतितरांतराम् ।

कीचकवचनचेष्टाभिश्च तद्गतहर्षौत्सुक्यचापल्यादिभावध्वनिः । कीचकस्य भीमेन सहनियुद्धोद्यमोत्साहस्यतादृशनीचपात्रगततया वीराभासतयैव परिणमति । क्रौग्र्यामर्षादयो व्यभिचारिणस्तत्र ।

तत्र भीमवचने 'कीचकस्य बहिर्गतप्राणरूपत्वेनाभिमानेने वधूशताऽनादरपूर्वकतदीयेतत्स्थानाऽऽगमनस्य हेतुत्वावगमनात् काव्यलिङ्गम् , प्राणरूपकस्यतत्रांगता, 'सुन्दरतरस्ववधूशतावमानस्य पारदारिकस्य च फलं स्वप्राणानां बहिर्गमनरूपमपिप्राप्यताम्' इति गूढोऽभिसन्धिरपि श्लेषेण सूच्यते स्वगतोभीमेन, तत्रच भीमेन कीचकमारणव्यापारात् प्रागेव तत्फलस्य तन्मारणरूपस्य श्लेषेण सू

चनात् कारणकार्ययोः पौर्वापर्यविपर्ययरूपात्यन्तातिशयोक्ति(१)रप्यत्र । कीचकस्य रन्ध्रविशिष्टत्वसमीरजातविधूनितत्वरूपहेतुसद्भावेऽपि कीचककूजनरूपकार्यानुदयाद्भिन्नक्रमोक्तिः 'शिलीमुखसमीरजातकीचक' शब्दगतश्लेषमूलकाभेदातिशयोक्तिश्चेतत्रानुकूलप्राणिका । एवमुत्प्रेक्षाः काव्यलिङ्गान्तराणियमकच्छेकानुप्रासावृत्यनुप्रासाश्चप्रस्तावाऽनुगुण्येनोपात्ता अपि चमत्कुर्वन्त्येव ।

" निपात्य मालिन्यपि तत्र शत्रुं चक्रन्द मीत्येव चलाग्रपाणिः ।
निशम्य तत्किं किमिति ब्रुवाणाः सर्वेऽपि तस्याऽवरजाः समेयुः ।।"

" विलोक्य तं भ्रातरमाशशोका मृत्युद्विषस्येव क्रियानपिण्डम् ।
ज्यायानिवामी विधुः स्थलीं तामङ्घ्रेण गुल्फद्वयसीं निजेन ।।"

" तदनु सोदरविपत्तिनिमित्तमियमेवेति रोषरुषितचेतसो निवेशितशवपिण्डभारस्य मूर्तीभीमस्य मुष्टिभिरिवनाभिलेलफलैरुपरुध्यमानपार्श्वस्य चरमविमानस्य स्तम्भदारुणि संदानितां कौन्तेयरीमन्तिनीं तिमिरमुदिरसौदामिनीभिः करदीपिकाभिर्दीप्यमानचक्षुःप्रभावकाशेन पथा पितृवनमुपनीयस्वकीयविवेकसंपत्त्या सह महत्यां चित्यामत्याधुः ।।"

" कान्देक तावदेहा चकितचकिता " हा नाथ हा नाथ ! जगत्प्राणभूत ! विपत्समयबन्धो ! सम्प्रति कान्तां रसवतीं परिगृह्य मुग्धामिमां कथं न गणयसि ?" इत्युच्चैररोदीत् ।।"

" तत्रास्या रुदितस्वनैरथ जवादाकारितो मारुतिः ।
सद्यनोर्वाभुबलाबलातमहसामीषल्लमैर्मीलनैः ।
ध्वान्ते गारुडमित्रिर्मक्षिपिशुनेऽप्योघं द्विषां धावितुं
ज्येष्ठस्याध्वनि दिव्यदृष्टिमकरोदोर्दर्पविद्भार्जुनेः ।।"

" निपातितान्स्वेन निरीक्ष्य तत्र सूतान्स वीरः सुषुनायते स्म ।
उत्पातमुद्रां दधता स्वपित्रा तालानिवारण्यतले विरुग्णान् ।।"

" गन्धर्वमीरुष्वनभेष्वितरेषु तत्र

---

१ अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे ।। ४३ । कुवलयानन्दे

विष्वक्पलायनपरेषु विमुक्तबन्धा ।
कृष्णा च कीचकरिपुश्च कृतप्रशंसा-
वन्योन्यमभ्यगमतां नगरं पुनस्तौ ।। ६।७४-७८ ।।

कीचकमरणानन्तरं तत्सम्बन्धिनां शोकः अश्रुपातनरोदनादिभिरनुभावितो दैन्यावेगादिसंचारिभावैः पोषितः करुणरसतां प्रपद्यते । कीचकानुजैर्नां द्रौपद्याः कीचकचरमयानस्तम्भदारुणिबन्धनेन तच्चितायां पातनेन च तद्गतरत्यभावो ध्वन्यते । द्रौपदी हाहाकारश्रवणेन आगतस्य भीमस्य द्रौपदीताडनोद्दीपितः कीचकबन्धुमारणादिचेष्टयाऽनुभावितस्तद्विषयकः क्रोधो औग्र्यामर्षादिसंचारिभिः पोषितो रौद्ररसतां प्रपद्यते । भीमस्य ताडनमारणादिचेष्टाभिः कीचकसम्बन्धिनां भयं पलायनाद्यनुभावैः त्रासावेगादि संचारिभिः पोषितं भयानकरसतां प्रपद्यते ।

तत्र कीचकपाते मालिन्या क्रन्दनद्वारास्वभीतिदर्शनेन स्वगतहर्षगोपनात् अवहित्थभावध्वनिः । स्मशानान्धकारस्य गाढत्वभित्तिर्भङ्गिपिशुनत्वेन तत्साहृश्यद्योतनादसंभवद्वस्तुसम्बन्धनिबन्धना निदर्शना । 'ज्येष्ठं कीचकमिव तदनुजानपि भीमो मारयामासे' ति वस्तुनः 'भीमो गाढान्धकारेऽपि ज्येष्ठास्या ऽध्वनि तदनुजानांधावितुं स्वदोर्दर्पसिद्धाञ्जनेर्दिव्यदृष्टिकरोदि' ति प्रकारान्तरेण कथनात् पर्यायोक्तम्, तस्मिन्नुक्त निदर्शनायाः सिद्धाञ्जनरूपकस्य, ध्वान्तेऽपि दिव्यदृष्टिरितिविभावनाविशेषोक्तिसन्देहसंकरस्य चाङ्गिता । कीचकसम्बन्धिनां पातेऽन्येषां गन्धर्वभीत्या पलायने भीमद्रौपद्योरन्योन्यप्रशंसया उभयगतो हर्षभावोध्वन्यते । अत्रान्ये रूपकोपमाकाव्यलिङ्गोत्प्रेक्षासहोक्तिश्लेषालंकाराः अपि तत्र तत्रानुगुण्येनोपात्ताः विदधत्येव किमपि रामणीयकम् ।

सर्वत्रैवात्र वीररौद्रभयानकादिरसानुसारिणी रचना तदनुगुणप्रसादमाधुर्यौजोगुणव्यञ्जकवर्णघटिताः वृत्त्यनुप्रासाश्च चमत्कारिण एव ।

एतदनन्तरं कीचकसम्बन्धिनां तद्वधजन्यः शोकः युधिष्ठिरादीनां निर्वृत्तिश्च वर्णिता विविच्यते तत्र तद्वर्णनं यथा -

'ततः क्षणादेव संध्यारुणिमकरम्बितेनाम्बरमणिबिम्बेन परिचुम्ब्यमा

नैशम्पायुधहरिदङ्गणे परितो रुधिरवीचीमुचा पिशितपिण्डेन कृतानुषङ्गं रङ्गविडम्बयति सति शुचा निरस्तमौलिभिर्विगलितवाग्भिर्निश्चलस्पन्दतनुभिर्निखिलैरपि पौरैर्नृपतिनिलयद्वारं निबिडितमभूत् ।

"वध्वस्तदा मण्डलशो निविष्टा रुन्धद्भिराशा रुरुदुर्विलापैः ।
महत्सु दुःखेषु विजृम्भितेषु मालिन्युपालम्भनमस्पृशद्भिः ।।"

"तस्मिन्दिने सन्निधिमागता सा कृष्णा दृशं कैकयराजपुत्र्याः ।
मङ्गीशलाकार्पणया विनापि मन्देतरामश्रुकणैरकार्षीत् ।।"

"तावद्युधिष्ठिरमुखा अपि वातजात-
व्याधूतकीचककुलाकुलकोटिभागम् ।
निर्यत्प्रियानयनवारिकरीपरीतं
संक्रेतशैलमधिरुह्य निशश्वसुस्ते ।। ६।७८-८१

अत्र कीचकं तदनुजांश्चालम्ब्य प्रवृत्तैः स्मर्यमाणतद्रूपगुणाद्युद्दीपितस्तद्ध्वादिगतो रोदनाद्युन्मोचनादिभिरनुभावितो विषाददैन्यादिभावैश्च पोषितः शोकः करुणारसतया परिणमति । तत्र प्रातर्वर्णने प्रातः सन्ध्यारुणहरिदङ्गणस्य कीचकपिशितपिण्डानुषक्तरक्तवर्णद्युतोपमा, मालिन्यभङ्गशलाकार्पणाख्यकारणविनापि श्रेदेष्यानयनयोरश्रुकणाविर्भावरूपकार्योदय वर्णनाद् विभावना, शोकानुगुणमाधुर्यानुसारिवर्णघटितवृत्त्यनुप्रासाश्च चमत्कारिणः ।

युधिष्ठिरादीनां गुप्तवाससमाप्त्यानिर्वृतौस्मृतिविषादधृत्यादिभावानिःश्वासादिभिरनुभाविताः संकीर्य ध्वन्यन्ते । तत्र भावानां सांकर्यं च तेषां परस्परस्य हेतुहेतुमद्भावेन । वातजात-कीचककोटिगतशब्दार्थश्लेषाः, तेषां च समस्तवस्तुविषयकसावयवश्लेषाख्यकारणता वृत्त्यनुप्रासाश्च चमत्कुर्वन्तितरांसुतराम् ।

(२६) दुर्योधनादीनांदौर्जन्यं पाण्डवैःसहकलहयोजना च

इतः परं दुर्योधनस्य पाण्डवनिन्दा वर्णिता विविच्यते, तद्वर्णनंयथा-

"तदनु विदितवार्तौ घार्तराष्ट्रश्चरेभ्यः
शुभगुणचरितेभ्यः सूतजानां शतस्य ।
वसतिमरिजनानां मत्स्यभूपालपुर्यां
हृदयमुकुलग्नेहैतुभिर्निश्चिकाय ।।"

"अन्येद्युर्द्यूतेश्वरसौबलाभ्यामास्थाय गोष्ठीमधिपः कुरूणाम् ।
भीष्माग्रगान्बन्धुजनान्विलोक्य गम्भीरमेवं गिरमाबभाषे ।।"

"भो भोः ! विदितं किं भवतामिदम् ? । सम्प्रति मात्स्यपुरे कामपिकामिनीं कामयमानः कीचकोऽपि निशि तस्याः पतिभिरदृश्यैः पञ्चभिर्गन्धर्वैरनुरहसि स्वसंख्यापदाभिधेयमनीयत । तस्यै पुनरपि द्रुह्यन्तस्तदनुजा अपि तथैवेतिकाचिदियं किंवदन्ती कर्णात्कर्णमधिरोहति । एवं चेदसंशयं सा चतुष्पथमण्डपस्तम्भसालभञ्जिकेव सर्वजनकरपरामर्शभाजनं पाञ्चालदुहिता । तस्याः पतिविडम्बका इति प्रवादभाजस्तेऽपि पुनरज्ञातवासिनः परेतपतिपवमानपाकशासनाश्विनां पारस्त्रैणेयाः । तेष्वपि द्वितीयेनैव बाहुबलशालिना वधूद्रुहां निहन्त्रा भवितव्यम् । अहो सर्वत्र विशृङ्खलमीषां दौःशील्यम् ।।"

"तथा हि ,-

"देशे जरासंधमुखैर्व्यरुन्धन्वनेऽपि किर्मीरहिडिम्बमुख्यैः ।
गूढे निवासेऽपि च सूतपुत्रैः क्व नु स्थितास्ते कलहं विनान्यैः ?।।६।८२-८४

एवं दुर्योधनस्य पाण्डवद्वेषः सुतरां वर्णितः कुशलेन कविना । तत्र पाण्डवपाञ्चालीनिन्दया तद्विषया असूया, तेषां मत्स्यपुर्यां वर्तमानत्वस्य निर्णयेन मतिः, हासेन चापल्यं, तेषामकिंचनत्वोक्त्या स्वस्यैश्वर्यशालिता प्रत्यायनेन गर्वो, दुर्योधनगतत्वेन प्रतीयते, तैश्च पुष्यन्नपि पाण्डवपराभवनविषयकस्तदुत्साहो ज्येष्ठभ्रातृत्वेन गुरौ युधिष्ठिरे अनौचित्येन प्रवृत्तत्वाद् वीरामासतयैव प्रतीयते । तत्र हृदये मुकुलारोपाद् रूपकम्, चरविशेषणस्य शुभगुणचरितस्य विश्वनीयत्वाभिप्रायगर्भितत्वात् परिकरः, मत्स्यपुरे पाण्डवस्थितौनिश्चये घार्तराष्ट्रस्य चरविदितवार्तत्वस्य हेतुत्वावगमात् काव्यलिङ्गम्, पञ्चभिर्गन्धर्वैः कीचको मारितः इत्यस्य स्वसंख्यापदाभिधेयतां नीत इति प्रकारान्तरेण कथ-

नात् पर्यायोक्तम्, द्रौपद्याश्चतुष्पथमण्डपसालभञ्जिकोपम्न, पाण्डवकर्तृकाया एकविरोधि क्रियाया जरासन्धादिभिरप्रकृतैर्योगात्, तुल्ययोगिता, तद् तद्घटित वाक्यार्थस्यपाण्डवानां सकलहत्वे हेतुत्वात् काव्यलिङ्गम्, छेकवृत्त्यनुप्रासाश्च चमत्कुर्वन्तितरांसुतरां सुमनोजनमनःसु ।

पाण्डवैः सह कलहाय सुशर्मप्रेषणम्

एतदनन्तरं दुर्योधनकृता पाण्डवैः सह कलहारम्भस्य कुयोजना कविवर्णिता विविच्यते तद्वर्णनं यथा-

'ततः, -

'संक्षोभे नगरस्य मत्स्यनृपतेर्यौद्धुं स्वयं निर्गता-
न्दृष्ट्वा तानवकीर्णिनो वितनुमो गच्छाधुना त्वं पुरः ।
इत्युक्तः कुरुभूभुजा सदसि गा हर्तुं त्रिगर्तेश्वर-
स्तस्यैवाप पुरीं दिनावधिरिवार्यम्णः प्रतीचीं दिशम् ।।'

'तत्र क्वचिदरुणतया निमग्नजमदग्निकुमारोष्णनिःश्वासवेगविलुलितविचित्रवीचीप्रपञ्चमिव स्यमन्तपञ्चकम्, क्वचिन्नीलतया मदकण्डूलवेतण्डशुण्डाविधूनितविटपमालमिव तमालकाननम्, क्वचिद्धवलतया मन्दरगिरिमथनविक्षोभितफेनकूटमिव क्षीरोदमध्यम्, उन्नमितलाङ्गूलम्, उद्गमितहुङ्कारम्, उल्ललितधूलीकम्, उद्दामघण्टारवं गोधनं दक्षिणेन पुरं व्यग्ररसैन्येन तेन कार्यमाणं निशम्य सेनाकुम्भिकुलगम्भीरबृंहितारम्भैर्मन्दिराग्रसिंहप्रतिच्छन्दवृन्दमुखकन्दरमौनव्रियमं विभिन्दन्, अनुकूलपवमानपुरोनाटितपटैर्वैरिभटजीवितहरणाय वैवस्वतमिवाह्वयद्भिः केतुदण्डैः परिमोटितगगनतटिनीतटविटपिवाटौ विराटोऽपि रणप्रयाणारम्भमाटीकत ।।'

'संख्याय यानेषु समारुरुक्षाकेलिस्पृशां कीचकबान्धवानाम् ।
अश्वप्रसङ्गेऽप्यभिधीयमानो गन्धर्वशब्दो गरलायते स्म ।।'

'सभ्यैश्च सूदैश्च तुरङ्गमैश्च गोपैश्च विज्ञापितवीर्यभूम्नः ।
दन्तानिवेन्द्रद्विरदः स पार्थान्वीरः पुरोधाय रुरोध शत्रुम् ।।'

॰ तृणकल्पमपि त्रिगर्तभूपं तमुपेक्ष्यैव तदा गवां कुलानि ।
सहदेवविलोकमात्रहर्षात्सहसा मात्स्यचमूसमीपमापुः ।।॰
॰ मौर्वीकुशाङ्कितकरावथ बद्धपङ्क्ती ।
मत्स्यत्रिगर्तवसुधाधिपयोरनीकौ ।
आध्मातशङ्खनिनदप्रणवप्रणाद-
मायोधनाध्ययनमद्भुतमारभेताम् ।।॰
॰ मत्स्येन्द्रमन्दिरमहानसभक्ष्यवृन्द-
स्वच्छन्दभक्षणरहस्यवदावदेन ।
क्ष्वेलारवेण बलसस्य तदा रिपूणां
चित्तं न केवलमकम्पिदिशो दशापि ।।॰
॰ उदये समरस्य सैनिकानामुभयेषामसिधेनवो ववल्गुः ।
निजनामपदापरार्घवाच्यं निखिलं ग्राहयितुं च रक्षितुं च ।।॰
॰ तावदम्बरपथादभिगन्तुस्तामनीकधरणीं शमनस्य ।
कासरादहरधीशतुरङ्गः कार्दिशीक इव दूरमयासीत् ।।॰
॰ पाटलीकृतपयोधरपङ्क्तिः प्रादुरास शनकैरथ संध्या ।
वासरस्य रजनेरपि सीम्नोर्मध्यभागकुरुविन्दशिलेव ।।॰
॰ संध्या बभौ सा समरे भटौघो बिम्बं विभिन्द्यादिति भीतिभारात् ।
विवस्वता विद्रवता विसृष्टा नभःस्थले दीप्तिरिवाग्निदेया ।।॰
॰ नभःपयोधेर्नवविद्रुमश्रीः क्रमेण संध्या क्रशिमानमाप ।
उद्यत्प्रकोपेरुभयेरनीकैर्विभज्य नीतेव विलोचनानि ।।
॰ ध्वजिनीजनितं रजोऽन्धकारं त्वरितं बान्धवकौतुकातिरेकात् ।
परिरब्धुमिवान्धकारसङ्घः परमार्थी रणचत्वरं जगाहे ।।॰
॰ संकोच्य पदातानेकेषु संविशत्स्वपि पत्रिषु ।
विस्तार्य पदातानपरे विचेरुस्तत्र पत्रिणः ।।॰
॰ शरवर्षभयेन तत्र युद्धे सकले कङ्कुले गतेऽपि दूरम् ।
प्रमदं दधदेक एव कङ्कः परिबभ्राम समीपपदापातः ।।॰

'अन्योन्यपट्टिशविघट्टभवैः स्फुलिंगराजिस्थले तिमिरकर्दमभाजियोधाः ।
आगामिनीषु समितिष्वधिकं विघातुमासन्प्रतापनवबीजमिवावपन्तः ।।'

'नलिनीशबिम्बपथचारमलब्ध्वा
नभसि भ्रमत्सु नववीरुरेषु ।
करपल्लवौ परिनिपीड्य मृगाक्ष्यः
कलहाय नक्तमशपन्त सुराणाम् ।।'

'राज हैमी रथकेतुराजी रज्यत्पटा रक्तकणैः प्रकीर्णैः ।
आकर्ण्य युद्धाद्भुतमर्धमार्गादिद्रष्टुं निवृत्ता चरमेव संध्या ।।'

'तत्र तावदरिशरनिकृत्तमत्तगजसप्तिरथपत्तिकुलनवरक्तसिक्तं रणचत्वरमनुभूय भूयसा रोषेण संवर्तसमवर्तिसमवर्तिसमूर्तिर्हृदि नर्तितधूर्तधार्तराष्ट्रशासनवार्तुस्त्रैगर्तः कैवर्त इव मत्स्यवक्रवर्तिनमाहर्तुं मुहूर्तादुपावर्तत ।।'

'मानिनामचरमोऽथ सुशर्मा मध्यवर्तिनमनीकपयोधेः ।
संमुखो झटिति बन्धमनैषीत्स ज्यया रिपुमपत्रपया च ।।'

'भूपेऽपराभवपदे युधि धर्मसूनो-
र्भ्रूवल्लिकम्पकलिकामवतंसयन्तः ।
मथ्नन्बलानि रिपवे मरुतः कुमारो
मात्स्यं विमुच्य विततार दशां तदीयाम् ।।'

'विराटसैन्येषु मिषत्सु युद्धे त्रिगर्तनेतुर्दृढबन्धनाय ।
कोदण्डयुक्तो गुण एव तत्र कर्ता च जज्ञे करणं च जज्ञे ।।'

'तस्यां निशायां तु तमःकदम्बकं निमीलनोन्मीलनयोर्दृशां यथा ।
युद्धं तयोर्मात्स्यसुशर्मणोस्तथा समानरूपं फलमेव संददौ ।।'

'विमानितो वायुसुवा विराटतो विमोचितो धर्मभुवा दयालुना ।
तया रजन्यैव स सामिशेषया समं ध्वजिन्या निरगाद्यथागतम् ।।'

'व्याकृतशीर्षकिरको विमलास्थिदन्तो
रक्तह्रदांशुकधरो रथकेतुदण्डः ।
सेनादायाद्धृतशमः स्वयमाजिखेलः

कङ्कादिवाप चरमाश्रमसंप्रदायम् ।।' ६।८५-१०७ ।।

'तदनु मुहुर्मुहुर्वललमेव केवलमवलोकमाना बलशासनदिशायामोजायमानेन चन्द्रमसा प्रसूताभिर्मदसहितकरिघटाविषाणाग्रेणप्रतिफलनशतगुणितधवलिमवीचिभिर्मरीचिभिर्दलितरणविमर्दुदर्शा विराटस्य चमूरपि प्रतिनिवर्तनहृष्यमाणगोधनवेगप्रद्युतत्करिघटारापातशीतलितसिक्तायां पदव्यां पद्मपूक्तिनिलीनेन समरभूरेणुभारेण नयननिमीलनशिल्पकल्पितबहुसाहाय्यमुद्रया तां यामिनीं पश्चार्धसीमानंप्रत्यवीवहत् ।।' ६।१०७। गद्यम् ।।

एवं पाण्डवानां निन्दाया उपहासस्य चानन्तरं गोष्ठ्यां दुर्योधनेन पाण्डवैः सह कलहाय पाण्डवनिवासभूमित्वेन संभाव्यमानस्य विराटपुरस्य रोधाय गवां हरणाय च त्रिगर्तभूपतिः सशर्मासमादिष्टः । सुशर्मणा कृतं गोहरणंश्रुत्वा विराटराजो सुशर्मणा युद्धाय निरगात् । श्रुतपराक्रमान् कङ्कादिरूपेण स्थितान्युधिष्ठिरादींश्चासौ युद्धे निनाय । गावस्तु सहदेवविलोकनजहर्षादिव विराटसैन्य समीपमागताः, किन्तु रात्रावपि उभयपक्षानीकयोर्भवति युद्धे सुशर्मणा स्वसैनिकप्रमाथंश्रुत्वा विराटेज्यया ऽवध्यतेन। ततो युधिष्ठिरसंकेतेन भीमो विराटं बन्धाद्विमोच्य सुशर्माणं बद्धवान् । युधिष्ठिरेण दयया विराटाद् विमोचितो ऽवशिष्टसैन्यसहितः सुशर्मा यथागतं निवृतः । विराटसेना च युद्धाग्रेणान्निवृत्य निद्रया तां रात्रिं यापितवती इति वर्णितं क्षेमेन्द्र कविनाऽतिवेदग्ध्येन ।

तत्र दुर्योधनाज्ञया विराटपुरं प्रति गच्छतः सुशर्मणो विराटराजगोहरणादि-विषयक उत्साहस्तदभियानादि चेष्टाभिरनुभावितोधृतिगर्वादिसंचारिभिः पोषितो वीररसतां प्रपद्यते । तत्रापहृतानां गवां स्वभाववर्णने स्वभावोक्तिरुत्प्रेक्षाः श्लेषवृत्त्यनुप्रासयमकानि च चमत्कुर्वन्त्येव ।

विराटराजस्यापि सुशर्माणं प्रत्यभियानेन तन्निग्रहविषयक उत्साहो धृतिगर्वादिसंचारिभिः पोषितो वीररसतां प्राप्नोति । तत्र मन्दिराग्रसिंहप्रतिकृतिमुखानां निःशब्दत्वस्य मौनत्वेनाव्यवसायात् रूपकातिशयोक्ति(१)तस्या-

---

१ रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः ।। ३६ । कुवलयानन्दे ।

श्च ' प्रतिकृतिभूतसिंहमुखानि प्रतिध्वनयन्' इत्यस्य ' मन्दिराग्रसिंहप्रतिच्छन्दवृन्द मुखकन्दरमीननियमं विमिन्दन्' इति प्रकारान्तरेण कथनात् सम्बन्धे पर्यायोक्तेऽ-गता, केतुदण्डानां गगनतटिनीतटविटपिवाटपरिमोटनकर्तृत्वाऽसम्बन्धे ऽपि तदुक्त्या सम्बन्धातिशयोक्तिः, अश्वप्रसर्पेऽभिधीयमानेन गन्धर्वशब्देन कीचक घातिगन्धर्वस्मृ त्या(१) स्मरणालंकारध्वनिः, तत्स्मरणस्यैव गन्धर्वशब्दगरलायितत्वे हेतुत्वाव गत्या काव्यलिंगस्याऽपि ध्वनिः , तयोरेकवाचकानुप्रवेशात् संकरः । सहदेवविलोकनजे गवांहर्षे- तृणकल्पस्यापि सुशर्मणो गोनिरूपेक्षाया अनुचितत्वाद् विषमम्, सत्ता विरोध्यमासे च ' तृणकल्पे' गतश्लेषमूलाऽभेदातिशयोक्तेरंगता ।भीमसेनस्य क्वेलाववर्णने- अनुमानालंकारः, तदाकारोयथा- ' वलली मत्स्येन्द्रमन्दिरमहानसमध्यवृन्दस्वच्छन्दभक्षणवात् , + रिपुगणचित्तदशदिक्कम्पकारिक्वेलाविशिष्टत्वात्' इति तस्य च ' रिपुगण चित्त- दशदिगुभयेषां कम्परूपैकधर्मयोगनिष्पद्यमानायां तुल्ययोगितायामंगता । समरारम्भे असिवल्गनफलप्रदर्शने- धेनूनाम् असि धेनुपदापरार्घवाच्यत्वरूप प्रकारान्तरेण कथनात् पर्यायोक्तम् । एवंमुपोत्प्रेक्षासमुच्चय-सांगरूपकाणि श्लेषवृत्त्यनुप्रासाश्चापि चमत्कुर्वन्तितराम् ।

रणप्रारम्भ एवाऽविर्भूतायाः सायं सन्ध्यायाः अन्धकारप्रसारस्य च-वर्णने- अन्धकारैक पत्रिवर्गस्य निलयनेऽपि अपरपत्रिवर्गस्य विचरणसंसर्गस्य अननुरूपत्वाद् विषमालंकारः, तत्र पत्रि शब्दगतश्लेषमूलकाभेदातिशयोक्तेरंगता । एवं शरवर्षमयेन सकलकुरुकुलस्य युद्धांगणाद् गतेऽपि एककुरुकुलस्यसभीमसदापातस्य प्रमोदेन तत्र भ्रमण संसर्गस्याननुरूपत्वात् परं विषमम्, तस्मिंश्चैककुरु-भीमपदापातु शब्दगतश्लेषमूलकाभेदातिशयोक्तिद्वयस्यांगता, रात्रौ सूर्यमण्डलभेदनाशक्त-नवीरसुरस्त्रीसामग्रमेलनाद् रात्रिशयनेन तद्विषया तासामसूयाध्वन्यते । एवं रूपकोत्प्रेक्षाश्चापि रमणीयाः ।

सुशर्मणो मत्स्यराजाक्रमणे तन्निग्रहे च प्रयुक्ता ' मत्स्यचक्रवर्ति' शब्दगतश्लेषमूलाभेदातिशयोक्तिः त्रैगर्तस्य कैवर्तत्वेनोत्प्रेक्षायांनितरामनुकूला । सुशर्म

---

१ सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ।। १०।२७ । साहित्यदर्पणे ।

कर्तृकरिपुकर्मकबन्धस्य ज्या पत्रपारूपकरणाद्वयेन योगात् तुल्ययोगिता । ज्याबद्धत्व रूपदशायाविराटात् सुशर्माणि संक्रमितत्वात् पर्यायालंकारः ।एकस्मिन् गुणे कर्तृत्वकरणत्वयोर्विरुद्धधर्मयोः सामानाधिकरण्यवर्णनाद् विरोधाभासः, तत्र 'गुण' शब्दगतश्लेषामूलाभेदातिशयोक्तेर्ध्वनिता । सुशर्माणि वायुभूकर्तृकविमानन- धर्मभूकर्तृक विमोचनक्रिययोः क्रमेण वर्णनात् पर्यायालंकारः । समरस्थलस्य सर्वाङ्गरूपकद्वारा सन्यासिविशेषावस्थावर्णनस्य कंकात् तद्दीक्षाप्राप्त्युत्प्रेक्षायामर्थध्वनिरत्र चमत्कुर्वन्तितराम् ।

भीमस्य ओजायितत्वातिशयविलोकनविभावितो मुहुर्मुहुस्तदवलोकनाऽनुभावितो विराटराजवाहिनीगतो विस्मयोऽद्भुतरसतां प्रपद्यते । कस्यचित् शूदस्येवमोजायितत्वमाश्चर्यकरमेव भवेत् । विराटसैन्यस्य पदव्याभेवनिद्रया यामिन्यश्च तिवाहनेन श्रमभावोध्वन्यते । अत्रसर्वत्र वीररसानुगुणाप्रसादौजोगुणानुसारिणीचनापरुषास्यवृत्यनुरूपवर्णघटित-ह्रस्ववृत्यनुप्रासानां योजना च रमणीयैव ।

दुर्योधनस्य दुःसाहसम्परामवश्च

एतदनन्तरं दुर्योधनेन कृतं विराटराजवापहरणम्, तद्वृत्तस्यगोपयूना (गूर्त) उत्तरायनिवेदनम्, उत्तरस्यबृहन्नलारूपेण स्थितस्यार्जुनस्य सारथ्यैसतिरथमारुह्यरणाय प्रयाणम्, रणे कुरुवीरसैन्यावलोकनेन उत्तरस्यभीतिःरणात् पलायनप्रयासश्च अर्जुनेन तं निरुध्य विहितं तत्कर्तव्यबोधनं स्वस्वरूपप्रकाशनं च वर्णितं विविच्यते सम्प्रति, तद्वर्णनं यथा -

'आरूढे धामकबिम्बे परेषुः साकं सैन्यैः सार्वभौमः कुरूणाम् ।
पाथोदैकां बिभ्रदाकृत्य गोत्रां मात्स्यादन्यां तत्पुरं हर्तुमागात् ।।'
'सुदूरमार्गश्रमविह्वलाङ्गी सेना समस्ता धृतराष्ट्रसूनोः ।
आभीरवाटान्तिक एव तस्थौ सद्यो निरुद्धेव तदाज्यगन्धैः ।।'
'तावत्तस्य पादातं सर्वाभिसारेण गाहं गाहं गवां व्रजं व्रजगृहे प्रजगृहे ।।'
'दण्डाघाते दीयमानेऽपि यौधैर्दुग्धं भूयो दोहशेषं वहन्त्यः ।

घोषाङ्गावो निःसरन्ति स्म यत्नाङ्गोभ्यो घोषो यत्नलेशं विनैव ।।

"इतस्ततः संभ्रममीयुषीणां गोपाङ्गनानां कुचदर्शनेन ।
निषादपङ्क्तिर्निजहस्तिमस्ते सृणिं निघातुं श्लथपाणिरासीत् ।।"

"भीमसेनभिषजा शमितो यो दक्षिणे फलटिति मत्स्यपुरस्य ।
उत्तरेऽप्युदभवत्तु तु पार्श्वे पक्षवात इव कौरवबाधः ।।"

"वृत्तं निवेदयितुमेतदतीव वेगा-
दाघाव्य कश्चिदथ गोपयुवा विविग्नः ।
स्खलत्पदाः क्षितिपतेरिव घोषसीम्नि
स्वस्यापि गा विमुमुचे नृपसूनुगोष्ठ्याम् ।।"

"औदास्यं किमिदं कुमार ! कुरवो गृह्णन्ति गास्ते खिला-
स्त्वद्गोष्ठीः समयोऽयमाजिषु परैर्दुष्प्रापमाप्तुं यशः ।
देतीं कैकयनन्दनां कुरु महावीरप्रसूमूर्धसु
द्रागारोह रथं गृहाण च धनुर्धत्स्वाभ्यमित्रीणताम् ।।"

"उक्तोऽयमित्थं पुरतो वधूनामुल्लासयन् श्मश्रुलवान्नखाग्रैः ।
किंचिन्मणिस्तम्बवियोजितार्द्रो गिरं दधेऽन्तःपुरमात्रधीरः ।।"

"तथा भुजं विक्रमयेयमेतं यन्ता यदि स्यादिह मे युयुत्सोः ।
षष्ठोऽपि नः कश्चन पाण्डवोऽभूदिति ब्रुवेयुः कुरवो यथा ते ।।"

"इदं निशम्य स्मितलाञ्छितोष्ठ्या तत्रोत्तरा प्रेम्णा ।
बृहन्नलां सारथिकृत्यदक्षां भ्रात्रे निवेद्यानयति स्म वेनाम् ।।"

""अवाप्य तां संसदमाकृतः क्रमादवाग्भार द्वयमिन्द्रनन्दनः ।
नृपात्मजं पूजयितुं च मस्तकं नितम्बिनीर्हासयितुं च कुचुकम् ।।"

""षण्ढोऽपि तेजसा तत्र सारथ्यसदृशाकृतिः ।
न कासां पौरदृष्टीनां चकासामास फाल्गुनः ।।"

"तं सारथिपदे कृत्वा स धातारमिवेश्वरः ।
परसेनां हसन्नेव प्रधक्ष्यामीत्यमन्यत ।।"

"मालिनी तादृशः पत्युर्महान्तं तं रणोद्यमम् ।

"श्यामाकचरुनिर्वापं जज्ञे सोमाय वाजिने ।।"

"अक्षतूर्काण्यथ वशे कुरूणां पाण्डुस्नुषाया वसनानि सन्ति ।
आहृत्य नस्तानि दिशेति कन्यास्तमभ्ययाचन्त कुतूहलिन्यः ।।"

"तत्काणं यातायातसरभसराजलेखवाहमुखश्रुतबललभुजावलेपवृत्तान्तमोदमानसू दकुलं वीरपत्नीत्ववीरजननीत्वयुगपत्प्रसिद्धैर्वेजननो वासरोऽयमिति कात्यायनीजन संस्तूयमानसुदेष्णां मस्तकतलविन्यस्तहस्तप्रवृद्धबल्लवयोषिदभ्ययाचनावचनप्रतिशब्ददा नदक्षागवाक्षामात्रोपलक्षितं कुमारप्रयाणपरिहार्यमाणमातुलशतान्तःपुरवधूटीनवि लापघोषं तत्पुरमासीत् ।।"

"लाजाभिवर्षी ललनासमाजो राज्ञः कुमाराय रथस्थिताय ।
मुदाशिषं मूल्यमिव व्यतानीज्जिघृक्षितानां द्विषदंशुकानाम् ।।"

"आलेख्यदत्तैः पुरुषैरुपेतामालोक्यन्राजपथे प्रतोलीम् ।
घोटान्नुदन्तीं स रथे निबद्धान्पोटां पुरस्कृत्य पुरात्प्रतस्थे ।।"

"तदनु दक्षिणादिङ्मुखादुदयमानः पवमानो वृन्दारकमुक्तमन्दारकुसुमवर्ष मन्दायितधूमगन्धं बललस्य चिकुरबन्धमाघ्राय निशि तस्य जयोत्सवं विज्ञापयितुमव सरं विचिन्वन्निव विराटकुरुनन्दनयोः स्यन्दनसमीपे मन्दं मन्दमस्पन्दत ।।"

"प्रस्वापितेभ्यः परभूपतिभ्यः सजातिवर्गः सुलभो रणोऽस्मिन् ।
भविष्यतीतीव ननर्त हृष्टा शतार्ग्घशाटी शतमन्युसूनोः ।।"

"जले मत्स्यान्दधानोऽपि स्थले मत्स्यान्विलोकितुम् ।
आगतोऽब्धिरिदानीकः कुरूणां ददृशे ततः ।।"

"सेहे जिष्णुर्न तत्रारेः सेनाधूलिं विसृत्वरीम् ।
प्रायेण मानिना पुंसाऽपरागो न हि सह्यते ।।"

"तत्रारिसैन्यमवलोकितुरुत्तरस्य स्त्रीगोष्ठिकाऽजनि रणे निजवेश्मनीव ।
भीश्चित्तमश्रुलहरी नयनं विमूर्च्छां बुद्धिं च वेपथुरुजा वपुरानशे यत् ।।"

"व्यातन्वन्कुरवं गले विरचयंस्तालुन्यपां शोषणं
वृष्टीरक्षिणा विवर्धयन्विपुलयन्धां घार्तराष्ट्ररावैः ।
सेवायां त्वरयन्धनुर्गुणगुणस्यान्तर्बहिः कम्पयं-

स्त्रासो मात्स्यसुते चकार चरितं षण्णामृतूनां क्रमात् ।।'

'अथ रथादवप्लुत्य पुरं प्रति पलायमानोऽयमुत्तरः पश्चादनुधाव्य कचेषु-गृहीतवते फाल्गुना कण्ठरवेण प्राक्तनचित्रमिव प्रमुषितार्धवर्णं वच एवमवादीत्, -'

'किं वा विकीर्षुरसि हन्त बृहन्नले ! त्व-
मक्षौणीर्न मान्ति कुरुराजबलान्यमूनि ।
सखे निवर्तय रथं समरेच्छयाऽलं
नेष्याम्यहं निजगृहेष्ववशेषमायुः ।।'

'गाः कालयन्तु सह वत्सकुलैरशेषै-
र्धौष्यान्दहन्तु कुरवः प्रहरन्तु गोपाः ।
मह्यं पलायनमहोत्सवमेव देहि
प्राणेषु किंचिदपि मे गुरुतां न वेत्सि ।।'

'मातुर्मुखं मम पुरः पुर एव तिष्ठ-
त्युत्कण्ठितस्य नय तत्सविधं कृपालो ! ।
यावन्ति सन्ति मम कोशगृहे सवित्री
तावद्भिरेव कनकैरभिषेक्ष्यति त्वाम् ।।'

'चित्रे युद्धं विलोक्याहं चापलादेत्य वञ्चितः ।
तत्रासद्भिरिहोद्यद्भिः क्वेलाहेषितबृंहितैः ।।'

'यथाहं भूतलं त्यक्त्वा रथमारुक्षमुच्छ्रितम् ।
तथा हृदन्तरं मुक्त्वा कण्ठं प्राणोऽभिरोहति ।।'

'इति बहु विलप्य पदयोः प्रणिपतन्तं तं नृपसुतमपरागे करपुटेन मुहुरास्फालयन्सस्मितं गिरममर्त्यपतिसुतोऽपि प्रवर्तयामास,-'

'उदितोऽसि विराटभूपतेरुदराड्भद्र कथं त्वमीदृशः ।
प्रवया अपि यः कुतूहलात्परसैन्यैरधुनापि युध्यते ।।'

'सारथौ गतभयेऽपि रथी त्वं सम्भ्रमे यदि बिभेषि रिपुभ्यः ।
मत्स्यकैकयसुवां भुजभाजां मानकृन्तनमितोऽपि किमन्यत् ।।'

"विस्तार्य संसदि विशृङ्खलवीरवादं
युद्धात्पलायितवतोऽथ तवाङ्गकम्पः ।
अन्तःपुरेषु हसतामबलाजनाना-
माचार्य एव भविता कुचवल्लितानाम् ।।"

"कियद्विलक्षामंशुकमाहृतं ते सहोदरेणेति सखीभिरुक्ते ।
मानोत्तराया भृशमुत्तरायाः किमुत्तरं ब्रूहि तदुत्तर ! त्वम् ।।"

"जरठो जनकोऽपि मातुलाः शतमप्यन्तमगुस्त्वमेककः ।
यदि यासि न धैर्यमत्र ते न वशे राज्यमिदं भविष्यति ।।"

"तदिदं विजहीहि साध्वसं कुरु पाणौ तृणतां कुरुष्वपि ।
तव मत्स्यपतेस्तु वाहिनीमुखभागे खलु वलगनं क्षमम् ।। ७।१-३३ ।।

"इत्याश्वास्य पितृवनाटवीतटमुपेत्य शमीविटपिकोटिसमाटीकितकिरीटशृङ्गचापनिषङ्गो जयलक्ष्मीपरिणयनयोग्यतां संपादयितुमिव खण्डितषण्ढभावो यमाखण्डलसुतो निजतत्त्वव्याकरणशतधापल्लवितघाष्टर्यैन तेनैव सुदेष्णापत्येन परिकल्पितसारथ्यशिल्पं रथमधिरुह्य क्षणेन वारिनिधिपूरस्य वाडवज्वलनिरिव-सपत्नसैन्यस्य संमुखीनो बभूव ।।" ७।३३। गद्यम् ।।

एवं विराटगवाहरणाय दुर्योधनोद्योगः, तद्योधैर्गवापहरणम्, गोपभूनाकृतं उत्तराय तद्वृत्तनिवेदनम्, उत्तरस्यान्तःपुरे वीरवादः, बृहन्नलासारथ्येनरथमारुह्य रणाय तत्प्रयाणं, तत्रकौरवसैन्यदर्शनेन तस्य भीतिरर्जुनार्ते पलायन प्रयासश्च, अर्जुनस्य तद्ग्रहणं तत्-स्वरूपबोधनं स्वरूपप्रकाशनं चेत्यादि वर्णितं वैदग्ध्येन कविना ।

तत्र दुर्योधनस्य गोहरणोद्यमेन तद्गतचापल्यभावध्वनिः । तत्र "गोत्रा" शब्दगत "गो- भू" श्लेषमूलकाभेदातिशयोक्तिर्गुणता ।

तत्र तत्सैन्यस्य श्रमश्लथाङ्गत्वेन स्थितौ आज्यगन्धलाभलोभाभिभूतत्वस्य हेतुत्वेनोत्प्रेक्षा ।

तत्पादातस्य विराटराजगवापहरणवर्णने छेकवृत्त्यनुप्रासाः यमकं च । दण्डाघातेदशसति घोषाइ गोनिःसरणे यत्नाभावस्य उचितत्वेऽपि यत्न वर्णन

द्वारा तदभावरूपकारणाभावस्य वर्णितत्वात् विभावना । गोकुलाच्चघोषनि: सरणस्यो युक्तत्वाद् अननुरूपसंसर्गात्मको विषमालंकार:, तत्र गोकुलाद् घोषनि:सरणरूपकार्यस्य यत्नरूपहेतुलेशाभावेऽपि संपन्नत्वाद् विभावनाऽपि 'घोष' शब्दगत 'पल्ली-नादौ' भयार्थश्लेषमूलाऽभेदातिशयोक्तिश्च तत्राङ्गे ।

गवापहरणेन विभावित: कुचवसनस्खलनसंभ्रमादिभिरनुभावितो गोपाङ्गनागतो त्रासावेगभावौध्वन्येते । तत्कुचदर्शनेन निषाद पंक्तीनां निजहस्तिमस्तके मृणिविधानश्लथपाणित्वेन तद्गतौत्सुक्यभावो ध्वन्यते ।

भीमसेनेन मत्स्यपुरस्य दक्षिणोशम्मितस्य कौरवबाधस्य उत्तरे समुदयवर्णने दक्षिणोत्तरपार्श्वगतश्लेषस्य, कौरवबाधेपदावातोपमाया, भीमसेने च मिषगुपमायाश्चाऽतिरामानुगुण्यं रमणीयता च ।

कौरवसैन्यकृतगवापहरणवृत्तनिवेदकस्य गोपयुवकस्य वाच: श्लथपदत्वेन त्रासावेगौ ध्वन्येते । तत्र 'गो' शब्दगत 'धेनु-वाक्' श्लेषमूलोपकाङ्गम् । गोपस्य-विराटराजकुमारोदासीनत्वकथनेन तद्विषयाऽसूयाध्वन्यते , तत्प्रोत्साहनवचने-क्रिया समुच्चयस्य चारुत्वम् ।

अन्त:पुरमात्रथीरस्य उत्तरस्य वधूजनपुरतोऽन्त:पुरे श्मश्रुलवोल्लासनस्व-शौर्यप्रशंसावचनादिभि: चापल्यं ध्वन्यते । तदीरवादश्रवणेन मालिन्या: स्मितेन तद्गतो हासो हर्षाधुन्मेषभावपोषितो हास्यतया परिणमति ।

मालिनी प्रेरितया उत्तरया भ्रात्रे निवेद्यानीताया बृहन्नलाया: उत्तर सारथ्याय कञ्चुकस्याऽवाग्धरणेन अन्त:पुरिकाजनगतहासोहास्यतया परिणमति ।तत्रतस्या: कुमारसम्मानायनम्रमस्तकस्य नितम्बिनीजनहासाय घृतकञ्चुकस्य अवाग्धा रणरूपैकक्रियया योगात् तुल्ययोगिता वर्णनसंकोपकत्वेन प्रौढियोगितिका ।

षण्ढस्यापि तेजसा सारथ्यौचित्योपपादनात् काव्यलिङ्गम् । मालिनी वेषोस्थिता द्रौपदी बृहन्नलारूपेस्थितस्य स्वपत्युर्जुनस्य तादृक्सारथ्यग्रहणात्मकर णोद्योगं 'सोमाय वाजिने श्यामाकं चरुं निर्वेद: क्लैव्याद् बिभीयात्' इति-श्रुत्युक्तं सोमायवाजिने श्यामाकचरु निर्वापमुत्प्रेक्षितवती, उत्प्रेक्षाया च तया अज्ञातवाससमाप्त्यनुमापकस्य षण्ढत्वनिवर्तनस्य प्रतीत्या अलंकारेणाऽलंकारध्वनि: । रथिसारथ्यो रुत्तरार्जुनयोरीश्वरयात्रुपमा परसेनायास्तृणायमाननस्यानुगुणा ।

कन्यानां द्रौपदीकटिभागोद्भूतानामकर्तृकाणां वसनानां याचनयातद्गतमौत्सुक्यं ध्वन्यते ।

कात्यायनीजनकृतसुदेष्णास्तवे वीरपत्नीत्व-वीरजननीत्वयोरेकयाप्रसिद्धयायोगार्ते तुल्ययोगिता ।

रणांगणं प्रस्थितविराटराजकुमारोपरिलाजाभिवर्षणेन ललनाजनगतो हर्षभावोध्वन्यते । तत्रलाजवर्षणे जिघृक्षितकौरववसनमूल्यवितरणोत्प्रेक्षाया आनुगुण्यम् ।

विराटपुरादुत्तराभिमुखं रणाय प्रतिष्ठमानयोरुत्तरार्जुनयोः स्यन्दनसमीपस्पन्दितस्य सुगन्धिमन्दायितदक्षिणपवमानस्यानुकूलत्वेन शुभसूचनात् भाविजयलाभोध्वन्यते , तत्रपवनस्यस्यन्दनसमीपमन्दस्पन्दने जयोत्सवनिवेदनावसरविचयनोत्प्रेक्षा नितरामनुकूला ।

शतमन्युसूनुशतार्द्रशाटीवर्तने प्रस्थापितरिपुभूपतिभ्यः सजातिसौलभ्यसंभावनाहेतुकत्वोत्प्रेक्षाया रिपूणां भाविपराजयो ध्वन्यते ।

कौरवसैन्यस्य अब्धित्वेनोत्प्रेक्षायाः जलगतमत्स्यधारकस्यापि तस्य स्थलगतमत्स्यदर्शनफलकत्वात् प्रतीयमानफलोत्प्रेक्षायाम् अस्फुटता, तत्र च 'मत्स्य' शब्दगत 'मीन-देशविशेषयो' रभेदातिशयोक्तिरनुप्राणिका । उत्प्रेक्षाका कौरवसैन्यस्यातिगभीरत्वं ध्वन्यते ।

कौरवसैन्यप्रसूनरपरागविषयकजिष्णुकर्तृकसंग्रहनाभावस्य सामान्यार्थोपन्यासेन समर्थनात् अर्थान्तरन्यासः , तस्मिंश्च अपरागपदगतायाः अपराग-परागयोः श्लेषमूलाभेदातिशयोक्तेरस्फुटता । तेन च अर्जुनगतोऽमर्षभावो ध्वन्यते ।

कौरवसैन्य-तदुत्थितदवेलाहेषितबृंहितविभावितः पलायनरोदनादिभिरनुभावितः उत्तरगतोभयस्थायिभावस्त्रासावेगदैन्यादिसंचारिभावैः पोषितो भयानकरसतां प्रपद्यते ।

तत्र अरिसैन्यविलोकनेन भीतस्योत्तरस्य वर्णनिर्वर्तनादिषु व्याप्तानां भी-मूर्च्छाऽश्रुलहरी-वेपथुरुजां समुच्चयः, तासु स्त्रीलिंगेन स्त्रीत्वप्रतीत्या सादृश्यमूलासमासोक्तिः(१) स्तदलंकारद्वयघटितवाक्यार्थेन चोत्तरस्य निजवेश्मनीवरणे

---

१ समासोक्तिः सनेर्यत्र कार्यलिंगविशेषणैः । (२।७-५८५८६)

ऽपि कथितायाः स्त्रीगोष्ठिकाया उपपादनात् काव्यलिङ्गम्, शङ्कतूनां चरितं-तु शङ्कव एव प्रकटयितुं शक्नुवन्ति , न त्रासः तेन तु तच्चरितसदृशं चरितमेव-प्रकाशयितुं पार्यते, अतोऽत्र असंभवद्वस्तु सम्बन्धनिबन्धना निदर्शना, तस्यां च 'कु रव- धार्तराष्ट्रधनञ्जयगुण' शब्दगतायाः 'कुत्सितरव- कौरव-फाल्गुनगाण्डिव ज्यानां कुरवकवृक्ष- नीलहंस- वह्निगुणोष्णत्वानां, च श्लेषमूलिकाया अभेदा तिशयोक्तेरङ्गता । एवमङ्गाङ्गितया संकीर्णा अलंकारा उत्तरगतत्रासव्यञ्जनेऽतितरा-मानुगुण्यं विदधति ।

उत्तरस्य भयजनित वाग्वैकल्य-वर्णने 'प्राक्तन चित्रमिव प्रमुषितार्थवर्णं' वचः' इति वर्ण्य शब्दगत 'रूपाचार' श्लेषमूलकाभेदातिशयोक्ति समुज्जीवितोप मा, दैन्यवचो वर्णने गोकुलकालन- धौतदहन-गोपप्रहरणक्रियाणांऽसमुच्चयः,- मातर्यस्युक्यवर्णने - युद्धात् संरक्ष्यपुत्रानयने क्रियमाणत्वेन संभाव्यमानेन सुदेष्णायाः कनकैरर्जुनकनकाभिषेकेण सुदेष्णादीयमानकनकानामपरिचितत्वध्वनिः चित्रगतयुद्धे अनुपलब्धानामपि क्वेलाहेषित बृंहितानां वास्तविक युद्धे उपलब्ध्या-विषादध्वनावनुगुणो विषादनालंकारः, त्रासवर्णने उत्तरस्य प्राणानां कण्ठ-धिरोहणं स्वस्योच्छ्वासरथारोहणेन उपमा च सुतरां चमत्कुर्वन्ति ।

युद्धभीतस्योत्तरस्य फाल्गुनकृताश्वासने- वार्धकेऽपि युद्धरतस्य विराटरा जस्य युद्धभीरुपुत्रोत्पत्त्या सारथ्यागतभयेसति रथिनस्ततोऽप्यधिकनिर्भयत्वस्यौचि-त्ये तत्स्थाने रथिनोऽतिभीरुतया अननुरूपसंसर्गात्मकं विषमालंकारद्वयम् , सार थौ निर्भये रथिन उत्तरस्य भीतत्वम् मत्स्यैकैकयभुवां वीराणां परं मानकृन्तनम् इतिहेतुमतोरभेदपर्यवसानात् हेत्वलंकारः (१) संसदिवीरवादविस्तारिणो युद्धात् पला यन सम्बन्धस्याऽप्यननुरूपत्वाद् विषमालंकारः, युद्धात्पलायितवत उत्तरस्याङ्गकम्पोऽन्तःपुरिकाजनानां हास जनको भवेत् इति वार्तायां 'तद्गुरुकम्पः' अन्तःपुरेषु हसतामबलाजनानामाचार्य एव भविता कुचवल्लितानाम्' इति रूपान्तरेण कथना

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ।। १०।५६ साहित्यदर्पणे ।।

१ अभेदेनाभिधा हेतुर्हेतोर्हेतुमतासह ।। १०।६४। साहित्यद-------

तु पर्यायोक्तालंकारः, उत्तरकर्तृक तृणताकरणविधेः पाणिकुलमययोगात् तुल्ययोगिता, तस्यां च तृणता शब्दगतवाच्य-तृणत्वोभयार्थश्लेषमूलाभेदातिशयोक्तेरप्यता साध्वसहान-तृणताकरणयोश्च उत्तरकर्तृकत्वेन समुच्चयात् समुच्चयालंकारोऽपि तुल्ययोगितायाः समुच्चयस्य च संसृष्टिश्च कारुणस्तानामुत्तरविषयकाणां ग्लानिविषादादिभावानां सुतरामनुरूपयन्तुर्वर्यन्ति ।

कौरवभटयुद्धोक्षदर्शनोद्दीपितरणोत्साहस्यार्जुनस्य परिगृहीतशमीकोटिनिहितकिरीटशस्त्रचापनिषङ्गस्य वर्णने तत्परिग्रहणे जयलक्ष्मीपरिणायनफलकत्वोत्प्रेक्षा, रिपुसैन्यसंमुखीभवने च वारिनिधिपूरसम्मुखीनवाडवानलोपमानितरामनुगुणा । अत्रोपमयाऽर्जुनोद्भूतमेव रिपुसैन्यं हनिष्यतीतिवस्तुध्वन्यते । एवं रुचिरतरं कविकृतं वर्णनमिदम् ।

दुर्योधनस्य विराटपुराभियानोद्योगे तत्सैन्यगोग्रहापहरणे अर्जुनस्य कौरवबलावलोकनेन स्वरूपग्रहणे च ओजस्विनी रचना परुषा च वृत्तिः उत्तरस्यरणप्रयाणे ललनाजनस्य हर्षे कौरवसैन्यावलोकनेनोत्तरस्य अर्जुनस्य तदाश्वासने च मधुरकोमला रचना उपनागरिका च वृत्तिः, तदनुसारिणो वृत्त्यनुप्रासाश्छेकानुप्रासाश्चाऽपि चमत्कुर्वन्त्येवात्र ।

(३०) कौरवाणामर्जुनेन युद्धम् पराभवश्च

इतः परं पार्थस्य कौरवसैन्येन युद्धम्, प्रस्वापनास्त्रप्रयोगः, कौरवाणां वस्त्रापहरणम्, पराभूतानां तेषां स्वपुरं प्रति निवर्तनं च वर्णितं कविकृतं विविच्यते, तद्वर्णनं यथा-

" संख्यातीतमवेक्ष्य कौरवबलं तत्सव्यसाची पुर-
श्चापे तादृशि किंचिदेव विवृते साधीभवन्तीं दृशम् ।
पार्वत्या निजपट्टवस्त्रशकलं स्नेहद्रयार्द्रं स्वयं

न्यस्य न्यस्य चिकित्सितव्रणशिरा देवोऽपि यं श्लाघते ।।'

' नभसि प्रविसारि देवदत्ते नरदत्तं ध्वनितं ततो दधाने ।
मुमुहुर्द्विरदा मुमूर्च्छुरश्वा रथिनश्चुक्षुभिरे भटाश्च बिभ्युः ।।'

' पयोधिणास्य गाण्डीवः पातितज्यः प्रकोष्ठयोः ।
गन्धर्वयुद्धमारभ्य कृतं मौनं समापयत् ।।'

' अथ करतलक्षयमण्डपकृततार्ण्डवस्य गाण्डीवस्य विस्फारेण पाण्डवो य -
मिति निश्चित्य लीलानिस्तीर्णदुस्तरसन्धासिन्धुयं पुनरपि निर्बन्धुमागत इत्य-
धृष्यया निजेर्ष्यया क्षुब्धा विपक्षाः पूर्वपक्षाः सिद्धान्तमिव युद्धाय तं पर्यवारयन् ।

' विजयस्य रथे ततो निपेतुर्विमतानामिषवः परःसहस्राः ।
जनमेजययागवेदिमध्ये जगतां भीतिकरा इवाहिसंघाः ।।'

' जम्भद्विषोऽपि तनयो जगदेकवीरो
जन्यं समारभत जृम्भयितुं महीयः ।
प्रत्यर्तिरक्ततटिनीस्नपनैः शराणां
मेत्स्यन्निवाथ पितृकाननवासदोषाम् ।।'

' चलदश्वरथद्विपोत्थरेणून्वरणाभ्रंघुभिः प्रणीय शान्तिम् ।
सुखदृष्टरणा यथा भवेयुः सुरवामा गगने तथा समेयुः ।।'

' कौन्तेयकर्णद्वितयोपकण्ठमाहूतिकावेदितजैत्रयात्रैः ।
आशातशल्ये रुरुधेऽथ भल्लैराशा कुबेरस्य च वैरिणां च ।।'

' उद्धारसंधिपरिमुक्तिषु मार्गणानामाधे उभे अपि तदा तिसृषु क्रियासु ।
सायुज्यमापतुरिवान्तिमया समीके चक्रीकृते धनुषि शक्रसुतेन तेन ।।'

' युद्धसीम्नि मृतगर्वविप्लुषो मूर्च्छिताञ्चटकनिःसृताम्भसः ।
तत्र लक्ष्यमकरोत्स कुञ्जरांस्तस्य तात इव शैलसंचयान् ।।'

' काण्डैरपातयदघः करिमण्डलानां
शुण्डाः प्रचण्डरदोर्युधिपाण्डुसूनुः ।
निद्रास्यतां निखिलवैरिमहीपतीना-
मुत्पादयन्निव पृथूरुपधानपङ्क्तीः ।।'

"विशालरन्ध्रं विजयास्त्रदत्तं देहस्य मध्ये दधतो महान्तः ।
स्कन्दस्य शक्त्या दातमेखलस्य क्रौञ्चस्य लीलां करिणो विवव्रुः ।।"

"आघोरणास्य शिरसा पतितार्धमार्गं
संधानभाजि दिवमुत्पतिते कबन्धे ।
न्यस्य भ्रजं सुरवधूरथ बद्धमौना-
तस्माद्भिया दिवि पलायत दूरमेका ।।"

"तुङ्गा गजाश्च जवनास्तुरगाश्च शूरा योधाश्च तेन निहता भुवमाशु जग्मुः ।
निद्रास्यतो निबिडमत्र नरेन्द्रसंघात्प्रागेवसम्यगवकाशजिघृक्षयेव ।।"

"गङ्गा सिता रविसुताप्यसिता पिशङ्गी
वक्त्रे तयोः सहचरी च पुरा विधात्रा ।
शोणा रुचा न तटिनीति किलार्जुनेन
बाणालिपिः शतमुखसरितां वितेने ।।"

"कर्णो वधेति गवेषणास्य विषये गान्धारनाथे पुनः
निर्गन्तुं धृतदिग्भ्रमे विकलितच्छत्रेऽपि दुर्योधने ।
द्रोणेऽपि क्षपितध्वजे कृतधनुर्भङ्गेऽपि तस्यात्मजे ।
मूर्च्छालेसहितः सुतेऽपि युधि सा म्लौ कुरूणां चमूः ।।"

"वीणामुनीन्द्रौ विजयस्य युद्धं नीरन्ध्रभावेन निरीक्षमाणः ।
आनन्दजैरश्रुभिरेव चक्रे हस्तार्पितैराहनिकृत्यमग्रे ।।"

"विस्मयार्णवविभावरीविभुं वीक्ष्य वीक्ष्य विजयस्य विक्रमम् ।
उत्तमांगमखिलाप्सरोगणैरुर्वशी नभसि साप्यकम्पयत् ।।"

"वपुरस्त्रसात्कृतवतां सुभटानां वरणाय विबुधवारवध्वः ।
कुसुमात्यये किसलयान्यपि दत्वा दुःस्थतामवाप कुलिशायुधशाखी ।।"

"बाह्वोः प्रवृष्टकुसुमस्य ततो निलिम्पैः
प्रस्वापनास्त्रमहिमातिशयेन तस्य ।
निद्रायते स्म निखिला पृतना रिपूणां
युद्धावतीर्णमपनेतुमिव श्रमं स्वम् ।।"

'ततः स बीभत्सुः परिषत्समानीतवधूपरिभवानुरूपफलप्रदित्सयेवसारथिना द्विषतामपहारितविविधपरिधानो गुरुप्रभृतिष्वमीषु दिवास्वापो मा भूदिति कृपया मन्यमान इव पुनरपि तदस्त्रं क्षणादेव संजहार ।।'

'अथ दृशः परिमृज्य करांचलैररुणिताः परिमीलनमुद्रया ।
प्रकटितास्याखिलैः पटुजृम्भणात्प्रबुबुधे कुरुराजबलमूश्चिरात् ।।'

'पूर्वप्रयोगमुदिता इव तस्य बाणा
निद्रां द्विषत्सु निखिला ददुरेव दीर्घाम् ।
पश्चात्प्रयुक्तमुनाऽहमितीव रोषा-
त्प्रस्वापनं तु विततार न तादृशीं ताम् ।।'

'स तु वपुरनुशोच्य धार्तराष्ट्रैः समिति विराटसुतापनीतचेलम् ।
कुलिशभृदनुजीविदत्तबन्धां कुशलमनन्यत घोषवाट्यात्राम् ।।'

'परांश्च कर्तुं वदनान्यनीशाः पश्चाद्विमर्देन नमस्यमर्यः ।
विरिक्तिय नग्नान्नृपतीन्क्रियार्तां निमीलनाज्ञं नयनं निनिन्दुः ।।'

'इति परिगवलक्ष्म्या संवृतां भोगमुद्रां
तनुभिरभिदधानाः स्थास्नुभिर्नग्नभावे ।
ध्वजपटशकलाग्रैः कल्पितकौपीनकृत्याः
सुबलदुहितृपुत्राः स्वां पुरीं प्रत्यगच्छन् ।।७।३४-५७ ।।

'एवं फाल्गुनस्य कौरव वाहिन्या युद्धम्, गजतुरगपत्तिपातनम्, प्रस्वापनास्त्रप्रयोगः, सारथिना कौरव वस्त्रापहारणम्, पराभूतानां तेषां प्रतिनिवर्तनं च वर्णितमतिवैदग्ध्येन कविना ।

तत्र अर्जुनस्य कौरवबल विषयकस्तत्संख्यातीतत्व दुर्धर्षत्वाद्युद्दीपितश्चापतिर्बलोकन विस्फारणबाणवर्षणादिभिरनुभावितो धृतिगर्वामर्षादिसंचारिभिः पोषितः उत्साहो वीररसतया पर्यवस्यंश्चमत्करोतितरां सचेतोजनचेतःसु ।- तत्र तद्गाण्डिवधनि तद्विशेषणत्वेन तत्प्रहारजन्य शिरोव्रणाविशिष्टमहादेववृत्तस्य गुणीभूतत्वादुदात्तालंकारः । तच्छ्लेषेदेवदत्ते नरदत्तध्वानं दधति सति द्विरदादीनां भय वर्णने द्विरदादीनां मोहादिक्रियासमुच्चयालंकारः ।

पार्थं पार्थत्वेन गाण्डीवविस्फारैर्निश्चिन्वतां विपक्षवीराणां पार्थनिग्रहविषयक उत्साहोऽपि तत्परिवारणशस्त्रास्त्रविषयीकरणादिवेष्टाभिरनुभावितो धृतिमत्यसूयादिसंचारिभावैः पोषितोवीररसतया परिणमति । तत्र 'वीरोऽयं पाण्डवः, गाण्डीवविस्फारकत्वात्' इति वाच्योऽनुमानालंकारः, तेन चापरोऽनुमानालंकारः 'चापोऽयं गाण्डिवः, तदीयविस्फारवत्वात्' इत्याकारो व्यङ्ग्यश्च पार्थस्य पार्थत्वेन निश्चयरूपं विपक्षवीरगतंमतिभावं व्यंक्तः । विपक्षवीरगतासूयाभावेपाण्डवस्य लीलानिस्तीर्ण दुस्तरसन्धासिन्धुत्वस्य विभावत्वात् सन्धारूपकस्यासूयाभावेगतता, विपक्षाणां पूर्वपक्षतया अर्जुनस्य सिद्धान्ततया सा दृश्योक्तिरपि असूयानुगुणा, कौरवाणां पूर्वपक्षोपमया दौर्बल्य प्रतीतेः अर्जुनस्य च सिद्धान्तोपमया प्राबल्य प्रतीतेरलंकारेण वस्तुध्वनिः ।

विजयरथोपरिनिपतता शात्रवशराणां जनमेजययागवेदिमध्ये निपतद्भिः सर्पसंघैरुपमया तेषां पर्यवस्यन् विनाशो ध्वन्यते ।

वैरिवृन्दपरिवारितस्यापि जगदेकवीरस्य जम्भद्विट्-तनयस्य जन्य जृम्भणे ओजो गुणानुगुणसंयुक्तपरुषवर्णघटितायारचनायास्तादृशस्यैव च वृत्यनुप्रासस्य शराणां प्रत्यर्थिरक्ततटिनीस्वपने पितृकाननवासदोषभेदनफलोत्प्रेक्षायाश्च नितरां चमत्कारिता ।

सुरवामानां रणदर्शनाय गगने समेतानां वीरनवसुराबरणाभ्रमधुमीरथाश्वद्विपोत्थरेणुशान्तिप्रणयनकर्तृत्वासम्बन्धेऽपि तत्सम्बन्धोक्त्यासम्बन्धातिशयोक्तिः तद्घटितस्य च पदार्थस्तोमस्यतासां सुखपूर्वकरणदर्शनेहेतुत्वात् काव्यलिङ्गम् वहति रमणीयताम् ।

कौन्तेय प्रेरित शराणां रोधनक्रियारूपस्यैकधर्मस्य कुबेराशाया वैरिजनाशायाश्च योगात् तुल्ययोगिता, तस्यां चाऽऽशाशब्दगतश्लेषमूलाऽभेदातिशयोक्तेः शरजेन्नयात्रावेदकस्य कौन्तेयकर्णद्वितयोपकण्ठे मौहूर्तिकल्पकस्य सचाभूता, स्वभेषामर्मोद्भिमावेन संकरोऽपि चमत्कारक एव । तुल्ययोगितालंकारेण कौन्तेयशराणां कुबेराशारोधनस्य वैरिजनाशारोधनस्य च हेतुहेतुमद्भावप्रतीत्या काव्यलिङ्गध्वनिः ।

शक्रसुतेन वैरिजनोपरिबाणवर्षणे तद्बाणानामुद्दारसन्धिपरिमुक्ति-

रूपासुतिमृषुक्रियासु आद्यक्रियाद्वयस्य अन्तिमक्रियया सायुज्य प्राप्त्युत्प्रेक्षायातस्य-बाणमोक्षणेलाघवातिशयो ध्वन्यते ।

शक्रसुतलक्ष्मीकृतमनां कटकनिःसृताम्भसां कुर्वाणां शक्रलक्ष्मीकृत- तादृक्शै लसंचयोपमया कटकश्लेषमूलया तेषां सद्यो मार्विधरापातोध्वन्यते । पार्थकृततदीय शुश्रूषासु निद्रास्यतांवैरिजनानामुपधानपूक्तित्वोत्प्रेक्षा, विजयास्त्रदत्तरन्ध्रवतां च-कुर्वाणां स्कन्दशक्तिभिन्नक्रौंचपर्वतलीलाधारणेन असंभवद्वस्तुसम्बन्धनिबन्धनानिद र्शना, आघोरणशिरसा कबन्धस्य सन्धानाभावेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः आघोरणशिरः-संहितगणानोत्पतितकबन्धस्य नववीरसुरत्वभ्रान्त्या सुरवधूगतया भ्रा न्तिमान्, बद्धमौनाच्च तादृक्कबन्धाल्ल सुरवध्वामीत्युसम्बन्धेऽपि तद्वर्णनादपरा सम्बन्धातिशयोक्तिः, पार्थकर्तृकहननक्रियया भूपतनक्रियया च गजतुरगयोधानां यो-गात् तुल्ययोगिताद्वयम्, तस्मिंश्च प्रतीयमानात् हनन-भूपपतनक्रिययोर्हेतुहेतुमद्भावा त् काव्यलिङ्गध्वनिः, तेषांभूपतने निद्रास्यतो नरेन्द्रसंघात् प्रागेव भुवि सम्यगवका शजिघृक्षाया हेतुत्वेनोत्प्रेक्षा, अर्जुनस्य युधि शोणिततटिनीशतप्रसारणे विधात्रा स्वविहितसितासितवर्णयोर्गङ्गायमुनयोःसहचर्याः पिशङ्गवर्णतटिन्या विधानाभाव स्य हेतुत्वेनोत्प्रेक्षा, कौरवचम्वाम्लानत्वे कर्णादीनां युधिगवेषणाविषयत्वादेः कारणत्वप्रतीत्याकाव्यलिङ्गम् कर्णादीनां समुच्चयश्चाऽर्जुनकृतसमरप्रमाथवर्णने चमत्कुर्वन्तितरांसुतराम् ।

अर्जुनकृतसमरप्रमाथेनाऽऽनन्दितस्य नारदस्य आनन्दाश्रुभिराहनिकृत्यकरणस्याऽसम्बन्धेऽपि तत्सम्बन्धोत्स्या सम्बन्धातिशयोक्तिः ।

अर्जुनस्य विक्रमे विस्मयार्णविविभावरीपत्यारोपात् परम्परितरूपकम्, त स्य चाप्सरसां विशेषतः उर्वश्यास्तत्प्रत्याख्यातरहः कर्मप्रस्तावायाश्चापि उत्तमां गकम्पनेन व्यङ्ग्ये हर्षेऽगता ।

अर्जुनकृत समरप्रमाथे अस्त्रसात्कृतानां सुरत्वं प्राप्तानां सुभटानां वरणमा लिकाये सततकुसुमानां प्रदानेन तेषां समाद्या पत्राक्किणामपि प्रदानेन समाप्त्या कुलिशायुधशाखिनः कल्पवृक्षस्यकुपत्व वर्णने तत्पुष्पपत्राणां समाप्ति सम्बन्धाभा वेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिद्वयम्, तेन चार्जुनहतानां सुभटानामसंख्यत्वं ध्व न्यते ।

अर्जुनोपरि तत्पराक्रमप्रमुदितानां सुराणां कुसुमवर्षणात् तद्गतोहर्ष-भावो ध्वन्यते । प्रस्वापनास्त्र निद्रितायारिपृतनायाः समरांगण शयने युद्धजन्य श्रमापनोदनरूपकफलकत्वोत्प्रेक्षाया नितरां रमणीयता ।

युधि निद्रितानां द्रोणकृपादीनां सारथिनोचरेण वस्त्राणामपहरणो-द्यूतसभासमानीतद्रुपदजापरिभवानुरूपफलदित्साहेतूत्प्रेक्षायाः, प्रस्वापनास्त्रसंहारे-च तेषां दिवास्वापजप्रत्यवायापत्त्यभावेच्छा हेतूत्प्रेक्षायाश्च वर्णनाऽऽनुकूल्याद् रुचिरता ।

प्रस्वापनास्त्र संहारे सति कौरवचम्वाः नयनारुण्य- जृम्भणाद्यनुभावै-र्विबोधभावो ध्वन्यते ।

प्रस्वापनास्त्रेण विजयस्य विजयोपलब्धिस्तु जाता किन्तु न कोऽपि मृ-तः, इतिवस्तुनो वर्णने कविना पूर्वप्रयुक्तबाणानां सुभटगणादीर्घनिद्रादाने पूर्व-प्रयोगमुदितत्व हेतूत्प्रेक्षाया पश्चात्प्रयुक्तप्रस्वापनास्त्रस्य च तद्दीर्घनिद्रादानाभा वे पश्चात्प्रयोगरुष्टत्व हेतूत्प्रेक्षाया रामणीयकमापादितम् ।

दुर्योधनस्य विवस्त्रस्ववपुषोऽवलोकनेऽनुशोचनेन विषादो ध्वन्यते । ग न्धर्वकृतस्वबन्धाया घोषयात्रायाश्च दुर्योधनेनाकुशलत्वेनाऽभिमताया अपि कुशलत्वे न स्वीकरणात् लेशालंकारः ।

विवस्त्र कौरवचमूसुभटगणदर्शनलज्जितानां सुखारवधूनां स्ववदन-पराक्क रणानीशत्वस्याऽसम्बन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः, निर्निमेषनयननि न्दया लेशालंकारश्च तद्गतलज्जाभावे सुतरामनुकूलौ ।

विराटसुताऽपहृतवस्त्राणां स्वां पुरीं हस्तिनापुरीं प्रतिनिवर्तमानानां कौरवाणां ध्वजपटशकलैः कौपीनकृत्यापादनेन ध्वन्यमानो लज्जाभावस्तेषां परि भव प्रकाशनेसुतराम् चमत्कारकः ।

(३१) पाण्डवानांगुप्तवास परिपूर्तिः, विराटराजकृतस्तत्सत्कारश्च

दुर्योधन सैन्यपराभवानन्तरं समाध्मातविजयशङ्खो विजयः पुनरपि स्मशानभूमिस्थ शमीतरौ स्वशस्त्र संभाराभिनिधाय बृहन्नलारूपं सारथ्यं च स्वीकृत्य-उत्तरं नयन् विराटपुरं प्रविष्टः, तत्रौचरेण विराटः कंकसूदबृहन्नलादीनां पाण्डवत्वं विज्ञायतान् विनीतः क्षमापयामास, भगवति कृष्णेसमागतेसति तत्सन्निधौ उत्तरा मभिन्यवे प्रदाय युधिष्ठिरादीन् महोपचारैः पूजयामासेति वर्णितं कविना विविच्यते सम्प्रति- यथा-

"तदनु हरिदनुगविशृङ्खलविश्रमितविजयशङ्खरवो निजायुधनिक्षेपरक्षिषु मृतकुटुम्बेषु नवरुधिराञ्जलिपानतृप्तिकिलिकिलितमनुभवितुकाम इव पुनरपि पितृवनमेत्य तरुनिहितशस्त्रसंभारः पुरात्सहायातेषु गणेषु आवामेव तव रणाद्भुतदर्शनं प्रतिवक्ष्यते इति उपालब्धुमिव कृतसांनिध्याभ्यां कलेव्यसारथ्याभ्यां भूयः कृतानुज्ञः कुरुकुञ्जरो भूमिञ्जयमेवं जगाद,-"

"कुमार ! कौशीकुरु केशपाशं मुखेऽश्रुणी मार्जय पातमार्गम् ।
तूण्या समं दोष्णि निधेहि चापं राशेरुपया स्वरथे पटानाम् ।।"

"बधान धैर्यं वद बन्धुगोष्ठ्यामात्मानमेवारिजयस्य हेतुम् ।
मातुः पितुर्वा धुरि मन्त्रिणां वा मा तत्वगन्धं मम सूचयेति ।।"

"अथ तथेत्यभ्युपगम्य क्षतपक्षारुणितनेमिरेखद्विषदौत्पातिकालातचक्रेरिव परिभ्रमद्भिश्चक्रैः संक्रीडता शतांगेन पथि गच्छन्नग्रेसरघोटकखुरपुटकुट्टनत्रुटितधरणितलोच्चलितरजोभाराक्रमणाविनम्रीकृतपद्मणापिकुरुकुलजैत्रोऽयमिति विस्मयबलविस्तारितेन चक्षुषा बृहन्नलामप्यनादृत्य मुहुर्मुहुरापिबद्भिः पौरैरनुगम्यमानोऽयमुत्तरो नलकूबर इवालकां स्वां नगरीं प्रविश्य परस्परोपमर्दनद्विगुणितबन्दिवादित्रघोषेण महता राजमार्गेणोपलक्षितः पितुः समामभिजगाम ।।"

"तान्येव पुष्पाणि त एव धूपास्ते केतवस्ते मणितोरणाङ्काः ।
पुत्रस्य तस्यापि पुरोपचारा बभूवुरग्रे जयिनः पितुर्यैः ।।"

"तत्रावनीन्द्रः प्रणतं कुमारमालिङ्ग्य राज्ञां तनुत्रभाजौ ।
दोर्भ्यां द्विषद्वन्धनखेदमाग्भ्यामपि प्रमोदाद् दृढमालिलिङ्ग ।।"

`पार्थोऽप्युपानीय रथस्य गर्भात्पार्श्वस्थितायैः पितुरुत्तरायै ।
प्रादत्त पट्टांशुकमात्मजन्मनोः पाणिग्रहार्थं किल मन्त्रवासः ।।`

`आचेटमन्यमखिलं पटमासुदेष्णामन्तःपुराय स विमज्य ददौ कुमारः ।
सैरन्ध्र्ये न तु मलीमसवाससेऽपि संचिन्त्य तां बहुपटप्रभवावनाम् ।।`

`विनार्जुनं पाण्डुसुतान्समाजे विस्मित्य विस्त्य विलोकमानम् ।
जिघ्रन्विराटश्चिकुरेषु सूनुं जगाद विन्यस्य निजासनार्धे ।।`

`निपात्य पार्थान्कान्तारे निःसपत्नत्वमीयुषाम् ।
कण्ठेगडूयसे वत्स ! कौरवाणां त्वमेककः ।।`

`नव्यं गुरुं भुवि न मार्गितुमुत्तरायाः
संरक्ष्य सूतमपि तादृशि संप्रहारे ।
जन्मर्क्षजीवदिनयोगफलं च दातुं
कन्यासु वत्स ! कथमेत्य कुरून्व्यजेष्ठाः ।।`

`इति प्रमोदचञ्चलेन पाणिना परामृश्य चरमाङ्गं पुनः पुनरनुयुञ्जानाय तातायसौदेष्णेयोऽपि त्रपाप्रवाहाभिमुखमवस्थातुमपारयन्निव विवलितकंधरो गिरमेवं विज्ञापयामास,-`

`रोदःप्रसारि ध्वनितं मया चक्रे धुरिद्विषाम् ।
यावान्मे वेगसंनाहस्तावांस्तत्र प्रदर्शितः ।।`

`अहमेको रणे तस्मिन्नपरैरनुष्ठिताम् ।
रथिसारथिपत्तित्वे रचयामि स्म कर्तृताम् ।।`

`देव ! किं बहुना , -`

`अपार्थं कर्म मे नासीदाहवे यदरातिषु ।
पुरो विजयमाधाय पुनरागां पुरीमिमाम् ।।`

`इति तादृशीं तस्य वचनचातुरीं निशम्य दुरोदरविहारप्रहारवेदनामप्यविगण्य तरलितेन शिरसा श्लाघमाने यतीन्द्रे वासरविरामशंसिनं यामशङ्खरवमाकर्ण्य यथोचितं समास्तारान्विसृज्य मेदिनीपतिर्मोदेन सुदेष्णाप्रासादमाससाद ।।`

`सुतावलोकेन नरेन्द्रसुभ्रुवश्च्युताखिलाश्रुष्वपि सोदरात्ययात् ।

विलोचनाभ्यां धृतिवृष्टिसंपदे विमाण्डकापत्यविजृम्भणायितम् ।।'

'अन्येद्युरात्मजमुखाल्लक्ष्मीषां याथार्थ्यमवगम्य चकितचकितः कुटुम्बेन सह स चिवान्पुरस्कृत्य सभामागतो विराटो नामान्तरसंनिधानादिव हायनमेकमनुपसर्पद्भिः स्वैः स्वैर्वेषैः प्रकृतिमापन्नेन सोदर्यजनेन समुपास्यमानस्य युधिष्ठिरस्य च रणनलिनयोः पलितभावुकेन मौलिना मरालयुवकेलिमुल्लालयन्प्रणिपातं चकार ।।'

'तुदा नुनोद स्मितपाण्डुरिम्णा तपः सुतौ ऽकातिहेतुमुग्रम ।
महेन्द्रसूनोर्दृशि शोणिमानं मात्स्यस्य चित्ते ऽपि न नीलिमानम् ।।'

'मात्स्यस्ततः प्रमुदितो महिते ऽहनिकन्यां शौरौ समेयुषि सहाखिलबन्धुवर्गैः
मूर्ध्नीं शिरीषकुसुमादपि पार्थसूनोः सीमाशिलामतनुत प्रथमाश्रमस्य ।।'

'तथोपचारं विदधे सुदेष्णाजानिः स पार्थेषु समाधवेषु ।
तमेव गान्धारपतिं यथा ते जानीयुरत्यन्तकृतोपकारम् ।।'

'अथोल्लास्य कुरूनेतान्हरिर्मात्स्यपुराधयौ ।
मन्दारप्रमुखान्कल्पान्वसन्त इव नन्दनात् ।।' ७।५७-७४।।

एवं पार्थस्य विजयशङ्खनादानन्तरं स्मशानशमीतरौ स्वशस्त्राणि निक्षिप्य पुनरपि षण्ढत्वसारथ्य स्वीकरणं रथैपटराशेरुपरि उत्तरमुपवेश्य तत्सारथ्येन पुरीप्रवेशः उत्तरस्य च सभायामुपविष्टस्य पितुः समीपगमनम् , विराटस्योत्तरागमनेन हर्षस्तं प्रति कुरुविजयप्रकारप्रश्नश्च, उत्तरस्य तदुत्तरम्, सुदेष्णायाः उत्तरागमनेन प्रमोदः , विराटस्य पाण्डवानां पाण्डवत्वज्ञाने ससचिवपरिवारं सभामागत्य गुप्तवासपरिपूर्त्या स्वस्ववेषविशिष्टैर्भीमार्जुनादिभिः सोदर्यैरुपास्यमानस्य युधिष्ठिरस्याचरणयोः शिरसा प्रणमनम्, सबन्धुजने शौरौ समागते उत्तरायां विवाहः, पाण्डवानां श्रीकृष्णस्य च विराटकृतो महोपचारैः सत्कारः ,-श्रीकृष्णस्य ततः प्रयाणं चेति वर्णितानि वैदग्ध्येन कविना ।

तत्र पार्थस्य समरविजयशङ्खनादस्य हरिर्व्रणा विश्रमेण तस्य चेतन धर्मस्य जडे बाधितत्वात् लक्षणालक्षणयातद्व्याप्तिः व्यञ्जनया च तदतिशयो ध्वन्यते, अतो ऽत्रात्यन्ततिरस्कृतध्वनिः । स्वशस्त्रनिक्षेपाय पुनरपि पितृवनगमने निजायुधरक्षिभूतकुटुम्बेषु नवरुधिरपान प्रमोदानुभवनकामनारूप हेतूत्प्रेक्षा । कलै-

व्यसारथ्ययोः पार्थसान्निध्यकरणे तद्वर्णनाद्भुतदर्शनवर्त्मनोपालम्भरूपकलोत्प्रेक्षा । कर्णव्यसारथ्ययोः अचेतनत्वेन पार्थस्य सान्निध्यकरणे अनुषङ्गजनकरणे च कर्तृताया अनुपपन्नत्वेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिद्वयम् । श्लेषानुप्रासाश्च चमत्कुर्वन्तितराम् ।

तत उत्तरस्य पुरीप्रवेशे रणक्षितिक्षतजपङ्कारुणितनेमिरेषु रथचक्रेषु क्षिप्तदीर्घातिकालातचक्रोत्प्रेक्षा, धरणीरजोमाराक्रमणेन पद्मनां विनम्रीभवनस्याऽसम्बन्धेऽपि तत्सम्बन्धोक्त्या सम्बन्धातिशयोक्तिः, उत्तरस्य नलकूबरेण पुर्याश्च अलकया उपमा, श्लेषवृत्त्यनुप्रासाश्च रुचिराः । पौराणामुत्तरावलोकनाधिक्येन तदनुगमनेन च तद्गतस्तेषां बहुमानोऽनुरागश्च ध्वन्यते । पानस्यमुखवर्मस्य चक्षुर्निबाधात् लक्षणलक्षणाया उत्तरकर्मकपार्थैकदर्शनस्याऽतिशयोध्वन्यते, अतोऽत्यन्ततिरस्कृतध्वनिश्चापि चमत्कारिणी तत्र ।

ततो विराटस्य अस्त्राद्रर्तनुत्रकुमारालिङ्गने तद्धेतोस्तद्वीराग्रिमतत्वस्य व्यङ्ग्यस्यात्काव्यलिङ्गध्वनिः, तद्विशेषणस्य चास्त्राद्रर्तनुत्रत्वस्य चोक्ताभिप्रायगर्भितत्वात्परिकरः, + अस्त्रश्लेषश्च, बन्धस्निग्धदोर्भ्यां दृढालिङ्गनरूपकार्थस्यासंभवेऽपि तद्वर्णनात् विभावना च चमत्कुर्वन्तितराम् ।

कौरवापहृतवस्त्राणामन्तःपुरिकाजनेषु विभजनेऽपि सैरन्ध्र्ये तददाने तस्या बहुपटप्रभवावलग्नत्वस्य उत्तरकर्तृकचिन्तनरूपा प्रतीयमाना हेतूत्प्रेक्षा ।

विराटस्य उत्तराभिनन्दनवचने उत्तरस्यगङ्गुपमया पार्थानां वनवासित्वात् उत्तरस्यैव कौरवविजयेन तत्कण्ठग्रहत्वम् नान्यस्येति प्रतीतेः परिसंख्यालंकारो व्यङ्ग्यः तेन उत्तरोत्कर्षस्य ध्वनिः

विराटस्य उत्तरं प्रति बृहन्नडा तत्कर्तृकभूतरक्षण-कौरववस्त्रापहरण-तद्विजय प्रकारप्रश्नेन उत्तरमहोत्कर्षप्रत्यायनात् व्यतिरेकालंकारो व्यङ्ग्यः, तेन च वीररसोपयिकतत्प्रभावो व्यज्यते ।

उत्तरस्य विराटप्रश्नोत्तरे रणे स्वकीयानां सत्यानां रोदनपलायनादीनाम् असत्यानां च क्ष्वेलापराक्रमादीनां कथने श्लेषः, स्वस्यैवैकस्यारथिसारथिपतित्वकरणे समुच्चयो, व्यतिरेकश्च, स्वकर्मणोऽपार्थत्वाभावे विजयस्य पुरस्करणे

चापि श्लेषः तद्वचनचातुर्यमुद्वरयन्ति ।

उत्तरावलोकनेन सुदेष्णायाः सोदरात्ययनिमित्तक सर्वाङ्गिपातेऽपि लोचनाग्र्येष्वतिवृष्टिवर्णनाद् विभावना, अग्र्यशब्दस्य देशविशेषावयवविशेषयोर्वाचकत्वात् श्लेषः, विलोचनमेवाग्र्यदेश इति रूपकम्, सुदेष्णाकर्तृकोत्तरकर्मकावलोकनस्य तल्लोचनाग्र्यातिवृष्टौ विभाण्डकापत्य विजृम्भणेन उपमा, चेति एकवाचकानुप्रवेशनाङ्गाङ्गिभावेन चान्योन्यं संकीर्य उत्तरविषयकसुदेष्णागतवात्सल्यमुपकुर्वन्ति+

उत्तरमुखेन कङ्क बृहन्नलादीनां पाण्डवत्वं विज्ञाय तद्विषयकावहेलाय पचारभीतस्य सचिवपरिवारसहितस्य विराटस्य गुप्तवासपूर्त्या स्वीकृतस्ववेषो सानुजे युधिष्ठिरे प्रणमनादिवर्णने युधिष्ठिरचरणयोर्नलिनत्वेन रूपणाद् रूपकम्, विराटस्य पलितेन शिरसो युधिष्ठिरचरणनलिनेमरालकेलिस्वीकारात् निदर्शना चाङ्गाङ्गिभावेन संकीर्यते । युधिष्ठिरादीनां हायनमेकं स्ववेषाणां दूरीभवने कङ्कादिनामान्तरसंनिधानरूपहेतोरुत्प्रेक्षावाचकसंकरेण संसृज्यते । हेकवृत्त्यनुप्रासश्चेति चमत्कुर्वन्तितराम् ।

विराटप्रणिपाते युधिष्ठिरस्य स्मितेपाण्डुरत्व सम्बन्धस्याऽसत्वेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, विराटे मयान्यत्वस्य नीलिमरूपेणवर्णनाद्भेदातिशयोक्तिः, युधिष्ठिरस्य स्वकीयस्मितपाण्डुद्विष्णामहेन्द्रसूनुनयनशोणिम्नो मात्स्यमानसभीतिरूपनीलिम्नश्चापाकरणात् तत्र तत्र पाण्डुरिमव्याप्तिप्रतीत्या तद्गुणालंकारः, युधिष्ठिरस्मितेन तद्गतमनः प्रसादस्यविजयविराटाभ्यामनुमानादनुमानालंकारः ,स्मितेन युधिष्ठिरगतप्रसादोदयस्य विजयनयनशोणिमदूरीभावेन तद्गतकोपशान्तेः, विराटमानसनीलिमापसरणेन तद्गतमयशान्तेश्च प्रतीत्या तेषां ध्वनयः । इत्यतितरां चमत्कारिणी महाकविसूक्तिः ।

मात्स्यस्य अभिमन्युना उत्तराविवाहात् पार्श्वेषु अनुरागातिशय्यो ध्वन्यते । शिरीषकुसुमाधिकसुकुमार्या उत्तराया अभिमन्युप्रथमाश्रमसीमाशिलात्वेन रूपणात् रूपकम्, तथाविधयाऽपि तया अननुरूपसीमाशिलानिर्माणरूपकार्यकरणाद् विषमम् , आश्रमोव्रतचर्यरूप एव आश्रमस्तपोवनभूमिभाग इति आश्रम शब्दगता श्लेषमूलाभेदातिशयोक्तिश्च पूर्वोक्तानुरागध्वनिमुपकुर्वन्ति ।

पार्थेषु भगवति कृष्णे च विराटस्य सत्कारातिशयैः अनुरागातिशयो ध्वन्यते । अपकारिष्यपि शकुनौ पार्थानां तदपकारैः विराटकृत सत्कारातिशयलाभात् उपकारित्व कथनात् लेशालंकारः, पूर्वोक्त ध्वन्युपकारकः ।

भगवान् कृष्णः रूठ स्वसंनिधानेन पाण्डवान् आनन्दविराटनगरात् पुनः स्वपुरीं ययौ, इतेन भगवतः पाण्डवेषु स्नेहोध्वन्यते, तत्र कृष्ण-पाण्डव--विराटपुराणां क्रमशः वसन्त- कल्पपादप-नन्दनैः समस्तवस्तुविषयोपमा नितरा मुपकारिणीचमत्कारिणीच । श्लेकवृत्यनुप्रासावपि रुचिरौ ।

एवं रुचिरतयैव वर्णिता कविना पाण्डवानां गुप्तवासपरिपूर्तिः ।

(३२) पाण्डवानां समरसन्नाहः कौरवैः सहसन्धेः श्रीकृष्णाप्रयासश्च

अथ पाण्डवानां कौरवाणांचरणोद्योगः , रणाय दुर्योधनेन अर्जुनेन-च कृतं भगवतः श्रीकृष्णस्य निमन्त्रणम्, वर्णितानि विविच्यन्ते सम्प्रति ।तद्व-नं यथा -

' तावत्पाण्डुसुतेन कौतुकवता कर्तुं प्रकोष्ठार्पणे
ज्यामेकां युधि नर्तकीं भुजभुवि स्थास्नुं चिरस्यापराम् ।
आहूताः क्षितिपा विराटनगरीं सैन्यद्विपेरुन्मदैः
प्रावृड्वासरसंचया इव घनैः प्रापुर्महाद्रेस्तटीम् ।।'

' सेनानां यावती? पार्थौ युद्धायाक्षौहिणीर्दधौ ।
धार्तराष्ट्रश्चतसृभिस्तावतीरधिकाः पुनः ।।'

' उक्ताध्ववृत्तान्तमुवाच शल्यं पार्थस्ततो भानुसुतस्य युद्धे ।
आक्षोपवाचा हृदयं वितन्वान्नन्वर्थतामाचर मातुलेति ।।'

' अथ मागिनेयेषु वत्सलतया सत्यसंधैरस्तथेति प्रतिश्रुत्य,-

' भद्राय तव मां विद्धि निद्रामुचमिति ब्रुवन् ।

मद्राधिपो ययौ पार्थात्स द्राग्दुर्योधनान्तिकम् ।।'

'तदनन्तरम्,-'

'साह्याय युद्धे सरसीरुहाक्षां वरीतुकामस्य बलारिसूनुः ।
जजातशत्रोरवतंसयन्ती तुङ्गध्वजां द्वारवतीमयासीत् ।।'

'तत्र चिरदृष्टस्य कुरुकुञ्जरस्य कुङ्कुमकोमलक्रमविलासस्य तस्य विलोकनाय वीथीषु जनाः सङ्घीबभूवुः ।।'

'हेतुं सुभद्राहरणे तदीयां यतित्वशुद्धिं हृदि कुर्वतीनाम् ।
गवाक्षमार्गैः कृतवीक्षणानां स्त्रीणां मुखेन्दोः स्मितचन्द्रिकाभूत् ।।'

'दौवारिकैस्तत्र स दत्तमार्गो निध्रायमाणस्य निकेतमध्ये ।
शौरेरुपायाच्चरणोपधानं तत्स्यन्दिसिन्धुच्युतकूर्मशोभम् ।।'

'यस्याधिमौलिसविधे प्रथमं समेत्य तिष्ठन्कुरुद्वहसुतो युधि साह्यमर्थी ।
रेजे परीक्षितुमिवोत्सुकतां दधानस्तत्कुन्तले निजमनस्यपि वक्ष्यमाणम् ।।
'निमीलनालिङ्गितनेत्रयुग्मो निष्पन्ददेहो नितरां बभौ यः ।।
स्वध्यानशैलीसुखमास्थितानां तपस्विनां सङ्घमिवानुकुर्वन् ।।'

'दैवीकुचाद्रिरुरुचे घुसृणेन कल्पः सक्तः कपोलफलके मकरो यदीये ।
स्वाक्ष्वजाजियिने विजयाय सिद्धिं विश्राणयेति निगदन्निव कर्णमूले ।।'

'पाश्चात्यपाथोनिधिपार्श्वभागे सम्पूर्य कुक्षिं सलिलस्य पूरैः ।
सजातियूथाच्च्युतिमाश्रितस्य क्रमं दधौ यो घनशावकस्य ।।'

'ततः प्रबुद्धेन तेन देवेन तयोः क्रमेण प्रथमाध्यागमनदर्शनाभ्यां कृत्यसाम्यं हृदि कृत्य रणार्थिनो गृहीतहेतीनां नवकोटिसंख्यावतां गोपकुमाराणां कदम्बेन केनचिदंशेन केवलसंनिधानेन स्वेनापि केनचिदंशेन परिपूरितधनमनोरथौ सुयोधनघनञ्जयौ स्वावासकटमुवमासेदतुः ।।'

'सेनागजेन्द्रमदसौरभवीचिवेग-
निर्धूतगोग्रहणसंयुगपूतिगन्धम् ।
संवीक्ष्य मत्स्यवसुधेन्द्रपुरोपकण्ठं
शौरिश्च शक्रतनयश्च ननन्दतुस्तौ ।।' ८।१-१२ ।।

एवं पाण्डवानां कौरवाणां च रणोद्योगः, दुर्योधनस्य अर्जुनस्य च रणाय श्रीकृष्णनिमन्त्रणं च वर्णितं वेदगर्भेण कविना ।

तत्र पाण्डवरणोद्योगे तद्गतेन उत्साहेन धृत्यादिभावेन च वीररसप्रतीतिः । तत्र उभयोरपि ज्यायोरेकयाकरणक्रिययान्वयात्तुल्ययोगिता, तयोरेकस्या समरस्थलनर्तकीकरणस्य अपरस्याश्च भुजप्रदेशस्थास्तूकरणस्य चेत्येवमुभयविषज्याविषयकाचारस्य विषमत्वेन विषमालंकारः, अपरज्यास्थास्तुत्वविधाने च पूर्वज्यानर्तकीकरणस्य हेतुत्वावगमात् काव्यलिङ्गम् च प्रकृतार्थमुपस्कुर्वन्ति । पाण्डवाहूतक्षितिपानां प्रावृड्वारिदोपमया प्रतापित्वं तेजस्वित्वं च तद्गतजानां च घर्मोपमया तुङ्गत्वं दुर्धर्षत्वं च द्योत्यते । छेकवृत्त्यनुप्रासावप्यत्र वीररसानुगुणौ ।

कौरवरणोद्योगोत्साहस्यात्र पाण्डवप्रतिक्रियापरिणाममात्ररूपत्वेन अपरिपुष्टत्वात् भावध्वनित्वमेव ।

प्रतिपक्षदलपतितस्यापि शल्यस्य 'मातुलेत्यादि वाचोयुक्त्यानुनीतस्य स्वानुकूलकार्यविधानाय दृढीकरणेन युधिष्ठिरस्य कौशलं धृत्यादिभावाश्च ध्वन्यन्ते । शल्यस्य शल्यतुल्यताचरणस्य अन्वर्थता चरणेनोक्ततत्वात् पर्यायोक्तमपितत्कौशलानुकूलम् ।

शल्यप्रतिवचने निद्रामुचमितिपदेन सावधानत्वातिशयो लक्षणामूलोऽत्यन्ततिरस्कृत वाच्योः ध्वनिः शल्यगतत्वेन पाण्डवविषयकवात्सल्यस्यापि-प्रतीतिरत्र ।

श्रीकृष्णस्य साहाय्य प्राप्तये तन्निमन्त्रणाय युधिष्ठिरस्यार्जुनप्रेरणेनार्जुनस्य च तत्कीर्त्तिविघर्षणेन तयो रुत्साहो धृत्यादि भावाश्च ध्वन्यन्ते । द्वारवत्याः तुङ्गध्वजत्वेन सम्पन्नत्व प्रतीत्या उदात्तालंकारः । भगवन्नेत्रयोः सरसीरुहोपमया तस्य रमणीयगुणवत्वं वरणीयत्वं च ध्वन्यते ।

अर्जुनस्य कुरुकुञ्जरत्वोक्त्या गौणलक्षणया कुञ्जरवन्महाकलित्वं निर्भयत्वं ध्वन्यते । एवं कुञ्जरकुमारकोमलचङ्क्रमविलासोक्त्या । उभयत्र क्रमेण रूपकमुपमा चेति तयो संसृष्टिः । अर्जुनावलोकनाय जनानां सङ्घीभवनेन तेषामौत्सुक्यं प्रीतिश्च ध्वन्यते , स्त्रीणामपि तदवलोकनाय एकत्रीभवनेन औत्सुक्यं , सुभद्राहरण

कालिकतथतित्वस्मरणेन स्मृतिभावः, तथतित्वे कपटस्यापि शुद्धिपदेन कथनात् विपरीतलक्षणाया तदीय कपटातिशयोद्योत्यते, तज्ज्ञानपूर्वकस्मितेन च तासां हर्षो ध्वन्यते । तासां मुखस्येन्दुत्वेन स्मितस्य च चन्द्रिकात्वेन रूपणाद् रूपकम्, तेन-तासां सततमानन्दनिरतत्वं तदीय हर्षानुकूलं ध्वन्यते ।

द्वारवत्यां दौवारिकदत्तमार्गस्यार्जुनस्य निकेतेनिद्रायमाणभगवच्चरणोपधान सविघप्राप्त्या तस्य भगवद्विषयको रतिभावो ध्वन्यते । चरणोपधानस्य भगवच्चरणोद्गत सिन्धुनिर्गतकूर्मशोभायुतत्व कथनात् निदर्शना श्रौतीपदगता असंभव द्वस्तु सम्बन्धोक्तिनिबन्धना । सा च भगवच्चरणयोर्भागीरथीप्रभवत्वेन पुण्यश्लोकत्वस्मारकत्वाद् तद्विषयोक्तरतिभावानुकूला ।

अर्जुनात् प्रागागत्य भगवन्मौलिसविघदेशे स्थित्वात्या दुर्योधनस्याभिमानित्वं कुटिलत्वं च ध्वन्यते । भगवत्कुन्तलस्य दुर्योधनमनसश्च वक्रत्व रूपकधर्मयोगात् तुल्य योगिता, भगवन्मौलिसविघस्थित्या च दुर्योधने भगवत्कुन्तल स्वमनसोर्वक्रत्वतारतम्यपरीक्षणोत्सुक्यधारणकर्तृत्वोत्प्रेक्षा चोक्तं ध्वनिमेवोपस्कुरुतः ।

निद्रायमाणस्य भगवतो निःस्पन्दत्वेन समाधिस्थतपस्विजनोपमा, केशरकल्पितदेवीकुचमकराकृतिरेखायां भगवत्कपोलसंक्रान्तायां मकरत्वोत्प्रेक्षा, तस्मिंश्च स्वीकृताग्निमन्मथमथनजयिनेऽर्जुनाय सिद्धिं यच्छेति वचनकर्तृत्वोत्प्रेक्षा, भगवतः पाश्चात्य पयोनिधि पयः पूरपानतुन्दिलघनशावकक्रमस्वीकारेण निदर्शना च भगवद्वर्णने प्रयुक्ताश्चमत्कारिण्य एव नितराम् ।

सेनागजेन्द्रमदसुरभितविराटपुरोपकण्ठदर्शनजन्यानन्दस्य कृष्णार्जुनाभ्यां योगात् तुल्ययोगिता, तया च वीररसंचारिभावौ ध्वन्यमानौ हर्षौत्सुक्यं-च उपस्कुरुतः । पाण्डवसेनासानन्दवीक्षणेन भगवतः पाण्डवस्नेहो ध्वन्यते ।

अथ युधिष्ठिरस्य कौरवैःसहसन्धिप्रयासाय श्रीकृष्ण प्रार्थना, श्रीकृष्णस्य तत्स्वीकृत्य रथेन कुरुराजधानीगमनम्, तत्र विदुरगृहे पृथा पार्श्वेरात्रिवासश्च वर्णितानि समीक्ष्यन्ते । तद्वर्णनं यथा -

"दृष्ट्वा निवृत्य वदतो युधि पाण्डवानामुत्साहमुग्रमथ संजयतो निशम्य।
वातैर्विनापि मणिसौधतले निवासं कुर्वन्नकम्पत भृशं कुरुवंशकेतुः ।।"

"पाण्डोः सुताय वसुधां प्रविभज्य दित्सोः
प्रज्ञादृशो रहसि सान्त्वपथोपदिष्टम् ।
दुर्योधनस्तु वचनं न चकार कर्णो
कर्णौ स्वमेव वचनं मधुरं चकार ।।"

"तदनु दिने दिने समुपचीयमानमानाविधनरपतिकुलचतुरङ्गबलकलकलानप्यभिभवद्भिः कङ्ककाकसालावृकजम्बुकरटितैः कटूकृतनिकट्यौः कुरुविराटपुटभेदनयोः कतिपयदिनैरेव पञ्च खलु वीराः कौरवसाम्राज्यलक्ष्मीमभिवीक्ष्य स्थातुमवशिष्यैरन्निति किंवदन्त्यां क्षितिपतिः क्षीणधैर्यादीनादारेण सहोदरसमर्दां सरसीरुहाक्षामेवमाचचक्षे,-"

"एतावतो बन्धूजनान्निहत्य किं लब्धाया कृष्णा । मुवानया मे ।
सकन्दमूलानि सनिर्झराणि न किं ममाद्यापि वनानि तानि ।।"
"संतापकाले सति सर्वमम्मः पतत्यधस्तादिति हि प्रसिद्धिः ।
जिह्वां विहायाद्य जलं मुहुर्मे दृष्टिं समारोहति चित्रमेतत् ।।"
गलत्समीरैर्गजकर्णतालैर्नटत्पटैर्यो नगरध्वजेभ्यः ।
तनूरिदानीं मम तान्तकान्तिराकम्पनाम्नायमसावधीते ।।"
"आनन्दयित्रीमखिलस्य जन्तोरन्तःक्षमां स्वामपहाय मोहात् ।
बन्धुप्रणाशाद्बहुदुःखदोग्ध्र्यै बहिःक्षमायै स्पृहयामि धिङ्माम् ।।"
"गतिर्न मेऽन्या गुरुडध्वज ! त्वया विनाधुनास्या विपदो विधूतये ।
वनानलार्चिर्वलयावृतस्थितैर्बलाहकात्किं शरणं मृगीशिशोः ।।"
"बहुभिः किमिहापरैः प्रलापैर्बहिरन्तश्च वदामि तुल्यमावम् ।
कुकुराधिप ! बन्धुभिर्मम स्वैः कुरु संधिं कुरुवंशभूतये त्वम् ।।"
"इति ब्रुवन्तं यदुनायकोऽब्रवीद्युधिष्ठिरं योगिविचिन्त्यवैभवः ।
महीपते ! यद्भवता समीरितं महात्मनां युक्तमिदं भवादृशाम् ।।"
"सरिदात्मजशासितोऽपि सन्स दुरध्वं न जहाति कौरवः ।
इति चिन्तयतो ममाधुना हृदि सिद्धिः खलु संशयेशया ।।
"प्रयते तथापि नृप ! संधिलब्धये

प्रयतेन्द्रियैर्मुनि पणायितस्य ते ।
फलति क्वचिन्न फलति क्वचित्क्रिया
प्रविधातुरेषु नहि दोषशीकरः ।।'
'इत्थं निगद्य मधुरस्मितमीक्षमाणो
भीमस्य वक्त्रमपि दारुकनीतमग्रे ।
आरुह्य रत्नरथमाश्रितदालीला-
कूलंकषो हरिरगात्कुरुराजधानीम् ।।'
'अवलोकयन्नथ पुरप्रतोलिकामनिमेषपौरजनतानिरन्तराम् ।
मृदुबाहतेषु स दुरासदः परैर्यदुराज एष विदुरालयं ययौ ।।'
'तमसां कुलानि सकलानि दर्शने सति सद्य एव शमयन्महामहाः ।
स विवेश तत्र विदुरस्य मन्दिरं दरमाश्रिकन्दरमधीशुमानिव ।।'
'कंसवैरिणि समेयुषि गेहं दातुरातिशयिकं मदनृत्तम् ।
संक्षिपां गमयति स्म पुरारेः सांध्यताण्डवविधेरवलेपम् ।।'
'विरतेरुचितं विशुद्धमहनो विधिमाधाय पितृष्वसुः सकाशे ।
वसतोऽस्य निशैव सा समाप्ता वसुदेवात्मभुवः कथा न तास्ताः ।।'
८।१३-२८ ।।

एवं युधिष्ठिरस्य कौरवैः सह सन्धिप्रयासाय श्रीकृष्णप्रार्थना, तदङ्गीकृत्य श्रीकृष्णस्य हस्तिनापुरगमनम्, तत्र विदुरगृहे पृथापार्श्वे रात्रिवासश्च सा सुवर्णितानि कविना ।

संजयात् पाण्डवानामुद्यमेन सन्नाहं श्रुतवतो धृतराष्ट्रस्य कर्म्मानुभावेन श्रासावेगादिव्यभिचारिभावैश्च परिपुष्टो भयस्थायिभावो भयानकरसं परिपोषयति । कुरूणां वंशोऽन्ववाय एव वंशो वेणुः तत्केतुः धृतराष्ट्र इति श्लिष्टपरम्परितरूपकम्, कम्पनकारणमूर्तिवातंविनापि कुरुवंशकेतुकम्पन रूपकार्थवर्णनाद् विभावना चैभि भयानकमेवोपस्कुरुतः ।

धृतराष्ट्रस्य पाण्डवाय राज्यभागं दित्सोः सान्त्वनयोपदिष्टं वचनम स्वीकुर्वतो दुर्योधनस्य कर्णपरामर्शेन च असूयाचापल्यभावौध्वन्येते । दुर्योधनोधृतराष्ट्रवचनं कर्णे न चकार, प्रत्युत स्ववचनं कर्णेराधेये चकारेति परकीयवचनं स्वकर्णेनिकृतवतः स्ववचनस्य परकर्णेकरणमननुरूपम्, अतोऽयं विषमालंकारः उक्तासू-

~~करुक~~ याचापल्योपस्कारक एव ।

कुरु विराटपुटभेदननिकटयोः समुपचीयमान नानाविधनरपतिचतुरंगबल-कल कलाभिभाविकृकाकसालावृकजम्बुककदम्बकरटितैः कतिपयदिवसानन्तरं कौरवसाम्राज्यलक्ष्मीमुपभोक्तुं पञ्चखलुवीरा अवशिष्यैरन्निति किं वदन्त्या च विभावभूतया क्षीणधैर्यत्वसजल दीननयनत्वमुखशोषशरीरकम्पादिभिरनुभावैः युधिष्ठिरगता निर्वेदावेगदैन्यशङ्काभावा अभिव्यज्यन्ते । निम्नगामित्वस्वभावे जले जिह्वां विहाय उपरिभागस्थितनयनदेशरोहणास्यानुरूपत्वात् विषमालंकारः, जलस्यजिह्वादृष्ट्योः पर्यायेण वर्तमानत्वात् पर्यायः, नगरध्वजपटनटने गजकर्णतालसमीरचलन हेतुकतायाः युधिष्ठिरतन्वां च नगरध्वजापादानक- कम्पनाम्नाप्राध्ययन कर्तृतायाः सम्बन्धेऽपि सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, युधिष्ठिरसदृशधर्मात्मनि-अखिलजननन्दनान्तः कामात्यागस्य बन्धुप्रणाशजबहुदुःखबहिः कामा स्पृहायाश्चानुरूपत्वादपरं विषमद्वयम्, तदुपपादितत्वाच्च युधिष्ठिरात्मधिक्कारस्य काव्यलिङ्गम् चोक्तभावध्वनीनुपस्कुर्वन्त्येव ।

युधिष्ठिरस्य भगवन्तं कृष्णं प्रति कौरवैः सह सन्धिसम्पादनप्रार्थनायां दैन्यभावध्वनिः, तस्य च वनानिलवलयावृतमृगीशिशुदृष्टान्तो नितरामुपस्कारकः ।

युधिष्ठिरं प्रतिभगवद्वाक्ये- युधिष्ठिरे सन्धिचिकीर्षायायुक्तत्ववर्णनार्ते समालंकारः, दुर्योधनस्य दुरध्वारूढत्वात् सन्धिप्रयासः सफलो भवेन्नवेतिवक्तव्ये क्वचित्क्रिया फलति, क्वचिन्नेति साधारणस्याप्रस्तुतस्यकथनादप्रस्तुतप्रशंसात्वंकारश्च चमत्कारिणी । युधिष्ठिरप्रार्थनानुसारं सन्धिप्रयासस्वीकारेऽपि भगवतो भीमं प्रति सस्मितवीक्षणेन सन्धिस्तवनाऽभिमत इतिजाने इति वस्तुध्वन्यते। भगवतः सन्धिप्रयासश्रमस्वीकारे आश्रितरक्षालीलाकुलकत्वस्य हेतुत्वावगत्या काव्यलिङ्गम्, आश्रितरक्षालीला~~सम्बन्धित्वेन कुलस्यौचित्यात् लीलाया स्तटिनीत्वप्रतिपत्या रूपकध्वनिः~~ ।

भगवतो विनम्रेषु मृदुत्वेन धृष्टेषु चामृदुत्वात् तद्रहासदत्वेन वर्णनादुल्लेखः, कुरुराजधान्यां भगवतो विदुरालयगमने विनम्रेषु मृदुत्वस्य हेतुत्वावगत्या

काव्यलिङ्गेन, भगवदवलोकनाय पुरप्रतोलिकासु जनतायानिबिडीभवनात् तस्यास्तद्विषयो रतिभावोऽभिव्यज्यते, तस्मिंश्चोक्तालंकारद्वयस्योपस्कारकता । अत्रैव 'दुरा' इति स्वरव्यंजनसमूहस्य चतुर्वारान् आवृत्या यमकम्, भगवतः सूर्येण विदुरमन्दिरस्य च चरमाद्रिकन्दरेणोपमा, तस्यां च साधारणधर्मभूते सकलतमःकुलशामकत्वे तमोगतश्लेषश्च चमत्कुर्वन्तितराम् ।

भगवति गृहमागते विदुरस्य हर्षातिशयेन नृत्यस्य पुरारिसान्ध्यताण्डवावलेपसंकीर्णकत्वोक्त्या व्यतिरेकालंकारो विदुरगतस्य भगवद्विषयकस्य रतिभावस्य तन्नृत्याभिव्यक्तहर्षध्वनिपोषितस्योपस्कारकः ।

विदुरगृहे भगवतः पितृष्वसुः सकाशे रात्रिवासेन तद्विषयक आदरोऽनुरागश्च ध्वन्यते, तत्र 'निशैव समाप्ता नतु वार्ता' इति परिसंख्यालंकार उपस्कारकः ।

अथ प्रातराह्निकं विधाय विदुरेण सह भगवतः कौरवसभां प्रतिगमनम् तत्र भगवतः स्वागतं पूजनं च वर्णितं विविच्यते, तद्वर्णनं यथा -

'अथ विरतायां निशीथिन्यामिव पृथाकथायां दीनद्युतिषु तारकाकलापेष्विव प्रदीपेषु विजृम्भितेषु शकुन्तिमिरिव बन्दिभिः कलकलेषु विकसितेषु नलिनेष्विव नयनेषु चञ्चरीकेष्विव पौरजनेषु सत्पलादिव राजमन्दिरान्महोत्पलं प्रतीव विदुरमन्दिरमागतेषु विरोचन इव कमललोचनः प्राचीनगिर्यट्टकादिव पर्यट्टकादुत्तस्थौ ।।'

'समाप्य संध्योपयिकं स कृत्यं समापयिष्यन्नथ शार्ङ्गधन्वा ।
अलंकृतार्ङ्गो विदुरस्य हस्तमालम्ब्य मन्दं निरगान्निकेतात् ।।'

'तदनु निखिलहरारम्भकृत्यमवसाय्य बालातपेन बलाहक इव घुसृणारुणेन पटीरकेन चर्चितकलेवरः पङ्केरुहशकिनीभिरञ्चलिलिखितराजहंसराजिभिरिवकृष्यमाणेनेव पीताम्बरभागेन परिचुम्बितप्रपदपल्लवोनिजोदरान्तरानवकाशतया बहिर्निर्गतैजगदण्डशिशुमिरिव मुक्ताफलैः प्रत्युप्तमेखलामुखभागो वर्षाहेमन्तसमययोरप्यविनश्वरं लक्ष्मीलीलाकमलमुपश्लोकितुमागतेन दिनमणिबिम्बेनेव कौस्तुभेन देदीप्यमानभुजान्तरो दनुजपरिषदुत्पातरक्तपरिवेषेणेव पद्मरागकेयूरेण परिमण्डितभु

ज दण्डो निर्गत्य सुयोधनदुर्वासिताया नगरभुवः स्पर्शनं परिहर्तुमिव द्वारसविनय मुपागतेन दारुकेण संयोजितमणिपादुकः किंचिदवनमितपूर्वकायेण विदुरेण वि तीर्यमाणहस्तावलम्बो गुरुकृपप्रमुखैश्चलसंघैः प्रतिपाद्यमानां जयाशिषं प्रतिगृह्णाना नः कुशलप्रश्नकोरकितमौदाभ्यां कुरुराजदेवव्रताभ्यां सदनाभिगमनाय संप्रार्थ्यमान श्चिरतरावसरं प्रतिपालयतामक्षौहिणीपतीनामञ्जलिकमलवनालिमवलोकनेन संभाव यमानो मुकुन्दो बन्दिवृन्दपरिपठ्यमानकंसादिविजयविरुदावलिप्रबन्धबन्धुरेण-- मंजुलकुसुमगन्धसंपदन्धीकृतपुष्पधयङ्कारसहचरवादित्रघोषेण मेघवर्जमुन्मिषन्तीभिः सौदामिनीभिरिव कनकवेत्रलताभिराकुलीकृतेन महताराजपथेन सुयोधनादिभिश्चतु- र्भिरध्यासितपूर्वं सभामण्डपं शनैः शनैरवजगाहे ।।

"द्वारं समेयुषि हरावथ तत्र गोप्त्र्याः सर्वैः समं नरपतिः सहसोदतिष्ठत् ।
पूर्वाचलाश्रयिणि पूषणिपद्मपद्मैः सौरभ्यपूरइव षट्चरणैरनेकैः ।।"
"तत्रातितुङ्गतरसोपनीते रत्नासनेऽयं रचितोपवेशः ।
पुरोहितैरग्रभुवि प्रदिष्टां पूजामुपादत्त पुमान्पुराणः ।।"
"समान्तरे तत्र समग्रकान्तिं संवीक्ष्य संवीक्ष्य सरोरुहाक्षम् ।
नरेन्द्रवर्गं नगरीजनेषु न कस्य वाभून्नयनप्रमोदः ।।" ८।२८-३२।।

एवं भगवतः प्रातः सन्ध्यावन्दनादिकं विधाय विदुरेण सह कौरवसभां प्रतिगमनम्, तत्र भगवतः स्वागतं पूजनं च वर्णितं कविना कौशलेन ।

प्रातः घर्मीभूतेन वाच्येन विरामेण पृथाकथाया निशीथिन्या, दीन द्युतित्वेन प्रदीपानां तारकाकलापैः, विजृम्भणेन बन्दिकलकलानां शकुन्तिकलकलैः विकासेन नयनानां नलिनैः राजमन्दिरात् विदुरमन्दिरं प्रतिपौरजनानां समाग- मनस्य उत्पलात् महोत्पलं प्रति चञ्चरीकाणां आगमनेन, प्रतीयमानेन तेजस्वित्वे न कमललोचनस्य विरोचनेन, देदीप्यमानत्वेन च पर्यङ्कस्य प्राचीनगिर्यङ्केन उपमा नितरां चमत्कारिणी ।

निखिलदिवसारम्भकृत्यावसाने घुसृणायसृणापटीरपङ्कचर्चितकलेवरस्य भगव तो बालातपभासमान बलाहकोपमा भगवतः प्रपदपल्लव प्राप्तपीताम्बरस्य पङ्केरुहतया शङ्कितस्य चरणस्य प्राप्तये तत् प्राङ्गणलिखितराजहंसाकृष्यमाणात्वोत्प्रेक्षा

के

मेखलामुखभागप्रत्युप्तभुक्ताफलेषु भगवद्दुदरान्तरालावकाशालाभाद् बहिरागतजगदण्डशिशुत्वेनोत्प्रेक्षा, कौस्तुभस्य दिनमणिबिम्बत्वेनोत्प्रेक्षा, पद्मरागकेयूरस्य-दनुजदलोत्पातरक्त परिवेषत्वेनोत्प्रेक्षा, दारुकानीतमणि पादुकाधारणस्य दुर्योधनदुर्वासितनगरस्पर्शपरिहरण कलकत्वोत्प्रेक्षा, भगवदभिनन्दनसंयोजिलताकौहिणीपतिपाणिषु कमलवनरूपकम्, कनकनेत्रललानां च सौदामिनीत्वेनोत्प्रेक्षा, नितरां चमत्कुर्वन्ति, तथा भगवतो माहात्म्यं ब्रह्मसद्मानां भगवते कृष्णाय जयाशीः प्रदानेन कुरुराज देवव्रतयोश्च भगवत्स्वागताभिनन्दनार्थकाभ्यागमनेन-अक्षौहिणीपतीनां च करांजलि कमलमुकुलतया भगवदागमन प्रतिपालनार्थकावस्थानेन च प्रतीयमानं तद्गतं भगवद्विषयकं रतिभावं चोपस्कुर्वन्ति ।

भगवति राजसभाद्वारं प्राप्ते निखिलैः सदस्यैः सह गोष्ठ्या दुर्योधनस्याभ्युत्थानेन भगवत्प्रभावो ध्वन्यते, तत्र पूषणि पूर्वाचलं प्राप्ते पद्मषण्डैः षट्पदैः सह समुत्थितेन सौरभ्यपूर्णोपमा उपस्कारिका नितरां चमत्कारिणी च ।

राजसभायां सत्वरोपनीत रत्नासनकृतोपवेशस्य भगवतः पुरोहितैः प्रतिपादितेन पूजासंभारसत्कारेण प्रभावातिशयः, नरेन्द्रवर्गं सदोजनानांचमुहुर्मुहुस्तद्वीक्षणेन प्रमुदितत्ववर्णनात् तद्गतो भगवद्विषयकोऽनुरागः प्रतीयते । छेकवृत्त्यनुप्रासा अपि यत्र तत्र रसानुगुणगुणानुसारिणश्चमत्कारिण एव ।

इतः परं भगवतः कृष्णस्य कुरुराजमण्डसभायां पाण्डवानां कौरवैः सह सन्धेःप्रस्तावः, तदुत्तरे धृतराष्ट्रस्य सदुःखं दुर्योधनद्वारा पाण्डवेभ्योऽर्धराज्यदानस्वीकारप्रतिपादनञ्च चेति वर्णितं विविच्यते । तद्वर्णनं यथा -

"भद्रासनादुपनतं पदपल्लवाग्रं संवाहयत्युपगते विदुरे दयार्द्रः ।
सामाजिके बुधजने सति दत्तकर्णे प्रश्नादृशं नृपमभाषत पद्मनाभः ॥"

"अल्पैरहोभिरधियुद्धमवेद्य नक्षत्र-
च्चान्द्रं कुलं तव सुतैः सह पाण्डवानाम् ।
संधिं विधातुमधुना समये विधेयं
प्राप्तोऽसि भारतऋषिं । तं सकाशम् ॥"

"शस्त्रेण संघत्स्व तनूभवानां कुन्तीकुमारान्कुशलोदयाय ।

कल्लोलजालेन कलिन्दजाया गंगातरंगानिव गेयकीर्तेः ।।'

'पादारविन्दे प्रणतीः शिरोभिः शतं शतं सादरमर्पयन्तः ।
पाण्डोः कुमाराश्च भवन्तमेवं विज्ञापयन्ति स्म विनीतिपूर्वम् ।।'

'जातौ वने वयमभी भवदेकभूमौ
वृद्धिंगताः शिरसि शासनमादधानाः ।
निस्तीर्णसिंगरपयोनिधयस्त्वयाऽध
स्थाप्या यथांशमवनेरवने वने वा ।।'

'बाल्ये वनान्तजनुषां मम पाण्डवाना-
मेकापि रक्षणविधौ न बभूव धात्री ।
इत्येव शोकमनिशं हृदये दधान-
स्तस्यास्तु नार्धमपि संप्रति दित्ससि त्वम् ।।'

'इत्थं ब्रुवाणं यदुवीरमेनं निःश्वस्य दीर्घं नृपतिर्बभाषे ।
व्यरंसिषं व्यध्वममुं विमुञ्च विमुञ्च वत्सेत्यनुशास्य शौरे ! ।।'

'मधुमथन ! निमीलिता मुनीन्द्रै
मम जननी खलु पुत्रवत्सला सा ।
मुखमहमनवेक्ष्य मूर्खसूनो-
र्मुदमधिकामधुना यथा दधामि ।।'

'स्वयमपि न विबुध्यते सुतोऽयं सुमतिजनस्य शृणोति नापि वाचम् ।
कुरुकुलकुशलाकुराभिवृद्धये गुणगणवारिनिधे ! गतिस्त्वमेव ।।' ८+ ३३-४१

एवं भगवतः कृष्णस्य कौरवसभायां पाण्डवानां कौरवैः सह सन्धेः प्रस्तावः, तदुत्तरं धृतराष्ट्रस्य दुर्योधनद्वारापाण्डवेभ्योऽर्धराज्यदानास्वीकारस्य सदुःखं प्रतिपादनं च वर्णितमति कौशलेन कविना ।

तत्र सभायां विदुरस्य भगवच्चरणसंवाहनेन तद्विषयो गाढो नुरागो ध्वन्यते । भगवतश्च तस्य तादृशसेवास्वीकारेण तद्विषयकं वात्सल्यमभिव्यज्यते।

सभायां सर्वेषु सभ्येषु दत्तकर्णेषु सत्सु धृतराष्ट्रं प्रतिभगवतः पाण्डवानां कौरवैः सह सन्धिवार्ता प्रस्तावोपस्थापनवचने तस्य 'भरतर्षभ ! गेय--

~~कीर्तैकपक्षेऽपि~~

कीर्ते ।' इति संबोधनपदाभ्यां धृतराष्ट्रस्य सन्धिवार्ताकथनयोग्यता व्यज्यते, तेन परिकरालंकारद्वयम् । पाण्डवानां कौरवैः सह सन्धेश्च गङ्गातरङ्गाणां कलिन्दजाकल्लोलजालैः सह सन्धानोपमया युक्तता गम्यते । पाण्डुकुमाराणां धृतराष्ट्रं प्रति प्रणतिपरम्परानिवेदनेन तेषां तद्विषया भक्तिः सविनयत्वं राज्यभागप्रदानपात्रत्वं च ध्वन्यते । पाण्डवावने जाताः ततस्त्वया ऽऽनाय्य स्वाङ्के वर्धिताः, तवशासनं शिरसाधृत्वापुनर्वनं गताः, स्वप्रतिज्ञापाथोधिं समुत्तीर्य सकुपुनः प्राप्तास्तेत्वयायथांशमवनेरवनेस्थाप्याः, पुनर्वनेवेति विकल्पालंकृतवचनेन धृतराष्ट्रस्य न्यायकारित्वं द्योत्यते, अत्र प्रतिज्ञायां पाथोधिरूपकं वने इत्यस्य त्रिरावृत्या यमकम् । बाल्ये वनेजनिभृतां पाण्डवानामेकाधात्री पोषणाय नाऽभूत इति शोकमनिशं वहानस्य तवधृतराष्ट्रस्य संप्रति पाण्डवेभ्यो अर्धधात्र्याः दानाभावोऽनुचित इति वचनेनाननुरूपसंसर्गात्मक धात्री श्लेषमूलकविषमालंकृतेन वचनेन पाण्डवेभ्यस्तदीयभूमिभागप्रदाने महदनौचित्यं ध्वन्यते ।

ततो भगवन्तं प्रति धृतराष्ट्रवाक्ये दुर्योधनस्य पाण्डवस्वभागदानपरामर्शस्वीकारप्रतिपादनेन सदीर्घनिःश्वासेन तदीयो विषादो ध्वन्यते । सत्परामर्शस्वीकारिणो सूनोः मुखदर्शनावसराभावेन स्वकीयान्धत्वस्य गुणत्वप्रतिपादनात् लेशालंकारः, तत्र स्वान्धत्वे स्वमातुर्मुनौव्यासेनिमीलितत्वस्य तस्मिंश्च तस्याः मल्लदाणपुत्रवत्सलत्वस्य च हेतुत्व प्रत्यायनाद् काव्यलिङ्गद्वयमपि चमत्कुरुतेतराम् ।

दुर्योधनस्य स्वयंबोधाभावस्य सुमतिजनकवचनश्रवणाभावस्य च प्रतिपादने गतिकारणे भगवति गतित्वारोपाद् हेत्वलंकारः (१) कुरुकुशले अंकुरारोपाद् भगवति च गुणगणवारिनिध्यारोप निरूपपरम्परितं च रूपकद्वयम्, भगवतो गुणगणवारिनिधिविशेषणेन कुरुकुलकुशलाङ्कुराभिवर्धनयोग्यताप्रतीत्यापरिकरालंकारश्च प्रकृतार्थमुपस्कुर्वन्ति ।

अथ भगवतो दुर्योधनभर्त्सनम्, दुर्योधनस्य पारुष्येण भगवत्सन्धिप्रस्ता

---

१ अभेदनाभिधा हेतुर्हेतोर्हेतुमता सह । १०।६४ । साहित्यदर्पणे ।

वं प्रत्याख्याय सभास्थलात् निर्गमनम् च वर्णितं विविच्यते, तद्वर्णनं यथा -

इति सिद्धान्तितवति बद्धाञ्जलौ राजनि निजासनार्धनिवेशितकरतलतया-किंचिदुन्नमितवामभुजशिखरेणगण्डमण्डलनिमज्जितमकरकुण्डलं कटितटचलन कन्दलितकाञ्चनं पटमण्डपारवमीषत्कंधरां विनिवर्त्य,-

' कल्पस्मितं रविसुवा कृतहस्ततालं
दुःशासनेन घुरि दूषितसंधिपद्माम् ।
कर्णोपकण्ठवलिताधरमातुलास्यं
कौरव्यमाह कुरुसंसदि कंसवैरी ।।'

' पृथासुतेभ्यः पृथिवीं तदीयां पुनर्दिशेति ब्रुवतो गुरोर्गाम् ।
अशृण्वतः पौरव ! ते कथं वा संभूतिरेषा शशिनोऽन्ववाये ।।'

' तदाकृशं शृणु महत्तव वंशवृत्तं
पूरुर्ददौ नवयः पितुराजरोर्णः ।
त्यक्त्वाश्रमं पितृमुदे तृणवद्द्वितीयं
देवव्रतोऽयमिह तिष्ठति धीरधीरः ।।'

' कितवोक्तिभिः किसलितः स कर्णयोः
सफलो भवेत्तव तदा मनोरथः ।
हरिनन्दनेन युधि पातितं धनु-
र्हरमस्तकान्न पुनरुन्मज्जेत् ।।'

' वंशः कुरूणां महितोऽयमस्मिन्वर्तुं कलङ्कं चतुरौ खलु द्वौ ।
एकत्र कोटौ रजनेरधीशः परत्र मन्ये पुरुषो भवांश्च ।।'

' बन्धूपदिष्टं न शृणोषि वत्स ! संधानमस्मिन्न तवाद्य दोषः ।
गन्धर्वराजेन कृतं वनान्तो बन्धं पुनर्मुक्तवतो हि तेषाम् ।।'

' इति निगदितवति भगवति क्रोधनः सुयोधनोऽपि गिरमिमामुज्जगार,-अये नन्दनन्दन ! केवलं विराटतनयाश्रयलाभेन कृतकृत्यमन्यमानानां कुन्तीसुवां च-बहुभिरदाक्षिणिपतिभिरनुद्रुताममावेष्यमाणाञ्जलिपुटामवलोकयितुमप्यलब्धावसराणामस्माकं च किं वा संधानं किं वा तव दूतकृत्यं किं वा मया देयमीदृग्विधं

मुधायासमवधूय यथागतं गन्तव्यमिति ।[1]

" आकर्ण्य तच्चकितचेतसि नम्रवक्त्रे
कर्णौ पिधाय नृपतौ करसंपुटाभ्याम् ।
मत्वा तृणाय मधुवैरिणमप्यलघ्यं
गोष्ठ्या जवेन निरगात्कुरुराजसूनुः ।।" ८।४२-४८।।

एवं भगवतो दुर्योधनभर्त्सनम् दुर्योधनस्य रौद्रयेणसन्धि प्रस्तावमस्वीकृत्य संभागणात् निर्गमनं च वर्णितं चातुर्येण कविना ।

दुर्योधनस्य स्मितहस्ततालादिचेष्टाभिश्चापल्यभावो ध्वन्यते । दुर्योधनं प्रति भगवद्वाक्ये गुरुजनवचनानुसारित्वेन प्रसिद्धे पुरुवंशे (चन्द्रवंशे) तदननुसारिणस्तव दुर्योधनस्य संभवोऽनुचित इति दुर्योधनसंभवस्य चन्द्रवंशानुरूपत्वात् अननुरूपसंसर्गात्मको विषमालंकारः, पूरुः पितुर्जरामादाय स्वयौवनं तस्मै वितताऽरेति परिवृत्त्यलंकारः, देवव्रतस्य धीर धीरत्वं तृणवत् द्वितीयाश्रमत्यागेस्य हेतुत्वावगमनात् औपम्यमूलकं काव्यलिङ्गम्, तवदुर्योधनस्य कितवोक्तिकिसलित मनोरथसफलत्वाभावे हरमस्तकात् गाण्डिवोन्मज्जनस्य हेतुत्वावगत्या परं काव्यलिङ्गम्, तेन तव जेतुर्गाण्डिवधारिणो वर्तमानत्वे तवमनोरथः कथमपि न सिद्धयेदितिव्यतिरेकमिश्रादौपम्यध्वनिः , महितकुरुवंशपूर्वापरकोटिस्थयोः शशिनस्तव(दुर्योधनस्य) च कलङ्कितत्वमित्युक्तौ एकस्य कलङ्कस्य द्वयोरन्वयात् दीपकम्(१) तत्र च कलङ्कपदवाच्ययोश्चिह्नापवादयोः श्लेषमूलाऽभेदातिशयोक्तिर्ध्वनिः दुर्योधनस्य हितोपदेशश्रवणाभावेऽपि तदीयदोषाभावप्रतिपादने व्याजस्तुतिः, युधिष्ठिरस्य गन्धर्वकृतत्वद्(दुर्योधन) बन्धमोचनरूपोपकारस्यापि कि दोषत्वेन प्रतिपादनात्लेशश्चेत्यलंकारविन्यासः परां छायां पुष्णातिभगवद्वाचाम् ।

भगवतो भर्त्सनावचनश्रवणाकुपितस्य दुर्योधनस्य सन्धिप्रस्तावतिरस्कारवचनेन गोष्ठ्या निर्गमनेन च तस्य गर्वासूयामर्षचापल्य भावा ध्वन्यते । तत्र नन्दनन्दनेति सम्बोधनपदेन भगवतो गोचारण गोपीवृन्दविहरण मात्र पाटववत्वेन सन्धिविग्रहादिराजनयविषयकविचारानर्हत्वद्योतनात्, कुन्तीसुवामिति पदेन च युधि-

---

१ वदन्तिवर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः । ४८।। कुवलयानन्दे ।

ष्ठिरादीनां स्वपितृपाण्डुव्यतिरिक्तपुरुषोत्पन्नत्वेन राज्यानर्हत्वबोधनात् प रिकरद्वयमुक्तभावध्वन्युपस्कारकमेव । अलङ्घ्यस्यमपि मघुवैरिणंतृणाय मत्वा दुर्यो धनस्य गोष्ठ्यानिर्गमनेन अर्थात् तल्लंघनेन विभावना, भगवद्विषयेताद्रुगवहेलनात्म क-व्यवहारस्यानुचितत्वाद् अननुरूपसंसर्गात्मकं विषमम् च दुर्योधनोद्धत्य ध्वनयतः।

अथ समास्थलाद् बर्हिगतस्य दुर्योधनस्य भगवद्-बन्धन मन्त्रणा, तद्वि-ज्ञाय कुपितस्य भगवतः स्वविराड्रूपप्रकाशनम्, भीष्मादीनां मुनीनां च स्तुत्या भगवतः पुनः सौम्यरूपस्वीकारः, धृतराष्ट्र भीष्मादीन् अपृच्छ्य पुनर्युधि ष्ठिरमागत्य तत्रत्यवृत्तप्रतिवादनं च वर्णितं वीक्ष्यते तद्वर्णनं यथा -

'तदनु दनुजारातिरेषु रोषस्मितलेशरूषिताधरस्तादृशेन तस्यावलेपवचने न भिया विहस्तान्मुदा निरस्तान्समस्तानपि समास्तारान्पुरस्तान्निरीक्ष्य पुन रपि वाचमेवं जगाद,-'

'धराभुजा किं तटिनीभुवा किं मयाधुना किं वसतापि दूत्ये ।
पार्थाय दातुं प्रभवेद्धरित्रीं गदैव सा मन्थवहस्य सूनोः ।।'

'शौरेस्तां वाचमाकर्ण्य साध्वसाक्रान्तचेतसः ।
जोषंभावं समास्तारा युगपद्गुरुतरम् ।।'

'बहिः स संमन्त्र्य बलावलिप्तैस्त्रिभिः सहायैर्धृतराष्ट्रसूनुः ।
गन्धर्वराजेन कृतां दशां स्वां गदाग्रजन्मानमियेष नेतुम् ।।'

'श्रुत्वा तत्कुपितो हरिः स्वयमसावेको ऽपि सर्वात्मक-
स्ताराधिर्नवभिर्ग्रहैर्निबिडितां शैलैर्वनैः सागरैः ।
पेट्यां भूषणमञ्जरीमिव धृतां कुक्षौ जगन्मण्डलीं
जज्वालामतनोत्समाजिरुषां दृक्पंक्तिघण्टापथे ।।'

'तस्मिन्नगुष्ठमात्रे नव इव मुकुरे वीक्ष्य सर्वं प्रपञ्चं
विस्मेराः सिद्धविद्याधरसुरनिकराः पुष्पवृष्टीर्व्यमुञ्चन् ।
सान्द्रं मोहान्धकारं सकलमुनिजनः संमदाभूणि भीष्मः
दाचाक्षणोः पद्मकाम्पं कुरुपुरजनता प्रेम दुर्योधने ऽपि ।।'

'अस्याट्टहासध्वनिरादिपुंसो विशृङ्खलं व्योम्नि विजृम्भमाणः ।

' दिक्पालसौधावलिजालकानामध्यापकत्वं बिभराम्बभूव ।।'

' संस्तूयमानचरितस्य जनैस्त्रिलोकी-
साधारणीकृतकृपस्य हरेः प्रसादात् ।
चक्षुष्मतां समधिरुह्य धुरं मुहूर्तं
भूयस्ततोऽप्यवततार स भूमिपालः ।।'

' ओजस्तवेदमुपसंहर माधवेति
घुष्यत्सु सत्सु गुरुभीष्मपुरोगमेषु।
घोरं विहाय निमिषेण कुशेशयाक्षो
गोपीदृशां कुतुकहेतुमवाप रूपम् ।।'

' ततस्तादृशं निरुपमानं तस्य महिमानमनुभूय चरितार्थौ मुनिसार्थशान्त-मूर्तिं तमेवमस्तौषीत् ,-

' भगवन् ! महात्मभिरपि योगिभिरविदितप्रभावाय तस्मै भवते नमः ।

' दुग्धाम्बुराशितनयाननयनजन्येन
तुल्याकृतित्वमहिमानमिवोपगन्तुम् ।
मत्स्यत्वमेत्य भुवि यः सुरवैरिनीता
मध्येसमुद्रमनवीनगवीर्विचिक्ये ।।'

' मन्थानशैलमपि मार्गरुधं हिमांशो-
र्वीचीकणैः सदृशमद्भुविषाक्तिभाग्भिः ।
काये बभार चरमे कमठात्कृतिर्यो
जीवातुमुद्गमयितुं जलधेः सुराणाम् ।।'

'दंष्ट्राग्रवर्ति किटिवैषधरस्य यस्य
क्ष्मामण्डलं कुवलयांकुरकोमलाभम् ।
ऊर्ध्वप्रसृत्वरबकावलिकावलीढ-
प्रावृट्पयोदवलयस्य बभार लीलाम् ।।'

' इन्द्रद्विषो मदगजस्य हिरण्यनाम्नो
भेदं रसस्य पिशितस्तबकालीनाम् ।

जिज्ञासमान इव यो धृक्ति सिंहभावः
स्तम्भादुदेत्य नखरैस्तमुरस्यभार्क्षीत् ।।
याच्ञाप्रतारणवशादधियज्ञशालं
यो वामनत्वमवलम्ब्य बलिं निगृह्णन् ।
दुःखं सतां स्वमिव सर्वतमं सुखं च
स्वीयं पदक्रममिवोन्नतमाततान ।।
सृष्टौ पुरा मुखभुजोरुपदे मुरारे-
रेकं द्वितीयमभजत्किमु वन्ध्यभावम् ।
इत्येव संशयमशेषजनस्य चक्रे
यस्याहवेषु करताण्डवितः कुठारः ।।
श्वश्रूमुनेरजनि यस्य पदाब्जधूलि-
र्यत्कृष्टमीशधनुरप्यपि शरव्यकृत्यम् ।
यस्मादभियाब्धिरपि कम्पमकम्पमागा-
दत्पत्रिणां विभव एव विभीषणोऽभूत् ।।
हन्यामहं युधि रिपूनहमेव हन्या-
मित्येव यन्मुसललाङ्गलयोर्विवादः ।
यस्याम्बरं निजरुचिप्रतिमल्लवर्णं
यत्षष्ठसंस्करणमासवपानमाहुः ।।
यः स्तन्यपानसमये वत पूतनायाः
प्राणानपि प्रविदधे परमोपदंशम् ।
नाकाधिपुत्र्य वनभूरपि येन लघौ
नारीमुदे कृतनखम्पचधूलिरासीत् ।।
वार्यस्तपोधनवरेण्यमनःखलीनै-
स्तृण्यां मुहुः कवलयन्नगदार्तिरूपाम् ।
नीचान्विघातुमसुरान्निजशौर्यतुल्या-
न्कोपादुदेष्यति च यः कुहनातुरेषुः ।।

"एतैः स्तवैर्हृष्टमना यथार्थैर्मन्दस्मितश्रीमधुराधरोष्ठः ।
पीठादुदस्थादथ पीतवासा मेरोर्नितम्बादिव मेघशावः ।।"

"आस्थानाद्बहिरेत्य कैटभरिपुर्गाङ्गेयमालिङ्ग्य तं
पश्चार्धेऽपरिमृश्य भूपतिरानापृच्छ्य सर्वान्कुरून् ।
आघ्रायातिचिरेण मूर्ध्नि विदुरं युक्तं शतार्चिं हये-
रारूढो भियया विराटनगरीमन्तः स्मरन्पाण्डवान् ।।"

"श्रुत्वा ततः परमतं पुरुषोत्तमस्य
फेनायमानरणसंनहनाब्धिपूराः ।
आराधयन्विधिवदस्त्रगणं श्मशाने
पीतां वमन्तमिव क्रान्तिमिषेण धूम्याम् ।।" ८।४९-६६।।

एवं समास्थलाद् बहिर्गतस्य दुर्योधनस्य भगवद् बन्धनमन्त्रणा, तद्विज्ञाय भगवतः कोपो विराड्रूपप्रकाशनं च, भीष्मादीनां मुनीनां च स्तुत्यापुनर्भगवतः सौम्यरूपस्वीकारः, भीष्मधृतराष्ट्रादीन् संभाव्य च आपृच्छ्य च भगवतो-युधिष्ठिरसमीपमागत्य तत्रत्यवृत्तप्रतिपादनं च वर्णितं कविना अतिकौशलेन ।

भगवतो दुर्योधनोद्धत्येन कुपितस्य गोष्ठ्यां सभास्तारान् निरीक्ष्य रोषास्मितलेशरूक्षिताधर वचने स्वस्य भीष्मस्य धृतराष्ट्रस्य चैकदुर्योधनोपेक्षाविषयत्व सम्बन्धात् तुल्ययोगिता, सभास्तारणां भियाविहस्तत्वेनमुदानिरस्तत्वेन चोल्लेखादुल्लेखः, गन्धवद्भूनुगदायां पार्थसम्प्रदानकधरित्रीदानप्रवृत्त्वाभावेऽपि तत्सम्बन्ध वर्णनात् सम्बन्धातिशयोक्तिश्च नितरां चमत्कुर्वन्ति ।

भगवद्वचनाकर्णनेन साध्वसाक्रान्तचेतसां सभास्तारणां जोषंभावरूपोत्तरणे परिणामालंकारः जोषंभावे समारोपितस्य उत्तराभेदस्य प्रकृतोपयोगित्वात् ।

भगवतो बन्धनप्रापणरूपविचारविषयकत्वस्याऽननुरूपत्वाद् अननुरूपसंसर्गात्मकं विषमम्, तेन तादृग्विचारकर्तुः दुर्योधनस्य चापल्यं निर्विवेकत्वं ध्वन्यते ।

दुर्योधनदुर्विचारश्रवणेन कुपितस्य भगवतो विराड्स्वरूपप्रकाशनेन उग्रत्व भावो ध्वन्यते । स्वरूपे प्रकाशितायां जगन्मण्डल्यां निबिडितत्वेन ग्रहनक्षत्रता

राशैलवनसागराणां योगात् तुल्ययोगिता, भगवान् एकोऽपि सर्वात्मक इति विरोधस्य तन्माहात्म्यज्ञानेन आभासरूपता, भगवत्कुक्षिस्थजगन्मण्डल्याः पेटीस्थित भूषणमञ्जुषोपमा, सभास्तारदृक्पङ्क्तिघण्टापथेत्यत्रूपकम् चेति विराट् स्वरूपस्य भगवतः सभास्तारदर्शन विषयीकरणस्य वर्णने चमत्कुर्वन्तितराम् ।

भगवद्विराड्रूपदर्शनविस्मितानां सिद्धविद्याधरसुरनिकराणां भगवदुपरि पुष्पवृष्टिकरणेन तेषां तद्विषयको "माहात्म्य ज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिः" इत्यभियुक्तोक्तो भक्तिभावस्तद्गतहर्षोत्सुक्यादि परिपुष्टोध्वन्यते । तत्र भगवतोऽङ्गुष्ठमात्रनवमुकुरोपमा, सिद्धादीनां विस्मेरत्वरूपैकधर्मयोगात् तुल्ययोगिता, सिद्धादिषु पुष्पवृष्टिकर्मिकयाः सकलमुनिजने सान्द्रमोहान्धकार कर्मिकयाः भीष्मे संमदाश्रुकर्मिकयाः विदुरे नयनपक्ष्मपातकर्मिकयाः कुरुपुरजनतायाश्च दुर्योधनविषयकप्रेमकर्मिकया एक विमोचन क्रिययान्वयात् अपरातुल्ययोगिता च चमत्कुर्वन्तितरांस्तराम् ।

भगवदट्टहासध्वनिर्दिगन्तेषु व्यापेति वार्तायां असौदिक्पालसौधावलिजालकानामध्याधकत्वं विमराम्बभूवेति प्रकारान्तरेण वर्णनात् पर्यायोक्तम्, भगवत्कृपया धृतराष्ट्रस्य तद्विराड्रूपदर्शने च दृष्टतांधुरि समधिरोहणस्य ततोवतरणस्य च वर्णनात् पर्यायः, तस्मिन् भगवत्प्रसादस्य गुणीभावात् प्रेयोलंकारः । उग्रविराड्रूपं प्राप्ते भगवति धृतराष्ट्रविषयक-दर्शनशक्तिदानकृपात्मकमृदुभावस्याऽननुरूपस्य वर्णनाद् विषमम्, विषमेण भगवतोऽचिन्त्यमाहात्म्यत्वरूपस्य वस्तुनोध्वनिः, द्रौणभीष्मादि सभास्तारसज्जनवृन्दप्रार्थनया घोररूपमोचनस्य गोपीजनमनोहारिरूपग्रहणस्य च वर्णनादपरः पर्यायः, भगवतः सुन्दररूपस्य गोपीजननयनकुतूहलजनकत्वेन वर्णनादपरं पर्यायोक्तम्, कुशेशयाक्ष इत्यत्रोपमा चापि किमितरां चमत्कुर्वन्ति ।

भगवतो द्रौणभीष्मादिसज्जनकदम्बकप्रार्थनया घोररूपमुत्सृज्य सौम्यस्वरूपस्वीकारे सति तन्महामहिमानमनुभूयतदीयदशावतारवर्णनेन तत्स्तुत्या तद्विषयको मुनिजनगतो भक्तिभावो ध्वन्यते । तत्रोपमारूपकोत्प्रेक्षाः दंष्ट्राविशिष्ट किटिवेषधारिभगवतो बकावलि विशिष्ट प्रावृट् पयोदलीलाधारणकथनात् असं-

भद्रस्तु सम्बन्धना निदर्शना, युधिष्ठिरे अहमेवहन्याम्, इति विवादस्य बलराम मुसललाङ्गलयो रसावेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, कृष्णावतारे यशोदास्तन्यपानसमये पूतनाप्राणानामुपदंशाभिन्नत्वेन प्रकृतोपयोगितयावर्णनात् परिणामः, कृष्णावतारे सत्यभामाप्रमोदाय नन्दनात् कल्पवृक्षानयनेन तच्छून्य नन्दनस्य नखसम्बन्धदूषितत्वेन वर्णनात् पर्यायोक्तम्, कल्कि स्वरूपेऽसुराणां वधस्य तदुर्योधनशृङ्गतुल्यत्वेनवर्णनादपरं पर्यायोक्तम् चेति कामपिच्छायां पुष्णन्ति वर्णनस्य ।

स्तुतितुष्टस्य भगवतः स्वर्णसिंहपीठादुत्थितस्य मेरुनिम्नोत्थितमेघशावोपमा रमणीया । ततः प्रस्थाने भगवतो भीष्मालिङ्गनेन धृतराष्ट्रपृष्ठपरामर्शेन इतरकुरुजनाऽऽपृच्छनेन च तद्विषयकः स्नेहो ध्वन्यते । शतङ्गारूढस्य तस्य विराटनगरीप्रयाण-समयेऽन्तः पाण्डवबन्धुस्मरणेन तल्लक्षणाभक्तजनपदापातो ध्वन्यते ।

भगवतः कृष्णात् दुर्योधनकृतसन्धिप्रस्तावानादरं श्रृण्वतां पाण्डवानां सस्त्रशस्त्रारोधनेन तद्गतरणोत्साहो ध्वन्यते । तत्र रणसंनहनाङ्गिधः पूरस्य कोनायकानत्वकथनात् रूपकेण रणसरम्भो व्यज्यते । शस्त्रास्त्राणां श्यामकान्तिमपह्नुत्य स्मशानेतन्निदीपकालिकीतधूम्पारोपादपह्नुतिः, तन्मूला च शस्त्रास्त्राणां धूम्यावमनोत्प्रेक्षा, तयाशस्त्रास्त्राणां पाण्डवकायये जागरूकत्वोत्प्रेक्षा ध्वन्यते ।

यत्र तत्र श्लेषवृत्त्यनुप्रासानां माधुर्यादिगुणानुरूपवर्णमयानामपि रमणीयत्वमेव ।

एवं भगवत्कृतः कौरवपाण्डवसन्धिप्रयासः तद्वैफल्यं च वर्णितं कविना अतिवैदग्ध्येन ।

(३३) कुन्त्याः कर्णं प्रति पाण्डवपक्षस्वीकारानुरोधः

इतः परं कौरवपाण्डवयोः सन्धिप्रस्तावेभग्ने रणसंनाहे च वर्धमाने कृष्णं जह्नुतनयातटिनीतटेतपस्यन्तं स्वसुतं कर्णं प्राप्य कुन्त्याः तस्य पाण्डवैः सह सम्मेलनायाऽनुरोधः, कर्णस्य तदस्वीकारे पुनस्तस्या निवर्तनं चेति वर्णितं-कविना विविच्यते, तद्वर्णनं यथा -

"अत्रान्तरे,-"

"ततः परं जह्नुकुमारिकायास्तटीवने कृत्यविदां पुरोगा ।
पृथा तपस्यन्तमवाप कर्णं कर्णं प्रवृत्तिस्तु न किंचिदस्याः ।।"

"कमनीययशोभरे तनूजे कवचोत्कर्तनकर्कशायुषेऽपि ।
नलिनान्मृदुलं नरेन्द्रपत्न्या नयनं तत्र चिरेण संचचार ।।"

"स तत्र पूतः परमाभिषेकैस्तपोवसाने तपनस्य सूनुः ।
श्रोत्रे वितेने शुचिमन्त्रमालां नेत्रे च राज्ञीं निकटं प्रपन्नाम् ।।"

"विनतेः पदयोर्नन्तरं विहिताशीः परिरभ्य तं सुतम् ।
परिहर्तुमुवाच पृच्छतामुभयीं धर्मसुतादिसूनुषु ।।"

"त्वयि वत्स ! रवेरनुग्रहादजनिष्ठा मयि भाग्यमर्थिनाम् ।
तनुरक्षणमात्रकारिणी तव राधातिरथौ न जन्मभूः ।।"

"जहीहि राधातनयत्वबुद्धिं सहैव दुर्योधनसौहृदेन ।
गृहाण वाण्या सह धर्म्यया मे सहोदरान्धर्मतनूजमुख्यान् ।।"

"यस्मैकस्मैचन त्वं सहजकवचदः प्रार्थनातुल्यकालं
मातुः साक्षान्निदेशे मम सुकृतमे मा कृथा मन्दभावम् ।
पारार्ध्यमुख्यं विधत्ते गुरुजनवचनानुष्ठिते यस्य चेतो
धिक्शब्दस्याभिधेयं जगदिदमखिलं दोग्धि तस्मै सुखेन ।।"

"इति वशनकिरणव्याजादन्तश्चिररक्षितं तदंशं स्तन्यं प्रकाशयन्त्या इव कुन्त्या निदेशं कर्णः कर्णदिशाध्वनीनं विधाय साकमंजलिना समुचितमुत्तरं ददन्क;-

"भोजान्ववायो भुवने प्रतीतः कुलं कुरूणां च तथा त्वयेऽस्मिन् ।
तवाम्ब ! जन्मोपयमश्च वेद्मि त्वय्येव जागर्त्युचितज्ञभावः ।।"

"अर्जुनद्वयं मे परिपालनीयमर्जुन ! त्वया शूरजनाग्रगेण ।

एवं वशे मे वितनोतु यस्तत्तस्यापि सख्यं किमुपेक्षणीयम् ।।'

'परस्य लोकस्य गतेर्हि विघ्नं कृतघ्नतामेव वदन्ति सन्तः ।
सा न स्पृशेन्मामधुना यथा त्वं तथा प्रसीदाम्ब ! कृपार्द्रचित्ता ।।'

'इतिवादिनो रविसुतस्य मानसं
न निवर्तते स्म धृतराष्ट्रनन्दनात् ।
अपि तु स्वकीयतनयान्महाभुजा-
दनवाप्य कामभियमेव केवलम् ।।' ८।७०+- ८०।।

एवं वर्णितं कुन्त्याः कर्णं प्रति पाण्डवैः सह सम्मेलनानुरोधः, कर्णस्य तदस्वीकारे कुन्त्यास्ततो निवर्तनं चेति नैपुण्येन कविना ।

तत्र पृथायाः कर्णं प्राप्तायामपि तत्प्रवृत्तिस्तत्कर्णं न प्रापेति विभावनया कर्णस्य भगवद्ध्यानमग्नत्वं ध्वन्यते ।

कवचोत्कर्तन कर्कशत्वमुक्तकर्णाऽङ्गकेऽपि नलिनादपि मृदुलं पृथायानयनं चिरं संचारेत्यत्र कर्कशे मृदुलस्य संचरणमननुरूपमिति विषमम्, नयनस्य नलिनादपि-अधिकमृदुलत्व कथनात् व्यतिरेकः , नयनेन तदङ्गदर्शनस्यतदङ्गदृशोचिरसंचरणरूपप्रकारान्तरेण कथनात् पर्यायोक्तं चेत्यलंकारैः पृथायास्तद्दर्शने सस्पृहत्व प्रकाशनद्वारा औत्सुक्यं ध्वन्यते ।

तपोवसाने कर्णस्य अङ्गमालायाः श्रोत्रे राज्ञ्या पृथायाश्च नेत्रे वितनरूपैककियायायोगात् तुल्ययोगिता ।

कर्णस्य पृथाचरणाप्रणामनान्तरं विहिताशिषस्तस्यावचनेधर्मसुतादि पञ्चक पञ्चतात्रयी परिहरणकलके पाण्डवानामदातत्व-षट्त्वविधानेच्छायाः प्रकारान्तरेण कथनात् पर्यायोक्तद्वयम्, तत्र पञ्चनाशब्दगतः श्लेषोऽङ्गम्, कर्णस्य अर्थिजनभाग्याभिन्नत्वेन वर्णनाद् रूपकम्, कर्णं प्रति राधातनयत्वबुद्ध्या सहदुर्योधनसौहृदस्य त्यागाऽनुरोधे धर्मोपेतमल्लक्षणाजननीनिदेशेन सह धर्मसूनुजादिसहोदराणां ग्रहणाऽनुरोधे च सहोक्तिद्वयम्, यस्यकस्यचित्सहजकवचदान प्रार्थनास्वीकारिणस्तव मातुर्मम निदेशकरणमनुचितं भवेदिति अननुरूपसंसर्गात्मकं विषमम्, कुन्त्याः कर्णप्रतिबोधनकालिक प्रसृतदशनकिरणात् तत्त्वेन व्याजोक्त्याऽपह्नु

त्य तेषु स्वान्तश्चिररक्षितकर्णांशभूतस्तन्यारोपापह्नुतिश्चालंकाराः पुष्णन्ति कामपि बन्धच्छायाम् ।

कुन्तीनिदेशं कर्णः श्रुतवानिति वक्तव्ये कर्णस्तं कर्णदेशाध्वनीतं विदितवान् इति प्रकारान्तरेण श्रवणस्य कथनात् पर्यायोक्तम् । कर्णः साकर्मञ्जलिना समुचितमुत्तरं ददन्नेत्यत्र सहोक्तिः । कर्णवचने- भोजान्ववाये कुरुवंशे च क्रमशो जन्मोपयमयोर्वर्णनाद् यथासंख्यम्, उक्तप्रथितकुलयोरेवजन्मोपयमयोः सत्वे मातरिकुन्त्यामुचितज्ञतावर्तमानत्वं प्रति हेतुत्वावगमात् काव्यलिङ्गम्, दुर्योधनीयायुद्धयपालनाऽनुरोधस्वीकारिणः कर्णस्य ममममि विश्वस्तस्य दुर्योधनस्य सख्यंनोपेक्षणीयमपितु रक्षणीयमित्यत्र विश्वस्तसख्यस्योचितत्व प्रतिपादनात् अनु शब्द श्लेष मूलकं समम् चेत्यलंकाराः रुचिरविन्यासाः कर्णगतधृतिस्थितिभावो ध्वन्यमानावुपस्कुर्वन्ति ।

मातः ! कृतघ्नतापापं मामां स्पृशेत् तथा प्रसीदेति मातरं प्रतिकर्णप्रार्थनया तद्गतो दैन्यभावो ध्वन्यते ।

मातुरनुरोधात् रविसुतस्य मानसं धृतराष्ट्रनन्दनात् दुर्योधनात् न निवर्तते अपि तु स्वसुतात् निवर्तते इत्यत्र परिसंख्यालंकारः, कर्णस्य दार्ढ्यं व्यंजयन् तद्गतं धृतिभावं ध्वनयति । एवं रुचिरतया वर्णितं कविना कर्ण चरित्रम् ।

(३४) कौरवाणां पाण्डवैः सह युद्धं विनाशश्च

(१) कुरुक्षेत्रे कौरवपाण्डव सैन्ययोः संघर्षः

अथ कुरुक्षेत्रे समवेतानां कौरवपाण्डवसैन्यानां हिरण्वतीनामकतटिनीतीरेऽन्योन्य संघर्ष पराभवन प्रहरण प्रहाराः क्षतयश्च वर्णिता विविच्यन्ते, तद्वर्णनं यथा -

"अथोनये ते कुरवो रणाय स्वनामधेयोपपदप्रसिद्धम् ।
क्षौत्रं व्यगाहन्त निरुद्धपार्श्वाः शतांयुतुर्युयोधैः ।।"

"हिरण्वत्यास्तत्र त्रिदशविनुतायास्तटरुह-
प्रसूनानां गन्धैर्मथितपथिखेदाः करिघटाः ।
कृतज्ञत्वेनेव स्वयमपि मदाम्भोधिलहरी-
र्ददुस्तस्यै जह्नवीरतिसुरभिगन्धीः प्रियसखीः ।।"

"अस्मज्जन्मभुवः समानभिधया सप्तापि सिन्धूनिमा-
न्नेष्यामो वयमय शोषणामिति स्फीताभ्यसूया इव ।
सेनासैन्धवपक्तयः खुरपुटैर्दीप्रक्षुरस्पर्द्धया प्रोषमे-
भूमेरुल्लिखिताच्छलादजनयन्भूरो रजोमण्डलम् ।।"

"तेषां कुरूणां कलहोदयात्प्राग्रथस्वनानां करिबृंहितानाम् ।
आशामशेषां स्ववशे विधातुमन्योन्यमासीत्कलहो महीयान् ।।"

"नाम्ना वो नवमग्रहस्य समतां सौढास्महे हे ! वयं
तुर्युत्वं न सहेमहीत्यतिरुषा संनाह्यधुर्या इव ।
उद्दण्डा अपि केतवः पदृशिरे स्थानं ग्रहाणामति-
क्रम्य स्यन्दनवृन्दमौलिकलिता मध्येनभस्वत्पथम् ।।"

"महीपतीनां पटमन्दिराणि मार्गं सुराणां लिलिहुःशिरोभिः ।
वयं हि दूष्याणि शुचीभवेमेत्यम्भापगावारिभिमृदायेव ।।"

"ततः क्षणादेव विशालविनिर्मितवीथीसहस्रविराजमानविशङ्कटविपणिवि विधपण्याहरणविमर्दसङ्क्रयिकलोकं विटकुलानुसार्यमाणावारविलासिनीजननिबिडवे शवाटं विशिखकृपाणकुन्तशक्तिप्रमुखविविधायुधसंस्कारपरवशयोधसंबाधं तत्कुरुक्षौत्रं कुरुनगरमित्रं बभूव ।।"

"तत्र तावद्दुःशासनाग्रजः "भगवन् ! अस्मिन्नुपतस्थुषि वीरभुजविनोदकाले त्वं विवाहविमुखोऽपि मदर्थं प्रत्यर्थिपार्थिवान्निहन्तुं पृतनाधिपत्यलक्ष्मीमुपयच्छस्व" इति विज्ञाप्य पितामहस्य चरणयोः प्रणिपपात ।।"

"दुर्योधने विशति मौलिभुवा पदं स्वं शूराग्रणीश्चचरमः सुरसिन्धुसूनुः ।

"अर्घक्षणादरिभटांस्त्रिदिवे विधास्य-न्ध्यक्षातापदमविक्षादनीकिनीनाम् ।।

"पार्थश्च ते द्रुपदनन्दनमाशु चक्रुः सेनान्यमुद्धतविरोधिवनानि दग्धुम् ।

वह्निं प्रतापकपटान्निजजन्मकाले सक्तं भुजे वहति यः सततंज्वलन्तम् ।।"

"अथसदसि महारथपरिगणनकथायामर्घरथोऽयमिति जाह्नवीयेन निह्नुतपौरुषतया रोषचिह्नितवदनरोचिरहनांपतिसूनुरहनाय तस्यावधिमेव निजहेतेरधारणस्यापि साधारणं प्रतिजज्ञे ।।"

"इदं प्रतिपद्य खिद्यमानं मानघनं सुयोधनं "वत्स ! मा मैष्टीः, महाभुजानपि रिपुमहीभुजः संख्ये खरतरविशिखमुखेन खादयामि" इति पितामह आश्वासयामास ।।"

"तदनन्तरम्,-"

"अम्भापगातनयपार्थतनन्दनाभ्या-

मग्रावनौ तिलकिता धृतकार्मुकाभ्याम् ।

उच्चावचं निजनिजं विरुदं वहन्तो

युद्धाय तस्थुरुभयेऽपि कुरुप्रवीराः ।।"

"जेता पुरामिव तदा जलजातयोनिं

पत्रीश्वराग्रजमिव प्रथमो ग्रहाणाम् ।

अग्रे विधाय यदुनायकमात्तसौत्रं

पार्थो रथी प्रघनभूमिमवाप वीरः ।।"

"संचिन्त्य भीष्मसुखबन्धुजनस्य हानिं

संतापिनः समरसीमनि शक्रसूनोः ।

बाष्पाम्बु चक्षुरधिकं श्वसितं मुखेन्दु-

र्धैर्यं मनः करतलं च मुमोच चापम् ।।"

"बलारिसूनुं वसुदेवसूनुर्वचोभिराश्वास्य चिरेण तैस्तैः ।

असासहिं पावकजाठराग्नेरग्राह्यत्तत्र पुनः शरासम् ।।"

"देवव्रतस्य जयकेतनचिह्नताल-

श्यामप्रभावलिरदृश्यत दूरदीर्घा ।

सख्याः सुतस्य समरे भुजवीर्यलक्ष्मीं
संवीक्षितुं रविसुतेव नभो विलग्ना ।।'

'युद्धारम्भमटार्भटीपिशुनतामुद्दामयन्तस्तदा
निःसाणादिमजैत्रवाद्यनिनदा निर्धूतशब्दान्तराः ।
श्रान्तिं क्षोप्तुमिवातिदूरपदवीसंपादितामम्बुधे-
र्वेलाशैलमहागुहासु विविशुर्व्याप्तासु धाराधरैः ।।'

'संग्रामदुन्दुभिरवश्रवणेन देवाः सर्वे कवाटघटितानि गृहाणि कृत्वा ।
आदाय नन्दनवनादभिषेक्तुमाजौ वीरान्प्रसूनचयमप्यमजन्विहायः ।।'

'सति घर्मजले मिथोविमर्दात्सकलं तद्व्यपनेतुमुद्यतेभ्यः ।
मघवत्प्रमुखाः सुरा बभूवुर्मरुतोऽपि स्वयमाचतालवृन्ताः ।।'

'तत्र तावरिगणौ शनैः शनैः संगतौ सधनुषौ सगर्जितौ ।
पूर्वपश्चिममरुत्प्रचोदितौ पुष्करे घनघनाघनाविव ।।'

'धावत्स्यन्दनकेतनांशुकमरुद्व्याधूतमन्दाकिनी-
बिन्दूनामपि सैन्यकुञ्जरघटाशुण्डासमुत्थायिनाम् ।
दानाम्भःपृषतामपि स्फुटशरव्याराकृतिस्पर्धिनां
भेदं ग्राहयितुं शशाक गगने मूर्ध्नानुरोधक्रमः ।।'

'आसाद्य द्विपमाहवे रदपथेनारुह्य तीक्ष्णासिना
यन्तारं विनिपात्य साट्टहसितं स्कन्धे विधाय स्थितिम् ।
कुम्भास्फालनकारिणं रिपुभटं दृष्ट्वा दिवौकःस्त्रियाः
कस्याश्चित्कुचकुम्भयोः कठिनयोः कण्डूरखण्डाऽभवत् ।।'

'कश्चिद्गजः प्रतिभटेन करे विलूने-
प्यामूलभागमसिना नमिताग्रकायः ।
क्षिप्रं प्रगृह्य रदनेन निषादिहस्ता-
त्प्रस्तं मृणिं पुनरदात्कुशलाय तस्मै ।।'

'भसितलेपसितौ करिणावुभौ युधि परस्परदत्तरदौ मुखे ।
हरिरवेक्ष्य वहत्यपि वाहने सरभसं निदधे सकला दृशः ।।'

"भिन्नैकदन्तमुसलः प्रतिदन्तिघाता-
त्कुम्भाग्रलग्नकुटिलाङ्कुशचन्द्ररेखः ।
कश्चिद्गिरीशसमतां कलयन्करीन्द्रः
सारूप्यभागिव गणाधिपतेर्विरेजे ।।"

"कश्चिन्निर्गत्य वेगादरिनृपतिबलेऽपातयत्स्वामिनं स्वं
तत्र स्कन्धाधिरूढं विभयमपि तथाधत्त नीत्वा स्वसैन्यम् ।
इत्थं दुःसाधरोधो युधि करिकलभो दूरधूताङ्कुशः सन्
विज्ञम्मन्यं निषादिध्वयमपि विदधे हासपात्रं जनानाम् ।।"

"हस्तेन हस्तमथ दन्तयुगेन दन्तौ
कर्णौ च कर्णयुगलेन पदे च पद्भ्याम् ।
वालेन वालमभिहत्य च वारणौ द्वौ
तुल्याङ्गयुद्धमतिशिक्षितमादधाताम् ।।"

"निषादिनो दन्तिशिरस्यधोमुखं निपातिताङ्गा लगुडस्य ताडनैः ।
व्यथापनोदाय मदस्य सौरभं विघ्रन्त इवालुलोकिरे ।।"

"तीक्ष्णैः प्रत्यर्थिमल्लैरपहृतशिरसां हस्तिपानां शरीरा-
दुत्क्रान्ताः प्राणवाताः करिमदपयसां सौरभीमुद्वहन्तः ।
पायं पायं कपोलस्थलकुचकलशस्वेदवारिप्रवाहं
चक्रुः संपर्कभाजां दिवि सुरसुदृशां तालवृन्तस्य कृत्यम् ।।"

"अश्वावुभौ तस्थतुरग्रपादावुत्क्षिप्य युद्धाभिमुखीभवन्तौ ।
परस्परस्योपरि हेतिपातात्स्वसादिनौ त्रातुमिवोर्ध्वकायौ ।।"

"एकैव वैरिभटखड्गवरस्य धारा
धारासु पञ्चसु सतीष्वपि कंचिदंशम् ।
स्कन्धे विभिद्य तदसृग्निकरैर्दुरापं-
जग्राह नाल्पमपि तत्क्षतजाम्बुलेशम् ।।"

"समरभुवि बभासे सादिनो भूषणानां
मरकतमणिभासां मध्यगः कश्चिदश्वः ।

सकलभटमर्दैश्चर्म्मलाइभिन्नवाहा-
न्निपतित इव रथ्यो नेतुरहनां शतार्द्धात् ।।'
'आयोधनाङ्गणजुषामसृगापगानामावर्तगर्भपतिताः कुणपा हयानाम् ।
संबभ्रमुर्विहितपूर्वमुपाददानाः शिक्षाविशेषमिव मण्डलचक्रमेषु ।।'
'धन्वी धानुष्कमारादसिभृतमसिमान् कुन्तिनं कुन्तधारी
चक्रास्त्रं चक्रहेतिर्गदिनमपि गदापाणिरन्योन्यमेत्य ।
स्वस्वास्त्राणां प्रयोगे दृढपरिचितयो हन्तृवध्यत्वशैली-
साधारण्ये प्रतिष्ठामभिविदधुरमी द्वन्द्वयोधाग्रगण्याः ।।' ६।१-३१ ।।

एवं कौरवपाण्डवसैन्यसंघर्षः, तस्मिंश्च गजतुरगरथपत्तिचेष्टायुद्धानि च वर्णितानि कविनाऽतिकौशलेन ।

तत्र उभयेषामपि कुरूणां गजतुरगरथयोधैः निरुद्धपार्श्वानां कुरुक्षेत्रे हिरण्यती तटिनी तटे युद्धाय गमनेन परस्परसंघर्षेण अन्योन्यप्रहरणेन च तेषां परस्परजयविषयक उत्साहो धृतिगर्वासूयामर्षौग्र्यादि परिपोषितो व्यज्यमानो वीररसतां प्रतिपद्यते ।

करिघटानां हिरण्यवतीतटरुहप्रसूनगन्धग्रहणेन स्वकपोलमदसुरभितलहरीप्रदानेन च परिवृत्त्यलंकारः ।

तुरगाणां स्वक्षुरोद्धतरजोमण्डलोत्थापने नामसाम्यधारिसिन्धुशोषणाऽभ्यसूयाहेतोरुत्प्रेक्षा ।

समरसमवेतानां रथानां करिणां निबिडिता नादादिगन्तान् प्रापुः-इत्यस्य सकला दिशः स्ववशेविधातुं तेषां नादानां परस्परं महान् कलहोऽभूदिति प्रकारान्तरेण वर्णनात् पर्यायोक्तम् ।

स्यन्दनवृन्दमौलिकलितानां केतूनामुद्दण्डानामपि ग्रहाणां तुङ्गं स्थानं-समतिक्रम्य स्थितिवर्णने केतूनां तादृगौन्नत्याऽसम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, उद्दण्डानां विनयविहीनानामपि उन्नतिप्राप्तिवर्णनादविभावना उद्दण्डशब्दगतश्लेषहेतुका, केतुषु ग्रहाणामन्यतमे एकस्मिन्ग्रहे स्वनामसामान्यसहनस्याऽसंबन्धेऽपि तत्सम्बन्धवर्णनादपरासम्बन्धातिशयोक्तिः, केतूनाम्

न्नतत्वे केतुग्रहोन्नतत्वासहनस्य हेतुत्वेनोत्प्रेक्षा च ।

महीपति पटमन्दिराणां दूष्यरत्नानां स्वेषामुन्नतत्वे गगनापगावारिमिमृक्षा हेतुत्वेनोत्प्रेक्ष्यते , तत्र दूष्यशबलगतो दोषयुक्तपटमण्डपश्लेषोऽगम् ।

कुरुदौत्रस्य विशालवीथी विराजमानविपणि विशकटपण्याहरणसमवेत क्रक्किनक क्रयिकजन संबाधत्वेन विटानुसार्यमाणाषारविलासिनीजनवेशनिबिडत्वेन स्वायुधसंस्काराकुलयोधजनसंकुलत्वेन च कुरुपुरोपमा ।

दुर्योधनस्य सैन्याधिपत्यस्वीकारे भीष्मप्रार्थनायां विवाहविमुखस्याऽपि सैन्याधिपत्यलक्ष्मी विवाहस्वीकारस्याननुरूपत्वाद् विषमम्, तस्य च भीष्मपदप्रणिपात व्यर्थ्य तद्भक्तिभावेगता, विवाह प्रार्थनका उपहासस्येव प्रतीतेः ।

पार्थानां स्वसैन्याधिपत्ये धृष्टद्युम्नस्थापनेविरोधिवनदहनफलकत्वप्रतीयमानोत्प्रेक्षा, तस्यां विरोधिषु वनाभेदरूपकम्, तद्भुजे प्रतापमपह्नुत्य जन्मकालसक्तानलारोपात् अपह्नुतिश्चाऽगे ।

महारथपरिगणनावसरे कर्णस्यार्धरथत्वेन भीष्मद्वारा परिगणनात् तस्य भीष्मावधिपर्यन्त शस्त्राग्रहणप्रतिज्ञया तस्मिन् असर्षो ध्वन्यते । कर्णस्य अहर्पतिसूनु विशेषणं तस्य रोषार्चिश्चिह्नितवनदत्वे युक्ततामवगमयतीति परिकरालंकार उक्तभावोपस्कारकः ।

कर्णप्रतिज्ञाश्रुत्यनन्तरं दुर्योधनं भीष्मस्य वत्स ! महाभुजानपि शूरसुखरतरविशिखमुखेन खादयामि इति कथनेन तद्गतो गर्वोऽभिव्यज्यते , 'खादयामी' ति पदेन भाविनोऽपि खादनव्यापारस्य वर्तमानत्वेन कथनात् तस्याशुभावित्वं-द्योत्यते ।

समरभूमौ पार्थः श्रीकृष्णं सारथित्वेन रथाऽग्रे विधायरणाय सन्नद्धोऽभूत् - इत्यत्र पुरारिः स्वयंभुवं सूर्यश्चाऽरुणमग्रे विधत्तः स्म- इत्यनयोरुपमानत्वेन स्थापनात् पार्थस्याऽजेयत्वं ध्वन्यते ।

भीष्मप्रभृति बन्धुजनविनाशचिन्तया पार्थस्यचक्षुषोर्बाष्पाम्बुकर्मिकायाः मुखेन्दोः श्वसितकर्मिकायाः मनसो धैर्यकर्मिकायाः करतलस्य च चापकर्मिकाया एकस्या मोचन क्रियायाः सम्बन्धवर्णनात् प्रकृतगता तुल्ययोगिता, तया चाऽर्जुनस्य

विषादो ध्वन्यते ।

वासुदेव प्रबोधितस्यार्जुनस्य पुनश्चापग्रहणेन धृतिभावो ध्वन्यते । कौरवसैन्याधिपतिभीष्मरथमौलिस्थितकेतनचिह्नभूते दीर्घतरतालश्यामप्रभायां तद्युद्धावलोकनागतयमुनाया उत्प्रेक्षा ।

युद्धारम्भकालिकवाद्यनिनदेषु शब्दान्तरतिरोभावनहेर्वर्णनाद् व्यतिरेकालंकारः, दिगन्तावधिपथसंचरणजन्यश्रान्त्या असम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, वेलाशैलमहागुहासु प्रवेशे चोक्तश्रान्तिहेतुफलकत्वोत्प्रेक्षा ।

देवानां युद्धदर्शनाय नन्दनवनात् पुष्पाणि गृहीत्वा कुरुक्षेत्रीयगगनतलप्राप्त्या तद्गत औत्सुक्यभावो ध्वन्यते । मरुतामपि तेषां संमर्दजनितघर्मजलापनोदनाय मत्तत्सेवनाय गृहीततालवृन्तत्वं वर्ण्यमाननमनुरूपमिति विषमालंकारः।

कुरुक्षेत्रे संगतयोरुभयोरपि विरोधिसैन्ययोः पुष्करे पूर्वपश्चिममरुत्प्रेरितत्वात् संगतयोर्घनाघनयोरुत्प्रेक्षा ससंभ्रमत्वं ध्वनयति ।

धावत्स्यन्दनकेतनांशुकमरुद्ध्याधूतमन्दाकिनी बिन्दूनां सैन्यगजशुण्डादण्डसमुत्थितदानाम्भःपृषतां च सामान्येन भेदग्रहणावसराभावेऽपि भृगानुसरणेन मदजलबिन्दूनां भेदग्रहणो[1]क्तिः विशेषकालंकारः(१) द्वयोरपि शरसाराकृत्या उपमा, मन्दाकिन्या रथकेतनांशुकमरुद्व्याधूतत्वस्य तद्बिन्दूनां च कुरुक्षेत्रागमनस्याऽसम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिद्वयम् ।

कंचिद्भटं शुण्डापर्यन्तगजमारुह्यतीक्ष्णासिनामन्तारं विनिपात्य गजकुम्भास्फालनकारिणं दृष्ट्वा कस्याश्चित् सुरस्त्रियाः कुचकुम्भयोः कण्डूत्यूच्छित्यातद्विषयकरतेस्तस्या औत्सुक्यं ध्वन्यते ।

कस्यचिद् गजस्य शुण्डादण्डे प्रतिभटेनविलूने सत्यपि निषादिना नमिताग्रकायः तद्धस्तात् पतितस्य वृणेः रदेन प्रगृह्य तस्मै दानेन विभावनालंकारो गजस्य शिक्षाविशेषविशिष्टता निषादिनश्चतच्छिक्षणकौशलं ध्वन्यते ।

---

१ भेदवैशिष्ट्योः स्फूर्तौ न्मीलित विशेषको । १४८ । कुवलयानन्दे

भूतिलेपसितौ कोचिद् युध्यमानौ गजौ दृष्ट्वा स्ववाहनस्य सदृशदर्शने न मद्वाहन ऐरावतोऽस्ति , न वा इति एकाश्रयस्थित्या संकीर्यमाणैः सादृश्यमूलकस्मृतिभ्रान्तिसन्देहालंकारैः शंकाभावो ध्वन्यते ।

कश्चित् गिरीशसमोमहान् गजेन्द्रः प्रतिगजेन भिन्नैकदन्तमुसलत्वाद् गणाधिपतिसारूप्यमागिवजात इत्युत्प्रेक्षा ।

कस्यचित् करिकलभस्य निषादिनियन्त्रणामस्वीकृत्य दुर्द्यूताकुशस्य स्व स्वामिनं रिपुदलं नीत्वा तत्रत्यमारूढं च स्वदलमानीय पातयितुश्चेष्टावर्णनात् स्वभावोक्तिः ।

कयोश्चिद् वारणयोर्हस्तदन्तादिना हस्तदन्तादिकमभिहत्युतुल्यागकरणक युद्धकरणेन शिक्षाविशेष विशिष्टत्वं ध्वन्यते ।

लगुडताडनजन्यव्यथापनोदाय दन्तिशिरस्यधोमुखं निपातितांगेषु निषादिषु तन्मदसौरभाघ्राणासक्तत्वमुत्प्रेक्ष्यते ।

तीक्ष्णरिपुभल्लापहृतशिरसां हस्तिपानां शरीरादुत्क्रान्तेषु प्राणवातेषु गदगजसौरभीसम्बन्धस्यासत्वेऽपि तत्सम्बन्धवर्णनात् सुरस्त्रीजनकपोलकुचकलश स्वेदवारिपानकर्तृत्वासम्बन्धेऽपि तत्सम्बन्ध वर्णनाच्चसम्बन्धातिशयोक्तिद्वयम् - तेषु च तालवृन्तकार्यकरण वर्णन तत्सदृशकार्यकरणप्रतीत्या असंभवद्वस्तु सम्बन्ध निबन्धना निदर्शना ।

कयोश्चिद् युद्धाय अभिमुखीभूय कृतोर्ध्वकाययोरश्वयोरुत्थित्वे रिपुशस्त्र प्रहारात् स्वस्वसादिरक्षाणफलकत्वमुत्प्रेक्ष्यते ।

कस्यचिद्वैरिभटस्य खड्गधरस्यैकधारा पद्धारा विशिष्टं स्कन्धेव्यभिन्न इति कथने रक्षणसमर्थपद्धाराविशिष्टत्वरूपहेतुसत्वेऽपि अश्वरक्षणाभाववर्णनाद् विशेषोक्तिः, अत्र धारा शब्दगतश्लेषागम्, खड्गधारायां अश्वप्राणग्रहण कर्तृत्वासम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः, खड्गधारायां अश्वस्कन्धभेदेन सहजातजाम्बुसम्बन्धेऽपि तदसम्बन्धवर्णनादसम्बन्धातिशयोक्तिश्च । एभिरलंकारैर्भटस्य हस्तलाघवं ध्वन्यते ।

कश्चिदश्वोमरक्तमणिभूषणप्रभामध्यगत्वेन श्यामश्यामः समरागणकृ

तप्राणोत्सर्ग-सूर्यमण्डलप्राप्तसकलभट संमर्दविचलित सूर्यशतांगात् परिभ्रष्ट तदश्वत्वे नोत्प्रेक्ष्यते । तत्र तद्गुणालंकारस्यांगता ।

रणांगण प्रसृमर शोणितसरिदावर्तगर्त पतितभ्रमद्राजिषु प्राप्तपूर्वशिक्षाविशेष प्रकाशनकर्तृत्वमुत्प्रेक्ष्यते ।तत्र सम्बन्धातिशयोक्तेरंगता ।

चापासिकुन्तचक्रगदाशस्त्रशस्त्रधारिणः तत्तदस्त्रशस्त्र धारिणं प्राप्य स्वस्वास्त्र शस्त्रप्रयोगेण हन्तृवध्यान्तरत्वं प्रापुरिति वर्णनिससंरम्भोत्साहो धृत्यमर्षगर्वादिभिस्तच्चेष्टाव्यज्यमानैर्भावैः परिपुष्टो वीररसतां प्रतिपद्यते ।

क्वचिदत्रालंकारा उक्त विधानुसारं स्वात्मचमत्कृतिमात्रविश्रमाः, क्वचित् ध्वन्युपस्कारकाः क्वचिच्च तद्व्यंग्यकाश्चमत्कारिण एव ।

क्वचिवृत्त्यनुप्रासाद्या यमकानि चापि यत्र तत्रोपात्तान्युपयुक्तान्येव तत्तद्गुणानुगुणघटनामयत्वात् ।

(२) भीष्मयुद्धं तद्धयश्च

'ततः,-

'धृष्टद्युम्नोत्कृतमर्माणमग्रे दृष्ट्वा हाहाशब्ददीनां स्वसेनाम् ।
कोदण्डज्यामामृशन्घोरघोषां कोपाद्भीष्मः प्राविशत्पार्थसैन्यम् ।।'

'ससिंहनादे सरितः कुमारे चापं समाकृष्य शरैर्विमुक्तैः ।
परान्वरीतुं प्रथमं प्रवृत्ते वरान्वरीतुं ववले ऽप्सरोभिः ।।'

'पृथासुतानां पृतनान्तराले पृथक्पृथक्तस्य पृषत्कवर्याः ।
द्विपान्सहस्रं तुरगान्सहस्रं भटान्सहस्रं पतितानकार्षुः ।।'

'सिन्धोः सुतस्य विशिखैर्जमदग्निसूनोः
प्राणान्विलिह्य धिगिति प्रविमुक्तवद्भिः ।
कृत्तान्यमुंचत विरोधिकुलानि कश्चि-
त्कश्चिज्जवेन जगृहे युधि भूतवर्गः ।।'

'देवव्रते दलितवैरिणि दृष्टमात्रे सारथ्यमात्रकरणे कृतसंगरोऽपि ।

मूले न केवलमहो पुरभिद्रथस्य मध्येऽपि चक्रमतिसंभ्रमयत्प्रकार ।।'

'अरिमण्डलखण्डनैः पृषत्कैरवदीर्णा रुधिरापगावलीनाम् ।

अवनीपतयो रुषा निजानामधिविन्नां जननीमुष्य चक्रुः ।।'

'तदनु समरसंमुखीनवैरिभटप्राणपरिशोषणोन्मुखशिलीमुख प्रस्थानसमयसमापृच्छनपात्रीकृतकर्णपुटैर्बलवैरिनगरवास्तव्यवारविलासिनीजनपाणिपल्लवैरुपरि गलितपारिजातप्रसवसहपतितचञ्चरीकपुञ्जमञ्जुगुञ्जितव्यञ्जितभेदचिकुरबन्धैर्वेगापतितविशिखविघट्टनविपर्यस्तमुकुटविप्रकीर्णविविधमुक्ताफलशंकावदान्यरणश्रमवारिशीकरनिकरकोरकितनिटिलभागैः रोषातिरेकव्यतिकरितदशनावलिदंशनपुनरुक्तरक्तिमाधरैर्युतैन राज्ञां शिरोभिः कल्पान्तरुद्रबन्धुः सुरसिन्धुसूनुरयं वसुधरां बन्धुरयांचकार ।'

'नद्याः सुतेन जनितैर्नवदेववर्गैः

सान्द्रे स्वधाम्नि सति संकुचितस्थितीनाम् ।

स्वर्गौकसामजनि सा स्वयमेव काम्या

कूलंकषा कुशिकनन्दनकोपमुद्रा ।।'

'भीष्मस्य कन्याजनपाणिपीडां पितुर्मुदे त्यक्तवतोऽपि तस्य ।

सद्यात्सुराणां सति पुष्पवर्षे संतानलाभोऽजनि तद्विचित्रम् ।।'

'इत्थं विधाय दिनपेकमसौ समीकं पाश्चात्यभूधरमुपेयुषि पद्मबन्धौ ।

प्रत्यर्थिनामिव चकार बलापहारं स्वस्यापि चापशिखरादवरोपितज्यः ।।

'इति नवदिनानि नवनवानि भुजविलसितानि प्रकाश्य दशमे हिनपुनरसौ निजध्वजचिह्नमात्रं वियदारोहति विवस्वति समरवर्षासमयशिखण्डिना गाण्डीवधन्वना पुरस्कृतं शिखण्डिनं दृष्ट्वा 'स्त्रीपूर्वोऽयम् , अमुना सह न योद्धव्यम्' इति निषिध्य हस्ततलनिरस्तधनुर्लतकः प्रथमं स्वदूरापसरणकुपितयेव सिञ्जिन्यापश्चादतिदूरनिष्कासितैर्विजयविपाठैरादिवसावसानं विदारितकलेवरतया नितान्ततान्तः शान्तमनाः शान्तनवोऽसौ स्वान्तनिहितरक्षाकान्तः सुभटलोकसमुचितांशरशय्यां क्रमादधिशिश्ये ।।'

'पार्थेन क्षितिविनिखातपुङ्खकानांबाणानामुपरि पितामहः शयानः ।

बभ्राज व्रणबिलवान्तरक्तबिन्दुधाराणां घन इव शक्रगोपवर्षी।

"संवीक्ष्य तत्र शयितं तमिमं शरेषु
सांक्रान्तिकं गुणमिव प्रतिपद्यमानः ।
भास्वानपि स्वयमुपात्तकरोष्मशान्तिः
पाश्चात्यसागरशरेषु शयालुरासीत् ।।"
"जगति विनुतकीर्तौ जामदग्न्यस्य शिष्ये
कवलितरिपुवर्गे कालधर्मं यियासौ ।
बहुसुरवरलाभाद्बद्धकामोत्सवानां
श्वशुरमरणदुःखं स्वर्वधूनां बभूव ।।"
"पतिते युधि वाहिनीसुते पतदश्रुर्द्विविधापि वाहिनी ।
प्रथमं परितापमुच्छ्रितं पटवेश्मानि ययौ ततः परम् ।।" ६।३२-४४।।

एवं वर्णितं कविना कौशलेन भीष्मयुद्धं तत्पतनं च । तत्र पार्थसैन्यालम्बनकोद्दृष्टद्युम्नपराक्रमोद्दीपनको भीष्मगत उत्साह स्थायिभावस्तस्य सिंहनादबाणवर्षणादि चेष्टाभिर्व्यज्यमानैर्धृतिगर्वादि संचारिभिः पुष्यन् वीररसतांप्रतिपद्यते । यत्र चैकवृत्त्यनुप्रासादिभिरोजोमाधुर्यादिगुणानुगुणवर्णघटितत्वेनोपात्तैः पुरस्तात् पदर्श्यमानैश्चार्थालंकारैरुपस्क्रियत एव । यथा - भीष्मकर्तृकपराक्रमक्रियायाः अप्सरोगणकर्तृकवरक्रियाया लक्ष्यीकरण-पतीकरणरूपोभयार्थवाचकश्लिष्टवरणक्रियाया एकस्या एव प्रकृताऽप्रकृतयोर्योगाद् श्लेषमूकलंदीपकम् , रणे भीष्मपृषत्कवर्षपतितानां सहस्रसहस्रगजतुरगयोधानामेकयैव पतनक्रियया योगात् प्रकृतगता- तुल्ययोगिता, भीष्मकृतविरोधिकुलानां प्राणादिपङ्क्तेक-पिशाचवृन्दरूपोभयभूतवर्गकर्तृकस्य मोचनग्रहणरूपविरुद्धक्रियाविषयत्वयोः एकधर्मिगतत्वेन प्रतीत्या विरोधः तस्य विरुद्धक्रियाकर्त्रोर्भिन्नत्वेन प्रतिसंधाने आभासरूपता, विरोधप्रतिसंधानेभूतवर्गशब्दगतश्लेषस्य हेतुत्वेनोज्जीवितता, देवव्रतस्य पार्थपृतनादलनदुर्ललननिरीक्षणकुपितस्य भगवतो मुरजितो रथमूल इव तन्मध्येऽपि चक्रभ्रामणेन योगात् तुल्ययोगिता, तस्मिन् रथाङ्गसुदर्शनोभयवाचकचक्रशब्दगतः श्लेषोज्जीवितः, अरिमण्डलखण्डनकारिभीष्मपृषत्कावदीर्णाऽवनिपतीनां निजरुधिरापगावलीभिरभ्युज्जनन्या जाह्नव्या अधिविन्नाकरणात् प्रत्यनीकम्[1] भीष्मस्यकल्पान्तरुद्रेणोपमा च चोक्तवीररस-

१, प्रत्यनीकं ब्रुवतः स्याद्योः पक्षे पराजयैः / ध्रुवत्वात्तद्विघातः ११९ ॥

स्योपस्कारका एव ।

भीष्मयुद्धे हतैर्नवदेवसुरैः स्वर्गस्य संकुचितत्वस्य स्वर्गकिंसां च कुशिकनन्द नकोपमुद्राकाम्यायाश्चासम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिद्वयम्।

भीष्मस्य पितुर्मुदे विवाहं त्यक्तवतोऽपि संतानलाभोऽभूत् इत्युक्तौ - हेतुंविना कार्यस्य वर्णनाद् विभावना । तत्र संतति- कल्पवृक्षकुसुमोभयवाचकसंता न शब्दगः श्लेषोऽस्ति ।

प्रथमे दिने सायं सूर्येऽस्तंगते सति भीष्मः प्रत्यर्थिनां स्वस्य च बलापहा रंचकारेत्युक्तौ बलपहारस्य प्रत्यर्थिगणस्यस्वस्य चोभयोः सम्बन्धात् सामर्थ्यनाश न - सैन्यसंयमनोभयवाचक-बलापहारशब्दार्थगतश्लेषमूलिका तुल्ययोगिता , भीष्म गत-धृतिभावपोषिका ।

समर एव वर्णोऽस्यः तस्य शिखण्डी भीष्म इति परम्परितरूपकम्, भीष्मस्य समर विषयकोरसः, तज्जन्यः मोदातिशयश्च ध्वन्येते ।

स्त्रीपूर्वंशिखण्डिनं युद्धोद्यतं स्वपुरतोऽवलोक्य युद्धविरतभीष्मकलेवरविदा रणाणां विजयविपाठानामतिदूरनिःसारणे गाण्डीवधन्विन्यां प्रथमरवदूरापसा रणं हेतुत्वेनोत्प्रेक्ष्यते,उत्प्रेक्षाया चार्जुनस्य समरसाध्यर्तिशयो ध्वन्यते ।

पार्थस्य क्षितिविनिखातपुंखानां बाणानां शय्यायां शायितो व्रण बिलवान्तरक्तधारावर्षी भीष्मः शक्रोपवर्षीधाराधर इव बभ्राजेति स्वरूपोत्प्रे क्षाया भीष्मस्य धृतिशक्त्यतिशयो ध्वन्यते ।

भीष्मं शरशय्यायाशायितं वीक्ष्यभास्वानपिसांक्रामिकगुणं प्राप्त इव पा श्चात्यसागरशरेणु शयालुर्जात इति बाणजलोभयवाचकशरशब्दश्लेषोत्थापितयो-त्प्रेक्षाया भीष्मोभास्वांश्च शरशायिनौ जाताविति दीपकं ध्वन्यते ।

निहतबहुरिपुवर्गेभीष्मे कालधर्मं पियासौ सतिभीष्मयुद्धाद् बहुनवसुरवर लाभाद् बद्धकामोत्सवानां सुरवधूनां श्वशुरमरणदुःखासम्बन्धेऽपि तदुक्त्या सम्ब-न्धातिशयोक्तिः ।

भीष्मे युधिपतिते सति कौरवपाण्डवद्विविधवाहिन्याः प्रथमं परिताप-

स्य पश्चात् च पटवेश्मनां च क्रमशः प्राप्तेर्वर्णनात् पर्यायालंकारः ।

(३) द्रोणाचार्य युद्धम्

अथ कविना वर्णितं द्रोणयुद्धम्, सत्यजिद्वधः भीमनकुलसहदेवयुद्धम्, भगदत्तयुद्धम्, भीमकृतभगदत्तगजबलविनाशः, सुप्रतीकगजकृतपार्थसैन्यव्यथाकुली, अर्जुनकृतः सुप्रतीकगजभगदत्तवधश्च विविच्यते सम्प्रति । तद्वर्णनं यथा -

" अपरेऽहनि कौरवश्चमूनामधिपत्ये परिकल्प्य कुम्भयोनिम् ।
पुरतो निजगाद भीष्मपाताद्रुदितोच्छ्वनदृशां नराधिपानाम् ।।"

" कुम्भोत्पत्त्या प्रसिद्धो मुनिवृषभ इव दमाधरं विन्ध्यसंज्ञं
लोके तादृग्विधस्त्वं युधि निजमहसा भूभृतः स्तम्भयित्वा ।
जीवग्राहं गृहीत्वा विनमितवदनं लज्जया धर्मसूनुं
पद्भ्यामेव प्रचारं विदधतमधुना क्रीलया मेऽर्पयेति ।।"

" उदितं तदिदं निशम्य गोष्ठ्यानुचितज्ञः करमुन्नमय्य किंचित् ।
गुरुसंनिभविक्रमस्तदानीं गुरुरेणोऽपि कुरुद्वहं बभाषे ।।"

" कर्तुं हि शक्त्यमखिलं नृप ! कौरितं ते
धर्मात्मजे परिवृतेऽपि धराधिनाथैः ।
शौरिप्रणुन्नहयहेषितशब्दमिश्रो
न श्रूयते यदि नरस्य शरासघोषः ।।"

" सर्वास्त्रविद्यासहवाससौख्यसंकेतभूमेरपि तस्य वाचम् ।
प्रत्युद्ययौ तां परिषड्गतानां तिर्यक्प्रचारः शिखो नृपाणाम् ।।"

" अथ द्रुपदजद्रोणौ रथाश्वगजसंवृतौ ।
बद्धायतसमुत्साहौ युद्धाय निरगच्छताम् ।।"

" नामाक्षरांकितनदीसुतबाणपूर्णं
रैङ्क्षवेतुरुभावपि राजवर्गौ ।
सच्चेलितौ सबिरुदौ समहाट्टहासौ

सास्फालितांऽसशिखरौ सहवल्गनौ तौ ।।'

'अक्षौहिणीरवनिवल्लभवाहिनीना-
मेकत्र गाढमिलिताः सुतरामसोढ्वा ।
सा युद्धभूमिरुपरीव समुत्पतन्ती
सान्द्रा रजःपटलिका समदृश्यताग्रे ।।'

'भेरीरवे गगनवाहिनि बाहुलीलां
द्रोणस्य वीक्षितुमनोभिरदृष्टपूर्वाम् ।
मध्ये विसृज्य दिवि जम्भभिदोऽवकाशं
तस्थेऽभितस्त्रिदशकिन्नरयक्षसिद्धैः ।।'

'ततस्ते नरेन्द्राः सर्वेऽपि वसुधातलनिहितवामजानुभागाः प्रवेलितमन्त्रमुदीर्य तूणीरपेटिकासमुत्थापितार्द्धीवाकर्णसमुपजातत्वरान्परुषभीषणाविषदिग्धाम्बिनतातनयनिबद्धस्पर्धांस्तदाकमुखान्बाणपन्नगान्नभोभुविविराय नर्तयन्तः परस्परपरिपन्थिनां प्राणपवमानमपीप्यन् ।।'

'कलशीतनयेऽथ कार्मुकं स्वं वलयीकुर्वति वैरिघन्वियूनाम् ।
युधि केवलमेव चापदण्डा मृतजीवा जनदृक्पथेष्वतिष्ठन् ।।'

'विधातृसृष्टिं विपरीतरूपां विधातुमुद्युक्त इवैष वीरः ।
शरामिवर्षेण चकार राज्ञामूर्ध्वं कबन्धानि शिरांस्यधस्तात् ।।'

'तावद्धौटैर्वलद्भौर्वलयितसविधे तस्थिवांसं शतार्द्धे ।
भारद्वाजो जिघृक्षुर्नृपतिमभिययौ भल्लवृष्टीर्विमुञ्चन् ।
दंष्ट्रारोचिःशलाकास्तुमुलभवकिरन्दिक्षु सर्वासु घोरः ।
शीतांशुं मध्यसीम्नि स्थितमिव परिषेः सिंहिकायाः कुमारः ।।'

'तदनु तदीयमार्गणगणाभिघातनिवर्तितमुखैर्निजशिलीमुखैः सह दूरमपयाता न्मातरिश्ववैश्वानरारिश्वनेयतनयप्रभृतीन्क्षतिपतिरक्षिणः प्रवीरानभिवीक्ष्य - क्षीणेन माधवधाव्यमानतुरङ्गेण शतार्द्धेन प्लवङ्गकेतनो नगेन्द्रो नदीप्रवाहमिव निर्निवाररथ्यं तमाचार्यमुपरुरोध ।।'

'शिवशुद्धकृतस्तस्य द्रोणयुद्धेऽप्यनुन्मनः ।
सर्वापि जनता श्रेयः काङ्क्षते हयुचरोचिषम् ।।

'दाता ग्रहीता धनुर्भृयो वेत्युदामशब्दो भुवने स्ति यस्य ।
विस्फारघोषो धनुषो स्य भूयान्विजृम्भते स्म द्विषतामसह्यः ।।'

'नामैषां मे ज्यायसः पुण्यकीर्तेरासीदिष्टं मात्स्यपुर्यामितीव ।
गाण्डीवोत्थैरेष बाणैर्हतानां क्रूरान्क्रव्यैर्विद्विषां पर्यताप्सीत् ।।'

'तदनु सव्यसाचिशरवीनीचीकृतभुजदम्भविजृम्भः कुम्भसंभवः समराय परिगृहीतेषु संविधानेषु द्यूतारम्भेष्विव प्रतिभटोन्मुखं विदधानैर्योधैः साकं चण्डमानुश्चरमगिरेरिव स्वयमपि कटकरोधानमासीदत् ।।

'अन्येद्युर्द्रौणिसंबोदितनृपवचने तस्थिवद्भिस्त्रिगर्तै-
राहूतेऽन्यत्र योद्धुं गतवति विजये कृष्णाकल्पप्रशंसे ।
प्रातस्ते घार्तराष्ट्राः परबलमभजन्वीतभीकैरनीकै-
र्दाविज्वालेन शून्यं वनमिव चमरा वल्गवद्भिः स्वयूथैः ।।'

'भारद्वाजोऽपि तस्मिन्नहनि कुरुपतेर्वाञ्छितार्थं विधास्य-
न्नज्ज न्नान्वेषोकतानो रथमधिनिकषा स्थापिते धर्मसूनोः ।+
कृष्णाम्यां रदाणाय प्रथितभुजमदे सत्यजित्युत्स्फुलिंगं
दृष्ट्यार्युग्मं निधाय प्रतिभटपृतनाकुद्दिमाविक्षदेकः ।।'

'विद्ध्वा चिरेण युगमात्रमपास्य रथ्या-
न्निर्धूनितेन सरुषा गुरुणा निकृत्तम् ।
तस्याथ रङ्गभुवि सत्यजितोरराङ्गं
बाष्पाम्बुभिः सह पपात युधिष्ठिरस्य ।।'

'अच्चया त्वरया तस्मिन्नुपकण्ठं समागते ।
पार्थस्य पश्यतोऽग्रे तं प्राणा अपि तथाचरन् ।।'

'तस्याथ द्वैषिसेनाजलधिकवलनात्कुम्भयोनित्वकीर्तिं
स्पष्टीकर्तुं स्वकीयामिव कुतुकवतः पार्श्वमभ्येत्य वेगात् ।
भीमो रथ्यानमध्नाद्द्रुपदतनुभवः सूदयामास सूतं
कोदण्डं केतुदण्डं द्वयमपि शकलीचक्रतुर्दंभ्रपुत्रौ ।।'

'ततस्तादृशं कुम्भसंभवस्याभिर्षङ्गमभिवीक्ष्य क्रोधनतया कर्णतालसमीरण-

समृद्धिपरिणतचक्रवातगर्भपरिभ्रमद्रथकेतुपताकापटसहस्रसंपादितसमरसागरावर्तवशंवदफेनकूटशोभानि सकलदिङ्मुखघण्टापथजयाधिकघण्टाभरणरणितबधिरीकृताष्टलोकपालपुरजनानि निबिडितसुरसमाजसमाक्रान्तगगनमण्डपसंधिबन्धस्थिरीकरणाय दत्तायतेन्द्रनीलस्तम्भानिवशुण्डादण्डानूर्ध्वमुन्नमयमानानि समस्तानि हास्तिकानि पुरस्ताद्विस्तार्यरणमत्तो भगदत्तः सुप्रतीकमधिरूढो हठाद्भीममभिदुद्राव ।।'

' घोरैरभियाते सति सुप्रतीके दूरैरसह्यैर्द्विषतां बलानि ।
परश्वधास्त्रे पतिते बलानि पत्युर्दीनानामिव पश्चिमस्य ।।'

' केतून्पातयतो रथान् श्लथयतो दन्तावलान् कृन्ततो
घोटान् पाटयतो विभिद्य गदया भीमो द्विपान्विद्विषाम् ।
संग्रामाङ्गणरक्तवारिलहरीसंलक्ष्यमाणस्वक-
च्छायामात्रसहायमेव विदधे तं सुप्रतीकं रणात् ।।'

' पादाग्रहस्तरदनप्रतिघातलीलालक्ष्मभ्नारिरक्तमसृणो भगदत्तदन्ती ।
आलक्ष्यत द्विरतिभृत्स्तटवप्रकर्मण्यालिप्तगात्र इव गैरिकपङ्कदेन ।।'

' तदनु करटिमल्लं तत्र वीक्ष्यापतन्तं
दलितपरबलं तं दन्तकुन्तं वहन्तम् ।
चकितहृदयवृत्तेः संगरे वायुसूनो-
र्जनकगुणसमृद्धिर्जघ्नयोराविरासीत् ।।'

' इति सुप्रतीकसंक्षुभितनिजध्वजिनीकोलाहलसमाकर्णनाकुलमानसोवासवसूनुर्महिषुनिषूदितावशेषसंशप्तकगणदूरनिरासप्रयुज्यमानवायव्यास्त्रवेगार्घं विमज्य-निजरथाय वितीर्णवानिव चिरन्तनीं तूर्णमासाद्य निर्वैलभुजगर्वदुर्विलसितौ-तौ कुम्भजातकिरातराजौ निरुद्धय चिरेण योधयामास ।।'

' ततः,- '

' मनश्च पार्थस्य रथं च मुक्तुं मदावलेन्द्रस्य करे प्रवृत्ते ।
सारथ्यचातुर्यवशेन शौरेर्भग्नः स तस्यैव मनोरथोऽभूत् ।।'

' पार्थस्य तस्य तदनु प्रहिता वधाय
मर्मघ्नं ययौ पथि शरैर्मगदत्तशक्तिः ।

प्रस्थानकर्मसमये भयदायि तस्या
नागस्य दर्शनमजायत यत्समीपे ।।'

'अथ तेन हरेः सुताय मुक्तं हृदिकृत्वा स्वयमात्मदैवमस्त्रम् ।
तदिदं वनमालया मुकुन्दः सहवास्तव्यकुटुम्बितामनैषीत् ।।'

'स फल्गुनस्तत्र चकार बाणैश्चिकीर्षुमन्त्याकारवर्जितं स्वम् ।
कुलाचलात्पीवरमप्यरातेः करेणुमाधाकारयोगशून्यम् ।।'

'मदर्कुललामगन्धिकालं मघवत्सूनुरुरेर्निपात्य शीर्षम् ।
पृथुलां मुदमादधे ततोऽसौ पृथिवी गन्धवतीति गोतमोक्तेः ।।'

'भगदत्ते वधं याते सह मत्तेन दन्तिना ।
सत्यजिन्नाशशोकार्तिमत्यजन्पाण्डुनन्दनाः ।।' १०।१-३०।।

'तदनु नाम्नाऽरुणो तेजसि संध्ययापि तादृशे कलशयोनिः स्वयं नाम्ना गुरुरपि व्ययायापि तादृग्विधस्त्रिभिरेवाङ्गैर्विरलितेन वलेनानुगम्यमानस्तादात्विकं स्वमनोरथमिव दूष्यतामुपगतमावासं शनैः शनैरावृत्ते ।।' १०।३०॥ गद्यम् ।।

एवं वर्णितं [illegible] कविनाऽतिकौशलेन द्रोणयुद्धम्, सत्यजिद्वधः, भीमनकुलसहदेवयुद्धम्, भगदत्तयुद्धम्, भीमकृतो भगदत्तगजबलविनाशः, सुप्रतीकगजकृतपार्थसैन्याऽऽकुलत्वम्, अर्जुनकृतः सुप्रतीकगजस्य भगदत्तस्य च वधः ।

तत्र दुर्योधनस्य द्रोणाचार्यं स्वसैन्याधिपत्येनियुज्यतं प्रति युधिष्ठिरं वीरग्राहं गृहीत्वा समर्पणस्य प्रार्थनायां चापल्यमसूया च ध्वन्येते, तत्र अगस्त्यमुनिवरोपमा द्रोणस्यो उत्कर्षिका । दुर्योधन वचन प्रत्याख्यानेन द्रोणगतोमतिभावो ध्वन्यते, ग्रहोपमा, सर्वास्त्रविद्यासहवास सौख्यभूमिरूपकम् च द्रोणोत्कर्षकं ।

द्रोणपक्षस्थानां धृष्टद्युम्नपक्षस्थानां चोभयेषामपि राजकुलानां परस्परालम्बनकः परस्परशौर्योद्दीपितः तदीयवेला हास स्वां सशिखरास्फालन वल्गन शस्त्रास्त्र संचालनादि चेष्टाभिरनुभावितः धृतिगर्वामर्षादि संचारिभिः परिपुष्टस्तद्गत उत्साहो वीररसतां प्रतिपद्यते ।

सैन्यानां पादाभिघातैरुत्पतितायां समरभूरजः परम्परिकायां तदसहि

ष्णुत्वं हेतुत्वेनोत्प्रक्ष्यते , तेन तेषां समरसंरम्भो व्यज्यते ।

द्रोणबाहुलीला दर्शनाय गगनदेशे त्रिदश किन्नरयक्षसिद्धानां स्थित्या तद्गतमौत्सुक्यं ध्वन्यते ।

वीराणां नभोभुवि प्रसृमरेषु बाणेषु पन्नगरूपकेण जीवाकर्षण-विषादिग्धत्व तत्राक्षमुखत्व विनतातनयनिबद्धस्पर्धत्व प्रतिपादकश्लिष्ट विशेषणा संपादित सांग्रुत्वेन बाणानां भयावहत्वं ध्वन्यते ।

द्रोणे स्वकार्मुकं बलयीकुर्वति सति वैरिघन्वियूनां चापदण्डा एव घृतजीवा अदृश्यन्त , नतु ते तथा इति परिसंख्यया द्रोणक्रुद्धस्याऽति भयावहत्वं - द्योत्यते । एवं तत्कृतानि वैरिणां शिरांस्यधः पेतुः कबन्धानि च ननृतुरित्य - द्रोणेन ऊर्ध्वस्थित्युचितानां शिरसामधः करणावर्णनात् अधः स्थित्युचितानां कबन्धानां चोर्ध्वकरणवर्णनात् निष्पन्नेन विषमालंकारद्वयेन सह विधातृसृष्टि-वैपरीत्यकर्तृत्वं द्रोण उत्प्रेक्ष्यमाणं तत्कृत विनाशलीलाया विस्तारं कथयति ।

युधिष्ठिरं निगृह्णतोद्रोणस्य चन्द्रं जिघृक्षुणा सैंहिकेयेनोपमया तस्य-बलातिशयो ध्वन्यते । द्रोणमल्लेः सह दूरमपसारान् क्षितिपरदिगणो भीमादीन् विलोक्य माधवमाव्यमानतुरङ्गेण शतह्रदेनाऽऽगतोऽर्जुनो नगेन्द्रो नदीप्रवाहमिव द्रोणमुपरुरोधेत्यत्र सहोक्त्या भीमादीनां विवशत्वं प्रतीयते , उपमया चार्जुनस्य सामर्थ्यातिशयो द्योत्यते ।

शिवेन सह युद्धं कृतवतो द्रोणेन सह युद्धेऽपि अर्जुनस्येच्छाऽपूर्त्ति इत्यत्र परिमाणपात्रत्व विशेषण वाचकशिवद्रोणाश्रुद्वगतश्लेषमूलकाभेदातिशयोक्त्यनु प्राणितोऽर्थान्तरन्यासोऽर्जुनस्य महद्भिः सहयुद्धे रुच्यतिशयो ध्वन्यते ।

द्रोणं रुन्धतो जुनस्य द्रोणालम्बनकोद्रोणपराक्रमोद्दीपितो जुनचेष्टाभिः शरवर्षणादिभिरनुभावितस्तद्गतैश्च धृतिमतिगर्वामर्षादिभावैः परिपोषितस्तदुत्साहो वीररसतामश्नुते ।

अर्जुन निवर्तितस्य द्रोणस्य स्वसहचरयोधैः सह विरोधिवीरोन्मुखं-प्रति स्वतूणीरमात्रस्य विधानेन तत्पृष्ठदेशप्रदर्शनस्य प्रतीत्या पर्यायोक्तम्, तेन द्रोणस्य पराजितत्वं , चरमगिरिकटकसीमानमासीदतश्चण्डभानोरुपमया द्रोण

स्य बलातिशय सम्पन्नत्वेऽपि विजयपराक्रमेण विवशता च ध्वन्यते

अन्येद्युर्द्रोणेन प्रेरित दुर्योधनवचनानुसारं त्रिगर्तभूपैरन्यत्र युद्धायाऽऽहूते विजये गते युद्धागतानां निर्भीकानां धार्तराष्ट्राणां दावज्वाल शून्यं वनं प्रविशद्भिश्चमरमृगैः सहोपमया निःसारत्वं चोक्त्यते ।

द्रोणकृते सत्यजिद्वधे तच्छ्रवसा सहभुवि युधिष्ठिराङ्गणिपेतुरितिसहोक्त्या युधिष्ठिरस्य सत्यजिति स्नेहातिशयः तेन तच्छ्रवणादश्च ध्वन्यते ।

युधिष्ठिरराज्ञे सत्यजिति पतिते द्रोणे च तदुपकण्ठमागते तत्प्राणा अपि तथा उपकण्ठमागता इत्यत्र उपकण्ठ शब्दगतश्लेषमूलकाभेदातिशयोक्ति निष्पादितसाधर्म्य मूलिकयोपमया युधिष्ठिरस्य भीतभीतत्व ध्वन्यते ।

द्वैषसैन्यजलधिकवलनेन स्वकीय कुम्भयोनित्वकीर्तिं स्पष्टी कर्तुं द्रोणे कुतुकवति सतितत्पार्श्वमेत्य भीमादयस्तद्रथ्य सारथि केतुदण्डकोदण्डान् प्रमथ्नन्नित्यत्र भीमादिकर्तृक रथ्यादि कर्मक मन्थनादिक्रियाणां समुच्चयः, द्वैषसेनायां जलधिरूपकम्, कुम्भयोनिशब्दगत द्रोणागस्त्यश्लेषमूलकाऽभेदातिशयोक्तिः, कवलनेन द्वैषसेनाजलधे विनाशातिशय प्रतीत्या अत्यन्ततिरस्कृतवाच्यो लक्षणामूलो ध्वनिश्च ।

भीमादिकृत द्रोणपराभवकुपित भगदत्त विस्तारितानां हास्तिकानां-कर्णतालवाते चक्रवात परिणमनकर्तृत्वस्य तद्घण्टारणिते अष्टलोकपालबधिरीकरणकर्तृत्वस्य चासम्बन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिद्वयम्, समरसागररूपकम्,-तदीयशुण्डादण्डेषु - गगनमण्डप सन्धिबन्धस्थिरीकरणदवेन्द्रनीलस्तम्भोत्प्रेक्षा च ।

घोर सुप्रतीकगजाभियानदूरापसृतद्विषत्कुलानां परशुरामस्य परशु-विपाटन दूरापसृतपश्चिमपयोधिपयोभिरुपमया तेषां भीतिर्ध्वन्यते ।

वैरिणगजकदम्बकेषु केत्वादि कर्मक पातनादिक्रियाणां वर्णनात् - समुच्चयः, भीमेन तेषु गजकदम्बकेषु गदया हतेषु सत्सु सुप्रतीको महागज एकाकी एवातिष्ठदितिवार्तायां विभिद्यगदया भीमो द्विपान् विद्विषां व्रंग्रर्माङ्गणे रक्तवारिलहरी संलक्ष्यमाणस्वकच्छायामात्रसहायमेव विदधे तं सुप्रतीकं क्षणात् - इति रूपान्तरेण वर्णनात् पर्यायोक्तम्, तेन भीमस्य पराक्रमातिशयो ध्वन्यते ।

स्वपादाग्रहस्तरदनप्रतिघातलीलाभग्नारिरक्तमसृणस्य सुप्रतीकगजस्य च प्रक्रीडायां गिरिगैरिक कर्दनलिप्तत्वोत्प्रेक्षाया तस्याऽतिक्रूरत्वं घोरत्वं सधोभारकत्वं च ध्वन्यते ।

तादृशं तं सुप्रतीकगजं वीक्ष्य भीमोऽपि भयात् पलायित इति वार्तायाः "चकितहृदयवृत्तेः संगरेवायुसूनोः जनिकगुणसमृद्धिर्जघ्नयोराविरासीत्" इति प्रकारान्तरेण वर्णनात् पर्यायोक्तम्, तेन भीमस्य कालोचित कर्तव्य प्रतिमानवत्वं तदनुसारिकरणपाटवं च ध्वन्येते ।

सुप्रतीकगजदुःखितस्वध्वजिनीकोलाहलाकर्णनाकुलितमानसोऽर्जुनः तत्रागमनायवेगवतिस्वरथे संशप्तकगणदूरनिरासप्रयुक्तवायव्यास्त्रवेगार्थं वितरणोत्प्रेक्षाया तदागमनशैघ्र्यातिशयो ध्वन्यते ।

पार्थस्य मनोरथं च भक्तुंमदावलेन्द्रस्य करे प्रवृत्ते शौरिणातद्रथे द्रागन्यत्रनीते तत्करप्रहारो विफलोऽभूदित्यत्र पार्थमनोरथयोरेकभङ्गनक्रिययायोगात् तुल्ययोगिता, दन्तावलेन्द्रमनोरथस्य च भङ्गाद् विषादनालंकारश्च ।

पार्थेरभंगदत्त प्रहितशक्तेर्भङ्गस्य तत्प्रस्थान कालिकनागदर्शनरूपाऽपशकुनेन समर्थनात् अर्थान्तरन्यासः, तत्र सर्पगजोभयवाचक नागशब्दगतश्लेषस्यांगता ।

पार्थाय भगदत्तेन प्रहितं वैष्णवास्त्रं भगवान् पार्थं स्वव्यहित्वं विधाय स्ववक्षसि वनमालावत् धारितवान्, इति वार्तायां "तदस्त्रं मुकुन्दो वक्षसि-स्वीये वनमालासहवासि चकारेति प्रकारान्तरेण वर्णनात् पर्यायोक्तम्, तेन च-भगवतोऽर्जुन विषयकोऽसीम प्रेमाभिव्यज्यते ।

कुलाचलादपि पीवरो रातेः करेणुः सुप्रतीकः, इत्यत्र करेणोपीवरत्वाधिक्यवर्णनात् व्यतिरेकालंकारः, फल्गुनमन्त्याद्ययोगशून्यं चिकीर्षुं तमरातिकरेणुमाद्याद्ययोगशून्यं चकार इत्यत्र इष्टाप्राप्तेरनिष्ट प्राप्तेश्च वर्णनात्-विषादनालंकारः, तत्र फल्गुनं फल्गुमित्यनुक्त्वा अन्त्याद्ययोगशून्यम्, इत्येवं,-करेणुं चरेणुमित्यनुक्त्वा आद्याद्ययोगशून्यम्, इत्येवं प्रकारान्तरेणवर्णनात्--पर्यायोक्तद्वयम्, तत्र च फल्गुन- करेणु-रूपशब्दार्थयोरभेदातिशयोक्तिद्वयमनुप्राणकत्वेनास्ति ।

'पृथिवी गेन्धवती' तिगौतमोक्तेर्मुदसम्बन्धेऽपि तत्कथनात्सम्बन्धाति शयोक्तिः, गौतमस्य तादृगुक्तेर्मोदाधाने च मघवत्सूनुकर्तृकगजमदपङ्कविशेषकगन्धिकाल विशिष्टारालिशीर्षपातनस्य हेतुत्वावगमात् काव्यलिङ्गम्, पाण्डुनन्दनानां सत्य जिन्नाश शोकार्ति त्यागे मत्तदन्तिसहितमगदत्तवधस्य हेतुत्वावगत्याकाव्यलिङ्गम्,- सायंपराभूतस्य द्रोणस्य शिविरं प्रति गमने वर्णने नाम्नासन्ध्यया चाऽरुणः, नाम्ना व्यथया च गुरुः, अत्रोभयत्रारुणगुर्वोः कर्त्रोः क्रमशो नामसन्ध्याभ्यां नामव्य थाभ्यां च द्वाभ्यां करणाभ्यामन्वयात् तुल्ययोगिता, स्फुटैव तत्र सूर्यलोहितवाच कारुणशब्दस्य आचार्यदुर्मर्त्वाच कस्यगुरुशब्दस्य च श्लेषोऽगम् । द्रोणमनो रथस्य तदावासेनोपमायामपि निन्य-पटमण्डपवाचकदूष्यशब्दश्लेषोऽगम् ।

एवं रसभावोपस्कारकत्वेन तत्तद्रस्त्वलंकार व्यञ्जकत्वेन स्वकीयच्छाया-मात्र प्रसारित्वेन चालंकाराणां निवेशोऽत्र रमणीय एव ।

एवं यत्र तत्र समुचितमाधुर्यौजोगुणानुगतयोपात्तानां यथायुक्तमधुरपरु-षान्यतर वर्णव्रातघटितानां छेकवृत्त्यनुप्रासानां प्रयोगोऽपि प्रसादक एव सुमनोज नमनसाम् ।

(४) अभिमन्युवधः

इतः परं द्रोणस्य पद्मव्यूहरचना, तस्मिन्नेकाकिनोऽभिमन्योः प्रवेशः कर्णादिभिर्बहुभिर्महारथैरेकाकिनस्तस्ययुद्धम्, निःशस्त्रत्वेऽपि तस्य बहुभिस्तैर्मिलित्वा कृतो वधश्च वर्णितानि विविच्यन्ते । तद्वर्णनं यथा -

'शिविरमेत्य तदैव सुयोधनः शितशरव्रणमोचितकञ्चुकम् ।
मृदुलमङ्गगतं कलशोद्भवं विरचिताञ्जलिरेवमभाषत ।।'
'महारथ ! त्वं मम वाञ्छितद्वं फलेग्रहिं न प्रतनोषि यस्मात् ।
कृपेति शब्दोऽपि बभूव नूनं ह्रस्वस्त्वयि श्याल इव त्वदीये ।।'
'भगवन् ! त्वमिदं सावधानेन चेतसा स्मरणपथमधिरोपय ।
'पितामहः सोऽपि पृषात्कतल्पे वपुर्निजं माधवमन्तरङ्गम् ।

तवैव हस्ते मम कार्यसिद्धिं कृत्वा हि धाम स्वमियेष गन्तुम् ।।'

'तमेतं दयमानेन समेतं शोकसंपदा ।

ऊचेऽथ गुरुणा तेन नीचेतरगुणाब्धिना ।।'

'बाष्पातिवृष्टावपि पाण्डवानां पाथोरुहव्यूहवितीर्णमोदान् ।

प्रातः श्व एवाखिलधार्तराष्ट्रान् संचारयेयं युधि वाहिनीषु ।।'

'इति गिरा तमाश्वास्य राजानं सदनाय विसृष्टवतो मुहुर्मुहुरर्जुनस्य सव्य साचित्वशैलीमनुचिन्त्य हृदि रणारणिकामनणीयसीं बिभ्राणस्य द्रोणस्य सका शाद्विनिर्गतां निद्रासखीं विचेतुमिव सा निशापि तरसा निरगात् ।।'

'अपरेद्युरसौ वृतो बलौघैरथ भेरीनिनदैर्नभो विभिन्दन् ।

कवची विशिखी रथी शरासी कलशीसूनुरवाप युद्धभूमिम् ।।'

'द्रोणस्य सेनाचलधूलिपाली द्यौणेस्तु नग्नंकरणी बभूव ।

घटाथ तस्याः कटदानपूरैः पटं पुनः संघटयाञ्चकार ।।'

'आश्चर्यस्थूललक्षां तदनु दिविषक्दामन्तरिक्षास्थितानां

द्यौणिन्द्राणां रिपूणामसुमृगहरणे कूटयन्त्रायमाणम् ।

गन्धर्वैः केसराढ्यैर्मदमधुभिरिभैः केतुपत्रैः शतार्घ्रैः

पद्मव्यूहं व्यतानीत्प्रथनभुवि गुरुः सांयगीनाग्रगण्यः ।।

'समयेऽत्र निशम्य वैरिवृत्तं तपसः सूनुरभाषताभिमन्युम् ।

अयि वत्स ! पिता त्यक्तोऽधुना ते तव भारोऽजनि सर्वसैन्यरक्षा ।।

'कवचं प्रतिमुञ्च धत्स्व चापं भज धैर्यं परितो विधेहि योधान् ।

अधिरोह शतार्घ्रमाविश त्वं कमलव्यूहमरीन्निषूदयस्व ।।'

'इति राज्ञो निदेशं मौलिदेशे निवेश्य योद्धुं प्रतिष्ठमाने जयनिःसाणभेरी पटहपणवाद्यैर्वाद्यैर्गगनशायिने गुणाय सौखशायनिकायमाने लीलयाकमलव्यूहमवगाह्य बालेऽपि स्वयमेकाकिनि निर्कोदण्डखण्डिमसंपदा कौरवचमूं द्रोमयमाणे तस्मिन्सौभद्रेयेसिन्धुपतिर्व्यूहमुखं पिधाय स्मरहरवरलाभदर्पेण तदनुधाविनीं पाण्डव वाहिनीं क्रुधा रुरुधे ।।'

'उद्यद्भिर्युद्धरङ्गादपि सुरवनितापुष्पवर्षात्पतद्भि-

वैगाल्लग्नैः परागैर्दृढतरघटिते चक्षुषां पक्ष्मयुग्मे ।
स्थित्वा मध्येन्तरिक्षं विजयसुतभुजागर्वलीलायितानि
द्रष्टॄणां खेचराणां मृशमनिमिषता तत्क्षणं मंगुरासीत् ।।

शरशायितैर्द्विरदशैलमण्डलैर्विपुलैर्विधाय विषमां वसुंधराम् ।
पृथुचक्रवर्तिपृथुयत्नवैभवं वितथीचकार विजयस्य नन्दनः ।।

पार्थात्मजो मानुसुतस्य सामि भित्त्वा शतांगं शितमल्लवृष्ट्या ।
पितामहोक्तं कुरुवीरगोष्ठ्यां तथ्यं चकारार्धरथत्वमस्य ।।

अथाभिमन्युर्घृतभूरिमन्युद्रौणिं तदीर्ष्यास्मितकान्तिलक्ष्यात् ।
बाल्ये निपीतानपि पिष्टसारानुग्रैः शरैरुद्भमयांचकार ।।

सुतस्य शौर्यात्सुरराजसूनोरुदीर्णदिग्भ्रान्तिरुदारधीतिः ।
कृपस्वसुर्मूर्छलतन्तुनैव साकं चकम्पे स गुरुर्मुहूर्तम् ।।

विशिखं मुमुक्षुमथ गौतमात्मजे
विबुधेन्द्रपौत्रमभिवीक्ष्य भीषणम् ।
जनने विपक्षेपि जना रणाजिरे
शर एव हेतुरिति तस्य मेनिरे ।।

आश्चर्यकर्मसु कृतेष्वपि हर्षभारा-
न्मोक्तुं मुहुर्मुहुरमुष्य शिरोजबन्धे ।
दृष्टास्तदा सुमनसो दिवि कर्तृभूता
नाकेन्द्रनन्दनवने न तु कर्मभूताः ।।

अमुष्य कोदण्डमखण्डयद्रवेः सुतो रथाश्वान्प्रममाथ कुम्भजः ।
कृपः कृणात्ति स्म जवेन सारथिं व्यपाटयत्केतुपटं गुरोः सुतः ।।

एकाकिनः परिभवाय बहून्प्रवृत्ता-
नेतानवेक्ष्य निखिलोऽपि निलिम्पवर्गः ।
मन्दारशाखिकुसुमानि यथाभिमन्यौ
निन्दाखान्निषु तस्य तथाभ्यवर्षत् ।।

रथादवप्लुत्य गदासखस्तदा विदार्य बालो विजयात्मसंभवः ।
चकार मन्दाक्षभृतो न केवलं रथानमीषां युधि तानपि क्षणात् ।।

"बालौ ततः कृतरणौ धृतराष्ट्रपौत्रौ
भीरू पृथग्गमनकर्मणि मन्यमानः ।
पार्थात्मजः स तु परस्परसाह्यवन्तौ
चक्रे कृतान्तपुरवर्त्मनि गन्तुमुग्रे ।।"

"अथ कर्णमुखा महारथास्ते मिलिताः कैतवमेत्य योगपद्यात् ।
सुरनायकपौत्रमेनमस्त्रैः स्वयशोभिः सह पातयाञ्चभूवुः ।। १०।३१-३२ ।।

"तदनु सेनयोस्तयोः क्वेलितरुदिते अपि स्पर्धाजनितया परस्परविजिगीषुतयेव व्योमसीमानमुदलङ्घयताम् ।।"

"तदानीं नियमवृद्धपरिषद्दूर्ध्वविक्षिप्तकरपुटजलाञ्जलिदानादिव व्यपया तमहोष्मणि पूषणि तौ द्वावपि बलौघौ निजनिजस्कन्धावारानुसंधानाय निरगच्छताम् ।।" १०।५२। गद्यम् ।।

एवं द्रोणस्य पद्मव्यूहरचना , तस्मिन्नेकाकिनोऽभिमन्योः प्रवेशः, तस्य कर्णादिभिर्बहुभिः सह युद्धम् निःशस्त्रत्वेऽपि तस्य बहुभिस्तैः कृतो वधश्च वर्णितानि कविना कौशलेन विपुलेन ।

तत्र द्रोणं प्रति दुर्योधनप्रार्थनावचने -" हेमहारथ ! त्वं स्वश्याल इव ह्रस्वकृपः , ममवाञ्छितमफलेग्रहित्वानाघायकत्वात्" इत्यनुमानालंकारः कृप-कृपा शब्दार्थयोः श्लेषमूलकाभेदातिशयोक्त्युपमा तु प्राणिता द्रोणस्य शैथिल्यं ध्वनयति । भीष्मस्य स्वस्यवपुषो शरशय्यायामन्तर्ग्रस्यमाधवे दुर्योधनकार्यसिद्धेश्च -- द्रोणहस्ते करणावर्णने आधेयानां माघाराणां चैककरणक्रियया योगात् तुल्ययोगितालंकारो भीष्मस्य कृतकृत्यत्वं द्रोणस्य चावशिष्टकृत्यकरणत्वं ध्वनयति ।

दुर्योधनं प्रति द्रोणोक्ति-वर्णने - द्रोणस्य महोन्नतगुणाब्धित्वेन-वर्णनं दुर्योधनकार्यसम्पादनसामर्थ्यं ध्वनयति । पाण्डवानां बाष्पातिवृष्टौ सत्यामपि धार्तराष्ट्रान् पाथोरुहव्यूहमुदितान् वाहिनीषु संवाहिनियिष्या-- मीति द्रोणवचने धृतराष्ट्रसुतनीलहंसोभयवाचकधार्तराष्ट्रशब्द- सैन्यविन्यास विशेषसमूहोभयवाचकव्यूह शब्द- सेना सरिदुभयवाचक वाहिनी शब्दश्लेष मूलकाऽभेदातिशयोक्त्यनुप्राणिता अतिवृष्टिरूपकारणसत्वेऽपि पाथोरुहनाशेन सरित्सुमु

क्षितनीलहंससंचरणाऽभाव रूपकार्यस्यानुत्पत्या विशेषोक्तिद्रौणस्य समरसाद्यर्य-चातुर्यातिशयं ध्वनयति ।

द्रोणस्य जाग्रत एव निशाव्यगमत् इति वर्णने निशानिर्गमने द्रोणसकाशनिर्गत तन्निद्रासखीविचयनफलकत्वोत्प्रेक्षा द्रोणगतं तज्जागरणाऽनुभावितभावेगभावं ध्वनयति ।

क्वचे द्रोणस्य भेरीनिनदकरणाकनभोविभेदनकर्तृत्वाऽसंबन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः । सा कवचादिधारणं च तस्य रणोत्साहं व्यनक्ति ।

द्रोणसैन्यचरणोत्थधूलीपटल्याः समुद्रशोषणस्य द्रोणिनग्नकरणत्व रूपप्रकारान्तरेण, गजघटायाश्च स्वकटदानपूरैः शुष्कसमुद्रस्य पुनः सरसत्वकरणस्य द्रोणिप्राच्छादनरूपप्रकारान्तरेण वर्णनात् पर्यायोक्तद्वयम्, तच्च सेनाचलधूलीपटल्यां द्रोणिनग्नकरणात्वस्य गजघटायाश्च स्वकटदानकरणकद्रोणिप्राच्छादकत्वाऽसम्बन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्त्योः क्रमशोऽनुप्राणकम्, तस्यचक्वच नग्नीकृतायाः द्रोणेः पुनः समाच्छादितत्ववर्णनात् सम्पन्ने पूर्वरूपा(८१) लंकारेऽन्तर्गता , संकरेण चानेन द्रोणसैन्यस्य दुर्धर्षत्वं द्योत्यते ।

द्रोणरचिते सर्वतोभद्रव्यूहे केसरमकरन्दपत्रायुतस्य पाथोरुहसमूहारोपात्सावयवश्लिष्टरूपकम्, प्रत्यर्थिजनप्राणहरिणाहरणाकटयन्त्रोपमा, दिविषदाश्चर्यस्थूललदारूपकं च तस्याऽद्भुतत्वं प्रत्यायति ।

कमलव्यूहप्रवेशरिपुसैन्यसूदनादिपराक्रमचेष्टितैरनुभावितः धृतिमतिगर्वामर्षादिसंचारिभावैः पोषितो द्विषद्भूपालम्बनकस्तच्चेष्टोद्दीपितोऽभिमन्योर्रणोत्साहो वीररसतया चमत्कुर्वन्नास्वाद्यतेतराम् ।

विजयसुतभुजगर्वलीलायितानि पश्यतां मध्येन्तरिक्षं स्थितानां खेचराणां नयनाऽनिमिषतायां युद्धश्रमोद्भवैः सुखनितापुष्पसमूहव्यतिकरैश्च परागैर्भृगुत्वाऽसम्बन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः ।

विजयनन्दनशरशायितैर्द्विरदशैलमण्डलैर्वसुधाया विषमीकरणस्य पृथु-

---

१ पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् । १४२। कुवलयानन्दे ।।

चक्रवर्तिपृथुयत्नवैभवविधीकरणे हेतुतावगत्याकाव्यलिङ्गम्, तस्मिंश्च सकल वसुधाया विषमीकृतत्वाभावेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिरङ्गम्, तेनरिपुगजबलस्य विनाशातिशयोक्त्यते ।

पार्थात्मजकृत कर्णरथसाभिभेदनस्य कुरुवीरगोष्ठ्यां भीष्मोक्त तदीयार्घरथत्वस्फुटीकरणे हेतुत्वावगत्या काव्यलिङ्गम्, तस्मिंश्चार्घरथशब्दगतश्लेषमूलका भेदातिशयोक्तिरङ्गता ।

अभिमन्युशरवर्षेण सैन्यस्याऽश्वत्थाम्नः स्मितकान्तौ तदपह्नवपूर्वक-बाल्यकालिक-मातृपायितोद्भ्रान्तपिष्टसमारोपाद् अपह्नुतिः तयाऽभिमन्युपराक्रमस्य पराकाष्ठा प्राप्तत्वं ध्वन्यते ।

सुरराजसुतसूनु शौर्यादुदितदिग्भ्रमो भीतश्च द्रोणः स्वपत्न्या मद्रसुतेन सह चकम्पे इत्यत्र सहोक्त्या दिग्भ्रमस्य भीतत्वे तस्य च कम्पे हेतुत्वावगत्या सम्पन्नेन काव्यलिङ्गेन च स्वमृत्युविषयक शङ्कभावो ध्वन्यते ।

कृपेषीक्षणविशिक्षमुक्तमभिमन्युं वीक्ष्य जनाः कृपस्य जनने विपदि च शरमेव हेतुं संभावयामासुः, अत्र कृपसम्बन्धिजननविपदोरेकेन शर हेतुकत्वेन योगात्-तुल्ययोगिता मुञ्जानोभयवाचकशर शब्दगतश्लेषोज्जीविता तदुपस्कृतवाक्यार्थेन बाणस्य कृपाऽसुहरणसामर्थ्यं ध्वनयति ।

आश्चर्यकर्माणि कृतवतोऽभिमन्योः शिरोजबन्धोपरिवर्षण-कर्तारः-सुमनसोदिवि ददृशिरे, न तु वर्षणकर्मभूतास्तु नन्दनवने । अत्र दर्शनस्य एकत्रस्थापनेन अपरत्र व्यपोहनेन परिसंख्या, देव-पुष्पोभयवाचकसुमनस् शब्दगतः श्लेषः, नन्दवने सुमनसां सत्वेऽपि तदभाववर्णनात् असम्बन्धातिशयोक्तिश्च । तद्घटितवाक्यार्थस्य देवानामभिमन्युविषयकानुरागव्यञ्जकत्वम् ।

कर्णादीनां समुदितानामभिमन्यु कोदण्डादिकर्मक खण्डनादिक्रियाणां समुच्चयात् समुच्चयालंकारोऽभिमन्युपराक्रमेण तेषां विवशतां ध्वनयति ।

एकाकिनोऽभिमन्योः परिभवाय प्रवृत्तान् बहून् विलोक्य निलिम्पवर्गोऽभिमन्यौ पुष्पाणि तद्रिपुषु च निन्दा शब्दान् अभ्यवर्षत् । अत्र निलिम्पवर्ग कर्तृकवर्षणक्रिया कर्मताया पुष्पेषु निन्दाशब्देषु चोपलम्भात् तुल्ययोगिता, दे

वानामभिमन्युपराक्रमेण हर्षो तद्रिपुदुष्टतया च ग्लानिर्व्यज्यते ।

रथभंगे ततोऽवतीर्णोऽभिमन्युर्गदया कर्णादीन् तद्रथांश्च मन्दादाभृतश्चक्रे इत्यत्र कर्णादीनां तद्रथानां चैकेन मन्दादाभृत्वेन योगात् तुल्ययोगिता, लज्जा शिथिल चक्रकोभयवाचक मन्दादाशब्दगतश्लेषमूलकतदुभयाभेदातिशयोक्त्युज्जीविता अभिमन्योर्लोकोत्तरपराक्रमित्वं ध्वनयति ।

अभिमन्युः कृतरणोद्धृतराष्ट्रसौत्रावुभावपि मारयामासेत्यत्र उभयोः कृतान्तपुरवर्त्मनिगन्तुं परस्परसाहयविशिष्टकरणे तयोर्भीरुत्व ज्ञानं हेतुत्वेनाभिमन्युगतमुत्प्रेक्ष्यते वाचकाभावात् प्रतीयमानोत्प्रेक्षा ।

कर्णमुखानां मिलितानां महारथानामस्त्राणि सुरनायकपौत्रं कर्णादि यशोभिः सहपातयामासुरत्रसहोक्तितेषां निन्द्यत्वमभिव्यनक्ति ।

अभिमन्युपातेन तत्सैन्यरुदितानां तद्रिपुसैन्यध्वेतानां च व्योमसीमोल्लंघने तयोर्विजिगीषुता हेतुत्वेनोत्प्रेक्ष्यते , तेन उभयेषामपि तेषां क्रमशो महती हानिः सफलता च जाता ध्वन्यते ।

एवं स्वचमत्कृतिमात्र विश्रान्तत्वेन रसभावाद्युपस्कारकत्वेन वस्त्वलंकार व्यञ्जकत्वेन च कृतोऽलंकारविन्यासः कवेरुचितर एव जातोऽस्ति ।

तथा वृत्त्यनुप्रासा अपि यत्र तत्र ओजोमाधुर्यादि गुणव्यञ्जनानुगुण्येनोपात्ता रमणीया एव सन्ति ।

(५) जयद्रथवधः

अथाऽभिमन्युवधेनार्जुनस्य शोकाकुलता, आगामिसूर्ये जयद्रथवध प्रतिज्ञा च, द्रोणेन कृतं अर्जुनप्रतिज्ञाभीतजयद्रथस्य रक्षाप्रतिज्ञया श्वासनम् पद्मव्यूहपृष्ठभागेतत्स्थापनं च, अर्जुनस्य पद्मव्यूह प्रवेशस्तत्क्षोभणं च, भीमसात्यकिभ्यां कर्णभूरिश्रवसोर्युद्धम्, भूरिश्रवसः सात्यकिनं निपात्य तद्वक्षसि स्थितस्याऽर्जुनेन कृतं हस्तच्छेदनम्, भीमस्य दुःशासनाष्टनवत्यनुजवधः भीमकर्णयुद्धम्, श्रीकृष्णस्यार्जुनं जयद्रथवधायादिश्य चक्रेण सूर्याच्छादनम्, सूर्यास्तज्ञानेन सम्मुखमागते जयद्रथे अर्जुनस्य

तच्छिरश्छेदनम्, जयद्रथशिरसि पार्थबाणेन नीतस्य सूर्याघ्र्यदानोद्यततत्पितृजलांजलौ पातः, शंभुवरेण + शिरसिशीर्यतस्तस्य निपातश्चेति वर्णितं विविच्यते सम्प्रति । तद्वर्णनं यथा -

" अथ त्रिगर्तानपि तान्दुरग्रैः सहस्रगर्तान्विरचय्य गात्रे ।
विनैव हेतुं व्यथमानचेता बिडौजसोऽपि न्यवृतत्कुमारः ।।"

" बाष्पायते दृष्टियुगं कराग्राच्चापो गलत्यन्तरुदेति तापः ।
फलं किमेतस्य भविष्यतीति विचिन्तयन्याम विवेश राज्ञः ।।"

" तत्राशु नेत्रानथ सर्वबन्धून्निशाम्य पुत्रस्य निशम्य वार्ताम् ।
तापापदेशेन घनंजयस्य चित्तं चुचुम्ब स्वसनामतेजः ।।"

" वीरं तनूजमनुचिन्त्य विलापभाजं
धारालदृष्टियुगलं धरणौ लुठन्तम् ।
वाग्भिश्चिरेण वसुधाधिपसंयुक्तस्तं
विश्वंभरोऽर्जुनमपि व्यदधादशोकम् ।।"

" इन्द्रासजस्तदनु बाहुमुदस्य कोपा-
त्सिन्धूद्वहस्य समरे द्विषतां समक्षम् ।
हैत्यां इव एव यदि तस्य शिरो न कुर्या
तस्यां विशेयमहमित्यकरोत्प्रतिज्ञाम् ।।"

" अथ वृत्तमेतदवकर्ण्य भीरवे वितताव सिन्धुपतये प्रतिश्रुतम् ।
तव गुप्तियुग्ममपि मे मरोऽर्जुनात्समरे श्व इत्यतिगभीरधीर्गुरुः ।।"

" अन्येद्युरवलम्बितप्रथमशिखरिसानौ यानौ स्कन्धावारयुगवसुंधराधिपतियुद्धसन्नाहपैशुन्यलम्पटपटहध्वानतरले सिन्धुराजयुगले शरणागतमरणालंकर्मीणेन पद्मनेत्रेण सौभद्रवधशोकातिरेकपरिगलितबाष्पपूरपंकिले द्वारदेशे समानीतं सौवीरनायकगोपनस्थलदिदृक्षयेव तुंगतरकेतुयुगमधिरूढेन कपिपरिवृढेन परिमण्डितं मानसगरुडन्यक्कबान्धवैः सैन्धवैराहितबन्धनं स्यन्दनमधिरुह्य संक्रन्दननन्दनः समरोचितवेषसंपदविकलेन निजबलेन सह प्रतिष्ठमानो निरुद्धवियत्पथे रथैर्मदबन्धुरैः सिन्धुरैर्विविधगतिनाटकैर्घोटकैः कृतरणासक्तिभिः पत्तिभिर्विरचितपरिपन्थिजनमोहस्यव्यूहस्य पृष्ठभागे जयद्रथं प्रतिष्ठाप्य स्वयमपि पुरोभागं परिष्कुर्वाणस्य द्रोणस्य

चरणयोर्वर्णिताभ्यां प्रणीतप्रणिपातस्तेन दीयमानमार्गविकाशश्चण्डमारुत इव-
घनमण्डलं तमेव व्यूहं द्राणादेव द्राभयामास ।।'

'तदनन्तरम्,-

'संशप्तकासुरपलायनवेगभङ्गीं
तत्तादृशीमभिनयन्निव शौरिपुत्रः ।
वेगेन विस्मयकरेण विरोधिसैन्ये
विष्वक्चचार विजयस्य शतार्धुवर्यः ।।'

'तत्र निहुतदिनेश्वरदीप्तौ जृम्भिते तमसि धूलिमिषेण ।
खिद्यते स्म युधि पाण्डवसेना हृष्यति स्म सहसा कुरुसेना ।।'

'गाण्डीवमेतेन मुहुर्विकृष्टं ह्रस्वं च दीर्घं च बभूव युद्धे ।
तुलामिवर्णेन तदाधिरोढुं स्वनामधेयस्थितिशालिनेव ।।'

'अस्तं गतश्चेदरविन्दबन्धुर्वन्ध्या भवेत्सापि मदीयसंधा ।
इतीव संक्रन्दननन्दनोऽसौ तदीयमार्गं रुरुधे शरौघैः ।।'

'मृत्संगतेनौष्ठपुटेन भूमुक्संबन्धितां स्पष्टमिव ब्रुवाणैः ।
धनंजयोऽसौ शितभल्लकृत्तैः शिरोभिराच्छादयति स्म धात्रीम् ।।'

'वृकं कङ्ककुलामिषं घृतविपल्लिं कलिं पुन-
र्भोजं भाजनमापदां यमपुरीसीमारुधं मागधम् ।
चोलं दुःखनिचोलचित्तमिषुभिः कुर्वन्सुपर्वाधिपू-
पुत्रस्तत्र दिनावसानसमये रुन्धे स्म सिन्धूद्भवम् ।।'

'तत्रान्तरे,-

'भूपस्तूतपमानधीर्मयपराज्जिज्ञासुरिन्द्रात्मभू-
वार्तां सात्यकिमारुती रिपुचमूव्यूहं प्रति प्राहिणोत् ।
तौ जित्वा गुरुमात्तसिंहनिनदौ संवीक्य भूरिश्रवा
राधेयश्च हठात्ततो रुरुधतुः संक्षोभयन्तौ कुरून् ।।'

'अथ सोमदत्ततनुजौ रमापतेरनुजोऽपि भग्नरथभूतकार्मुकौ ।
परिगृह्य पट्टसलतां परस्परं प्रथनं भयंकरमुभौ वितेनतुः ।।'

'अथ शिनितनयं निपात्य भूम्यामुरसि धृतासिरसौ तु सोमदत्तिः ।
गलयितुमिव गर्वसारमन्तर्निजचरणेन निपीड्यञ्चकार ।।'

'तदा हरिर्दूरगतोऽपि नादां व्यापारयामास रथेऽर्जुनस्य ।
निजानुजातोरसि दत्तपादे भूरिश्रवस्येव महारथेऽस्मिन् ।।'

'चोदितस्य हरिणा किरीटिनो मार्गणेन हृतहस्तपल्लवः ।
सोमदत्ततनयो न केवलं कौरवा अपि विहस्ततां ययुः ।।'

'भूरिश्रवास्तदनु पुत्रमृतुं बलारे-
र्भूयो विगर्ह्य पुरुषोत्तमसंनिधाने ।
आचम्य पावनमसौ कुशमेकमन्त्य-
मास्तीर्य युद्धभुवि तत्र शयालुरासीत् ।।'

'तदनु हिडिम्बवैरी विननायकतनयसाहाय्यकेन भयानकसायकनिकायवर्षिणाममर्षिणां दर्पेण गरीयसां दुःशासनयवीयसां विसरमुज्जासयितुं विदलितविमतमदां निजगदामष्टाभिः काष्ठाभिः सह भ्रमयञ्चकार ।।'

'गान्धारराजजठरासीन्धि पुराश्मदतां
दत्त्वा दशां युधि गदा पवमानसूनोः ।
दुःशासनानुजकुलाय हि योगपद्या-
च्चक्रे मिथोऽष्टवतिं त्रिदशीस्तु यातृः ।।'

'विहयं विरथं विसारथिं विशरासं विपताकिकापटम् ।
विशिखेन विवस्वतः सुतं विदधातिस्म वृकोदरः क्षणात् ।।'

'अथान्यमास्थाय रथं क्षणेन कर्णः कुरूणां धुरिकार्मुकस्य ।
पूर्वं गुणेनाशुजातमेकं पश्चादटन्याशुपरं निरास्थत् ।।'

'मारुतिस्तदनु सोमदत्तभूपादपांशुपरिधूसरोरसा ।
कंसमर्दनकनीयसा समं शक्रनन्दनसमीपमापतत् सः ।।'

'तदनु दनुजपरिपन्थिनि श्रीकृष्णो निजशरपुङ्खेन कुरुकुञ्जरान् भञ्जयन्तं धनञ्जयं तं सुतवधेन कृतमन्तुं रिपुं निहन्तुमादिश्य दलितदैत्यचक्रेणानिजचक्रेण चण्डकरमण्डलमपिदधाने गभस्तिमानस्तमहास्तेति समस्तनिजबलकोलाहलमाकर्ण्य दुःशलाजानि-

मुदा निजवदनमुदासयत् ।।'

'तदा प्रकाशस्य दिवाकरस्य तिरोहितस्यापि जयद्रथस्य ।
अदर्शनायापि च दर्शनाय सुदर्शनं हेतुरभून्मुरारेः ।।'

'सकलमपि जगन्ति चक्षुर्थं सवितुरदर्शनतः सखेदमाहुः ।
समरभुवि कथं नु शौरिचक्रं तपनतिरोभवनं तदाचकांक्षो ।।'

'तावत्किरीटी तरुणेन्दुमौलेर्वदान्यताकीर्तिवदावदेन ।
शरेण शत्रोरलुनीत शीर्षं साकं प्रमोदेन स कौरवाणाम् ।।'

'वृद्धक्षत्राञ्जलौ सायं नालमध्यर्य कं घृतम् ।
इतीव कं सिन्धुभर्तुर्जिष्णुस्तस्मिन्नपातयत् ।।'

'एतत्किमित्ययमपास्य सुतस्य शीर्षं
शीर्यन्स्वमूर्धनि वरेण शशाङ्कमौलेः ।
क्रोष्यामवाङ्मुखतया निपपात वेगा-
दाघ्रातुकाम इव तत्सुतवत्सलत्वात् ।।' १०।५३-७६।।

एवमर्जुनस्याभिमन्युवधेन शोकाकुलता आगामिन्नि सूर्यजयद्रथवधप्रतिज्ञा च द्रोणेन कृतमर्जुनप्रतिज्ञामीतजयद्रथस्य तद्रक्षाप्रतिज्ञया श्वासनम् पद्मव्यूहपृष्ठभागेत त्स्थापनं च, अर्जुनस्य पद्मव्यूह प्रवेशस्तत्दारोमणं च, भीमसात्यकिभ्यां कर्णभूरिश्रव सोर्युद्धम्, भूरिश्रवसः सात्यकिनं निपात्य तद्रक्षासिस्थितस्यार्जुनेन कृतं हस्तच्छेदनम्, भीमस्य दुःशासनाष्टनवत्यनुजवधः, भीमकर्णयुद्धम्, श्रीकृष्णस्यार्जुनं जयद्रथवधाया दिश्य चक्रेण सूर्याच्छादनम्, सूर्यास्तज्ञानेन सम्मुखमागते जयद्रथे जुनस्य तच्छिरश्छेद नम्, जयद्रथशिरसः पार्थबाणेन भीतस्य सूर्यार्घ्यदानोद्यततत्पितृजलाञ्जलौ पातः,- शंभुवरेण शिरसिशीर्यतस्तस्य भूविनिपातश्चेति वर्णितं कविना कौशलेन ।

तत्र त्रिगर्तानपि सहभ्रगर्तान् विरचय्य विनैव हेतुं व्यथमानचेनाः शक्रसूनु स्ततोन्यवृतत्- इत्यत्र त्रिगर्तत्वसहभ्रगर्तत्वयोर्विरुद्धयोः सामानाधिकरण्याद्वि रोधोऽर्थान्तरज्ञानेन तन्निवृत्या आभासरूपः, हेतुं विनाऽपि तच्चेतसो व्यथित-त्व वर्णनाद् विभावना च । अर्जुनस्य दृष्टिबाष्पायमाणत्व चापपतन-श्रवान्तता पोदयानां समुच्चयः तेन शंकाभावध्वनिः, सर्वबन्धुसाश्रुनेत्रत्वदर्शनेन पुत्रवधवार्तायि-

वर्णेन च धनञ्जयस्य चित्तं तापहेतुना नाम्ना स्वमानतेजश्च चुम्ब इत्यत्रापह्नुत्या - अग्नेः प्रकारान्तरेण वर्णनात् पर्यायोक्तेन च अर्जुनगतशोकसंचारिणो विषादस्य ध्वनिः । विलापाश्रुमोचनादिभिरनुभावैरर्जुनगतशोकस्य परिपुष्यन् करुणरसतां-प्रतिपद्यते ।

भगवतो युधिष्ठिरस्य च सान्त्ववचनैर्विशोकयार्जुनस्याऽऽगामिन्येवसूर्ये जयद्रथवध प्रतिज्ञया उग्रतामावो ध्वन्यते ।

अर्जुनतादृक्प्रतिज्ञाश्रवणभयेन जयद्रथगत आवेगो द्रोणस्य च रक्षणप्रतिज्ञया तदाश्वासनेन धृतिभावो ध्वन्यते ।

अन्येद्युर्युद्धसन्नाहलम्पटपटहध्वानतरलितत्वस्य सिन्धुराजयुगलेन योगवर्णनाद् दीपकम् जयद्रथसमुद्रोभयवाचक सिन्धुराजशब्दगतश्लेषमूलकम् , पटहध्वानेन-समुद्रस्य तरलित्वासम्बन्धेऽपि तत्सम्बन्धकथनात् सम्बन्धातिशयोक्तिरपि तद्ध्वनम्, संक्षोभेणायुद्धस्य भीषणत्वातिशयो जयद्रथस्यावेगातिशयश्च ध्वन्येते ।

अर्जुनरथतुरगयुतकेतुपताकापटोल्लिखितकपिपरिवृढस्य तुरगरश्मेः शौवीरनामक-गोपनस्थल-दिदृक्षा-हेतुकत्वोत्प्रेक्षाया जयद्रथो द्रोणगोपितोऽपि गुप्तो नस्थास्यतीति विशेषोक्तिर्ध्वन्यते । अर्जुनरथतुरगाणां मानसमार्गणाद्युपमया मालारूपया गतिवेगातिशयो ध्वन्यते ।

अर्जुनस्य पद्मव्यूहप्रवेशबाणवर्षणादिभिस्तत्क्षोभणादिनाऽनुभावितो धृत्यमर्षादि संचारिभावैश्च पोषितस्तदुत्साहो वीररसतां प्रतिपद्यते । तत्रार्जुन पद्मव्यूहो: क्रमशश्चण्डमारुत-मेघमण्डलोपमाभ्यां तयोर्भीष्मपराक्रमत्वं तृणसारत्वं च ध्वन्येते । अर्जुनरथस्य संशप्तकासुरपलायनप्रक्रियाभिनयनकर्तृत्वोत्प्रेक्षाया वेगातिशय सम्पन्नत्वं द्योत्यते ।

धूलिमिषेणातमसादिनेश्वरदीप्तावच्छादितायां पाण्डवसेनाखेदेन तद्गतो विषादः कौरवसेना समुल्लासेन च तद्गतो हर्षो ध्वन्यते । तत्रापह्नुतेरुपस्कारकता ।

तदा गाण्डिवस्यार्जुनकृष्टस्य युधि मुहुर्ह्रस्वदीर्घभावेन स्वनाम गाण्डीव शब्दगतैकारवर्णस्य पर्यायह्रस्वदीर्घतापन्नस्यानुकरणोत्प्रेक्षाया तच्चापव्यापारस्य-

लाघवं ध्वन्यते ।

गाण्डीवमुक्तशितभल्लकृतानां भूलुठितानां भू भूक्षिरसां मृत्संगतोष्ठपुटत्वे तासां भूमुक्सम्बन्धित्वस्य हेतुत्वावगत्या काव्यलिङ्गम्, वाच्योपस्कारकम् ।

पार्थस्य बर्ह्मकलिङ्गादिनृपाणां कृकलासाभिषत्वापादनादि व्यापारसमुच्चयः तत्कृतसिन्धुद्वहरोधे तस्य सामर्थ्यं ध्वनयति ।

युधिष्ठिरस्य पद्मव्यूहप्रविष्टार्जुनवार्ताज्ञानाय भीमसात्यकिप्रेषणेन तद्गतः शक्रावेगभावो ध्वन्येते ।

भीमसात्यकिनोर्द्रोणपराभवनेन कर्णभूरिश्रवसोश्च तयोरोधेन तेषामुत्साहः परस्परालम्बनकः स्वस्वचेष्टाभिः धृतिगर्वामर्षादिसञ्चारिभावैः परिपुष्यन्वीररसतां प्राप्नोति ।

सात्यकिनं भुविनिपात्य स्वचरणेन तद्ग्रीवानिपीड्यतो धृतासेर्भूरिश्रवसो तन्निपीडनव्यापारे सात्यकिस्वान्तगतगर्वसारनिःसारणोत्प्रेक्षाया भूरिश्रवसो बलातिशयसम्पन्नत्वं ध्वन्यते ।

तदा हरिरर्जुनरथे अक्षं न व्यापारयामास, अपितु तादृश्युद्धते महारथे भूरिश्रवस्येव अक्षं व्यापारयामासेत्यत्रव्यापारस्यैकत्र व्यपोहनादपरत्र च स्थापनात् परिसंख्यालंकारः निकटस्थ रथेऽक्षसंचारणाभावस्य दूरस्थमहारथेऽक्षसंचारणस्य चाननुरूपत्वादननुरूपसंसर्गात्मकं विषमद्वयम्, रथावयवदृगुभयवाचकाक्षशब्दगतश्लेषमूलकाऽभेदातिशयोक्त्यनुप्राणितम् हरेः समयोचितकर्तव्यकरणजागरूकत्वं ध्वनयति ।

हरिप्रेरितार्जुनबाणविहस्तत्वस्य भूरिश्रवः कौरवोभयेभ्योयोगात् हस्तरहित- लज्जितोभय-वाचकविहस्तशब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितातुल्ययोगितार्जुनस्य हस्तलाघवातिशयं कौरवाणां च तादृग्लाघवरहितत्वं ध्वनयति।

भीमसेनस्य गदागान्धारीजठरस्थ गर्भसम्बन्धि पाषाणकरणकमन्थनात्मकदशां दुःशासनाष्टनवत्यनुजेभ्यो दत्वा तान् जघानेति वार्तायां तथा कृत्वाऽष्टनवतिन्निदशोः परस्परयातृश्चक्र इति प्रकारान्तरेण कथनात् पर्यायोक्तम्, भीमसेनस्य पौरुषातिशयं व्यनक्ति ।

भगवता चक्रेण सूर्यमण्डले समाच्छादिते मुदास्ववदन प्रकाशेन जयद्रथस्य-हर्षो ध्वन्यते । तत्र प्रकाशमान सूर्यस्य गोपनेन गुप्तस्य च जयद्रथस्य प्रकाशनेन परस्परविरुद्धकार्यकर्तृत्वेन विरोधाभासेन भगवतश्चक्रस्य अद्भुतत्व प्रतीत्या भगवन्माहात्म्यं ध्वन्यते । चक्रव्यूहस्य सवितृदर्शनाभावे खिन्नत्वस्यानुरूपत्वात् समालंकारः, शौरिचक्रस्य सवितृदर्शनाभावाकाङ्क्षाया अननुरूपत्वाद् विषमम्, विषमे चक्रवाक सुदर्शनोभय वाचकचक्र शब्दश्लेषमूलकाभेदातिशयोक्तेरनुप्राणकता, विषममपि शौरिचक्रस्याऽद्भुतकारित्वं द्योतयति ।

किरीटीपाशुपतास्त्रेण जयद्रथशीर्ष कौरवप्रमोदेन साकमलुनीतेति सङ्गोक्तिरूपमातिशयोक्ति मूला कौरवाणामाशुशोकाकुलित्वं ध्वनयति । पाशुपतास्त्रधीतस्य कस्य (जयद्रथशिरसः) सूर्योध्यौधितजयद्रथजनक जलाञ्जलौ पाते कस्य (अञ्जलिगतजलस्य) पर्याप्त घृतत्वाभावो हेतुत्वेनोत्प्रेक्ष्यते , तत्र जलशीर्षोभयवाचक-क- शब्दगतश्लेषमूलकाभेदातिशयोक्तेरनुता, उत्प्रेक्षोपस्कृत तादृग्वाक्यार्थेनार्जुनस्य लोकोत्तरधनुर्विद्याकौशलं ध्वन्यते ।

जयद्रथशिरसि तत्पितुर्वृद्धक्षत्रस्य भुविपतिते सोऽपि शिरसि भिन्नोभुविपपाते त्यत्र सुतवात्सल्य प्रेरिततच्छीर्षाऽऽघ्राण कामना हेतुत्वेनोत्प्रेक्ष्यते ।

एवं क्वचित् स्वच्छायामात्रविश्रान्तत्वेनक्वचित् वाक्यार्थोपस्कारकत्वेन क्वचित् रसभावाद्युपकारकत्वेन क्वचिच्च वस्वलंकारव्यञ्जकत्वेन च विहितोऽलंकार-विन्यासः कामपि चमत्कृतिमातनोत्यति सहृदय हृदयेषु ।

तथा माधुर्योजः प्रसादानुगुण्येनोपात्ता मधुरपरुषप्रसन्नवर्ण घटिता-ऽनेकानुप्रासा वृत्त्यनुप्रासयमकालंकाराश्चापि यत्र तत्र किमपि कामनीयकमेवोर्वरयन्ति ।

(६) घटोत्कच द्रोणवधः

अथ दुर्योधनस्य रात्रौ रणभेरीध्वानोज्जृम्भणम्, पार्थानामपि रण सन्नाहः, तिमिरस्य तत्र युद्धस्य च समुज्जम्भणम्, घटोत्कच युद्धम्, तेन दुर्योधनस्य स्वसर्वनाशभीतिः, कर्णस्य पुरुहूतदत्तशक्त्या घटोत्कचवधः, विराट्द्रुपदभूपयोर्द्रौ

णेन सह युद्धम्, तत्र तयोर्नाशश्च, श्रीकृष्णार्जुनादीनां धृष्टद्युम्नगजघटां पुरोधायक द्रोणाभिमुखगमनम्, भीमस्य रिपुगजनाशनम्, तत्राश्वत्थामनाम्निगजे मृते युधिष्ठिरस्य 'अश्वत्थामामृते' इत्युक्तिश्रवणम्, तेन द्रोणस्य शस्त्रत्यागे धृष्टद्युम्नस्य खड्गेन तच्छिरःकर्तनम्, तच्छ्रुत्वा श्वत्थाम्न आग्नेयास्त्रमोचनम्, अर्जुनस्य ब्रह्मास्त्रेण तच्छमनम्, चेति वर्णितं विविच्यते। तद्वर्णनं तावत् प्रागुपन्यस्यते, यथा -

'अथ तदनस्मिन्वासवसूनौ वासरविरामे शिविरमेत्य यथावृत्तं रणकथांविज्ञाप्य हृषितरोमाणं राजानमुपतिष्ठमाने सुयोधनस्तु क्रोधनतया भगिनीजानिहानिनिदानया सर्वामपि शर्वरीं नियोद्धुकामः सन्गम्भीरयुद्धारम्भभेरीनिर्घोषमुज्जृम्भयामास ।।'

'ते तदा तं समाकर्ण्य समरवैज्ञानिकाः स्मरणमात्रकृतसन्निधानं निशिदशगुणितभुजबलावलम्बं हिडिम्बभागिनेयं पृथक्प्रस्थाप्य स्वयमपि सकलान्यपि निजबलानि संनाह्य संयुगाय युगायतबाहवः शक्रसुतादयो निश्चक्रमुः ।।' १०।७६।गद्यम्

'या तारका मे सततं विरुद्धा तां विभ्रतीमा इति बद्धरोषम् ।
सर्वेन्द्रिये सत्यपि सैनिकानां मार्गं दृशामेव तमो रुरोध ।।'

'शर्वर्याश्चिकुरे मनोजशिखिनो धूमे नभोरण्यभू-
जम्बूशाखिनि पेचकाण्डजदृशामालोकसिद्धाञ्जने ।
चैले कालहलायुधस्य तमसामुज्जृम्भणे तादृशे
प्यहनीवाहवशिल्पमद्भुततमं चक्रुर्जये सैनिकाः ।।'

'प्रवने ऽद्भुते ऽपि निशि नारददृष्टेः प्रथमेतरा व्यलसदीतिरुल्बा ।
वनिता अपि त्रिदशनाथनगर्या वरणाग्रजं चिकुर एव बबन्धुः ।।'

'अमीषु युद्धदिवसेष्वयमेव हि कामुकः ।
रणोत्सवं विमज्यार्धं राज्ञेऽसौ ददौ यतः ।।'

'ततः रणादेव घटोत्कचोऽसौ संग्रामसीमोपरि जृम्भमाणः ।
तमीमिमां सान्द्रतमां तमोभिर्दृष्टाप्रभामिर्दिवसं वितेने ।।'

'तिष्ठ द्रोण ! सुयोधन ! द्रुततरं धावस्व दुःशासन !
त्वां मुञ्चामि किमद्य भीः कृप ! कृपालेशो ऽपि न त्वत्कृते ।

गान्धाराधिप ! का कथा तव रणे दुर्मंधसामग्रणीः ।
कर्णः क्वेति घटोत्कचः कटुरवो व्यभ्राम्यदभ्रान्तरे ।।'

' हैडिम्बेयममुं निजाट्टहसितैः क्षुभ्यद्दृशाशामुखं
दंष्ट्राकूरकरालमाप्तपरशुं दृष्ट्वैव केचिद्भटाः ।
बिभ्युश्चुक्रुशुरामिमीलुरवनौ पेतुर्मुमूर्च्छुर्जहुः
प्राणानारुरुहुर्विमानममरीरौषुः प्रमोदं दधुः ।।'

' नमसि तमभिवीक्ष्य घोररूपं दिशि दिशि तत्र पलायिते नृपौघे ।
मरणसमयमुष्टिलग्नशस्त्रस्तदभिमुखः प्रययौ कबन्ध एकः ।।'

' पितुश्च पुत्रस्य च वैदवाक्यैर्यदुक्तमैकात्म्यमिदं हि दृष्ट्वै ।
भीमात्मजोऽपि स्वयमेव युद्धे भीमो यदासीदरिसैनिकानाम् ।।'

' भिन्दीपालैस्तोमरैः शूलजालैर्वर्षद्भिरुग्रैश्चोभयेषां नृणामाम् ।
दृष्टः क्वापि क्वाप्यदृष्टोऽरिसैन्यं व्योम्नि स्थित्वा नाम्नि शेषं सचक्रे ।।

' स्वं स्वं कार्यं नागमदद्य रात्रौ दुर्योधनस्य ध्वजिनीति मत्वा ।
पितृव्यमक्त्यैव स भीमसूनुस्तत्रैव तस्याः कार्यमाततान ।।'

' तत्रान्तरे,-

' वाहिन्या एव मे नार्धं मेदिन्या अपि नङ्क्ष्यति ।
कर्णं युद्धेऽत्र चेदेष इति मेने सुयोधनः ।।'

' इत्थं नितान्तचिन्तासंतानादितस्य धार्तराष्ट्रस्य संप्रार्थनागुणनिकया संभृतसर्वांभिसारो मिहिरकुमारो वज्रधारया महेन्द्रो महीध्रमिव तेन दत्त्या वलद्या श्वक्षापणदक्षोयमिति चिररक्षितया महत्या शक्त्या वक्षसि निर्भिद्य कर्णेन तं कर्णदाचरं क्षितौ निपातयामास ।।'

' पौत्रस्य तस्य प्रबलस्य शक्तेः प्रहारपीडां प्रतियोधिदत्ताम् ।
अपारयन्द्रष्टुमिवातिघोरामन्तः स्थितो वायुगाद्बहिष्ठात् ।।

' सापि शक्तिरभिहत्य नराशं सांयुगीनजनसंस्तुतशौर्यम् ।
वायुसूनुपरिघादिव भीता वासवस्य सदनं प्रतिपेदे ।।'

' तदानीं तत्र तेषां कौरवकौन्तेयसैन्यानां बाष्पलहरीं निष्पादयितुमौ

दविषादयोरहमहमिकया स्पर्धा समवर्धत ।।`

`अथ जयद्रथघटोत्कचनिधनशोकातिशयगुरून्द्वयानपि कुरूनाश्वासयितुमिव कुलकूटस्थे कुमुदबान्धवे कुलिशायुधदिशमेत्य काशनिकाशैरंशुभिराकाशं सदिशावकाशं विकाशयमाने सति कोपकुटिलीकृतचापो विराट्द्रुपदभूपौ द्रुतमनीचैनाराचैराचार्यं शलभैः शत्यमृगमिव निबद्धतनुमातेनतुः ।।`

`तस्यार्धमग्ना नाराचास्तन्वां तद्विक्रमश्रियः ।
रौचन्ते स्म प्रहृष्यन्त्या रोमाञ्चानामिवाङ्कुराः ।।`

`अग्निदेश्येन निर्दिष्टमथोर्वी द्रोणपार्षतौ ।
कोदण्डविद्यासर्वस्वं तन्वाते स्म प्रकाशितम् ।।`

`ततः शरसंभवभगिनीजानेश्चापचतुर्मुखो वृद्धत्वविश्राणितविकृतवेषयोरपि विशिखविमोचनसृष्टिशिल्पेन विलोभनीयविग्रहीकृतयोर्विराटपार्ष्णिग्राल्योर्वरणोत्सवयोगपथे सति विबुधपुरविलासिनीनां बिडौजसः कुटुम्बिन्या अपि दुःसमाधेयं - विवादमापादयामास ।।`

`अथ तत्र शर्वरीचरभुजगर्वनिर्वापितपर्वतशृङ्गशिलावर्षविपाटितशरीरा संध्यारागमिषेण रुधिरधारामुत्सृजन्ती सा निशापि विनाशदशामाशु विवेश ।`

`तदनु कोककुटुम्बिनीनां नग्नक्करणे महसि समारब्धविहायसि क्रौञ्चनिद्रारोधसाधारणीभवदरुणिमदृक्प्रतिफलनैरायोधनधरणीरुधिरधुनीषु पङ्केरुहाण्यङ्कुरयन्तौ घटोत्कचविराटपार्ष्णिग्राल्यप्रेषितावरमारतया `गुरोरायुर्हेतुमलीकाचारं परिमार्ष्टुमलीकवचनमेकं प्रयुज्यतां भवता` इतिधर्मजातमनुकूलयन्तौ वसुदेववासवकुमारादयः प्रथमसंनिकृष्टस्य धृष्टद्युम्नस्य वरूथिनीं विमार्ष्टीं वारणघोरणीं प्रवेतसमिव पयोधरपरम्परां पुरोधाय भृशं खस्य गुणं शुक्लस्य परिपूरणेन दुर्वहं कुर्वन्तं कौरवसेना पतिमभिजग्मुः ।।`

`कोपेन तावत्कुटिलः स भीमः कुम्भानभीदृङ्गदया गजानाम् ।
नामैकदेशोऽपि च कुम्भयोनेरैतैर्धृतोऽभूदिति मत्सरीव ।।`

`इति तत्र तां कथिटां पाटयता घटोत्कचजनकेन द्रोणसुतस्य सनाम्नि हस्तिनि पातिते सति `प्रचुरतरमदः स्ववशानुवर्ती शुभतरमणिदेदीप्यमानमस्तको

यमश्वत्थामा हतः' इति धर्मतनयगदितं कर्णारुतुदमाकर्ण्य वैवर्ण्यमाप्तव दनं सुतनाशशोकमोहेन परित्यक्तचापशयं स्थण्डिलेशयं भारद्वाजमालोक्य हृष्टतरधी र्धृष्टद्युम्नो निजपितृबन्धन स्मृतिजनुषा रुषा सत्वरमेत्य हन्तुमुदयुक्त ।।'

'एकेन खड्गं द्रुपदस्य सूनुः करेण चान्येन कचं गृहीत्वा ।
विलूय शीर्षं गुरुमप्यसुं द्राग्तत्रोपसन्तं कलयांचकार ।।'

'तत्तादृशं तदनु तातवधं निशम्य
कोपातिरेकविकलुषः कृपभागिनेयः ।
आग्नेयमस्त्रममुचत्परसैनिकाना-
मक्षौहिणी शलभतां लभते स्म तस्मिन् ।।'

'ततः सुराधीश्वरसूनुमुक्तब्रह्मास्त्रभासा भृशधिक्कृतेन ।
अस्त्रेण सार्धं गुरुनन्दनस्य मन्दायमानद्युतिरास भानुः ।।'

'धृतराष्ट्रसुतोऽपि गैहभागा
द्विनदीपाकुरदीनदीनदीप्तिः ।
शकलीकृतबाहुकर्णनासैः
सह योधैः स घटोत्कचाश्मवर्षात् ।।' १०।८०-१००।।'

एवं जयद्रथवधक्रुद्धस्य दुर्योधनस्य रात्रौरणभेरीनिनादोज्जृम्भणम्, युधिष्ठिरादीनामपि रात्रियुद्धाय सन्नाहः, तिमिरस्य समरस्य च रात्रौ समुज्जृम्भणम्, पार्थस्मरणागत-घटोत्कच-युद्धम्, घटोत्कचयुद्धेन दुर्योधनस्य स्व- सर्वनाशभीतिः, कर्णस्य पुरःहूतदत्तशक्त्या घटोत्कचवधः, विराटद्रुपदभूपयोर्द्रोणेन सह युद्धम्, तत्र तयोर्वीरगतिप्राप्तिः, श्रीकृष्णार्जुनादीनां धृष्टद्युम्नगजपंक्ति पुरोधायक द्रोणाभिमुखगमनम्, तत्राश्वत्थामनाम्नि गजे मृते युधिष्ठिरस्य 'अश्वत्थामामृत' इत्युद्घोषणम्, तेन द्रोणस्य शस्त्रत्यागेधृष्टद्युम्नस्य खड्गेन तच्छिरः कर्तनम्, तच्छ्रुत्वाऽश्वत्थाम्न आग्नेयास्त्रमोचनम्, अर्जुनस्य ब्रह्मास्त्रेण तच्छमनम् चेति वर्णितं कविना विपुलेन कौशलेन ।

तत्र भगिनीजानिहानि निदानया क्रोधनतया दुर्योधनस्य सर्वां शर्वरीं योद्धुकामस्यभेरीनिनादोज्जृम्भणेन अमर्षचापल्यभावो तद्गतौ ध्वन्येते ।

भेरीनादश्रवणेन समयानुसारिकर्तव्यस्फूर्तिमतां पार्थानां तत्कालस्मृतोपस्थितस्य निशितदशगुणितभुजबलस्य घटोत्कचस्य पृथक् प्रस्थापनेन सकलानि बलानि संनाह्यस्वयं निष्क्रमणेन शस्त्रास्त्रसंचालनरिपुबलनाशनादिना चानुभावितो धृति-मति-गर्वादिसंचारिभावपरिपोषितस्तद्गत उत्साहो वीररसतामाप्तश्चमत्करोति तरां सुतरां सचेतोजनमनःसु ।

रात्रौ प्रसृतस्यतिमिरस्य वर्णने तस्य लोचनमात्रमार्गरोधने तत्सततस्वरि रुद्धतारकाधारणजन्यरोषहेतुकत्वोत्प्रेक्षा शर्वरीचिकुरत्वादिरूपेण तद्रूपणात्-मालारूपकं च तदुपस्कारकत्वेन रुचिरताम् ।

" अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः प्रत्यासन्नाश्च राजानो षडेताईतयः स्मृताः " इत्यत्र वर्णितासुषडविधास्वीतिषु प्रथमेतरा(द्वितीया)-ईतिरनावृष्टिरूपेव प्रघनेऽद्भुते सत्यपि तिमिरेण नारद दृनिरोधेन अद्भुतयुद्धदर्शन जन्यतदीयहर्षाश्रूणामभावात् व्यलसत् , तिमिरेण युद्धक्षोत्पृष्टदेहानां नववी रसुराणां दर्शनाभावादेव च तद्वरणाप्रसक्त्या त्रिदशवनितावरणाग्रजं चिकुरबन्ध-एव बबन्धुः, इत्युभयत्रापि अद्भुतयुद्धरूपकारणे सत्यपि नारदहर्षरूपस्य त्रिदशवनि तानववीरसुखवरणरूपस्य च कार्यस्याभावात् विशेषोक्तिद्वयम् उभयेषां प्रतिकूल दैवत्वं व्यनक्ति ।

रणोत्सवयुक्तरात्रिधर्मितदिवसस्य कामुकत्वेन रूपेण प्रतीयमानकामिनी भावायैरात्र्यैरणोत्सवार्धभागदानस्य हेतुत्वेनोपन्यासाद् एकदेशविवर्तिहेतुरूपकम् दि वसस्य रणोत्सवव्यसनिवीरवर्गमित्रत्वं ध्वनति ।

घटोत्कचस्य तत्कृत कौरववाहिनी विनाशलीलायाश्चवर्णने कौरवसैन्य तच्चेष्टाविभावितः कौरवसैन्यविद्रावणधारणादिभिरनुभावितः उग्रताऽसूयाऽम र्षादिव्यभिचारिभावैश्च परिपोषितो घटोत्कचगतः क्रोधस्थायिभावो रौद्ररस तां प्रपद्यते । तत्र तस्य स्वदंष्ट्रा प्रभाभिः सान्द्रतमतिमिरायास्तस्यादिवसत्व-विधानेन विरोधाभासो घटोत्कचस्याऽघटनीयघटनाघटीयस्त्वं व्यनक्ति ।

घटोत्कचोग्ररूपविनाशलीलाविभावितो भीतिक्रोशनमूर्च्छनादिचेष्टाभि रनुभावितस्त्रासावेगदैन्यमोहादिव्यभिचारिभावैः परिपोषितो रिपुभटगणगतो

भयस्थायिभावो भयानकरसतामाप्नोति । तत्र भटगणगतभयाक्रोशादिक्रियाणां समुच्चयः तद्गतावेगदैन्यमोहजाड्यमूर्च्छामरणादिभावान् व्यनक्ति । घटोत्कचाभिमुखं मरणसमयधृतशस्त्रमुष्टयेकः कबन्धोययौ, न तु भटाः, इत्यत्राभिमुखगमनक्रियाया: कबन्धे नियमनात् परिसंख्या, घटोत्कचकृतकौरवसैन्यविनाशलीलाताण्डवं च व्यञ्जमानं प्रकटयति। भीमात्मजस्य घटोत्कचस्यापि भीमत्ववर्णनात् भीमसेनभयंकरोभयवाचकभीमशब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितः समालंकारः तद्घटितवाक्यार्थेन वेदोक्तपितृपुत्रैकात्म्यस्योपपादनात् काव्यलिङ्गम् घटोत्कचस्वरूपोपस्कारकम् । व्योमस्थितस्य घटोत्कचस्य दृष्टत्वादृष्टत्ववर्णनाद् विरोधाभासस्तस्य मायावित्वं व्यनक्ति । व्योमस्थितो घटोत्कचो रिपुसैन्यं हतवानित्यस्य नामस्थितं चक्रे, इति प्रकारान्तरेणावर्णनात् पर्यायोक्तम् तस्य विषमस्थितिकारित्वं व्यनक्ति । रिपुसैन्यनाशनैकरणभूतानां भिन्दीपालाद्यायुधानां समुच्चयः सर्वास्त्रशास्त्र संचालन नैपुण्यं द्योतयति । दुर्योधनध्वजिनी दायविधाने घटोत्कचस्य पितृव्य दुर्योधनभक्तिप्रयुक्ततद्रात्रिकालविश्रामार्थमप्राप्तदायसम्पादनेच्छा हेतुत्वेनोत्प्रेक्ष्यते , तत्राऽऽवास प्रत्योमयार्थकदायशब्दगतश्लेषमूलकाऽभेदातिशयोक्तेरनुप्राणकता ।

घटोत्कचकृतविनाशलीलया दुर्योधनस्य वाहिन्या भेदिन्याश्च नाशतर्कणेन शङ्कामावोऽभिव्यज्यते, तत्र वाहिनीभेदिन्योर्नाशरूपक्रियायायोगात् तुल्ययोगिता वाक्यार्थमुपस्करोति । घटोत्कचमीतदुर्योधनस्यतद्घार्थं मुहुः कर्णप्रार्थनया तस्यदैन्यं ध्वन्यते ।

दुर्योधनदैन्यप्रार्थना-घटोत्कचविनाशलीलाविभावितः शक्त्यस्त्रप्रयोगानुभावितो धृतिगर्वौग्र्यत्वादिव्यभिचारिभिर्भावैः परिपोषितो भिहिरकुमारगत उत्साह स्थायिभावोवीररसतां प्रपद्यते । तत्र कर्णस्य शक्त्या घटोत्कचभेदने महेन्द्रस्य वज्रधारयामहीध्रभेदनेनोपमा तस्य कमपिवीरत्वोत्कर्षं ध्वनयति ।

घटोत्कचे हते कौरवानन्देन पाण्डवाश्च विषादेनाश्रुणिमुमुचुः तत्र कौरवपाण्डवगतहर्षविषादयोर्बाष्पलहरीनिष्पादने स्पर्धाया अभावेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः तदतिशयं व्यनक्ति ।

चन्द्रस्य प्राच्यां समागमने जयद्रथ-घटोत्कचनिधनशोकाकुलस्ववंशजकौरव-पाण्डवाश्वासनफलकत्वोत्प्रेक्षा नितरां सामयिकी ।

चन्द्रोदये विराट्द्रुपदमूपयोर्द्रोणालम्बनकरतत्प्रतीपचेष्टाभिरुद्दीपितः शरवर्षणानुभावितस्तयोरुत्साहोऽमर्षौग्र्यादिव्यभिचारिभावैः परिपोषितो वीररसतां प्रपद्यते । तत्र तच्छरनिबद्धद्रोणस्य शललनिबद्धशल्यमृगोपमया तयोः शरवर्षणालाघवं ध्वन्यते । द्रोणतनुत्रायिमग्ननाराचेषु प्रहृष्यत्पराक्रमश्रीरोमाञ्चाङ्कुरोत्प्रेक्षाया तस्य विक्रमव्यञ्जनित्वं द्योत्यते । अग्निदेवस्यमुनिनिक्षिप्त- द्रोणवार्षत प्रकाशित- कोदण्डविद्यायां सर्वस्वारोपाद् रूपकेण तस्या महार्घ्यत्वमनन्यसाधारणत्वं च व्यज्यते । द्रोणचापेचतुर्मुखारोपाद् रूपकम्, विराट्द्रुपदयोर्वृद्धत्वकृतविकृतवेषत्वेऽपि द्रोणचापचतुर्मुखेन विशिखविमोचनसृष्टिशिल्पकृत-विलोभनीय विग्रहत्ववर्णनेन विरोधाभासः, तत्र हतयोस्तयो र्हति त्वस्यप्रकारान्तरेण वर्णनात् पर्यायोक्तम्, तयोर्नवदेवत्वे वरणोत्सवयोगपथे सुराङ्गनानां विवादस्य शचीदुःसमाधेयत्वाभावेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिश्च वाक्यार्थमुपस्कुर्वन्ति ।

निशापगमवर्णने निशायां शिलाभ्यो विपाटित शरीरत्वादि विशेषणेन दिनश्यन्नायिकात्वप्रतीत्या समासोक्तिः, तत्र सन्ध्यारोग तदपह्नुवपूर्वक रुधिरधारारोपादपह्नुतिर्ध्वनिः ।

सूर्योदयवर्णने- सूर्यस्य कोककुटुम्बिनीनर्नुक्करण महस्त्वात्मकप्रकारान्तरेण कथनात् पर्यायोक्तम् ।

वसुदेववायुवासवकुमारादिषु घटोत्कचविराटपाञ्चालपुत्रताप्रलब्धक्रोधारुणनेत्राणां रणभूरुधिरधुनीषुप्रतिबिम्बनस्य पङ्कुरुहाङ्कुरणरूपप्रकारान्तरेण वर्णनात् पर्यायोक्तम् , तेन च तादृशनेत्राणांपङ्कुरुहतुल्यताभिव्यक्त्या उपमाध्वनिः ।

द्रोणे प्रवेतस उपमा तत्पुरोधापितवारणघोरण्यां पयोधरपरम्परायाम् उपमा च तयोर्दुर्धर्षत्वं व्यनक्ति । द्रोणशङ्खपरिपूरणेन स्वगुणस्य दुर्वहत्वात्सम्बन्धेऽपि तदुक्त्या सम्बन्धातिशयोक्तिस्तद्वैपुल्यं ध्वनति ।

कुङ्कुमीमकृतगजराजिकुम्भमर्दने तत्कृतकुम्भयोर्निनामार्घं धारणजन्यतन्मत्स

रहेतुकत्वस्योत्प्रेक्षा ।

' प्रचुरमदः स्ववशानुवर्ती शुभतरमणिदेदीप्यमानमस्तकोऽयमश्वत्थामा हतः ' इति धर्मतनयगदिते विशेषणविशेष्याणां श्लिष्टत्वात् अश्वत्थामनामकगजद्रोणसुतयोरुभयोरपि समकोटिकतया प्रतिपिपादयिषितत्वाच्च प्रकृतश्लेषः ।

धृष्टद्युम्नकृतशीर्षस्य द्रोणस्य गुरोरप्यन्ते वासित्वकथनात् अन्तेवसच्छब्दगतश्लेषमूलको विरोधाभासः ।

तातवधप्रकुपितद्रोणसूनुमुक्ताग्नेयास्त्रे परसैनिकाक्षौहिण्याः शलभत्वोक्त्या रूपकम् तदस्त्राग्नेः परितः प्रसृमरत्वं भीषणत्वं च व्यनक्ति ।

सुराधीश्वरसूनुमुक्तब्रह्मास्त्रतेजसा मन्दायमानद्युतिना गुरुनन्दनास्त्रेणसह सायं भानोर्मन्दद्युतित्ववर्णनात् सहोक्तिः ।

योधानां घटोत्कचाश्मवर्षशकलीकृतबाहुकर्णनासत्वाद् द्रोणवधाच्च दुर्योधनस्य वैवर्ण्येन दैन्यावेगविषादाध्वन्यत्वे , तत्र दिनदीपांकुरोपमाया उपस्कारकत्वम् ।

एवं क्वचिद् वाक्यार्थोपस्कारकत्वेन क्वचिद्वस्त्वलंकारव्यञ्जकत्वेन क्वचिच्च रसभावोत्कर्षकत्वेन कृतोऽलंकार विन्यासो जातोऽस्ति रुचिरतर एव ।

लोकवृत्त्यनुप्रासानां यमकानां चापि यत्र तत्र माधुर्यौजोगुणानुगुणवर्णघटिततयोपात्तानां निगुम्फोऽपि नितरां रमणीय एव संवृत्तोऽस्ति ।

(७) कर्णवधः

अथ कविवर्णितं कर्णयुद्धं दुःशासनवधः कर्णपुत्रवधः, कर्णार्जुनयुद्धम्, भगवतः कर्णमुक्तसर्पास्त्रादर्जुनरक्षणम्, अर्जुनकृतः कर्णवधश्चेति विविच्यते, तद्वर्णनं यथा -

' अन्येद्युरब्धिघमिलितैरसृगापगानां
पूरैरिवोदयति घूर्णति शोणितार्द्रे ।
सेनाधिपत्यसरणौ धृतराष्ट्रसूनुः

कर्णं सुवर्णघटवारिभिरभ्यषिञ्चत् ।।'

' आमामतानीदभिषेककाले तस्योपरिष्टात्तपनीयकुम्भः ।
आघ्रातुमात्मप्रभवौचमार्द्रं समीप्यातस्य सरोजबन्धोः ।।'

' दिङ्मूलशैलकुहरोदयकेसरीन्द्रसौखप्रसुप्तिकमहापटहारवेण ।
कर्णौ बलेन करनर्तितकालपृष्ठो जन्यस्थलीमथ रथेन जवाज्जगाहे ।।'

' तावत्परेषां ध्वजिनीश्वरोऽपि पदं न्यधत्त प्रणनप्रदेशे ।
परिस्फुरत्पट्टसशक्तिखड्गशरासतूणीरशरैर्बलौघैः ।।'

' चमूद्वयी सा तदनु प्रगल्भा विसृत्वरेव्योमनि पांसुपुञ्जैः ।
प्रागेव शुद्धामपि सिद्धसिन्धुं विचित्रमेतद्व्यतनोदपापाम् ।।'

' पादातं पादातं रथ्या रथ्यां च हास्तिकं गजता ।
आश्वीयं चाश्वीयं द्रागभिदुद्राव कम्पितमहीकम् ।।'

' विरोधिसेनामभिवीक्ष्य कोपाद्धिस्कारिताङ्गानुसुतेन चापात् ।
विजृम्भमाणं तरसा गुणं स्वं वियत्समस्तं न शशाक वोढुम् ।।'

' कुरुचमूपतिबाणविदारितादुदपतन्मणयः करिमस्तकात् ।
सुतवितीर्णनिजास्पददुर्दशां द्युमणये विनिवेदयितुं किल ।।'

' अनेकधा दत्तविलास्यबाणैरातिलेटावलिराबभासे ।
भीव्रीडखेदावकराङ्गहीतुं पृथक्तयाऽशून्यमचालिनीव ।।'

' तदनु बाणगणैर्द्युमणेः सुतो घृतविपत्ति स पत्तिकदम्बकम् ।
अतिविषादि निषादिकुलं व्यधाद्यमपुरीपथिकान्रथिकानपि ।।'

' अग्रेसरः कर्णहतेषु कश्चिद्भटः प्रविष्टो रविरन्ध्रमार्गम् ।
निलिम्पचाटुश्रुतिपुष्टदेहो निर्गन्तुमीष्टे स्म न किंचिदुच्चैः ।।'

' पुष्पप्रदानेन सुरद्रुवर्गे श्रान्तेऽमराणां प्रथमं वृतानाम् ।
हठेन कण्ठादपहृत्य मालां वृण्वतामभ्यसुरानमर्यः ।।'

' तत्तादृशं तरणिभूभुजखण्डमानं
संवीक्ष्य सर्वरिपुदृक्षु च भीतिमाक्षु ।

' आसीत्प्रमोदपरिमेदुरमेकमेव

वामेतरं रणतले वनमालिनेत्रम् ।।'

'रिक्ते पुष्पैः सिद्धगन्धर्ववर्गैर्मुक्त्वा मुक्त्वा मूर्ध्नि वीरस्य तस्य ।
द्वावेवाग्रे चौसदां गोष्ठिमध्ये पूषाचन्द्रौ पुष्पवन्तावभूताम् ।।'

'वियत्प्रदेशाद्धिशिखैः कठोरैर्दुद्राव दूरं ध्रुवमब्जबन्धुः ।
अमुष्य नो वेदचिराद्गमेरन्पादाः कथं पाटलिमानमेव ।।'

'तरणेः किरणैस्तदारुणानां पटलं व्योम्नि पयोमुचां बभासे ।
चिरकालबुभुक्षाया पिशाचैरधिकं मांसमिवाहवादुपात्तम् ।।'

'अवरोपितज्यमथ कर्णकार्मुकं
विरतौ दिनस्य विजहौ विनम्रताम् ।
अवलोकनाय हरिदन्तरे भया-
द्व्रजतामरातिघरणीभुजामिव ।।'

'अप्राप्तनूतनशरघातिभिः स्वसैन्यै-
रस्पन्ददृष्टिभिरनुत्राणमीक्ष्यमाणः ।
दुर्योधनाग्रकरसंवलितांगुलीकः
प्राविक्षदात्मकटकं स तु भानुसूनुः ।।'

'परेद्युः परिस्फुरितकमलचक्रव्यूहे प्रकाशमानपत्रिकुलसंचारे प्रकटितघर्मश्रियतेजो वर्धने भाविनि प्रथन इव प्रभातसमये प्रादुर्भवति सति मधुमथनसारथेर्मघवत्कुमारस्य-वधकृते शल्यसत्सारथ्यमेव परं साधनमवधारयता राधेयेन कृतबोधनः सबहुमानं मान धनभाजं मद्रराजमुपगम्य स्वागमननिदानपरिज्ञानेन विमनायमानमपि तं नैस्तैर्मधुरर चनैर्वचनैः कोपगिरेरधित्यकाप्रदेशात्कथंचिदवरोप्य कर्णरथनैपथ्यं सारथ्यमधिरोपया मास ।।'

'अथ मद्रनायकनिबद्धसैन्धवं
रथमारुरोह रविभूः पराक्रमी ।
प्रमदश्च कौरवचमूचरान्क्षणा-
दतिसाध्वसं च परयोधमण्डलम् ।।'

'ततः क्षणादेव रथेन तेन संग्रामसीमानमुपेत्य वीरः ।

'शंखं तदन्त्याक्षरवाच्यमेतद्द्वयं निनादैरपुपूरदेषः ।।'

'तदनु चण्डतरदोर्दण्डश्चण्डकरसूनुर्निजयन्तारं मद्रनेतारं प्रति वचनमित्थमुच्चैस्थापयामास-

'इदानीमयि शल्य ! तव सारथ्यकौशल्यं निशाम्य विजयसारथेर्वदनमधिलज्जापयोधि सहमज्जनकृते नाभिकमलवास्तव्यस्य नयनायुधसारथेश्चत्वार्यपि मुखानि समाह्वातुमिव भृशमवनतमास्ते ।।'

अपिच,-

'मरुत्कदम्बैरुपलाल्यमानं मद्रेन्द्र दीप्राखिलहेतिजालम् ।
शराभिवर्षेणाघनञ्जयं सम्पिङ्गालयेदेष भुजः क्षणेन ।।'

'ततस्तच्छ्रवणपुटक्लवं कर्णवचनमाकर्ण्य पार्थेन पुरा प्रार्थितमर्थं हृदिकृत्यस मद्रभूपतिरपवार्यावार्यसूर्यतनयधैर्यं गगनकुसुमसौदर्यं विधातुमेवमुत्तरयामास,-

'पुरा विराटस्य पुरोपकण्ठे रणाङ्गणे सारथिनार्जुनस्य ।
उत्पाट्यमानेऽपि रयेण नेत्रे निद्रा कथं ते हृदयंगमासीत् ।।'

'आयासलेशरहितं वनसीम्नि पूर्वं
संदानिते सुहृदि ते सुरवैणिकेन ।
कुत्रापि गूढवसतिस्त्वमहो निकुञ्जे
किं नाबिभेः सविधकीचकरन्ध्रगानात् ।।'

'पाञ्चालिकायाः परिणीतिकाले संधीभवद्भिः सह धार्तराष्ट्रैः ।
भवानभूत्वार्थशरप्रयोगात्कर्णोऽपि भूत्वा कथमाजगन्थ ।।'

'इन्द्रात्मजातेन स तेन गन्तुमीष्टे तुलामीश्वर एक एव ।
तृणाय कृत्वा निजजीवनं यो युद्धाय येन स्पृह्यन्नुदस्थात् ।।'

'इति तस्य मद्राध्यक्षस्य तादृक्षामुक्तीः कुमारे पक्षपातं समीक्ष्य कर्मसाक्षिनन्दनोऽपि रौक्ष्यवर्जितं पदविभागचमत्कृतिसुभगं भावुकं वचनमेवमवादीत्-

'अयि ! भागिनेययशसां सुभगंकरणस्त्वमथ भुवि मद्रपते ! ।
मम मातुलेति बहुधा वदता विजयेन शंभुमपि मा तुलय ।।'

'इत्युक्तवत स्तस्य सीरैर्दन्तपुटाविव ।

अवा॰ "जवादुभावनीकौ तौ जघटेते परस्परम् ।।"

"सर्वतोऽपि भुवि सैन्यपरागैः शोणितेषु सजलेषु सरःसु ।
केवलं गगन एव तदानीमप्सरःकुलमलोक्यत लोकैः ।।"

"तदनु तत्र परस्परघट्टनजनितस्फुलिङ्गव्याजेन निपीतपूर्वाङ्गरुधिरशीकरानजीर्णशङ्कया वमन्तीभिः पट्टसवल्लरीभिश्च, कबन्धोत्पाटनसृष्टिपाटवमेव संग्रामदेशदेशिकयदेशाभ्यसितुमवनीतलभवतीर्णैः पयोधरपटलैरिव खेटकमण्डलैश्च, युगपदेव बहुविधवीरयोधजनप्रवेशसौकर्याय तरणिरश्मिसरणिं विशालयितुमिव वियत्तले दूरमुच्चलिताभिः शक्तिभिश्च, प्रतिदाणदापितविपक्षाकुलवृत्तान्तं मुहुर्मुहुरटनीमुखेन कथयितुमिव धानुष्ककर्णाभ्यर्णं प्रत्यागतैः कोदण्डदण्डैश्च, युद्धविलोकनबद्धकौतुकसिद्धयोवतकुचमण्डलनिजकुम्भतारतम्यपरिचिचीषयेव दूरं नभसि करान्प्रसारयद्भिः शुण्डालमण्डलैश्च, विचित्रतरचक्रचक्रमणाभिधेन पदात्पदमपि न गन्तव्यमिति विमतनिरोधकुण्डलनाभिव कुर्वद्भिरर्वद्भिश्च, शोणितपङ्कशोणितैः वेगसंभ्रमविदार्यमाणधरणीरन्ध्रनिर्गत्वरफणीन्द्रफणासहस्रमणिकिरणघोरणीमसृणितैरिवचक्रैः संक्रीडद्भिः शतघ्नीभिश्च, भयानकैसकलसुरजनतनूरुहसौखशायनिके समीके ।।"

"दुःशासनो नयनभृम्भितकोपवह्नि-
स्फीत्यैव फालतलमूर्ध्वमुपाश्रिताभ्याम् ।
भूम्यां भयानकमुखो रिपुभूमिपान-
प्यारब्ध यो घयितुमेतदतीव चित्रम् ।।"

"स कुन्तलात्यम्बखुतिघुर्यः स्वसिंहनादैर्विदधे दुरापः ।
परामवं सोमकलास्यहेतौ पाञ्चालिकायामिव पार्थवध्वाम् ।।"

"ततो याज्ञसैनीकटितटपटापहारसमयचक्रचक्रमणावासनानुवृत्तिवशादिव विविधानि रेचकमण्डलानि वितन्वन्निजास्पदभेदको भीमः क्व वा समागच्छतीति वीक्षितुमुन्नतप्रदेशमधिरूढाभ्यां हृदन्तररुधिरबुद्बुदमुकुलाभ्यामिव रोषलोहिताभ्यां लोचनाभ्यां साध्वसदानशौण्डः करतलभ्रम्यमाणपरिघपातनपाटितभटघोटककटिघटादातजप्रवाहैः समीकसीमानं कण्ठद्वयसौ विदधानः सुयोधनानुजो वियदध्वनिविजृम्भितध्वनिर्वृकोदरदृगध्वनीनोऽभूत् ।।"

"बद्धकक्ष्यावपि द्वौ तावमीकौ भीमकौरवौ ।

गदागदि रणं घोरं कुर्वाते स्म परस्परम् ।।'

' निपातितस्य द्विषतः स भूमौ समदामकर्णां कुरुभूपतीनाम् ।
गण्डे कराभ्यामुदरे पदाभ्यां संताडनं साधु समाचचार ।।'

' निजप्रियाकैश्यकृषोऽस्य शत्रोर्निर्भिद्य वक्षः पिबतोऽसृगम्भः ।
समीरसूनोश्च पिशाचिकानां सप्रीतिकेल्यां कलहो बभूव ।।'

' एणीदृशः स्वकीयाया वेणीं तैरेव शोणितैः ।
कोष्णिमृतां द्विषामेषः शोणिचक्रे सहाक्षिभिः ।।'

' तदनन्तरम्,-

' रिपून्कुरुक्षोत्रतले चरन्तं तृणाय मत्वा वृषसेनमुग्रम् ।
किरीटिगोपः परपेतुकान्तं निनाय काण्डैर्यमलोकगोष्ठम् ।।'

' अवकर्ण्य किरीटिमग्नमाजावभिमन्योरधिकं सुतं स कर्णः ।
रिपुकुतरक्षुरुष्टदिक्षु ज्वलयंश्चक्षुरभूदरीन्दिषक्षुः ।।'

' कुण्डलीकृतकोदण्डश्चण्डभानुतनूभुवः ।
ताण्डवं विदधे पाणिः पाण्डवानां बलान्तरे ।।'

' युद्धे हतो योधसमूह एष बिम्बं पितुर्मे बत भेत्स्यतीति ।
मत्वेव पत्युर्महसां कुमारः संछादयामास दिवं शरौघैः ।।'

' करीन्द्रमण्डले पेतुः कर्णमुक्ताः शरव्रजाः ।
सदानाम्बुकरं यान्ति स्थूललक्ष्यं हि मार्गणाः ।।'

' प्रकाश्य कर्णं युधि कालपृष्ठं भयंकरामे चलति प्रवीरे ।
तदीयमल्लैर्दलिताः परेऽपि प्रकाश्य चेलुर्बत रक्तपृष्ठम् ।।'

' तत्र तत्र युधि संचरमाणः शल्यसारथिमता स रथेन ।
चूर्णितारिमदवारितयाऽसौ सूर्यसूनुरपि चण्डकरोऽभूत् ।।'

रवेः कुमारस्य रथं समीक्ष्य समाश्रियस्यापि तदा समीके ।
धैर्यं हृदः स्वेदजलं शरीराज्जगाल तोत्रं च जवेन हस्तात् ।।'

' तदनन्तरममर्त्यवक्त्रवर्तिविकर्तनतनयौ परस्परं प्रथनं प्रवर्तयितुमारभेताम् ।।

' राधाकुन्तीपुत्रयोः शौर्यभाजोश्चक्रीभूतौ चापदण्डौ ज्वलन्तौ ।

मध्यस्थायाग्रभूदेवतायास्ताटङ्काभामाबधाते स्म तत्र ।।'

' अवकर्ण्य शरासवल्लिघोषं सुतयोस्तत्र सहभ्रदृष्टिघृष्ट्योः ।
दिवि वैणिकतापसस्य चित्रं महती प्रीतिरभूच्च नैव चामूत् ।।'

' उल्लोलकल्लोलितदोर्विलासावुपेन्द्रमद्रेश्वरसारथी तौ ।
परस्परं मल्लकुलैरभूतां रुषावलीढावरुषावलीढौ ।।'

' कर्णाभिरेन्द्रसुतकार्मुकवल्लिवान्ते-
नीरन्ध्रिते म्बरतले निबिडैः पृषत्कैः ।
अभ्यागतानन्दरसावमुपेत्य वीरा-
न्प्रच्छ वैणिकमुनिः प्रथनप्रकारान् ।।'

' पाणिना तदनु मानुनन्दने पन्नगास्त्रमचिरेण गृह्णाति ।
पूर्वमेव निखिलाप्सरःकुलात्सा बधौ वरणमाल्यमुर्वशी ।।'

' सव्यसाचिहननाय शरासे संहिते रविसुवा भुजास्त्रे ।
नन्दनद्वितयवत्त्वनमंस्त स्वस्य कल्पकवनेन सहेन्द्रः ।।'

' रवितनयविमुक्तमस्त्रमेतद्दिवि रसनायुगलं बहिर्वितन्वत् ।
अहमरिमथुना द्विधा करोमीत्यभिनयकेलिमिवाबधद्भासे ।।'

' द्विधा विधातुं वियं शिरोघावधापतन्तं स सरीसृपं तम् ।
निरीक्ष्य पादेन निजेन शार्ङ्गी निमज्जयामास शतार्ङ्गमुर्व्याम् ।।'

' आनेमिमग्नस्य हरेरुपायाद्वधा शतार्ङ्गस्य किरीटिनोऽस्य ।
गर्भेऽवकाशं किल बान्धवेन शंभोः शतार्ङ्गो धरणी व्यतानीत् ।।'

' ततः कृपाणामिव पुष्करान्ते चैलार्भटीं नृम्णयतात्मनश्च ।
उग्राहिना तस्य किरीटशृङ्गमग्राहि नाकेन्द्रभयेन साक्षम् ।।'

' ततः स्नेहसाद्रस्तं पक्षपाती मुर्जङ्घभम् ।
तदाकः किल पार्थस्य वर्धयामास सायकः ।।'

' दन्तीन्द्रपादातरथाश्वभेदी कुन्तीकुमारः स हरेर्निदेशात् ।
राधेयकाये विविधास्त्रजालमाधेयमेव व्यधित क्षणेन ।।'

' सर्वेषु मार्गणगणेषु बहुप्रदत्त्वा-
त्खर्वेतराद्भुतिरयं खमणेः कुमारः ।

पार्थस्य मार्गणगणं पतितं शरीरे
सार्थं व्यधादमितं स वितीर्य जीवम् ।।'
'कर्णो थ कर्णेन्द्रियमात्रपात्रे दुर्योधनः शोकरसे ममज्ज ।
अभ्यासभूमानमिवाधिरोढुमनागतस्य ह्रदमज्जनस्य ।।'
'ततः स्वकीयस्य तनूभवस्य
वधाज्जले स्नातुमना इव प्राक् ।
मन्दायमानद्युतिमालभारी ~~करीविकल्पे कर~~
मरीचिमाली च ममज्ज सिन्धौ ।।' ११।१-५७।।

एवं कर्णयुद्धं, दुःशासनवधः, कर्णपुत्रहतिः, कर्णार्जुनयुद्धम्, कर्णमुक्तसर्पास्त्राद् भगवतोऽर्जुनरक्षणम्, अर्जुनकृतः कर्णवधश्चेति वर्णितं कविना विपुलवेदग्ध्येन ।

तत्र सर्वतः प्राक्, प्रभातवर्णने लोहितवर्णसूर्यस्य सागरसंगतरक्तसरित्पूररक्ततत्वोत्प्रेक्षाया तद्युद्धदिवसस्यातिभीषणत्वं व्यज्यते ।

कर्णस्य सेनापत्यनियोगाभिषेककालोन्नीतसुवर्णकिलशे स्वात्मजोत्पार्ङ्गगाघ्राणाय समीपायातसरोजबन्धोराभाससम्बन्धवर्णनाद् निदर्शना प्रकृतार्थोपस्कारिका ।

कर्णसैन्यपटहारवस्य दिङ्मूलशैलकुहरेशयकेसरीन्द्र सौप्तशायनिकत्वासम्बन्धेऽपि तद्वर्णनात् सम्बन्धातिशयोक्तिः ।

कर्णस्य धृष्टद्युम्नस्य सैन्यानां च परालम्बनकः परकीयबलशौर्यचेष्टाद्दीपितः क्ष्वेलाशस्त्रास्त्रवालनादि स्वस्वचेष्टानुभावितः धृतिगर्वामर्षादिव्यभिचारिभावैः परिपोषितः उत्साहस्थायिभावोवीररसतामश्नुवानः सातिशयां च मत्कृतिमादधातिसताम् ।

चमूसमुत्थरणरेणुराशिवर्णने शुद्धाया अपि सिद्धसिन्धोरपापत्वकथनेन-
अपगतसलिलत्व-पापरहितत्वोभयवाचकापापशब्दगतश्लेषमूलकोऽविरोधाभासः, सिद्धसिन्धोर्व्यपगतजलत्वाभावेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिश्च रजः-पटलस्य घनोन्नतत्वं व्यक्तः ।

कर्णकामुकविकारस्वरूप गगनदुर्बलत्वाक्षम्बन्धेऽपि लघुत्वात् सम्बन्धा क्षिप्तयोजितरूपत्व वैपुल्यादिदं व्यनक्ति ।

कर्णबाणविदारितगजराजराजितरक्तोत्पत्तिपुलकामणीनामुत्फुल्लने यु यौत्सुक्यकृतदशाविवेचनकरूपोत्प्रेक्षाशब्दाभिन्नपदावली शुभ्रीडोपाय-करूपार्थैकरूपतद्गुणाश्रयसमवायित्वोत्प्रेक्षा, कर्णछत्राग्रसंघट्टयन्त्यविद्ध निक्षिप्य चाटुकृतिपुष्टेक्षत्वस्य वैनतेयविरुद्धमार्गनिर्गमनाशक्तत्वस्य वाक्षम्बन्धेऽपि तत्कथना तु सम्बन्धाक्षिप्तयोजितत्वयत्, नवतीक्षुराणां वरणे देवताभिर्वस्तुतपुष्पप्रदान शास्त्रत्यासम्बन्धेऽपि सङ्गत्यापि सम्बन्धाक्षिप्तयोजितः, पुर्णेन्दुमुखमण्डलस्वरूपदर्शन प्रमुदितत्वेन वनमालिनो दक्षिणाक्षिस्पन्दस्य दुर्वक्षस्त्व प्रतीत्याक्षेपकत्वनिः, कर्णपु-लवमण्डलत्वदर्शनप्रमुदितत्वस्य वनमालिदक्षाक्षिस्पन्दमात्रे पुष्पत्वस्य च कर्णमूर्धाभिषिक्तत्व नीचन पुष्पत्वेतदिविधदृगोष्ठीमध्यगतपुष्पविन्यासकौशल नियमनात् ग्रहणसंख्याक्षय मु, तावं दूर्वांकुराणां पाटलिप्राप्यौ कर्णमुक्तफलोरविशिष्टमणिहृतत्वहेतुकत्वोत्प्रेक्षा, शार्ङ्गाटिकसम्ध्यारागरंजितपयोधरघटेषुविरलालकपुलिन विशालकपुली तपरिशिलीमुखोत्प्रेक्षासावयवरोपितत्वेन नग्नताक्षानात्कर्णकामुकदण्डत्वोत्प्रेक्षत्वे ऽरिदन्तरफलाक्षिकाराविदर्शनकत्वत्वोत्प्रेक्षा च तावपि रणक्षितां पुष्पा-क्षिप्त सङ्गत्याक्षिप्तौ ।

कर्णमुद्रादिवेषत्वेनिकानां तुलसीबाणाग्रणाप्राप्त्या युद्धविघ्नकरत्वदीयौपुण्यादि क्षयो व्यक्ते ।

प्रभातवर्णने तद्भ्रमाधिक्यनोपमा परिकुपितकण्ठकूणत-प्रकाशमान पक्षिकुलकंतार-प्रकटितघर्मोद्भवेनो वर्णनपरिशिष्टविशेषणाश्रयवाक्यार्थप्रतीतारुणी यावाक्यार्थोपकारिका ।

कर्णस्य भङ्गनायकत्वेनयोजितत्वेऽपि शिष्टशारीरे तदीयारोहणक्रि यायाः प्रमद-साध्यत्वैकवेद्यत्वाभ्यां कौरवसेनाऽन्यैरन्यकर्मान्तराभ्यां च योगात् तुल्ययोगिता, ईक्षणस्य च कर्णकृत्ति-निवारकरणजुगुप्साक्रियायोगात् अपरा तुल्ययोगिता, तस्यर्क्षसङ्ख्यादान्त्यादारभ्यान्त्यस्य ऋक्षप्रहारान्तरेण कथनात् पर्यायो क्तम्, शल्यं प्रतिकर्णकथने व्रणानोचनाकुमारत्वविरुद्धव्रणाक्षरेणकथनादयं प-

र्यायोक्तम्, विजयसारथिवदननम्रत्वे लज्जासमुद्राधिकरणकसहमज्जनार्थक नयनायुधसारथिमुखचतुष्टयाहवानफलकत्वस्योत्प्रेक्षाचमत्कुर्वन्तिताम् ।

"मरुत्कदम्बोपलाल्यमानं दीप्रहेतिजालं धनंजयं मे भुजः शराभिवर्षेण इंद्रालयेत्" इति शल्यं प्रति कर्णस्य गर्वोक्तिवचने श्लेषमूलासमस्तवस्तुविषयासावयवोपमा, मरुद्धेतिधनंजयशब्दयोः शब्दैरुपमानोपमेयानामुभयेषामुपस्थापने धनंजयस्य इंद्रालतुल्यकरणाविधानात्, (स्य प्रयोजकत्वात्) यया कर्णस्य गर्वातिशयोध्वन्यते ।

कर्णवचनस्य वक्त्रचरूपकेण शल्यकृतेऽसह्यत्वातिशयो व्यज्यते ।

कर्णं प्रतिशल्यवचने "पुराविराटपुरोपकण्ठेऽर्जुनसारथिना तवनेत्रे हृतेऽपि निद्रा हृदयंगमा कथमभूत्" इत्यत्र शल्यवचने हृतनेत्रस्य निद्राप्राप्तिरसंगतेत्यननुरूपसंसर्गात्मकं विषमम् वस्त्रनयनोभयवाचकनेत्रशब्दश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितम्, कर्णस्य निर्लज्जत्वं व्यनक्ति । एवं सुरैणिकैर्दुर्योधनस्य कृते बन्धने कृष्णगूढस्य कर्णस्य कीचकरन्ध्रगानरवाइ मीतिकथने तस्य दुर्योधनसाहाय्ययायोग्यत्वं व्यज्यते । एवं पाञ्चालिका स्वयंवरे पार्थशरप्रयोगे कर्णस्य श्राक्षगन्धत्वकथनात् अननुरूपसंसर्गात्मकं विषमं श्रवण-राधेयोभयवाचककर्णशब्दपराभूत-गृहीतगन्धोभय वाचकाक्षगन्धशब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणितं कर्णस्यार्जुनस्पर्धायोग्यत्वराहित्यं द्योतयति । एवं ईश्वरस्य सुरराजतनूजतुल्यताप्राप्तियोग्यता कथने ईश्वरस्यार्जुननिष्ठोपमानतानिरूपितोपमेयतायां असंबन्धेऽपि तत्कथनादतिशयोक्तिः, अर्जुनेनतुल्यतामीश्वर एव प्राप्तुं शक्नोति न तु त्वादृश इति पार्थतुल्यताप्राप्तेरीश्वर एव नियमनात् परिसंख्या, ईश्वरस्यपार्थतुल्यता प्राप्तियोग्यतायां तस्य निजजीवितृणत्वावधारणपूर्वकं पार्थयुद्धाय सन्नद्धत्वेनोपादनात् काव्यलिंगम्, ईश्वरस्य तादृग्गवमाननायां असंबन्धेऽपि कथनात् संबन्धातिशयोक्तिः, एवं अत्रातिशयोक्ति परिसंख्याकाव्यलिंगानामंगांगित्वेन संकरः कर्णस्य पार्थप्रतियोगितायामतितुच्छत्वं ध्वनति ।

शल्यं प्रति कर्णवचने शल्यस्य मागिनेययशः सुधर्मस्करणत्वे तेन शम्भोरपितुलानिषेधस्योपपादकत्वात् काव्यलिंगम् शल्यवचनानामतिशयोक्त्यातिशुक्लत्वं द्योतयति ।

उभयोरनीकयोः परस्परघटितत्वेऽन्योन्यघटितसौरिदन्तपुटोपमया तस्य तयोश्चामर्षो ध्वन्यते ।

सैन्यपरागैः सकलसजलसरःसुशोषितेषु सत्सु गगन एवाम्बरःकुलविशिष्टत्वस्य नियमनात् परिसंख्या स्वर्वेश्या-सलिलसहितसरोवाचकाऽम्बरः-शब्दगतश्लेषमूलकाभेदातिशयोक्त्यनुप्राणिता वाक्यार्थोपस्कारिका ।

युद्धवर्णने पटिटशपरस्परघट्टनोत्थस्फुलिङ्गेषु तदपह्नुव पूर्वकरुधिरशीकरारोपादपह्नुतिः, खेटकमण्डलेषु संग्रामदेशरूपदेशिकात् कबन्धोत्पातनपाटवाभ्यसनफलकमवनितलावतीर्णपियोधरपटलोत्प्रेक्षा देशिकरूपकसलिलाऽपमूर्धकलेवरोभयवाचक कबन्धशब्दगतश्लेषमूलकाऽभेदातिशक्त्यनुप्राणिता, शक्तीनां वियत्तल दूरोच्चलैने तरणिरश्मिसरणिविशालीकरणफलकत्वस्योत्प्रेक्षा, कोदण्डदण्डानां घानुष्ककर्णाभ्यर्णागमनेऽटनीमुखेन प्रतिक्षणदापितविपदाकुलदापणवृत्तान्तावेदनफलकत्वस्योत्प्रेक्षा, शुण्डालमण्डलानां नभसि करप्रसारणे गगनस्थसिद्धयोवनस्तनमण्डलनिजकुम्भतारम्यपरिचिचीषाहेतुकत्वस्योत्प्रेक्षा, अर्वतां चक्रगमनेषु तदपह्नवपूर्वकविमतनिरोधकुण्डलनाकरणोत्प्रेक्षा, शोणितपङ्कशोणितशतार्पणचक्राणां-तद्वेगविदार्यमाणधरणीरन्ध्रनिर्गत्वरफणीन्द्रसहस्रफणामणिगणकिरणमयूखितत्वोत्प्रेक्षा, युद्धस्य सुरजनतनूरुहहर्षकतायास्तनूरुहसौखशायनिकत्वरूपप्रकारान्तरेण वर्णनात् पर्यायोक्तं, युद्धे तदसंबन्धेऽपि तत्कथनात् सम्बन्धातिशयोक्तिश्च कामपि चमत्कृतिमुर्वयतिवर्णनस्य ।

दुःशासनवर्णने तद्भुजोः कालनलोद्गमने तन्नयनभूम्मितकोपवह्नि भीतिहेतुकत्वस्योत्प्रेक्षा, 'रिपुभूमिपानपि योधयितुमारब्धेति वाक्यार्थस्य आश्चर्योपपादकतया काव्यलिंगम्, तदुपपादनं च शत्रुभूपानां भैरण्डात् भूमिपानेप्रवृत्तत्वेन ['ये स्वयं पर्वं (भूमिं) पिबन्ति, तानपि दुःशासनो भक्षयितुं प्रवृत्त' इति विचित्रं मैवेति] घोभूतनामप्रकाशकरणाच्च मन्तव्यम्, उपमाऽपि तथाकरणसंसर्गस्य तस्मिन्ननुरूपत्वाद् विषमज्ञेयम्, ['पान्-योपधितृ' इत्यनेन श्लेषः] । कुन्तलाल्यम्बरद्युतिघुर्यैति तद्विशेषणश्लेषः, 'सोमकलास्य हेतौ पर्यालिकायामिव पार्थिवम्पां सः परामर्शं विदधे' इत्यत्र सोमकलास्यहेतुरूपश्लिष्टविशेषणवाच्यधर्मप्रयुक्ता पार्यालिकापार्थिवम्योरुपमा । तस्य विविधरेचकमण्डलविधाने याज्ञसेनीकटितटपटापहारसमयचक्रचक्रमणवासनानुवृत्तिवासि-

तत्रहेतुकत्वस्योत्प्रेक्षा, उन्नतभालप्रदेशाधिरूढरोषलोहितलोचने निजास्पदभेदको भीमः कव वासमागच्छतीति वीक्षितुमुन्नतप्रदेशाधिरूढहृदन्तररुधिरबुद्बुदमुकुलोत्प्रेक्षा, च तद्वर्णनं सजीवमिव विदधाति ।

भीमदुःशासनयुद्धे तयोर्बद्धकक्षत्वेऽप्यभीकत्वकथनेनाभीकशब्दगतश्लेषमूलको विरोधाभासः ।

भूमिपातितदुःशासनताडनेन तद्वक्षोभेदनेन तद्गतरुधिरपानस्वकरालेपनेन च भीमगतस्तद्विषयकः क्रोधोमर्षौग्र्यादिव्यभिचारिभावपोषितो रौद्ररसतां प्रपद्यमानश्चमत्करोतितरां सचेतोजनमनःसु । तत्र तद्वक्षोरुधिरपानप्रवृत्तसमीरसूनु-पिशाचिकानां सपीति कलहरूपैकधर्मयोगात् तस्य प्रकृताप्रकृतगतत्वाद् दीपकम् उपस्कारकम् ।

दुःशासनरुधिरकरणाकपांचालीकेशशोणीकरणेनभीमगत उत्साहो धृतिगर्वादिव्यभिचारिपरिपोषितो वीररसतया परिणतो नितरां चमत्कृतिमाधत्ते सहृदयानाम् । तत्र तच्छोणीकरणेन सह द्विषामदणां शोणीकरणोक्त्या स्थानभेदभिन्नप्रकारक शोणत्वाभेदातिशयोक्त्युज्जीविता सहोक्तिः शत्रुषु कोपोदयं व्यनक्ति, तेन तमुपेक्षमाणस्य च भीमस्य निर्भयत्वातिशयो व्यज्यते ।

ततोऽर्जुनकृतवृषसेनाख्यकर्णपुत्रवधे कुरुक्षोत्रिरिपून् तृणायमत्वाचरतः-परधेनुकान्तस्य वृषसेनस्य किरीटिरूपगोपकर्तृक यमलोकरूपगोष्ठकर्मक-काण्डकरणाक नयनरूपेण वर्णिते समस्तवस्तुविषयं श्लेषमूलक सावयवरूपकं भृशं चमत्कारि ।

सुतवधश्रवणाकुपितकर्णयुद्धवर्णने कर्णस्य रिपुरकुतरक्षु रूपकम् परम्परितम्, कर्णस्य बाणौघकरणाकगगनाच्छादने युद्धहतयोधसमूहकर्तृकानभिमतस्वपितृसूर्य--बिम्बभेदनज्ञानहेतुकत्वस्योत्प्रेक्षा, कर्णमुक्तशरव्रजकर्तृकरीन्द्रमण्डलाधिकरणपतनस्य मार्गणकर्तृक-सदानाम्बुकर-स्थूललक्ष्यकर्मक यानरूपसामान्यार्थेन समर्थनात् श्लेषमूलकाभेदातिशयोक्त्यनुप्राणितोऽर्थान्तरन्यासः, कर्णकालपृष्ठं प्रकाश्यचलतिसति तद्भल्लदलितरिपुवर्गस्य रक्तपृष्ठप्रकाशनपूर्वक-चलनवर्णनेन रिपूणांपराननुरूपचेष्टाकरणात् विषमालंकारः, चूर्णिताश्मदवारितया सूर्यसूनोरपि वण्ठकराभिन्नत्वोक्त्या श्लेषरूपकोज्जीवितो विरोधाभासः, कर्णरथदर्शनेन भगवतः कोभेतदीय-

हृदय-शरीर-कारुण्यः क्रमशो धैर्य-स्वेद-गात्राणां गलनवर्णने प्रकृतानामनेकेषां गलन क्रियायोगात् यथासंख्य तुल्ययोगिता च रोचन्तेतरां सहृदयजनमनोज्ञः ।

कर्णार्जुनयुद्धे चक्रीभूत- तच्चापदण्ड्योः तन्मध्यस्थरथभूरूपदेवतायास्ता- टंकाभाविधानोक्तावसंभवद्वस्तुसम्बन्धनिबन्धना निदर्शना तयोर्युद्धप्रवृत्ति संरम्भं व्य नक्ति ।

कर्णार्जुनधनुर्वल्लीविस्फारघोषश्रवणेन नारदस्य महती प्रीतिरभूदिति का रणानुरूपकार्योत्पत्त्या समालंकारः, तेनमहती प्रीतिर्नैवाभूदितिकारणाननुरूपकार्यो त्पत्त्युक्त्या च विषमालंकारः, वीणाविपुलार्थक-महतीशब्दगतः श्लेषश्च भृशं- चमत्कुर्वन्ति ।

कर्णार्जुनयुद्धवर्णनेऽन्योन्यमल्लकुलैस्तयोरुरुषावलीढत्वस्यरुषावलीढ त्वस्य चोक्त्याविरोधाभासः श्लेषमूलकः, कर्णार्जुनकार्मुकवल्लिवान्तशरकुलसंक्षादि ताम्बरतलप्रवेशमलभमानस्य नारदस्य युद्धप्रहताऽमरभावप्राप्तवीरकर्मक प्रश्नप्रकारवि षायक पृच्छासम्बन्धस्याऽभावेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः, अर्जुनमुद्दिश्य- कर्णस्य पन्नगास्त्रग्रहणप्रवृत्तौ अर्जुनस्य स्वर्गागमनसंभावनया उर्वश्या अर्जुनवरणा य मालाग्रहणे ~~स्यासम्बन्धेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः~~, एवं तदामथवतो ऽपि अर्जुनस्वर्गागमनसम्भावनयावनजयन्तार्जुनेः नन्दनत्रयवत्वसम्भावनया ~~असम्बन्धेऽपि~~ ~~तदुक्त्याऽन्या सम्बन्धातिशयोक्तिः~~, कर्णपन्नगास्त्रग्रहणस्य उर्वश्या ~~इन्द्रस्य च~~ ~~उर्वश्या~~ इन्द्रस्य चोक्तसंभावना हेतुत्वात् काव्यलिंगद्वयम् ~~अनुक्तनिमित्तादिसम्बन्धा~~ ~~विशयोक्तिश्चा~~ पन्नगास्त्रस्याऽमोघत्वस्य ध्वनिः, पन्नगास्त्रस्य रसनायुगलबहिः प्रसारणे शत्रुसंपदिद्विधाकरणभावनाप्रकाशकाभिनयकेलिविधानोत्प्रेक्षा च चमत्कु र्वन्तितरां सचेतोजनमनःसु ।

समुत्पतत्पन्नगास्त्रावलोकनशंकितभगवतः स्वचरणेन पार्थरथस्य पृथ्व्यां निमज्जनेन तदीयोऽर्जुन विषयकं वात्सल्यं ध्वन्यते । शम्भोः शतार्द्धोद्धरणी भग वदुपायात् आनेभिमग्नस्य किरीटिशतार्द्धस्य बन्धुत्वेन स्वमध्येऽवकाशं चकारेत्यत्र ब न्धुत्वानुरूपव्यवहारसम्बन्धात् समालंकारः उत्प्रेक्षा च संकीर्णा, कुरूणामिव- आत्मनः क्ष्वेलामटीं जृम्भयता च उग्राहिणार्जुनस्य किरीटशम्भु नाकेन्द्रभयेन सह-

गृह्यतेत्यत्र गरलचिह्नादौ सर्वत्राधिक्यवेलाशब्दगतश्लेषमूलकाभेदातिशयोक्तिगर्भिता धिन्यर्थप्रकृता कौरवपक्षगारुडोपमा, अर्जुनकिरीटशृंग-नाकेन्द्रमयोः सहोपहारकथनात् सहोक्तिश्च । "श्लेषसाद्रेः पक्षपातीङ्गकः पार्थलायकस्तं भुजंगमं वर्धयामास" इत्यत्र श्लेषमूलकः समस्तवस्तुविषयः सांगरूपकालंकारः । "दानशौण्डत्वात् सर्वमार्गणगणादृतिमात् कर्णः शरीरलग्नात् पार्थमार्गणगणानपि स्व जीवं वितीर्य साधात् सकारेत्यत्र दानशूरस्य कर्णस्य स्वजीवितरणेन पार्थमार्गण गणसार्थक्यकरणानुरूपव्यवहारसंसक्तिः समालंकारः ।तस्मिन्नाणायाचकोभयता सक्तमार्गणशब्दगतश्लेषमूलकाभेदातिशयोक्तिः स्वजीवितरणेमार्गणगणादृतिमत्त्वस्य तस्मिंश्चदानशौण्डत्वस्य हेतुत्वावगत्या काव्यलिङ्गं वांगतयाश्रिते । एवं रुचिरो त्र अलंकाराणां विन्यासः । कर्णस्य मृत्योरतस्य कर्णेन्द्रियमात्रपात्रत्वश्लेषप्रकारान्तरेणाकथनात् पर्यायोक्तम्, कर्णनिधने दुर्योधनस्य शोकसमज्जने माविभूदर्थमज्जनाध्यवसायकारणकलज्जत्वरयोत्प्रेक्षा, सान्ध्यरागारुणस्य मन्दायमानद्युतिमालमारिणश्च मरीचिमालिनः पश्चिमसागरमज्जने स्वतनुलक्ष प्राप्तजलनाभफलकत्वरयोत्प्रेक्षा कर्णनिधनप्रकृतकौरवपक्षशोकस्योपकारिका ।

एवं क्वचित् स्ववैचित्र्यमात्रविश्रान्तत्वेन क्वचित्प्रकृतार्थोपकारकत्वेन-क्वचित् च्वन्गंत्वेन च कृतोऽलंकारविन्यासः कामपि सुषमामपि पादयति कर्णनिधनं।

तथा यत्र तत्र यमकानां वैकानुप्रासानां वृत्त्यनुप्रासानां च विन्यासो - पि प्रकृतरसानुगुणमाधुर्यौजोगुणानुसारिघटनानुकूलवर्णरचितत्वेन रमणीयतर एव जातो दिक् ।

(८) दुर्योधनवधः

अथ शल्यस्य कौरवसेनापत्ये निषुक्तिस्तत्पश्चात्, शकुनेस्तत्पुत्रस्य च वधः, अश्वत्थामपलायनम्, दुर्योधनस्य ह्रदमज्जनम्, भीमस्य तदन्वेषणम्, बलरामागमनम्, भीमदुर्योधनयुद्धम्, दुर्योधनोरुभंगश्च, अश्वत्थाम्नो धृष्टद्युम्नशिखण्डिप्रभृतिपञ्चालस्त्रीवधः, श्रुतकीर्तिकवचस्य दुर्योधनस्य प्राणत्यागः, भीमस्याश्वत्थामशीर्षचूडार

त्नोत्पाटनम्, धृतराष्ट्रगान्धार्योरपत्यनिधनशोकः कृष्णाव्यासयोस्तत्सान्त्वनम्, युद्धहतानां मौर्ध्वदैहिकं कर्म च कविना वर्णितं विविच्यते । तद्वर्णनं यथा-

"शल्यं ततः परमरातिकुलस्य चित्ते
शल्यं दिशन्तमनिशं रमणः कुरूणाम् ।
कल्यं रणेषु पृतनाधिपतिं विधाय
तुल्यं त्रिविष्टपपतेः स्वममन्यतासौ ।।"

"तत्रादृशं तदनु बाहुबलेन शत्रू-
नाकम्पयन्तमरावलिभस्तवेन ।
शक्त्या निहत्य युधि शल्यमजातशत्रोः
पाणिर्दधौ प्रथमतः परहिंसकत्वम् ।।"

"अथ तं सुबलात्मजं कृपादवगत्य प्रियपाशकं मृधे ।
यमदापितपाशकं व्यधाद्यमयोः प्राथमिकः पराक्रमी ।।"

"अथ युद्धतपर्तुदुः सहस्रीर्हरिदभ्यन्तरधावदात्मधोषम् ।
सहते स्म न किंचिदप्युलूकं सहदेवस्य भुजप्रतापभानुः ।।"

"ज्वालं विषक्तमिव दानविधौ कृशानोः
शोणं दधच्चमरवालमुदस्य चापम् ।
पार्थे निहन्तरि रिपूनथ कांदिशीका
द्रोणात्मभूकृपनुषाः सहसा बभूवुः ।।"

"इत्थं सोदरदायादवरूथिनीनां रणादितां परिक्षयमभिवीक्ष्य महीयसा साध्वसेन मनसि विरचितप्रथमप्रवेशः क्वचन दुर्ज्ञेयदेशे गूढावस्थितिरेव महतीं ममायुष्टोमैष्टिरित्यालोच्य झटिति घटितकवचावगुण्ठनः पन्नगकेतनः समन्तपञ्चकसीमन्तं सागरगम्भीरं त्वरितनामानं कंचन महाह्रदमासाद्य 'मद्भुजेन चिरधार्यमाणां कौणपीं त्वय्येव समर्पयिष्यामि' इति पातालवासिनः पन्नगाधिपतेर्द्विसहस्रलोचनेषु रहसि वाचा निवेदयितुमिव दूरं दूरं निमज्ज्य स्वविधया सर्वमप्यम्भः स्तम्भयामास ।।"

"बकहन्ता पुराधासौ धार्तराष्ट्रवधोद्यतः ।

इति भीतस्य राज्ञोऽस्य युक्तं कासारमज्जनम् ।।

दरीषु वा शिखरितटीकरीषु वा पुरीषु वा घनवनवल्लरीषु वा
तिरो भवेदयमिति तं स मार्गितुं रणस्थलात्पवनसुतोऽथ निर्ययौ ।।

अपैरपि सोदरैस्तदानीमनुयातस्य जयार्थसिद्धये ऽस्य ।
शतमन्युभुवः पुरेव दिष्ट्या शबरः कश्चन संन्यधाद्वनान्ते ।।

अथ तेन कृताञ्जलिना सविनयं निवेदितायां सार्वभौमलक्षणोपेतायां पद
पङ्क्तौ लक्ष्यमाणैः सलिलमाहर्तुं वनदेवताभिराहितैरिव कलशैरङ्कितावतारपथात्सं
गरङ्गप्रयुक्तविविधायुधसविधाभ्यस्ततैदग्ध्यानीव मारुतिवचनानि निशम्य विशालैः
क्रोधनिःश्वासैरुपरिकीरकितबुद्बुदकलकलोदयात्तस्माज्जलाशयादुत्तीर्य मानिनामग्रणीः
सुयोधनो धीरधीरमनास्तादृशेन भीमेन सह भयानकं गदागदिकलङ्कं संरभसमुपचक्रमे।

आजगाम स सरस्वतीतटादाजिसीम्नि बलवान्बलस्तदा ।
जायते सह यदाख्यया खलु भद्रदेवपदयोः समागमः ।।

तत्र विस्मयकरं गदाहवं पश्यतोऽस्य सह संमदाश्रुभिः ।
पुष्पवृष्टिमयोरुपान्तयोः पुष्करात्सुरभिगन्धिरापतत् ।।

प्रविवेद कुलालचक्रवद्भ्रमतोस्तत्र तयोर्द्वयोर्मिदाम् ।
न बलो न हरिर्न पाण्डवा न सुरा नाश्वमुखा न चारणाः ।।

मन्नामधारि मृदुलं वसनं विमथ्ना-
त्येतत्सदेत्यतिरुषेव यदूद्वहस्य ।
नेत्रेण सूचितमरेरथ सक्थियुग्मं
चूर्णीचकार गदया श्वसनस्य सूनुः ।।

तत्राथ तारकमिवाद्रिसुताकुमारो
जित्वा सुयोधनमसौ शिविरं विनान्ते ।
वर्गः पृथातनुभुवां मधुभित्समेतः
षड्भिर्मुखैर्जनितशंखरवो जगाहे ।।

भूयोऽपि सायमनलाय महःप्रदाने
भासां प्रभोरिव कराहिशि विप्रकीर्णैः ।

धूमैरिवादिपथरोधिभिरन्धकारैः
प्रापे कुरुक्षितिभृतां पटमण्डपौघः ।।'

'तस्मिन्काले विचित्य क्षितिपतिमसुभिर्युक्तमासाद्य खिन्नै-
स्तैस्तैराश्वास्य लापैर्निजमपि समरे भावि कृत्यं निवेद्य ।
मुक्तस्तेनार्घमार्गे हरवरमुदितो द्रोणभूश्चापमौर्व्या
धृष्टद्युम्नं निकृत्य स्वसुरपि तनयानस्य चिच्छेद शूरान् ।।'

'इत्थं निशीथे भयानकनिजसायकशतघाशकलीकृतद्विषदनेकानीकान्कुरुनाथ कपटनिकेतनात्स्वभुजाभ्यामिव प्रविष्टकटकाभ्यां कृपकृतवर्माभ्यां सह पुनरपि सरस्ती रमागत्य दुष्करं स्ववृत्तान्तं कथयन्तमश्वत्थामानं प्रति 'अयि सखे ! संप्रति मम य प्रीतिरेतावती' इत्यभिनेतुमिव तिर्यक्प्रसारितेन बाहुयुगलेन यत्नादाश्लिष्य 'त्व मेव खलु मम प्राणो भवसि' इत्योपचारिकं वचनं प्रद्युम्नानं राजानं कोपादिव त-दीयाः प्राणास्तदानीमत्याक्षुः ।।'

'कृपस्ततः कुरूपुरीं कृतवर्मा कुशस्थलीम् ।
प्रययौ द्रोणसूनुश्च पाराशर्यतपोवनीम् ।।'

'अथ दीप्तिभिरात्मनो विजेतुर्विमतद्रौणिशिरोमणेर्भवित्रीम् ।
सहजास्पदमुन्मानहानिं खमणिर्द्रष्टुमिवोदयाद्रिमागात् ।।'

'तदनन्तरमात्मसोदरसूतमुखाच्छ्रवणाकालकूटमपत्यात्ययमधिगम्यविषीदन्त्या याज्ञसेन्या मूर्च्छान्धकारं रत्नदीपालोकेन दूरमुत्सारयितुमुत्सुक इव गुरुसुताहरणा य शतार्द्धमधिरुह्य मौर्वीं विस्फारयद्भिर्मघवत्कुमारादिभिर्भासितपार्श्वभागो-मारुतिस्तपस्यतस्तस्यैवाश्रमपदभागं प्रतस्थे ।।'

'तत्रागतेषु युधि तेषु तपोधनोऽय-
मेकोऽपि धीरतधीरिषुवर्षुकेषु ।
निष्पाण्डवास्तु वसुधेति निजव्रतेन
साकं व्यमुञ्चदभिमन्त्र्य जवादिषीकाम् ।।'

'अथ स ब्रह्मशिरोस्त्रस्य प्रहितस्य किरीटिना ।
योगाशूलपदस्येव ह्रस्वभावं जगाम सा ।।'

'अथाहृतो मारुतिना हठेन भग्नस्य शीर्षाद्गुरुनन्दनस्य ।
दत्तो मणिः पार्वतनन्दनायाः शोकाग्निदाहप्रतिबन्धको भूत् ।।'

'ततः संवर्तसमयच्छात्रे तादृशि कुरूणामुभयेषामपि संप्रहारे कृष्णावेणीबन्धायुषा सह परिसमाप्ते,-

'स्वं दुःशलाशेषमपत्यवर्गं पाण्डोश्च विज्ञाय समस्तशेषम् ।
दृशा सदान्धो जरठो महीपश्चिरं तदा चेतनयापि जज्ञे ।।'

'तदानीं विदुरसंजयाभ्यां व्यजनादिभिरुपचारैर्विज्ञापितसंज्ञः कुरुभूपतिः 'हा सुयोधन ! हा दुःशासन !' इति बहुधा विलपन्नुत्थाय रणनिहतस्वजनमुखेन्दुस्मरणमात्रादुल्लोलितशोकसिन्धुभिर्बन्धुभिः सह नगरान्निर्गतः 'हे प्राणाः ! भवत्सर्वेषु गतेष्वपि यूयमद्यापि न निर्गताः ?' इति रोषेण प्राणान्बहिरुत्सारयितुमिव हृदि पुनः पुनर्विरचितकरास्फालनाभिः सविधमागत्य मज्जन्मधुसौन्दर्यप्रातिभत्यमियमाचरतीत्यसहिष्णुतयेव कपोलमकरिकामुन्मूलयन्तं बाष्पप्रवाहं नयनैरुत्सृजन्तीभिरनवरतमस्मान्कुसुमरामोदमदिरान्विदधानाः सुयोधनायः क्व पतिता इति गवेषयितुमिव भुवि दूरविकीर्णैश्चिकुरहस्तैरुपलक्षिताभिः पवनसुतपरिघोपालम्भनपरिपूरितार्थैः विलापैर्दिगन्तरं निरन्तरयन्तीभिः स्नुषाभिः परिवार्यमाणया गान्धारसुतया शनैः शनैरनुगम्यमानः संग्रामभुवमवगाह्य पर्यङ्कितशः परिशीलितदीर्घनिद्रेषु पाकशासनमुक्तपारिजात प्रसवपरिमिलितकबन्धेषु प्रवीरेषु तनयेषु निपत्य पतितो विलुण्ठन्कुरुभूपतिश्चिरमरोदीत् ।।'

'रुष्टं पितृव्यमभुमागतमाजिभूमौ
द्रष्टुं भयाकुलधियाथ युधिष्ठिरेण ।
अभ्यर्थितौ हरिपराशरनन्दनौ द्रा-
गाजग्मतुस्तमपनीतरुषं विधातुम् ।।'

'तं व्यासकृष्णावभितप्यमानं शोकेन शान्तं सुतरां व्यधत्ताम् ।
नभोनभस्याविव दावदग्धं दन्दह्यमानं दवपावकेन ।।' १२।१-२३।।

'अथ सहजैः सह महाहवभुवमासाद्य 'स्वामिन् ! अनेकविधापराधकरणोनतव शापपात्रं जनोऽयमागतः' इति चरणयोः प्रणमन्तमात्मानं प्रथमतो मृदुलमा

र्लिंगितवन्तं पश्चाद्भावजेन मुकुन्देन पुरः स्थापितेन लौहभीमसेनेन सह निजवैरपि-
वूर्णीकृतवन्तं प्रज्ञादृशं पुरस्कृत्य स्मृतबहुलकरणीयजातो युधिष्ठिरः पुरा भगीरथ
इव प्रेतभूर्यृणाय सर्वस्मैज्ञातिजनाय निर्मलैर्निलिम्पनिम्नगासलिलैर्निवापाञ्जलिनिर्वा
पणं विधिवदेवनिर्वर्तयामास ।। १२।२३। गद्यम् ।।

एवं शल्यस्य कौरवसेनापत्ये नियुक्तिस्तद्वधश्च, शकुनितत्पुत्रवधः, अश्व
त्थामपलायनम् , दुर्योधनस्य ह्रदमज्जनम्, भीमस्य तदन्वेषणम्, बलरामागमनम्,-
भीमदुर्योधन युद्धम् दुर्योधनोरुभङ्गश्च, अश्वत्थाम्नो धृष्टद्युम्नसुप्ततत्स्वस्त्रीयवधः ,
श्रुतसोप्तिकवधस्य दुर्योधनस्य प्राणत्यागः, भीमस्याश्वत्थामशीर्षचूडारत्नोत्पा
टनम्, धृतराष्ट्रगान्धार्योरपत्यनिधनशोकः ,कृष्णव्यासौस्तत्सान्त्वनम्, युद्ध-
हतानामौर्ध्व दैहिकं कर्म च वर्णितं कविना विपुलेन कौशलेन ।

तत्र दुर्योधनस्य स्वसेनाधिपत्ये शल्य नियुक्तेर्वर्णने शल्यसेनापत्य विधा
नस्य त्रिविष्टपतुल्यत्व दुर्योधनसंभावनायां हेतुत्वावगत्या काव्यलिंगम्, तेन च ह
ते भीष्म मृते द्रोणे कर्णे च निधनं गते बाशाबलवती राजन् शल्योजेष्यति पाण्डवा
न् इति प्राचामुक्त्यनुसारं शल्यसेनापत्येन पाण्डवजयस्य निःसपत्नसागरमेखलासा
म्राज्य संभोगदुराशयादुर्योधनस्य चापत्यं ध्वन्यते ।

युध्यतः शल्यस्य अमरावलिभस्तकेन सह शत्रुदलकम्पनोक्त्या सहोक्तिः,
शल्यस्य युद्धकौशलं व्यनक्ति । शल्यवधे युधिष्ठिरपाणेः करणत्वेन कर्तृत्वासम्ब
न्धेऽपि तदुक्त्या सम्बन्धातिशयोक्तिः युधिष्ठिरस्य शल्यवधे तत्प्रातीपिकत्वेन-
वैवश्यं द्योतयति ।

नकुलस्य शकुनिवधेशकुनेःप्रियपाशकस्वस्य यमदापितपाशकत्व विधाने हेतु
त्वावगत्याकाव्यलिंगम् तस्य वधौचित्यं ध्वनति । सहदेवस्य शकुनिपुत्रोलूकवधे सह
देवभुजप्रतापभानुः युद्धतपर्तुपुःसश्रीः हरिदन्तरघावदात्मघोषमुलूकं न किंचित्
सेहे इत्यत्र उलूकात्मघोषश्लेषमूलकः समस्तवस्तुविषयः सांगरूपकालंकारः सहदेव
स्य महावीरत्वं व्यनक्ति ।

अर्जुनस्य रिपु संहारेण द्रोणपुत्रकृपकृतवर्मादीनां भयद्रुतत्ववर्णने तच्चा
पलग्नशोणचमरबाले कृशानुकृततद्दानकालिक निशाक्त तज्ज्वालोत्प्रेक्षा चापस्य-

भयानकत्वं ध्वनति । तेन द्रोणपुत्रादीनां भयङ्करत्वेन वैशिष्ट्यं व्यज्यते ।

दुर्योधनस्य ह्रदमज्जनेन तद्गतं भयं व्यज्यते, तस्यदुर्ज्ञेयदेशेस्वगूढावस्थिते-रायुष्टोमेष्टित्वेनाभिमानरूपाक्षीणातङ्कभावो व्यज्यते । कवचावगुण्ठनेनावहित्थभावो ध्वन्यते, महाह्रदस्य समन्तपङ्कसामन्तरूपकेणगम्भीरत्वप्रयुक्त सागरोपमया च तस्य स्वगोपनकामताज्ञानद्वारा मतिभावो व्यज्यते, भावैरैतैः तद्गतं भयंपरिपोष्यते । ह्रदे दूरतरगभीरमज्जने दुर्योधनस्य स्वभुजबिरुदार्यमाणाद्रिातिसमर्पणवार्तायाः पन्नगपतिद्विसहस्रलोचनेषु निवेदनफलकत्वस्योत्प्रेक्षा वाक्यार्थोपस्कारिका। भीमस्य बकहन्तृत्व-धार्तराष्ट्रवधोद्यतत्वस्य ज्ञानवतो धार्तराष्ट्रदुर्योधनस्य स्वरक्षणाय कासारमज्जनरूपचेष्टाया अनुरूपत्वात् समालंकारोबकधार्तराष्ट्रशब्दगत-श्लेषमूलकाभेदातिशयोक्त्यनुप्राणितो वाक्यार्थोपस्कारकः ।

दुर्योधनन्वेषणनिर्गतस्य भीमस्य गिरिदरीकरीपुर्यादीनां दुर्योधनगोपनस्थानत्वेन संभावनया तर्कभावोध्वन्यते । ह्रदमानावतारपथेन सार्वभौमलक्षणोचितपदपङ्क्तिसनाथेन दुर्योधनह्रदमज्जनानुमानादनुमानलंकारः, तदाकारो यथा ह्रदोऽयं स्वमग्नदुर्योधनवान् सार्वभौमलक्षणोचितपदपङ्क्तिसनाथावतारपथसंलग्नत्वात् । दुर्योधनोद्देश्यक-तीक्ष्णवचनेषु सङ्गरप्रयुक्तविविधायुधतैक्ष्ण्याभ्यासहेतुकत्व-स्योत्प्रेक्षा भीमवचनानां तैक्ष्ण्यस्य युक्ततां गमयन्ती समालंकारं व्यनक्ति ।

भीमदुर्योधनगदायुद्धदर्शनेन बलरामस्य आनन्दबाष्पैसह पुष्करात् पुष्पवृष्टेर्वर्णने सहोक्त्यलंकारेणबलस्य देवानां च हर्षो ध्वन्यते । गदायुद्धेकुलालचक्रवद् भ्रमतोरुभयोर्भेदज्ञान सम्बन्धेऽपि बलश्रीकृष्णादिषु तदभावोक्त्या असम्बन्धातिशयोक्तिः । हरिनेत्रस्य दुर्योधनसक्थिचूर्णीकरण संकेतदाने स्वनेत्रनाभ्यारिमृद्धलवसनविमन्थनजनितरोषहेतुकत्वस्योत्प्रेक्षा नयनवसनोभयवाचकनेत्रशब्दगतश्लेषमूलका भेदातिशयोक्तिसमुज्जीविता वाक्यार्थोपस्कारिका । दुर्योधनस्य तारकासुरेणसह-रिपार्थबन्धुवर्गस्य च षडाननेनोपमया तत्कृतविजयशंखध्वनिव्यङ्ग्यहर्ष उपस्क्रियते।

सायं प्रसरतोऽन्धकारस्य वर्णने अन्धकारे सूर्यकर्तृकवह्निसंप्रदानकमर्हैः-प्रदानकालिकवह्न्युत्थितधूमस्वरूपोत्प्रेक्षा प्रकृतार्थोपस्कारिका ।

रात्रौ स्वपतां द्रौपदीपुत्राणां वधेन अश्वत्थाम्न आततायित्वं व्यज्यते

तन्नीचकार्यश्रवणातुष्टत्वेनमुमुषोर्दुर्योधनस्य महादुष्टत्वं ध्वन्यते, स्वकृत्यनिवेदकाश्वत्थामालिङ्गनार्थकदुर्योधनबाहुतिर्यक्प्रसारणे 'त्वदेतद्दुष्करकार्येणममतावती विपुलाप्रीतिः' इत्यभिनयफलकत्वोत्प्रेक्षाया दुर्योधनस्य महादुष्टत्वं परिपोष्यते,-प्राणानां दुर्योधनपरित्यागे 'त्वमेवखलुममप्राणो भवासि' इत्यश्वत्थामोद्देश्यकोपचारिकदुर्योधनवचनप्रयोगजन्यकोपहेतुकत्वस्योत्प्रेक्षाया दुर्योधनसदृशमहादुष्टस्य तत्प्राणकर्तृकत्यागो युक्त एवेति समालंकारो ध्वन्यते ।

सूर्योदयवर्णने - दीप्त्या स्वजेतुर्द्रौणिशिरोमणेः सहजस्थानभूजन्यमानहानिं द्रष्टुमिवोदयाद्रिं खमणिरागात्- इत्यत्र द्रौणिशिरोमणेः खमणिजैतृत्वोक्त्या व्यतिरेकालंकारः, खमणेरुदयाचलारोहणे स्वजेतृद्रौणिशिरोमणिसहजस्थानभूजन्यमानहानिदर्शनफलकत्वस्योत्प्रेक्षाया भावि द्रौणिनिग्रहौचित्यंध्वन्यते ।

द्रौणिनिग्रहनिर्गतभीमादिप्रस्थानेन याज्ञसेनीगतस्वसुतात्ययजन्यविषादमूर्च्छान्धकारोत्सारणार्थकतदौत्सुक्यहेतुकत्वस्योत्प्रेक्षा, तत्र द्रौपदीसुतात्यये श्रवणकालकूटस्य तन्मूर्च्छायां चान्धकारस्य रूपकद्वयमङ्गम् ।

रथाक्षचोत्रात् व्यासाश्रमंगतस्य तपस्यतो द्रौणेस्तत्र पाण्डवानवलोक्य तन्नाशाय निजतपोव्रतेन सह इषीकास्त्रमोचनस्योक्त्या सहोक्तिः । तूल - पंदयोगात् इषीका शब्दस्येव किरीटिप्रहितब्रह्मास्त्रयोगात् द्रौणिप्रहितेषीकास्त्रस्याऽपि ह्रस्वाभावाप्त्या इषीका शब्दार्थाभेदमूलक उपमालंकारः इषीकायाः फल्गुत्वं व्यनक्ति ।

पराजितस्य द्रौणेः शीर्षादि बलपूर्वकं मारुतिनागृहीतस्य पार्थत्यैच समर्पितस्य मणेः तच्छोकाग्निदाहप्रतिबन्धकत्वोक्त्यामणेश्चन्द्रकान्तत्व प्रतीत्या रूपकध्वनिः , तत्र शोकेऽग्नि-रूपकस्याङ्गता ।

कौरवपाण्डवयुद्धस्य संवर्तसमयसच्छात्रत्वोक्त्या उपमालंकारः, तस्य कृष्णावेणीबन्धायुषा सह समाप्त्युक्त्या सहोक्तिरलंकारः । अत्र उपमया युद्धस्य सर्वनाशकत्वं सहोक्त्या च कृष्णावेणीबन्धस्यापि तादृशत्वं ध्वन्यते ।

दृशान्धस्य वृद्धनृपस्य चेतनयान्धत्वे स्वापत्यानां दुःशलाशेषत्वस्य -

च सुन्दरस्य हेतुत्वावगत्या काव्यलिङ्गे सुन्दरपदार्थहेतुता, अन्यत्वेन हेतुकरणकत्वात् हेतुकारणकत्वेऽपि हेत्वन्तरत्वात् पर्यायः, तस्मिन् अन्यसङ्गतसौन्दर्यमूलकाभेदाध्यवसायेन श्लेषमूलालंकारयोश्चसङ्कीर्णता । उक्तालंकारैकपदमूलेन धारावाहिकेन धृतराष्ट्रगतविषादनोदयाकोर्ध्वनिः । एतन्निबन्धनसुन्दरकरणसामग्रीगतानां शोकविस्मयोत्कण्ठाकलोलितत्वयोगात् इन्दुकरनिकरकारणत्वाभावेऽपि विस्मयोत्कण्ठाकलोलितत्वव्यवहारौचित्यविरहात् विभावना, अधुना कर्तृदर्शनाभेदध्यवसायानां प्रेक्षां गतत्वेऽपि प्राप्तानां निर्वेदनामावज्ञत्वरोधप्रयुक्तादुत्साहाख्यकलत्वव्योत्प्रेक्षा, अधुना धारावाहिकशोकोत्कण्ठाकलोलितत्वेन स्वजन्य मूलयत्नप्राप्तिमत्या कर्तव्यतिष्ठासया हेतुकत्वयोत्प्रेक्षा, अधुनाऽऽकलनानां धृतिदृढतरप्रयत्नो निजकरप्रयुक्तकुसुमकरणकत्वाभावेऽपि तत्त्वविवक्षातदुचितोपनायकत्वेन याकलत्वयोत्प्रेक्षा च वाक्यार्थीयकरणधारा धृतराष्ट्रतत्त्वाधिगतशोकं पुष्णन्ति ।

धृतराष्ट्रगाम्भीरोदात्तत्वाधिगतः समरनिहतत्वजनितशोकः बहुगुणैश्वर्याधिगिरुद्दीपितः शोकोदयसंकल्पजनमूलोठनाधिगिरुद्भावितः क्लेशो विषादमूर्छानोत्तादिभावैः परिपोषितः करुणरसतां प्रपद्यते ।

शोकाकुलधृतराष्ट्रलोपगमने तत्र पवनावकल्पकमानवावबृहोज युधिष्ठिरप्रेरितव्यासकृष्णयोश्च नयोनभरवाक्यानुपपत्या युधिष्ठिरस्य सत्योक्तिकारित्वं व्यासकृष्णयोश्च नेपुण्यातिशयो व्यज्यते ।

मुहाहवमुखि धृतराष्ट्रतनयैः सहसागत्य प्रणामतो युधिष्ठिरस्य धृतराष्ट्रकृतेन मृदुतार्जुनेन अवघ्रित्यभावो लोक भीम वृकोदरेण सौभद्रेणाय स्वङ्गतो व्यज्यते । धृतराष्ट्रस्य लोमोलोमेन सह विश्वेषामुपकरणव्योमोलोकोचितः, वैरमुपकरणेन वैरानुबन्धोचितकार इति अस्तुतेन न गतिमावो धृतराष्ट्रगतत्वेनाधिव्यज्यते ।

प्रेक्षमुखं गतायं स्वजनविनाशाय चिरापकृतिनिर्वापणेन युधिष्ठिरादिगतः शोकः स्मृतिमत्त्वादिभावौचित्यतः करुणरसतां गाहते ।

एवं सर्वत्रैव प्रधानौचित्यानुरोधेन सर्वत्रैव अप्रधानत्वेन सर्वत्रैवाभावाधिकरणौचित्यरूपेणोक्तालंकार वर्गः कापि वस्तुवृत्तिं अनयति गतोऽनयत्तु ।

तथा श्लेषवृत्त्यनुप्रासयमकालंकारैश्च रसभावानुगुणमाधुर्यौजोगुणानुसारिवर्ण घटितत्वेन यत्रतत्रोपन्यस्तोऽपि वर्णनस्य नितरां रमणीयतामुद्वेयति।

(३५) युधिष्ठिरस्याराज्येऽभिषेकः

अथ हरिपुरोधाय सहजैः सह युधिष्ठिरस्य स्वपुरी प्रवेशः, कृष्णादीनां राज्ये युधिष्ठिराभिषेकस्तन्मूर्ध्नि हैमरत्नमुकुटनिधानं च, व्यास-विदुरसंजयैः संभाष्यमाणं हरिपुरतो विधाय युधिष्ठिरस्य गजारूढस्य च नगरीपरिक्रमणं मण्डपमागत्य कुरुकुलक्रमागत-सर्वतोभद्रसिंहासनाधिरोहणं च सहजैः सहधर्मसूनोः-पितृव्यं पुरोधार्य भीष्माद्वर्णाश्रमधर्मश्रवणम्, अश्वमेधयज्ञविधानं, सागरमेखलावशीकरणपूर्वक प्रजापालनं च वर्णितं कविना विविच्यते, तद्वर्णनं यथा -

"शुभाङ्घिधवीचीरिव तोरणावलीस्ततो वहन्तीं ततवाद्यनिस्वनाम् ।
हरिं पुरोधाय सभं सहोदरैरविक्षदात्मीयपुरीं युधिष्ठिरः ।।"

"वलग्नसूतैर्द्रुपदात्मजाया चितानिते धाम्नि स तत्र चैलैः ।
स्थित्वा पितृव्यस्य दिनं तदेकं परेऽहनि पार्थः प्रययौ स्वगेहम् ।।"

ततः-

"राज्याभिषेकसलिलादिव संगतं द्रा-
गावर्तमुद्वहति मूर्धनि धर्मसूनोः ।
कृष्णादयः शुभगुणे कृतिनो मुहूर्ते
हैमं न्यधुर्मुकुटमुज्ज्वलरत्नजालम् ।।"

"द्विजप्रणामेषु नृपस्य लग्ना मौर्वीगुराजिर्भुजसीम्नि रेजे ।
एकाधिकद्वादशहायनेषु क्षितेः कृशाङ्गी विरहादिवास्य ।।"

"तदानीमेव पराशरसुतविदुरसंजयैः सह संभाष्यमाणं स्मारस्मारमग्रतो निधायसविनयं युयुत्सुना दीयमानहस्तावलम्बो भूभारलघुकरणेन प्रीयमाणोदिग्वा

रणैः प्रेषितमिव महान्तं कंचिदौपवाह्यमधिरूढः शशिमण्डलेनशर्वरीप्रथमयाम इव धवलातपत्रेण परिष्क्रियमाणो परिषागो लालनवेश पार्श्वयोरागत्य प्रभोदत्तरल पक्षापुटाभ्यां मरालदम्पतिभ्यां चतुर्मुख इव चामराभ्यामुपवीज्यमानो हर्म्यशिखराव लम्बिनीनां पुरनितम्बिनीनां कपोलपालकस्खलनदूदविप्रकीर्णैरानन्दबाष्पबिन्दुमुकु लैरिव लाजाञ्जलिभिरवकीर्यमाणः पुरःसरविविधवाद्यगुरुजनशिष्यायमाणगवाक्ता परम्परां तां नगरीं प्रदक्षिणीकृत्य द्वारमुपमवतीर्णो निजमणितिलकप्रतिबि-म्बानीव दीपाङ्कुराणि कनकपात्रमध्ये वहन्तीभिर्वारस्त्रीमन्तिनीभिर्विरचितारार्तिर्विकर्मबुलः पाण्डुसूनुर्निबिडवितानमाल्यधूपपरिमलसुरभिते मण्डपे कुरुकुलक्रमागतं सर्व तोभद्रं नाम सिंहासनमध्यवात्सीत् ।।

"सौधं कदाचिदधिरुह्य युधिष्ठिरस्तं-
मूर्धन्यचिराद्रिरहितस्य पुरस्य तस्य ।
वापीषु वीथिषु वनीषु नतुष्यशेषु
नृत्यालयेषु च निमज्जयति स्म दृष्टिम् ।।"

तदानीं खलु-

"दौर्णीं कौशगृहाणि गोधनततिं घोटान्रथान्कुञ्जरा-
नन्यां संपदमप्यदात्यणमिषादस्माकमीशाय यः ।
तादृङ्मा शकुनेः करो विजयतामित्यालपन्तीः शुकी-
रुद्याने स निशम्य धर्मतनयो मन्दं जहासानुजैः ।।"

"सुन्त्या पाण्डोस्तनूजः सुतशतविरहादन्तरत्यन्तमार्तं
भक्त्या साकं पितृव्यं प्रतिदिनमनुजैरग्रतः स्थापयित्वा ।
कृत्वाधस्तात्कुशाग्रं विजितमिव धिया प्राञ्जलिः सर्वधर्मा-
न्वीप्साताणाभिमाणामविकलमशृणोत्स्वास्पदं गन्तुमिच्छोः ।।

"द्वा लक्षायास्तदनु सहजैरा जिनाद्रेर्जितश्रीः
शौरेर्दीष्णा घटितनिजदोर्धर्मभूर्वेदिपार्श्वे ।
साक्षीणां शतमवदृशायाकथानोऽभ्यधत्ता-
मन्यादृक्षं नियमपरीराजहाराश्वमेधम् ।।"

" राज्ञां मौलिपरम्परां चरणयोः पाणौ प्रदानश्रियं
बुद्धौ राजनयोदयं हृदि कृपां सत्यं च चिह्नद्वये ।
बाहौ सागरमेखलां वसुमतीं मस्ते किरीटं मुद्वा
कुर्वन्धर्मतनूभवश्चिरमसौ गोपायति स्म प्रजाः ।। १२।२४-३२।।

स्वं युधिष्ठिरस्य सहोदरैः सह स्वपुरीप्रवेशः, राज्ये कृष्णादीनां-युधिष्ठिराभिषेकस्तन्मूर्ध्नि हेमरत्नकिरीटनिधानं च, व्यासविदुरसंजयैः संभाष माणं हरिं पुरोधाय गजारूढस्य युधिष्ठिरस्य नगरीपरिक्रमणं मण्डपागतस्य च-तस्य कुरुकुलक्रमागतसर्वतोभद्रसिंहासनाधिरोहणं, सहजैः सहधर्मसूनोः पितृव्यं पुरो धायभीष्मादु वर्णाश्रमधर्मश्रवणम्, अश्वमेधयज्ञानुष्ठानं च वर्णितं कविना विपुलेन कौशलेन ।

तत्र युधिष्ठिरस्य पुरीप्रवेशे पुर्यास्तोरणावल्यादिभिरलंकरणेन मंगल-वाद्यध्वनिव्याप्तत्वेन पुरीस्थजनानां हर्षोद्भवन्यते । युधिष्ठिरस्य हरिं पुरोधा य सहोदरस्वजनैः समं पुरीप्रवेशेनानुभावितो धृतिहर्षादिव्यभिचारिभावैश्च पो-षितस्तद्गत उत्साहो वीररसतया परिणमन् चमत्कुरुतेतरां सचेतोजनमनःसु ।त त्रपुरतोरणावलीषु सुमाञ्चिवीच्यारोपेण परम्परितरूपकं प्रकृतरसपरिपोषाय-कल्पते ।

युधिष्ठिरमूर्ध्नि चक्रवर्तिचिह्नरूपस्यरोमालिरचितावर्तविशेषस्य संस्था-ने राज्याभिषेकसलिलसंगतत्वस्योत्प्रेक्षा, तत्र जलभ्रम-रोमसंस्थानविशेषोभयवा चकावर्तशब्दगतश्लेषमूलकाभेदातिशयोक्तिर्ध्वनन्ति । कृष्णादीनां युधिष्ठिरमूर्ध्नि-हेमरत्नमुकुटनिधानेन युधिष्ठिरस्य तत्पात्रत्वं कृष्णादीनां च पात्रोत्कर्षदर्शन स मर्थनजनितो हर्षो ध्वन्यते ।

द्विजप्रणामेषु नृपभुजसीम्निलग्नाया तनीयस्याभूरेणुकणाराजेस्तनीसस्त्वे त्रयोदशहायनकालिकतद्विरहहेतुकत्वस्योत्प्रेक्षा प्रकृतार्थोपस्कारिका ।

राज्याभिषेकानन्तरं युधिष्ठिरस्य व्यास-विदुरसंजयसंभाषमाणास्मा रमणपुरस्करणपूर्वकं गजारूढस्य नगरीपरिक्रमणे औपवाह्ये भूमारलघूकरणपरितु-ष्टदिग्वारणप्रेषितत्वस्योत्प्रेक्षा, धवलातपत्रपरिष्क्रियमाणस्य नृपस्य शशि-

मण्डलशोभमानशरद्राकाशर्वरीप्रथमयामत्वस्योत्प्रेक्षा, चामरवीज्यमानस्य च तस्य लालनवशपार्श्वागतप्रमोदतरलपद्मापुटमरालदम्पतिसेव्यमान चतुर्मुखत्वस्योत्प्रेक्षा, नृपोपरिनगरनारीजनविकीर्यमाणलाजानां तत्कपोलफलकस्खलितदूरविप्रकीर्णानन्दबाष्पमुकुलत्वेनोत्प्रेक्षा, नगरीगवाक्षपरम्पराणां नृपपुरःसरविविधमङ्गलवाद्यप्रतिध्वनितानां तद्भूपगुरुजनशिष्यत्वरूपप्रकारान्तरेण कथनात् पर्यायोक्तम्, वारविलासिनीधृतनृपमङ्गलारार्तिक्यस्वर्णपात्रस्थितदीपाङ्कुरेषु तदीयमणितिलकप्रतिबिम्बत्वेनोत्प्रेक्षा च प्रकृतार्थमुपस्कुर्वन्ति ।

सौधाधिरूढनृपस्य पुरीवीथिवापीवनीचतुष्पथादिषु दृक्पातनेन पुरीविषयको रागोध्वन्यते ।

शकुनिप्रशंसापरोधानशुकीवचनविषयको हर्षादिभावपरिपोष्यमाणो युधिष्ठिरादिगतो हासोहास्यरसतया परिणमंश्चमत्करोति ।

युधिष्ठिरस्य धृतराष्ट्रं सभक्तिपुरःस्थाप्यमातृसहोदरसहितस्य कुशास्तरणोपविष्टस्य भीष्मादिवर्णाश्रमधर्मश्रवणेन धर्मे भीष्मे धृतराष्ट्रेकुन्त्यां च भक्तिः भ्रातृषु च वात्सल्यं ध्वन्यते ।

सहजरालकुन्तलायाश्च हिमाद्रेर्जितायाः श्रियः समर्पणेन तेषां युधिष्ठिरे कोऽपि गाढोऽनुरागोज्येष्ठभ्रातृवशवर्तित्वं धर्ममर्यादास्थिरास्थावत्वं महापुरुषत्वं च ध्वन्यते , तेन शौर्यसाहाय्येनाऽसाधारणाश्वमेधसम्पादनेन च युधिष्ठिरस्य भगवति धर्मानुष्ठाने च प्रगाढोऽनुरागो लोकोत्तर उत्कर्षश्च व्यज्यते । असाधारणाश्वमेधसमारम्भेण मघवतोऽप्यभ्यसूयाजननात् तत्कृताश्वमेधात् युधिष्ठिरकृताश्वमेधे आधिक्यप्रतीत्या तया च इन्द्रापेक्षया युधिष्ठिरस्याऽप्युत्कर्षप्रतीत्या ध्वन्यमानेन व्यतिरेकालंकारेण पुनरन्यव्यतिरेकालंकारो ध्वन्यते ।

अन्ते च युधिष्ठिरकर्तृकस्य बुद्ध्यधिकरणकराजनयधारणस्य बाह्वधिकरणकवसुमतीधारणे तस्य जिह्वाग्रलाधिकरणकसत्यधारणस्य हृदयाधिकरणककृपाधारणस्य पाण्यधिकरणकप्रदानश्रीधारणस्य च चरणाधिकरणकराजमौलिपरम्पराकरणे हेतुत्वावगत्या काव्यलिङ्गपञ्चकम्, पाण्यधिकरणकप्रदानश्रीधारणे हृदयाधिकरणककृपाधारणस्याऽपि हेतुत्वावगत्या तदप्येकं काव्यलिङ्गम् । काव्य

र्लिंगषट्कस्य च समुच्चयेऽगता । तेन धर्मतनूभवस्य युद्धदयादानधर्मवीरत्वे कोऽपि लोकोत्तर उत्कर्षोऽभिव्यज्यते, तेन व्यतिरेकालंकारो, तेन युधिष्ठिरसदृशोयुधिष्ठिर एवेत्यनन्वयालंकारो,नयुधिष्ठिरसमः कोऽप्यन्योनास्तीति असमालंकारश्च ध्वन्यते ।

एवमलंकारवर्गस्य क्वचित् स्वच्छायामात्रविश्रान्तत्वेन क्वचिद् वस्त्वलंकारव्यङ्ग्यत्वेन क्वचिच्च रसभावादिपोषकत्वेन नितरां चमत्कारिता । रसाद्यनुरूपप्रसादमाधुर्यौजोगुणानुगुण्यवर्णघटितश्लोकवृत्त्यनुप्रासयमकालंकाराणामपि सचेतोजनमनोहारितैवेत्यलं पल्लवितेन ।

-0-0-0-0-0-0-